
# विधिपौरुषम्





डा० कृष्णकुमार

# विधिपौरुषम्

# VIDHIPAURUSAM

**लेखकस्याऽन्याः प्रकाशिताः कृतयः**

१. भारतीय संस्कृति के आधार तत्त्व
२. अलङ्कारशास्त्र का इतिहास
३. वैदिक साहित्य का इतिहास
४. संस्कृत साहित्य का इतिहास
५. पं० अम्बिकादत्त व्यास - एक अध्ययन
६. ऋक्सूक्त-सुधाकर
७. ऋक्सूक्त-संग्रह
८. चतुर्वेद-सूक्त-संग्रह
९. वैदिक-सूक्त-संग्रह
१०. विषविज्ञान
११. पोषण के लिए खनिज और विटामिन
१२. संस्कृत-नाटक-सूक्तितरङ्गिणी
१३. छन्दोऽलङ्कारप्रकाश
१४. प्राचीन कथायें
१५. गढ़वाल के प्रमुख तीर्थ
१६. गढ़वाल के संस्कृत अभिलेख
१७. उदयनचरितम् (संस्कृत उपन्यास)
१८. ध्वन्यालोक व्याख्या
१९. अभिज्ञानशाकुन्तलम् व्याख्या
२०. प्रियदर्शिका व्याख्या
२१. प्रतिमानाटकम् व्याख्या
२२. हर्षचरितम् पञ्चम उच्छ्वास व्याख्या
२३. किरातार्जुनीयम् प्रथम सर्ग व्याख्या
२४. रघुवंशम् द्वितीय सर्ग व्याख्या
२५. रघुवंशम् त्रयोदश सर्ग व्याख्या
२६. कुसुमलक्ष्मी व्याख्या
२७. शिवराजविजय व्याख्या
२८. कुन्दमाला व्याख्या
२९. अस्ति कश्चिद् वागर्थीयम् (संस्कृत नाटक)
३०. संस्कृत नाटकों का भौगोलिक परिवेश
३१. Descriptive Catalogue of Sanskrit Manusripts Part I
३२. Descriptive Catalogue of Sanskrit Manusripts Part II
३३. Descriptive Catalogue of Sanskrit Manusripts Part III
३४. संस्कृत नाटकों का वानस्पतिक पर्यावरण
३५. संस्कृत नाटकों का जीव-जगत्
३६. चौरपञ्चाशिका
३७. अस्ति कश्चिद् वाग्विशेषः
३८. अन्तःस्रावी ग्रन्थियां
३९. प्राचीन भारत का सांस्कृतिक इतिहास
४०. तपोवनवासिनी (संस्कृत उपन्यास)
४१. तपोवनवासिनी (हिन्दी उपन्यास)
४२. केदारखण्ड पुराण (चार खण्डों में)
४३. मेघदूतानुशीलनम्
४४. गढ़वाल के प्राचीन अभिलेख एवं उनका ऐतिहासिक महत्त्व
४५. प्राचीन भारत की राजनीतिक एवं प्रशासनिक संस्थायें
४६. विधि पौरुषम् (संस्कृत उपन्यास)
४७. भाग्य और पुरुषार्थ (हिन्दी उपन्यास)

---

# विधिपौरुषम्



डा. कृष्णकुमारः
एम.ए. साहित्याचार्यः,
पी-एच.डी.,डी.लिट्.



मयंक प्रकाशन
मिश्रा बाग, हनुमानगढ़ी
कनखल (हरिद्वार)

# विधिपौरुषम्

(संस्कृतोपन्यासः)



**प्रकाशकः**

मयंक प्रकाशन
मिश्रा बाग, हनुमानगढ़ी
कनखल (हरिद्वार)



१९९७

मूल्य : ३५०-००

कम्प्यूटर कम्पोजिंग :
नीलपर्वत D-11 कृष्णानगर, कनखल हरिद्वार
**मुद्रक प्रबन्धक :**
सरस्वती सदन, ए-1/32, सफदरजंग एन्क्लेव,
नई दिल्ली-21

विधिपौरुषम्

याकुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभि: देवै: सदा वन्दिता
सा मां पातु सरस्वती भगवती नि:शेषजाड्यापहा ।।

# विधिपौरुषम्

# विधिपौरुषम्

## किञ्चित्प्रास्ताविकम्

महनीयस्याऽस्य भारतवर्षस्य पुरातनं कथासाहित्यं रम्यं रुचिकरं चित्ताकर्षकं मनोमोहकं ज्ञानवर्धकमादर्शनयसम्भृतं लोकव्यवहारबोधकं लोकहितकरभावनाभिव्यञ्जकञ्चेति समनुभूयते काव्यरसास्वादनाभिमुखैः सहृदयजनैः। पुरातनैः कविभिर्महर्षिभिर्लेखकैर्मनीषिभिश्च लोकानुरञ्जनं निमित्तीकृत्य लोकाचारनयोपदेशाः जनजनहृदयेषु सन्निवेशिताः। संक्षेपेण वस्तुतत्त्वमिदं यत्कथाप्रवाहस्य प्रयोजनद्वयं मुख्यतमम् - जनजनमनोरञ्जनमुपदेशप्रचारश्च।

मम्मटादिभिराचार्यैः काव्यशास्त्रकारैः काव्यस्य प्रयोजनषट्कं प्रतिपादितम् - यशोऽर्थो व्यवहारज्ञानं विपन्निवारणं रसानुभूतिः कान्तासम्मिततयोपदेशश्चेति। तथापि तत्र रसानुभूत्युपदेशयोरेव प्राधान्यम्। जनमनोरञ्जनेन सह नीतीनां शिष्टजनोचितानां विशिष्टविचाराणामुपदेशाः प्रभूतं प्रभावं जनयन्ति। अत्र मनोरञ्जनं रसानुभूतिः सदुपदेशश्च कान्तासम्मिततयोपदेशः।

भारतवर्षस्य पुरातनं लोककथासाहित्यं प्रयोजनयुगलमिदमुपरिवर्णितं संदधाति। एकतस्त्विमाः कथाः सहृदयपाठकजनहृदयान्यौत्सुक्यसम्पूरितान्यापादयन्ति अथ चाऽलौकिकानन्दाद्भुतमनोरञ्जनसम्भृतानि विदधति, अपरतश्च शिक्षानीत्युपदेशमयान् विचारानपि प्रस्तुवन्ति। कथानामेतासां माध्यमेन लेखकैर्मनीषिभिर्भारतीयैः सदाचारराजनीतिलोकव्यवहाराणां शिक्षणमतिरुचिरेण सरलेन हृदयग्राहिणा च मार्गेण प्रतिपादितम्।

महाकवेर्दण्डिनो जीवनगाथाविषयिणी श्रूयते भणितिरियं यदयं मनीषी साहित्यस्रष्टा काव्यार्थगौरवविधातुर्भारवेर्वंशपरम्परायां जातो दक्षिणभारतीयं प्रथितं काञ्चीनगरं स्वनिवासेन समभूषयत्। कैशोरे वयसि दीर्घकालं सर्वास्वेव दिक्षु भरतखण्डे भ्रमता तेन विविधशिक्षणसंस्थासु महामहोपाध्यायेभ्यो विद्याध्ययनं विदधता सुमहता ज्ञानसमुच्चयेन सह धनवैभवमप्यधिगतं महती च कीर्तिरर्जिता। तद्रचितं साहित्यं तस्य प्रकाण्डविद्वत्तां, काव्यशास्त्ररचनानैपुण्यं काव्यरचनाकौशलञ्चापि व्यञ्जयत्तस्याऽऽजीवनं समनुभूतानामनुभवानां सन्दोहमपि प्रकटयति।

महाकवेर्दण्डिनः प्रसिद्धिः काव्यरचनाकौशलेन सह साहित्यसमालोचनेऽप्यतितरामवर्तत। लक्ष्यलक्षणग्रन्थसृष्टिकरेण तेन यथा विशिष्टगद्यकथासाहित्यस्य रचनायां चातुरी प्रदर्शिता, तथैव काव्यादर्शसदृशः काव्यशास्त्रविषयकप्रौढग्रन्थोऽपि विरचितः। गद्यकथासाहित्ये तस्य कृतिद्वयम् अवन्तिसुन्दरीकथा दशकुमारचरितञ्चेति परां प्रसिद्धिमुपगतम्। सरलसरससंस्कृतभाषायां तस्य कवेर्गद्यविधानिबद्धाः कथाः रुचिरघटनाः वैचित्र्यसन्दर्भसमन्विताः वर्तन्ते, सहृदयपाठकानामौत्सुक्यवर्धनेन सह पात्राणां चरितगतवैशिष्ट्यान्यभिव्यञ्जयन्ति, यावज्जीवञ्च सोत्साहं कर्मण्यतामुपदिशन्ति। कवेरस्योपदेशस्योद्देश्यं कार्यसिद्ध्यै, सततं जागरूकताऽभिरुचिर्नयसमन्वितः प्रयासः परिश्रमश्च।

लोकहितकरवृत्तानां परमौत्सुक्यभरसम्भृतानां सुमनोरञ्जनीं संघटनां प्रणीय दण्डिना राजनीतिसिद्धान्ताः लोकव्यवहाराश्चाऽतिसरलरूपेणाऽध्यापिताः। सुस्पष्टरूपेण प्रतिपादयन्त्येताः कथाः यच्छ्रेष्ठजनाः स्वकार्याणि सत्त्वबुद्धिबलपराक्रमैरेव साधयन्ति। उपकरणानि तु ध्रुवं तेभ्योऽनायासेनैव विधिना प्रदीयन्ते।

प्रस्तुतस्याऽस्य गद्यकाव्यस्योपन्यासस्य कथानकस्य मूलं लेखकस्य नूतनाभिः कमनीयकल्पनाभिः सह दण्डिनो काव्ययुगलं वर्तते। प्राचीनसंस्कृतकाव्यकारेष्वन्यतमस्य दण्डिनो गद्यकाव्येष्वन्तर्गताभिः घटनाभिः सह निजहृदयप्रस्फुटितललितकल्पनानां संयोजनं विधाय लेखकेन गद्यकाव्यमिदमुपन्यस्तम्।

गद्यकाव्यस्याऽस्य प्रणयनप्रसङ्गे आचार्यप्रवरडा० रामनाथवेदालङ्कारमहोदयं प्रति लेखकस्य विनम्रा प्रणतिः समर्प्यते, कृतिमेनां सम्यक् परीक्ष्य यो विविधपरामर्शप्रदानैर्गुणमस्याः संवर्धनेन विनयावतं लेखकमन्वग्रहीत्।

इयं कृतिः सहृदयजनेभ्यः स्वस्थं मनोरञ्जनं वितीर्याऽऽदर्शनीतिशिक्षणमपि विधास्यति। अपि च रचनयाऽनया पाठकजनाः प्राचीनभारतीयसमाजस्य जनजीवनस्य लोकपरम्पराणाञ्चाऽवलोकनेऽपि समर्थाः भविष्यन्ति। रचनयाऽनया सहृदयहृदयाऽऽह्लादकारिण्या पाठकाः मनोरञ्जनेन सह नयादर्शयोः स्वस्थं समन्वयमधिगच्छेयुरिति विनयावनतस्य लेखकस्य कामना वर्तते।

चैत्र शुक्ल नवमी २०५४<br>रामनवमी<br>१६ अप्रैल, १९९७

विदुषां वशंवदः<br>कृष्णकुमार<br>(कृष्णकुमारः)

# पूर्व-पीठिका

## दण्डी

## दण्डी

विन्ध्यपर्वतस्य परे पारे भारतभूरियं शिल्परचनाकुशलया प्रकृत्या स्वकीयसुकोमलकला-मयकररुहैरतिसौन्दर्यमयी रमणीया सुसमृद्धा जनजनहृदयाह्लादकारिणी च घटितेवावभासते। दक्षिणसीमान्ततटवर्तिनीषु भूमिषु दक्षिणमहासागरस्योत्तालतरङ्गाः कुमार्यन्तरीपसन्निकटतीरवर्तिकन्याकुमारीमन्दिरपरिसरस्य सोपानपङ्क्तीः प्रक्षालयन्तः देव्याश्चरणस्पर्शप्रयासान् सततं कुर्वन्ति। पूर्वदिशि बङ्गसमुद्रस्य नीलमणिसमोज्ज्वलजल-राशिमध्यादुदयन् प्रेयसीमुषसमनुसरन् दिनकरस्तटवर्तिभूमिभागान्नरुणवर्णैः रश्मिभिराच्छादयन् सानुरागानिव प्रतिपादयन् क्षितिजप्रान्तभागेभ्यो व्योम्नि सुदूरमुद्गच्छति। मध्याह्नकाले नभोमध्ये चोन्नततमस्थितिं सम्प्राप्यासौ प्रतप्तप्रखरकिरणैः भूप्रदेशान् सुतप्तान् विधाय परिणतो भूत्वा शनैः शनैः पश्चिमदिशमभिमुखोऽधोमुखो दृश्यते। तदनन्तरमयं संसृतिचक्रपरिणामदशामभिव्यञ्जयन् सहस्रकरनिकरसमन्वितोऽपि विधेरपरिहार्यतया प्रतीच्यां पश्चिमसागरस्य श्यामलजलराशिमध्ये स्वात्मानं निमज्जयति। विधेर्वैपरीत्यं सोढुं कः क्षमते? उत्तरस्यां विन्ध्यगिरिप्रान्तरेषु गहनं विन्ध्यवनं, तदनन्तरञ्चोत्तरदिशि हिमाच्छादितशुभ्रशिखरविभूषितहिमगिरिपर्यन्तमार्यावर्तस्याऽसंख्य-नदनदीजलसिञ्चिताः धनधान्यखनिजसस्यसम्पत्समृद्धाः विशालपरिणाहाः समस्थल-भूमयः।

दक्षिणभारतस्य निसर्गरमणीयेषु प्रदेशेषु कुत्रचिदुच्चावचाः गगनवेधकाः भूधरसमूहाः क्वचिच्च स्वल्पोच्छ्रायवन्तो गिरिपरिसराः। कुत्रचिद् गभीरागाधसलिलसम्पूर्णाः सरितः, क्वचिच्च स्वल्पागाधाः क्षुद्रनद्यः। कुत्रचिद् गभीरानतिगभीराः समविषमतलो-पत्यकाः क्वचिच्च समतलभूभागोपसुशोभितानि क्षेत्राणि सकलविधप्राकृतिकसौन्दर्यसमन्वितं मनोहारित्वमापादयन्ति। अत्रत्याः भूमयो विविधैर्वनस्पतिभिर्नभोवेधकैर्वृक्षैः, स्वल्पोच्छ्रायवद्भिः क्षुपैर्विटपाश्लेषिकाभिर्लताभिर्भूमिविस्तीर्णाभिर्वल्लरीभिर्निविडतमकट-सन्दोहैश्चाऽऽसमन्तात् परिपूर्णैः सघनैः पदचारणसुदुष्करैर्वनैराच्छादिताः संलक्ष्यन्ते।

अत्र नारिकेलपूगखर्जूरनिम्बतालतमालादिवानस्पत्याः नभोभेदिनः समुद्रतटवर्तिनो भूमिभागान् सततं सघनञ्चापि परिवारयन्ति। स्थूलसूक्ष्मैलाकृष्णमरिचलवङ्गजीरकशुण्ठी-पिप्पल्यादीनां पाचनास्वादवर्धनकराणां रुचिकराणां भोजनप्रियङ्कराणां वेषवाराणां, काजुकमुद्गफलिन्यादीनां पुष्टितुष्टिकराणां शुष्कफलानामत्र प्राचुर्यमुपलभ्यते।

नारङ्गाम्रकदलीनिम्बुफेरुकपरुषकद्राक्षादिफलान्यत्र वैपुल्येन समुद्भवन्ति । मलयाचलभूमिरुहैश्चन्दनपादपैरयं प्रदेशः सर्वदा सौरभमयं वातावरणं वितनोति । विविधरोगविनाशकौषधिपरिपूर्णा भूमिः जनेभ्यो नित्यं स्वास्थ्यं वितरति । अत्रत्येषु समविषमभूमिगर्भभागेषु रसोपरससाधारणरसधातूपधातुरत्नोपरत्नादीनां प्राचुर्यमुपलभ्यते । समुद्रतटवर्तिप्रदेशेषु मौक्तिकमुक्ताशुक्तिप्रवालशङ्खवराटसमुद्रफेनादिमणिमयसामुद्रिकसम्पत्तिराशिमवकिरन्ती महामाया प्रकृतिः दक्षिणभारतं धनसमृद्धिवैभवेन सततमभिषिक्तमिव सर्वदा विदधाति ।

विन्ध्यपर्वतस्यान्येषाञ्च दक्षिणदिग्वर्तिभूधराणामुच्चावचभूमिभागेभ्यः प्रभवन्तीभिः संख्यातीताभिर्बृहतीभिर्लघ्वीभिश्च सरिद्भिः सिञ्चितोऽयं प्रदेशोऽनन्तसस्यसम्पन्नोऽतितरां सततं शोभते । सहस्रशो हि संवत्सराणामवधिर्व्यतीतः कदाचिद् भगवता रामेण सीतया विदेहराजनन्दिन्या सहधर्मिण्या लक्ष्मणेनानुजेन च साकमुत्तरभारताद् विन्ध्यगिरिवनभुवमुल्लंध्यात्र समागत्य गोदावरीतटवर्तिषु दण्डकारण्यान्तर्गतेषु भूभागेषु चतुर्दशवर्षावधिभूतारण्यनिवासः स्वीकृतः । परं विधिनात्र प्रदर्शितः स्वबलप्रभावः । लङ्कापतिदशाननो जहार रामस्यार्धाङ्गिनीं जानकीं छलेन । परं रामेण पुरुषोत्तमेन दक्षिणदिङ्निवासिनां वन्यजातिजनानां संघटनं विधाय परमरणकौशलं प्रदर्शयता यमलोकं प्रेषितः स सीतापहरणकर्ता परमपराक्रमी देवशत्रुर्लङ्काधिपती रावणः । अथ प्रसारितश्च तेनार्यसभ्यताप्रभावविस्तारः पारेसमुद्रद्वीपानि पर्यन्तम् ।

ख्रिष्टस्य प्रथमशताब्द्याः मध्यकालोऽयमासीत् । दक्षिणभारतस्य तेलङ्गानप्रदेशस्य प्रमुखं राजधानीरूपं नगरं काञ्चीपुरं भारतीयराजनीतिसंस्कृतिसभ्यताधर्मकर्मकाण्डमतमतान्तरवाणिज्यादीनां प्रधानं केन्द्रमेव संजज्ञौ । काञ्चीपुराधीशाः सकलमेव दक्षिणभारतं विन्ध्यगिरिदक्षिणभूभागं राजनयप्रयोगसहायेन भुजबलेन स्वशासनान्तर्गतं कृत्वा राजनीतिकप्रभुत्वं प्रसारयामासुः । तेषामनीकिनीनां शौर्यसमन्वितरणदाक्ष्यस्य राजनीतिविशारदानां मतिमतां मन्त्रिणां नयनैपुण्यस्य यशश्चन्द्रिका दिशां प्रान्तराण्यप्युल्लंघ्य जलनिधिविस्तारानपि समुत्तीर्य सुदूरवर्तिषु द्वीपद्वीपान्तरेषु व्यापृता बभूव ।

तस्मिन् युगे काञ्चीसंस्कृतिरेव दक्षिणभारतीया संस्कृतिरवर्तत । अत्रत्यानां जनानां लोकव्यवहारानन्यदेशवासिनो जना अनुचक्रिरे । काञ्चीपुरे या जीवनयापनपद्धतिर्या भवननिर्माणकला, या वेशभूषा, या वस्त्राभरणप्रसाधनप्रयोगिता, या च मनोविनोदपरम्परा, तासां सर्वासां परम्पराणामनुकरणं सकलप्रदेशवास्तव्याः जनाः गौरवं मन्यन्ते स्म । अत्रत्यानां सुन्दरीणां शृङ्गारपद्धतिरन्यप्रान्तयुवतीनां सदाऽनुकरणीया स्पृहणीया च बभूव ।

शिक्षणसंस्थानां प्रसारस्य धर्मप्रचारस्य चेयं पुरी प्रमुखकेन्द्ररूपेण सर्वेष्वेव लोकेषु परां प्रसिद्धिं लेभे। काञ्चीपुरस्य शिक्षणालयेषु नियुक्तानामाचार्याणामुपाध्यायानामध्यापकानाञ्च गुरुजनानामध्यापनशैली विश्वप्रसिद्धाऽवर्तत। न केवलं दक्षिणभारतीया, अपितूत्तरभारतीया अपि विद्यार्थिनो विविधविषयपारङ्गतत्वाभिलाषिणोऽत्रागत्यागत्य गुरुजनचरणेषु विनयावनताः भूत्वा स्वदेशान् सम्प्राप्य काञ्चीपुरस्य यशोगाथां निरन्तरं प्रसारयन्ति स्म। सत्यमेव प्रतिपादितं मनुना मनीषिणा मनुस्मृत्याम् -

*एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।*
*स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।*

काञ्चीपुरं वाणिज्यस्य प्रमुखं केन्द्रमवर्तत। अत्रत्याः विपणयः सर्वविधैर्विक्रेयवस्तुभिः सम्भृताः सुशोभिता अवर्तन्त। भोजनवसनभवननिर्माणभवनोपस्करप्रसाधनालङ्करणवाहनमनोविनोदशिक्षणादिसम्बद्धः सकल एव सामग्रीसन्दोहः काञ्चीपुरस्य राजपथं महापथमभितः संस्थितासु विपणिष्वापणेषु सर्वेष्वेव समयेषु प्राचुर्येण समुपलब्ध आसीत्। अत्रत्यानां वणिजां पोतनिकराः विस्तृतागाधनीलसलिलराशिचयसम्भृतेषु सागरेषु निरन्तरं यातायातं कुर्वन्ति स्म। द्वीपद्वीपान्तरेषु व्यापारयात्रां कुर्वन्तस्ते विक्रेयवस्तूनामायातनिर्यातैरिदं काञ्चीपुरं सर्वदैश्वर्यसमृद्धं विदधुः। काञ्चीपुरसार्थवाहानां शकटसन्दोहाः गणनातीतसंख्यासु स्थलमार्गैः सर्वस्मिन्नेव भारतवर्षे स्थलसंयोजितेषु सन्निधिदेशेषु परिभ्रमन्तः क्रेयविक्रेयवस्तून्यानयन्तो नयन्तश्च प्रचुरधनसमृद्धिलाभेन सह स्वामिना साकं राष्ट्रमपि समृद्धिशालि प्रत्यापादयन्। अत्रत्यासु शिल्पशालासु कर्मशालासु च निर्मितानामुपभोगवस्तूनां स्पृहा न केवलं भारतीयजनपदेषु, विदेशेष्वप्यवर्तत।

यस्य युगस्य कथाऽत्र वर्णनीया वर्तते, तस्मिन् समये काञ्चीजनपदे, बहूनां धर्माणां सम्प्रदायानां मतमतान्तराणाञ्च प्रचारः प्राबल्येनाऽवर्तत। धर्मप्रचारकाश्चाविरलं भ्रमन्तः प्रजाजनान् पार्थिवांश्च स्वमतप्रभावितान् दीक्षितांश्च विधातुं सुकठोरं तपश्चरन्ति स्म। प्रमुखरूपेण वैदिकधर्मान्तर्गतमतमतान्तराणां सम्प्रदायानां वैष्णवशैवशाक्तसौरगाणपतादीनां प्रचारो वैविध्यपूर्णो नितरामवर्तत। स च प्रचारः श्रुतिस्मृतिप्रमाणपरिपुष्टो मूलरूपेणैकत्वं धारयन्नपि वैविध्यपूर्णो वा परस्परं विरुद्धो वा प्रत्यभासत। धर्मप्रचारकाश्च ते परस्परं स्पर्धालवो विविधतर्कयुक्तिप्रचारैः स्वकीयमन्तव्यानि प्रमाणीकुर्वन्ति स्म। तत्रापि वैष्णवेषु शैवेषु चाप्यतिशयेन प्रतिद्वन्द्विताभावोऽविद्यत। वैदिकेतरसम्प्रदायानां धर्माणाञ्च बौद्धजैनचार्वाकादीनामप्याविर्भावः प्रचारश्चात्र भारतवर्षे तस्मिन् युगे समवर्तत। परं काञ्चीपुरे निकटवर्तिषु च प्रदेशेषु नाप्येभिः सम्प्रदायै-

रधिकं महत्त्वशालि स्थानमधिगतम् । सत्स्वप्यनेकेषु सम्प्रदायेषु न कोऽपि परस्परं विदिद्वेष, न च राजकीयासु व्यवस्थासु धर्मान्धता पक्षपातो वा पदं लेभे। सौहार्दभावेन परस्परं स्निह्यन्तो विविधसम्प्रदायावलम्बिनो जनाः सुखेन न्यूषुः।

पौराणिकदेवतानामर्चनोपासना प्रचुरं प्रचारमध्यगच्छत्। तत्रापि शेषशायिनो विष्णोस्त्रिशूलधारिणश्च ताण्डवनृत्यनियोजकस्य नटराजस्य नीललोहितस्य शङ्करस्य पूजार्चना मुख्यरूपेण प्रचलिताऽवर्तत। अनया दृष्ट्या काञ्चीपुरं द्वयोर्भागयोर्विभक्तमासीत्। काञ्चीपुरस्योत्तरवर्तिनि विभागे भगवतस्त्रिनयनस्य शङ्करस्योपासकानां बाहुल्यमवर्तत। विशालेन महनीयेन शिवमन्दिरेण विभूषितोऽयं विभागः शिवकाञ्चीत्यभिधानेन विश्रुतो बभूव। मन्दिरस्य गर्भगृहे प्रतिष्ठितायाः पिण्डिकायाः मध्यभागे सुसंस्थापिता शिवलिङ्गमूर्तिः समुज्ज्वलसुचिक्कणकृष्णपाषाणनिर्मिता भक्तजनहृदयान्दोलनकारिणी देवरतिभावसम्पा-दयित्री ताम्रनिर्मितसर्पफणच्छत्रिता बभूव। भक्तजनाः शिवलिङ्गमेतत् श्रद्धाप्रसूनजलत-र्पणादिभिः समभ्यर्च्याऽन्याश्चाऽपि मानवाकारदेवप्रतिमाः समुपासते स्म। तत्र प्रमुखरूपेण भवानीसहितस्य भवस्य वृषभारूढा शुभ्रनिर्मलस्फटिकमणिनिर्मिता मूर्तिरवर्तत। अत्र शिवोऽर्धनारीश्वररूपं बभार। भव्या विशालाकारा प्रतिमेयं श्रद्धाविनमितैः शिरोभिर्भक्तजनैः करवीरार्कधत्तूरपुष्पैर्बिल्वविजयापत्रैर्निर्मलाम्भःसम्मिश्रैः सदैवाभ्यर्च्यति स्म।

अथ च ताण्डवनृत्यमुद्रासंस्थितस्य प्रसन्नवदनस्यापि नटराजस्य रुद्रस्य सकलकलाकलापगुरोः प्रतिमा कलाप्रियैर्नृत्याचार्यशिष्यशिष्यागणैः सततमभ्यर्च्यति स्म। गर्भगृहस्य विभिन्नेषु कोणेषु भित्तिषु च स्थापिताः कार्तिकेयगणेशादिदेवानां पार्वतीसहितानां कालभैरववीरभद्रादिभूतप्रेताधिपानां मूर्तयोऽपि विराजमानास्तत्रोपास्यन्ते स्म। गर्भगृहस्य बहिर्द्वारसमक्षमेव शिववाहनो नन्दी विशालाकारशुभ्रस्फटिकवृषभप्रतिमारूपेण द्वाररक्षाकार्ये नियुक्तो भक्तजनानां हृदयानि श्रद्धया प्रापूरयत्।

काञ्चीपुरस्य दक्षिणवर्तिभूभागो भगवतो विष्णोश्चक्रधरस्य भक्तैरुपासकैः प्राचुर्येण समधिष्ठितमासीत्। पुरस्यायं विभागो विष्णुकाञ्चीति नाम्ना भुवनेषु प्रसिद्धो बभूव। अत्र शेषशायिनो भगवतो विष्णोर्विशाला भव्या च प्रतिमा प्रतिष्ठिताऽविद्यत। अगणितफणच्छत्रितशेषशयनस्य भगवतो ब्रह्मकमलोदरस्य विष्णोश्चरणौ संवाहयन्त्याः श्रियः सौन्दर्यस्य समुत्कीर्णने शिल्पिनां कलामयकराङ्गुलिभिः न काऽपि न्यूनता हीनता वा तत्र समवालोक्यत। सकलकलापरिपूर्णोज्ज्वलेयं लक्ष्मीप्रतिमा स्वकान्तिभिर्मन्दिरगर्भगृहं दिव्यप्रभालोकभास्वरं व्यदधात्। कमलनयनस्यानन्तशयनस्य जगत्पालकस्य नारायणस्य नाभिकमले स्थितस्य ब्रह्मणश्चतुर्मुखस्य चतुर्ष्वेव करेषु चतुर्णां वेदानामृग्यजुःसामाथर्वणां प्रतिष्ठाऽवर्तत। महादेवस्य शम्भोर्देवदेवस्य विष्णोश्चेमे मन्दिरे शिवकाञ्च्याः विष्णुकाञ्च्याश्च

सम्मिलनस्थले निर्मिति बभूवतुः। तत्रस्थं विशालोद्यानमपि द्वयोर्विभागयोर्विभक्तम्। एकतस्तु शिवमन्दिरमपरतश्च विष्णुमन्दिरम्।

तस्मिन् युगे तस्यां महनीयायां सकलभौतिकाध्यात्मिकविभूतिविभूषितायां पुर्यां सिंहविष्णुवर्माभिधानो नरपतिः प्रजापालको राजसिंहासनमलञ्चकार। पल्लववंशविभूषणस्य तस्य राजवंशस्यायं मध्याह्नकालीनो प्रतापसूर्योऽदीप्यत। तस्य नरपालस्य प्रखरप्रतापमसहमानाः प्रतिवेशिनरपतयः सुदूरमवनमितशिरोभिश्चरणयोः प्रणमन्तो मुकुटपरिनिहितमौक्तिकदामसौरभपरिमलपरागैः सम्राजः पादाङ्गुलिरन्ध्रभान् रञ्जयन्तः सततं हृदयेषु पीड्यमानाः सन्तप्यन्ते स्म। तस्मिन् पार्थिवे विद्याबुद्धिनीत्यैश्वर्यविभवाः प्रतापशौर्यसाहसादिगुणाश्च तथा समाजग्मुर्यथा शारदाश्रीदुर्गाश्चेति तिस्रोऽपि महादेव्यः स्वयमेव धरामवतीर्य तस्य वपुषि समाविष्टाः स्युः।

एकस्मिन् समये पार्थिवोऽसौ राजसभायां रत्नैर्देदीप्यमानं सुवर्णघटितमुच्चवेद्यां संस्थापितं पञ्चाननाकृतिपादपीठसमलङ्कृतं राजसिंहासनमध्यतिष्ठत्। उभयतश्च द्वयोः पार्श्वयोः धवलचामरधारिण्यावेकोनविंशतिवर्षदेशीये द्वे सेविके सततचलत्करयुगलहेम वलयशिञ्जितमणिबन्धमधुररवैः सभाभवनं मुखरितमिव कुर्वत्यौ बालव्यजने वीजयन्त्यौ सुमाभरणरजसां सौरभैस्तं नरपतिमामोदभरैः प्रीणयतः स्म। राजसिंहासनसमक्षमेव द्वयोः पङ्क्तयोर्मध्ये सरलसुविस्तृतसुखस्पर्शसुकोमलारुणवर्णस्थूलकौशेयाच्छादनयुतमार्गस्य दक्षिणतो वामतश्च स्थापितास्वासन्दीषु यथायोग्यपदानुरूपं मन्त्रिणोऽन्ये च राजसभासदः समुपविष्टा आसन्। तदा नरपतिना सह सर्वेषु सभासत्सु साहित्यिकविनोदवार्तारसास्वादन-तत्परेषु चित्रवाहनो नाम गन्धर्वो नरपालेनानुमतप्रवेशो राजसभां प्राविशत्। सचकितं सर्वैरेव सभासद्भिः निर्निमेषनिष्कम्पदृष्टिभिरवलोक्यमानो दिव्यरूपेण तेजसा च राजसभां प्रकाशयन् सविनयं करबद्धं स्थितो भूमिपालेनानुमतः प्रणम्य गीतिकामिमां जगौ-

*दनुजपतिहृदयभूधरविभेदविज्ञातशक्तिनखकुलिशम्।*
*जगदुदयहेतु विष्णोरवतु वपुर्नारसिंहं वः।।*

रुचिरस्वरेण सङ्गीतां हृदयहारिणीं रम्यां प्रसादगुणयुतामुदारार्थविभूषितां गीतिकां निशम्य भूपतिना सभासद्भिश्च सम्भृता सा सभा चमत्कृतिमापन्ना। कुतूहलसम्भृतोऽसौ नरपालस्तं गन्धर्वं चित्रवाहनं पप्रच्छ -

"भद्र ! प्रतिभान्वितः प्रशंसनीयः कोऽयं कविर्येन गीतिकाया अस्या विरचने नैपुण्यमनिर्वचनीयमभिव्यञ्जितम्।"

गन्धर्वेणोत्तरितम् -

"राजन् ! दीर्घेयं वार्ता। तथापि कुतूहली यदि भवान्, श्रूयतां तावत् -

सकलविश्वाभरणभूतस्य जम्बूद्वीपस्य पश्चिमोत्तरप्रदेशे नगरमानन्दपुरं नाम शोभते। आर्यावर्तस्य मुकुटमणिविभूषणमिवेदं पुरम्। सिन्धुसरितो वामतटे सुनिवेशिते तस्मिन्नगरे चतुर्वर्णमौलिभूताः ब्राह्मणजना एव प्राचुर्येण न्यवसन्। कस्मिंश्चिदतिप्राचीनकाले कुशिको नाम महामुनिस्तत्र परां प्रसिद्धिमवाप। तपसः प्रभावेण स मुनिस्तपोधनो नहुषयज्ञविधानदक्षो देवराजसहस्राक्षव्यवहारेण सावमर्षः सृष्ट्युत्पत्तिविधायकमच्युतो-दरपङ्कजसम्भवं प्रजापतिं ब्रह्माणमपि पराजित्य नवसृष्टिरचनासंविधाने संलग्नो बभूव। ब्रह्मकमण्डलोः पुण्यश्लोकायाः सरस्वत्याः प्रभव इव तस्मान्मुनेः कौशिकवंशस्य प्रादुर्भावः समजनि।

गच्छति च काले तद्वंशोद्भवा अनेके विप्रयुवानो विद्यापारङ्गताः प्रतिभाशालिनः स्वमूलस्थानमानन्दपुरं परित्यज्य सर्वास्वेव दिक्षु परिभ्रमन्तो भारतवर्षस्यानेकप्रदेशान् प्रान्तभागांश्च निवासेन पावयामासुः। तेष्वेव कश्चित् कौशिकवंशीयो युवा शारदावरलब्धपरमप्रज्ञाप्रतिभाविद्यासमुज्ज्वलो दक्षिणभारतस्य तुङ्गभद्रासरित्सिञ्चित-क्षेत्रस्य नासिकप्रदेशस्य सीमां सम्प्राप। तत्र तेनाचलपुराभिधानो ग्रामः स्वनिवासभूमिरूपेणाङ्गीकृतः। कौशिकवंशीयस्य तस्य पण्डितस्य विद्यया ज्ञानेनौचित्यसमन्वितेन व्यवहारेण च प्रभाविता अचलपुरभूस्वामिनस्तं विप्रयुवानं यथायोग्यं सम्मान्य यथोचितञ्च तस्मै धनादिकमुपहृत्य तत्रैव सुस्थापयामासुः।

कौशिकवंशीयेन तेन विप्रेण तस्मिन्नचलपुरे प्रभूतं यशः सप्रतिष्ठञ्च धनादिकमर्जितम्। व्यतीतेषु च तेषु कतिपयेषु वर्षेषु तस्मिन् कुले नारायणस्वामिनामा साक्षान्नारायण इव श्रिया शारदया च समन्वितः परममनीषी बभूव। तस्यानेकेषु पुत्रेषु दामोदरनामा साक्षाद् भगवान् दामोदर इव सकलास्वाशासु सकलं विश्वं स्वकीर्त्या शुभ्रवर्णमकरोत्। दामोदरस्य सूनुर्भारविरपि मेधावी, मनीषी, विद्वान् प्रतिभाशाली कविरजायत। अर्थगौरवविभूषितास्तस्य गीतिकाः कवेर्मुखाद्धिमवतो गोमुखशिखराद् भागीरथीप्रवाहा इव प्रभवन्ति स्म। तस्मिन् काले नासिकप्रदेशस्य नरपतिर्विष्णुवर्धनः कलामर्मज्ञो विदुषामाश्रयः स्वयमपि च विद्वान् सुकविरासीत्। महताऽनुरोधेन विनम्रभावेन च स स्वयमेव सम्प्रार्थ्य भारविं स्वमित्रं कृत्वा राजधानीमानिनाय। द्वयोरेव प्रगाढं सख्यमजनि।

एकदा भूमिपालो विष्णुवर्धनो मृगयायै वनेभ्यः प्रतस्थे। राज्ञोऽनुरोधं सम्मान्य भारविरपि तेन सहारण्ययात्रामङ्गीचकार। वनेषु मृगयायै विहरता वन्यपशूनाञ्च त्वङ्मांसादिषु लोभाविष्टचेतसा राज्ञा सह स भारविः क्षुत्पिपासातिविह्वलो निर्मलनीरपरिपूरितस्यैकस्य सरसस्तटमुपाजगाम।

सहसैव स मृगयाव्यसनी राजा विष्णुवर्धनो निर्मलसलिलमास्वादयन्तं सुदीर्घशृङ्गसुशोभितं दीर्घपश्चात्पादं रुचिरचित्रवर्णं मांसलं सुपुष्टमेकं मृगं ददर्श।

दृष्ट्वैव चतुर्गुणितबुभुक्षावेगोऽसावेकेनैव शरसम्पातेन तं मृगं व्यापाद्य शुष्ककाष्ठखण्डान् समाहृत्याऽनलं समेध्य मृगमांसं बभृजे। बुभुक्षयाऽतितरां सम्पीड्यमानोऽपि भारविर्मांसभक्षणवर्जनशीलो न स्पृहयाञ्चकार तस्य मृगमांसस्य भक्षणाय। परं भूमिपालस्य प्रबलानुरोधेन विवशीभूतः स स्वल्पमेव भर्जितमृगमांसमभक्षयत्। परन्तु तन्मांसमास्वाद्य निषिद्धखाद्यभक्षणजनितपश्चात्तापानलेन दन्दह्यमानान्तःकरणोऽसौ संक्षोभेणोद्वेल्लितहृदयो मनसि विचारयामास -

अहो ! धर्मशास्त्रेषु सुनिषिद्धमपि मांसभक्षणरूपं कुकृत्यं पापाचरणं विधाय न मया साधु समाचरितम्। मया त्वनर्थ एव विहितः। इदमपुण्यप्रदं कार्यं कृत्वा मया स्वकीयेनात्मना हृदयेन मनसा च सह धर्मकीर्तिसमुज्ज्वलो वंशोऽपि कलङ्कतां नीतः। परानुरोधेन कृतान्यविचारितकृत्यानि पापाय केवलं प्रभवन्ति। परमपापीयानहं वर्ते, यदुदरम्भरणमात्रहेतुना धर्मविनाशकरमनिष्टकारकञ्च मांसभक्षणरूपं पापमाचरितम्। बुभुक्षया मरणं वरं परं नाभक्ष्यभक्षणेन जीवनधारणम्। एवं लज्जया विदीर्यमाणहृदयस्तीक्ष्णव्यथया च पीड्यमानचित्तो न पारयामास स भारविः पित्रोः समक्षमात्मानमुपस्थापयितुम्। तत्रैव सः पार्थिवस्य विष्णुवर्धनस्य साहचर्यं तत्याज।

पातकप्रक्षालनाय प्रायश्चित्तं विधातुमसौ युवा भारविः कविस्तीर्थेष्वनेकेषु भारतवर्षस्य विभिन्नप्रदेशस्थेषु परिबभ्राम। परं न कुत्रचिन्मनसि स शान्तिं लेभे। उदरं प्रविष्टः सुस्वल्पोऽप्यसौ मांसखण्ड उद्वमन्निवाऽऽन्त्राणि प्रज्ज्वालयन्निव तीव्रनिशितक्रकचविदारिकया पीडया तं पीडयामास। एवं परिभ्रमन्नसौ परमप्राचीनतीर्थं रघुपतिपदपवित्रितं पम्पासरस्तीरं समाजगाम। ऋष्यमूकगिर्युपत्यकायां विद्यमानं पम्पाभिधानं सरः पम्पासरितः प्रभवस्थानम्। रक्तनीलपीतशुभ्रचित्रविचित्रविविधवर्णपद्मालङ्कृतमिदं सरो यायावराणां परमं प्रीतिप्रदं स्थानम्। राजहंसमल्लिकाकादम्बधार्तराष्ट्रबकसारसक्रौञ्चजलकुक्कुटादिजलचरपक्षिणां कूजननिनादैर्मुखरिते पम्पासरस्तीरे मातङ्गमुनेरतिप्राचीनमाश्रमपदमासीत्। कदाचित् सीताविरहजनितशोकतापसन्तप्तहृदयो रामो लक्ष्मणेन सहेहागत्य विशश्राम जलपानादिना च मार्गजनितश्रमं दूरीचकार। तदनन्तरं हनुमतः सहायेनासौ ऋष्यमूकगिरिशिखरस्थितैर्वानरैः सह मैत्रीसम्बन्धं संयोजयामास। एतत्स्थानं सम्प्राप्य भारविर्मनसि शान्तिमनुभवन् कतिपयदिनस्थायिनिवासं कल्पयामास।

पम्पासरस्तटे निवसतस्तस्य महाकवेर्भारवेः कतिपयदिनानि व्यतीतानि। दुर्विनीतो नाम राजकुमारः कल्याणनगरनरपालसुतः कतिपयसेवकैः सह तत्रागतः। विद्वान् बुद्धिमान् नीतिमान् साहित्यकलामर्मज्ञोऽपि स्वभावेनोद्धतः स्वपित्रा दुर्विनीत इति

नाम्ना विभूषितः। सततं प्रजानामुत्पीडकस्य तस्य दुराचरणैर्नितरां प्रकुपितो राजा तं नगरनिष्कासनदण्डेन दण्डयामास। स्वल्पसंख्यकैरेवानुवर्तिभिःसार्धं स पम्पासरस्तीरवर्तिनीं भूमिमुपाजगाम। अत्र राजपुत्रस्य दुर्विनीतस्य महाकवेर्भारवेश्चान्योन्यं सख्यमुपाजायत। द्वावेव तौ साहित्यरचनाकुशलौ काव्यमर्मज्ञौ परस्परं प्रीतिमापन्नौ काव्यशास्त्रविनोदेन कालं यापयामासतुः।

कथारसास्वादनोत्कण्ठितं राजानं दृष्टिपातेनोपकृत्य क्षणं विरम्याऽसौ गन्धर्वः पुनरप्याह -

तेष्वेव दिवसेषु पर्यटन्नहं पम्पासरस्तीरं दैवयोगात् समायातः। तत्र तयोर्भारविदुर्विनीतयोः काव्यगोष्ठीषु सम्मिलितः परमानन्दमनुभवन् पञ्चदशदिवसान् न्यवसम्। एकस्मिन्नवसरे काव्यगोष्ठ्यां भवतः प्रजावत्सलतां पराक्रमं राजनयप्रवणत्वं च प्रशंसति मयि स कविर्भवन्तमुपलक्ष्य गीतिकामिमां जगौ। सैवेयं गीतिका।

गन्धर्वमुखाद् गदितां गीतिकारचनाभूमिकां निशम्य राजा सिंहविष्णुवर्मा भारविकवेर्दर्शनायोत्कण्ठितोऽनल्पेतरानुपहारानादाय कतिपयमन्त्रिभिः सेवकैश्च सह गन्धर्वनिर्दिष्टमार्गः स्वयमेव कवेर्दर्शनाय पम्पासरस्तीरं समाजगाम। पम्पासरो निकषा तत्रासौ तटस्य नातिदूरे स्वशिविरं संस्थापयामास। तदनन्तरं बहुभिरुपहारैः सह तेन नरपतिना स गन्धर्वः कविसकाशं प्रेषितः। गन्धर्वोऽपि भारविं प्रसाद्य तेनानुगम्यमानो राजानं प्राप्नोत्। भारवेर्मुखस्यानुपमं सौन्दर्यं सौष्ठवञ्च विलोक्यासौ राजा सिंहविष्णुवर्मा विस्मयमापन्नः परमां प्रीतिमवाप।

गन्धर्वेण सह समायातं कविमवलोक्य प्रीतिप्रफुल्लनयनो नरपतिरसौ विष्णुवर्धनः स्वयमेव समुत्थाय कानिचित् पदान्यग्रेसरीभूय स्वागतवचनैः सत्कृत्य तस्य वामेतरकरं स्वसव्येतरकरेण गृहीत्वा स्वासनस्यैकभाग एव समुपवेश्य स्वयमपि तत्रोपविष्टः। मुहूर्तमात्रं तु तौ कविराजानौ परस्परं प्रीतिवचनाकृष्टहृदयौ संललपतुः। तदैव राजा तं कविं स्वराजसभां सुशोभयितुं प्रणयादरवचोभिर्निमन्त्रयामास। प्रथमं तावत् कविना न राज्ञोऽनुरोधवचांसि हृदयेनाङ्गीकृतानि। परन्तु पुनः पुनः सादरं सस्नेहञ्च पार्थिवेनानुरुध्यमानः प्रार्थ्यमानश्च तस्याग्रहं स्वीचकार। काञ्चीपुराधीशेन सहासौ काञ्चीपुरमाजगाम।

काञ्चीपुराधिपतिना सिंहविष्णुवर्मणा साकं काञ्चीपुरं गन्तुमसौ भारविः दुर्विनीतं राजसुतमनुमतिं ययाचे। भविष्यति काले कवेरुन्नत्या सह प्रतिष्ठावृद्धिरपि भविष्यतीति विचारयता दुर्विनीतेनानिच्छताऽपि स भारविः सवाष्पनयनः प्रस्थानायानुमतः। कवेः प्रस्थानसमये सकलमेव तपोवनमौदासीन्यभावसम्भृतं निरानन्दञ्च बभूव। सुविशालस्य पम्पासरसः सलिलतरङ्गास्तारल्यं तत्यजुः। सलिलपृषन्निचितदलसुशोभितपद्मनिचयं साश्रुनयनैरिव तत्सरो भारवये गमनायानुमतिं प्रायच्छत्। सजलनयनानां जलचरपक्षिणां

कूजितानि कण्ठेष्वेवावरुद्धानि। भारविमादाय स्वाभीष्टप्राप्तिप्रीतिसम्भृतमानसः सिंहविष्णुवर्मा स्वराजधानीं काञ्चीपुरीं पुनरप्याजगाम।

नराधिपेन सिंहविष्णुवर्मणा महाकविर्भारवी राजसभायां सभापण्डितपदे प्रतिष्ठापितः। काञ्चीपुरस्य मध्यभागे राजमार्गस्य सन्निकट एव भव्यं विशालं गृहं तस्य निवासाय सकलविधोपकरणसहितं राज्ञा प्रकल्पितम्। विविधविलासोपकरणसहितैर्धनैर्धान्यैश्च सन्तोषितेन कविना सह नरपालः काव्यगोष्ठीषु काव्यशास्त्रविनोदेन कालं गमयामास। राजनयशास्त्रसिद्धान्तानामध्ययनप्रयोगेष्वपि कवेर्नैपुण्यमपरिमितमेवाऽवर्तत। सन्धिविग्रह-यानासनसंश्रयद्वैधीभावेषु राजनयषडङ्गेषु, आदानविसर्गप्रेषणनिषेधार्थचयनव्यवहार-दण्डग्रहणशुद्धिष्वष्टविधकर्मसु पञ्चविधगुप्तचरव्यवस्थासु, अनुरागापरागयोः, सामदानदण्डभेदेषु चतुर्षूपायेषु, प्रभुशक्तिमन्त्रशक्त्युत्साहशक्तिषु तिसृषु राजनयशक्तिषु, धर्मार्थकाममोक्षरूपे चतुर्वर्गे, ऐहिकामुष्मिकैहिकामुष्मिकात्मके त्रिविधे नीतिशास्त्रे, राजायत्तसचिवायत्तोभयायत्तरूपे त्रिविधे प्रशासने, प्रभुसिद्ध्यमात्यसिद्ध्युभयसिद्धिरूपासु त्रिविधासु सिद्धिषु सर्वत्र तस्य नैपुण्यानि प्रयोगदक्षताश्च दरीदृश्यन्ते स्म। अन्यानि च विविधविषयकाणि सुभाषितानि विरच्यापि शिवार्जुनकथामाश्रित्यासौ किरातार्जुनीयमिति शीर्षकेण महाकाव्यमेकं कल्पयामास। महाकाव्येऽस्मिन् लोककथया सह राजनयसिद्धान्तानां व्यावहारिकोपदेशोऽपि तेनोपदिष्टः।

महाराजस्य सिंहविष्णुवर्मणः समाश्रये निवसतस्तस्य राजनीतिनिपुणस्य प्रतिभाप्रज्ञाशालिनः काव्यमर्मज्ञस्य काव्यस्रष्टुश्च भारवेरल्पेतराणि वर्षाणि व्यतीतानि। गृहस्थधर्ममनुपालयन्नसौ त्रीन् तनयानजीजनत् - बुद्धिरथं, मनोरथं भावरथञ्च। त्रिष्वेतेषु मध्यमो मनोरथो बुद्धिमत्तमः प्रतिभान्वितोऽवर्तत। तस्य चत्वारः पुत्रा अभवन् - वीरदत्तो धर्मदत्तो धनदत्तः प्रभुदत्तश्च। चतुर्मुखस्य ब्रह्मणश्चत्वारो वेदा इव ते चत्वारोऽपि मनोरथसुताः धर्मस्य वा पुण्यस्य वा महत्तमानि धामान्यासन्। ज्येष्ठस्तु वीरदत्तस्तत्त्वविदामग्रणीः गुणशालिनाञ्च प्रथमपदभाजनमासीत्। वीरदत्तस्य जाया गौरीति नामधेया विशिष्टा गौरीपतेः शङ्करस्यार्धाङ्गिनी गौरीव रूपगुणविशेषाणां निधानमेवासीत्। ध्रुवमेव सा पत्युरखण्डा अव्यर्था च शक्तिर्बभूव। सा सकलगुणनिधानं दण्डीति नाम्ना प्रसिद्धं सुतमजीजनत्।

दण्डिनो बाल्यावस्थायामेव तस्य पितरौ सकलजगत्सर्जनपालनहरणकर्ता परमप्रभुः स्वसमीपं ब्रह्मलोकमानिनाय। प्रचण्डमसहनीयमाघातं केनापि विधिनासौ बालकः सेहे। पितृव्याणां संरक्षणे स विविधशास्त्राणामध्ययनञ्चकार। भगवतीं वाग्देवीञ्च समाराध्य तस्याः कृपाकटाक्षेणासावपि समनुगृहीतः। धर्मार्थकामशास्त्रेष्वसौ विशेषेण नैपुण्यमध्य-

गच्छत्। गुरुजनानामतिशयस्नेहं विद्यालयेषु सम्मानञ्चाप्यसौ लेभे।

आयुषः षोडशवर्षकल्पे च सति दण्डिनि काञ्चीराज्यस्य शासनव्यवस्था निर्बला सञ्जाता। सर्वत्रोपद्रवाणां बाहुल्येन विध्वंसदशा संप्रवृत्ता। नगरे तस्कराणां दस्यूनां लुण्ठकानाञ्च राज्यमेव सर्वथा सञ्जातम्। अबलाः प्रबलैः सम्पीडिताः। चौराणां लुण्टाकानां लुण्ठनहिंसावधादीनां प्राबल्यं बभूव। अतीव प्रबलमाघातं प्राप्तवानयं दण्डी। राजशक्त्या सहैव विच्छिन्नायामर्थव्यवस्थायां वाणिज्यकार्याणि समवरुद्धानि। पलायनं प्रारब्धं नगरे नागरिकाणां सर्वत्र। बाह्येभ्य आन्तरिकेभ्यश्चोपद्रवेभ्यः प्रजाजनानां न कोऽपि रक्षको ददृशे। प्रतिवेशिराजभिः समाक्रान्ता काञ्चीनगरी पौनःपुन्येनावलुण्ठिता। मातापितृविहीनोऽसौ किशोर एवंविधैरुपद्रवैरुपप्लवैश्च प्रताडितो नगरत्यागस्य विनिश्चयञ्चकार।

प्रतीचीं दिशं समाश्रित्य प्रतस्थे दण्डी काञ्चीपुरं परित्यज्य। प्रथमं तावत् प्राच्यां संस्थितं सलिलनिधिनीलसलिलकल्लोलराशिप्रक्षालिततटभूमिभागं मामल्लपुरं नाम पत्तनं प्रपेदे। तत्र शेषशायिनं भगवन्तं लक्ष्मीबल्लभं प्रणम्यासौ बङ्गसमुद्रतटवर्तिभूमि-मार्गेणोदीचीमुन्मुखीभूय भगवतो जगन्नाथस्य नगरीं जगन्नाथपुरीं समाजगाम। तत्र गगनोद्भेदिशिखरोद्वेलितपताके जगन्नाथमन्दिरे सुभद्राबलरामसहितं लोकस्थितिकरं भगवन्तं श्रीजगन्नाथं समभ्यर्च्य स दण्डी पुनरपि प्रतीचीं दिशमवललम्बे। तत्र संख्यातीतान् भूधरान् बृहत्क्षुद्रसरिज्जलानि तटवर्तिशिलासैकतानि वनानि नगराणि ग्रामांश्चोल्लंघ्य दण्डी त्रिष्वपि लोकेषु प्रथितामनुपमेयां भगवतस्त्रिनयनस्य त्रिशूलकोणसमवलम्बितां वाराणसीं नाम पुरीं काशीतिद्वितीयेनाप्यभिधानेन प्रसिद्धां सम्प्राप। भागीरथी तत्रासिरिव वक्राकारा असीति नाम्नापि प्रसिद्धा बभूव।

अस्मिन् युगे भारतवर्षेऽनेकेषां विश्वविद्यालयानां महती प्रतिष्ठाऽवर्तत। पूर्वजनपदेषु वाराणसी, नालन्दा चेति द्वे विद्याप्रतिष्ठानेऽतिशयेन प्रसिद्धे विद्वज्जनमाननीये बभूवतुः। भागीरथीवरुणयोः सरितोः मध्यवर्तिन्यां भूमौ समवस्थितायां विविधदेवमन्दिरसमलङ्कृतायामस्यां पुर्यां वर्षयुगलं गुरुजनेभ्यः पाठानधीत्य विविधासु विद्यासु परमं प्रावीण्यमवाप।

तदनन्तरं प्राच्यां दिशि मगधजनपदालङ्कारभूतं नालन्देति नाम्ना प्रसिद्धं विश्वविद्यालयं जगाम। तत्र तेन वैदिकशास्त्रैः सह बौद्धशास्त्रेष्वपि प्रावीण्यमधिगतम्। धियः प्रतिभायाश्च वैभवेन तेन तस्मिन्नालन्दाविश्वविद्यालये सहाध्यायिनो गुरुजनाश्चापि चमत्कृताः। वर्षद्वयं तत्र तेन व्यत्यापितम्।

तदनन्तरमसौ दण्डी ततोऽपि पूर्वदिग्वर्तिषु जनपदेषु बभ्राम। बङ्गेषु गौडेषु

कामरूपेष्वन्येषु च जनपदेषु तेन वर्षद्वयकल्पं भ्रान्तम्। विविधेष्वाश्रमेषु विद्यालयेषु च ऋषीणामाचार्याणाञ्च चरणसंवाहनप्रसादेन बह्वीनां विद्यानामध्ययनेऽसौ महान्तं परिश्रमञ्चकार। भारतवर्षस्य पश्चिमोत्तरप्रदेशेषु गान्धारेषु संस्थितस्य तक्षशिलाविश्व-विद्यालयस्य कीर्त्या सकलं भूमण्डलं धवलितमासीत्। दण्डिनोऽप्यभिलाषो बभूव तत्रत्यानामाचार्याणाञ्चरणेषु श्रद्धाञ्जलिकुसुमान्यर्पयितुम्।

कामरूपतक्षशिलामध्यवर्तिमार्गस्तु नासीत् सुकरः सुतरो वा। पञ्चशताधिकैकसहस्र-क्रोशभूयिष्ठप्रकृष्टान्तरालोऽसौ पन्थाः क्वचित्तु समविषमैरुच्चावचैर्लघुबृहद्विविधाकारै-स्त्रिकोणचतुष्कोणपञ्चकोणषट्कोणाकारैस्तीक्ष्णधारैर्गोलाकारैर्वा पाषाणखण्डैरन्यत्र सुचिक्कणैर्बभ्रुवर्णैः रजोराशिभिः क्वचिद् वनस्पतिविरहितैरूषरप्रान्तैरन्यत्र वनस्पतिवा-नस्पत्यगुल्मक्षुपलतावल्लरीघनाक्रान्तभूमिभागैः क्वचित् कण्टकजालाञ्चितैर्वनैरन्यत्र चरणतलसुखस्पर्शपुष्पदलपरागालङ्कृतैराच्छन्नः सुकठिनोऽपि रमणीयतमोऽवर्तत।

कार्यार्थी मनस्वी स तु दण्डी कैशोरे वयसि वर्तमानः कार्यं वा साधयेयं देहं वा पातयेयमिति दृढप्रतिज्ञाव्रतः तक्षशिलागुरुकुलविश्वविद्यालयस्य गुरुजनानां सकाशाद् विद्यासु परमप्रावीण्यमभिलषमाणो गौरीगुरोः पादतलोपत्यकास्वेव मार्गचिह्नान्यवलोकयन् प्रचचाल। स तु विविधान् जनपदान् क्षुद्रबृहन्नदीसलिलानि सैकतान्युपत्यकाः क्षेत्राणि नगराणि ग्रामांश्चोल्लंघयन् पञ्चशताधिकसहस्रैकक्रोशकल्पमार्गं समतिक्रम्य तक्षशिलाविश्वविद्यालयमाससाद।

तस्मिन् युगेऽस्य विश्वविद्यालयस्य भौगोलिकपरिमितता शतद्वयवर्गक्रोशेभ्योऽप्यधिका समवर्तत। सुविस्तृतागामस्यां भुवि विविधविद्यानिष्णातैराचार्यैः स्वस्वगुरुकलानि, विद्याध्ययनकेन्द्राणि संस्थापितान्यासन्। कुलपतीनामाचार्याणामध्यापकानाञ्च विद्यानां कलानां कौशलानां शास्त्रेषु पाण्डित्यस्य च कीर्त्या समाकृष्टाः मनोऽभिलषितविद्याचरित्र-शिक्षणोत्सुकाः विद्यार्थिनो भूमण्डलस्य सकलेभ्योऽपि प्रदेशेभ्यो राष्ट्रेभ्यश्च समागच्छन्ति स्म। उपनयनसंस्कारानन्तरमन्तेवासिनः सन्तस्ते गुरुजनानामाश्रमेषु निवसन्तो विद्याध्ययनरताः भवन्ति स्म। आचार्याः कुलपतिपदाधिष्ठिताः स्वयं तेभ्यः सावधिकं पाठ्यक्रमं निर्धारयन्ति स्म। समापिते चाध्ययनावधौ परीक्षोत्तीर्णाः स्नातकाः प्रमाणपत्राधिकारिणः सकलभुवनजनवन्दनीयाः भवन्ति स्म।

तक्षशिलाविश्वविद्यालयस्य एकैकस्याचार्यस्य सविधे छात्राणां महती संख्याऽवर्तत। प्रायशः शताधिकाश्छात्रा एकस्याचार्यस्याध्यक्षतायां संरक्षायाञ्च विद्यामधीयते स्म। परन्तु कदाचिदाकस्मिकासु परिस्थितिषु संख्येयं पञ्चशतीमप्यतिशेते स्म। पाठ्यग्रन्थानामध्ययनेन सह क्रियात्मकशिक्षाऽपि महत्तां दधौ। एनां विना सर्वमप्यध्ययनं

शिक्षणञ्च निःसारकम्। छात्राणां सर्वविधविकासार्थं देशाटनमप्यनिवार्यमवर्तत। समापितेऽध्ययनावधौ सम्पूर्णे च पाठ्यक्रमे विषययोग्यतासम्पन्नेषु च छात्रेषु विविधविधिभिराचार्याश्छात्रान् परीक्षन्ते स्म। परीक्षोत्तीर्णाश्छात्राः दीक्षान्तसंस्कारेषु विशेषसमारोहसम्पादितेषु प्रमाणपत्राण्युपलभ्य स्नातकपदवीविभूषिताः सन्तो गृहाणि गन्तुमन्यन्ते स्म। स्नातकानां गौरवमयपदमतिसम्मानास्पदमासीत्। विशेषतस्तु तक्षशिलाविश्वविद्यालयाचार्येभ्यो ऽधीतविद्यानाम् । राजानोऽपि राजसभासु विशेषासनप्रदानैस्तान् सम्मानयन्ति स्म।

तक्षशिलाविश्वविद्यालये समृद्धिमद्भिः सद्वंशजातैः कुमारैः राजकुलविभूषणैः राजपुत्रैश्च सार्धमेव निर्धनाः साधनहीनाश्च छात्रा अपि सततमध्ययनाधिकारं भजन्ते स्म। यद्यपि सर्व एव छात्राः समानरूपेण निवासोचितान् भोग्यपदार्थान् निवसनभोजनाध्ययनादीन् तत्सम्बद्धानन्यांश्च व्यवहारान् लभन्ते स्म, तथापि तत्र द्विविधा व्यवस्था बभूव। समृद्धिमन्तश्छात्राः निवासभोजनाध्ययनादिव्ययपूर्त्यै शुल्कमाचार्येभ्योऽर्पयन्ति स्म। परं शुल्काहरणासमर्थेभ्यो धनसमृद्धिविरहितेभ्यश्छात्रेभ्य आचार्यगृहेषु निवसद्भ्योऽपि न काचिदपि शुल्कापेक्षाऽवर्तत। ते तु विद्याध्ययनेन सह आश्रमकार्याण्यपि सम्पादयन्ति स्म। दीक्षान्तसंस्कारावसरेषु गुरुदक्षिणायै ते प्रतिजानन्ते स्म। गुरुदक्षिणां विना न किमपि साफल्यमध्ययनस्य सम्भवति।

तक्षशिलां प्राप्य दण्डिना दाण्डायनाभिधानस्य कुलपतेर्विद्यालये प्रवेशोऽधिगतः। तत्र तेन धर्मशास्त्रार्थशास्त्रकाव्यशास्त्राण्यधीतानि। शास्त्रेष्वेतेषु परमं प्रावीण्यं प्राप्य विधिवद्दीक्षान्तसंस्कारावसरे गुरुदक्षिणायै प्रतिज्ञायासौ दक्षिणदिशं प्रतस्थे। प्रथमं तावदसौ सौराष्ट्रजनपदं गत्वा बलभीविश्वविद्यालये शिल्पशास्त्रं द्वादशमासमधीत्य तदनन्तरं स्वगृहं काञ्चीपुरमाजगाम।

त्रिभुवनललामभूतस्य काञ्चीपुरस्य तदानीमवर्णनीया शोभाऽवर्तत। उपप्लवाः प्रशान्ताः शासनव्यवस्था च सुदृढीभूता। पुनरपि तन्नगरं वाणिज्योद्योगसम्पन्नं सत् सुखकरं समृद्धिमच्चाऽवर्तत। विद्यालयेषु तथैव गुरुजनाः शिष्यानध्याप्यन्ति स्म। देवगृहेषु पूजार्चनादीनां तथैव समारोहाः समायोज्यन्ते स्म। राजशासनभयात् सबलाः दुर्बलान् पीडयितुं न साहसिकाः बभूवुः। काञ्चीपुरे दण्डिनं पुनरायातं विलोक्य पारिवारिकजनाः महतीं प्रसन्नतां हृदयानुरञ्जनीं प्रकटयामासुः। दण्डिनो व्यक्तित्वं गौरवमयं विद्याप्रतिभासमुज्ज्वलमनुभूय ते तं सम्मानयामासुः।

पैत्रिकमावासं पुनः प्रतिसमाधानेन प्रतिमार्जनेन बहुभिरुपकरणैश्चालङ्कृत्य दण्डी तत्रैव निवासञ्चकार। गुणवतीं सर्वशुभलक्षणसम्पन्नां श्यामां मनोऽनुकूलां कन्यां

परिणीय गृहस्थधर्मपालनरतोऽसौ दिनान्यतिवाहयति स्म। राज्ञा राजसभायां सम्मानितो लोकैरप्यसौ सम्मानितः। दण्डिनो विद्यया कलाकौशलेन सुव्यवहारेण विनम्रप्रभावशालि-वचोभिश्च प्रभाविताः समाकृष्टा अनेके प्रतिष्ठितवंशीयाः पुरवासिनस्तस्य मैत्र्याभिलाषिणो बभूवुः। सुभाषितानां काव्यानाञ्चापि विरचनं तेन प्रारब्धम्। सरस्वत्याः वरदपुत्रः साहित्यसाधकोऽसौ विद्वान् प्रतिभाशाली मनीषी दण्डी स्वल्पेनैव समयेन काञ्चीपुरस्य मूर्धन्येषु सुप्रतिष्ठितेषु विद्वत्सु च गुणगणैर्गणनामवाप।

मधुमासस्य मधुमये समये वसन्तर्तोराविभविन वनेषूपवनेषु च सौन्दर्यस्य सौरभस्य च सृष्टिरिव सञ्जाता। तमालवनानि नीलसुरभितकुसुमैराच्छादितानि। शाल्मलिपलाश-काञ्चनाराशोकादितरूणां वह्निकणसमुज्ज्वलपिङ्गलपुष्पगुच्छकैः सर्वाण्येव दिक्प्रान्तराणि सुतप्तकनकराशिसाम्राज्यन्तर्गतानीव सम्पादितानि। पीतवासन्तिकपुष्पमञ्जरीभिः सघनमाच्छादिताः नम्रीभूताः मृदुपवनैरान्दोल्यमाना आरग्वधतरुविटपाः सर्वासु दिक्षु सर्वेषु च दिग्विभागेषु पीतिमानं प्रासारयन्। रसालतरुमञ्जरीभिरुन्मादकसौरभैस्तरुण-जनानां हृदयानि विह्वलीकृतानि। नारिकेलतालानोकहानामूर्ध्वमुखविलोकनीयेषु शिखरेषु लघुबृहदाकाराणां फलानां सघनचयाः समदृश्यन्त। पूगीफलानां पादपानां शिखरेषु लघुक्रमुकगुच्छगुच्छा विकासभावं प्रापुः। एलामरिचमलयजसुरभितानि काननानि सहृदयानां हृदयान्याजह्रुः। विकसितपुण्डरीकेन्दीवरतामरसकमलकुमुदकैरवकह्लारविभू-षितेषु जलाशयेषु विचरतां हंसबककाकसारसक्रौञ्चादीनां जलवयसां विरावैर्दिगन्तानि निनादितानि। वसन्तर्तोः प्रकृतिरामणीयकेन सौरभेण च प्रमुदितं सकलं चराचरं जगदुन्मादमयमिव संवृत्तम्।

तेष्वेव वासन्तिकेषु दिवसेषु दण्ड्यसौ मनीषी एकस्मिन् समये वयस्यैः सह निजगृहबाह्यप्रकोष्ठे समुपविष्टः सुभाषितसुगोष्ठीसुखानन्दसागरे निमग्नो बभूव। मध्याह्नवेलायाः प्रथमे प्रहरे सेवकेनैकेनान्तः समागत्य प्रणतशिरसा महाकविरभिनन्दितः सविनयं च निवेदितः -

"वास्तुशास्त्रप्रवीणः शिल्पी कश्चिद्दर्शनाकाङ्क्षी द्वारि स्थितो भवदनुमतिं प्रतीक्षन्नास्ते।"

वयस्येष्वेकां दृष्टिं निपात्य दण्डी सेवकमादिदेश -

"गच्छ, सादरं तमिहैवानय।"

दारुवर्मनामाऽसौ शिल्पी कतिपयैरेव क्षणैः सेवकमनुसरन्नभ्यन्तरमागत्य दण्डिनश्चरणयोर्निपत्य प्रणम्य निर्दिष्टमासनं जग्राह। वास्तुविद्याकर्मणि दारुवर्मणो यशः काञ्चीपुरे समीपस्थेषु च प्रदेशेषु प्रथितोऽविद्यत। दण्डिनो मित्राणि तं प्रशशंसुर्जगदुश्च-

"अयं दारुवर्मा सुमहान् कलाकारः। शिल्पकर्मण्यनेन वास्तुविद्यादेवस्त्वष्टाऽप्य-तिशयितः। दारुवर्मणा निर्मितानां प्रासादानां देवमन्दिराणां प्रतिमानाञ्च प्रशंसा

सर्वैरेव जनैर्मुक्तकण्ठं विधीयते। काञ्चीपुरस्य प्रसिद्धे शिवमन्दिरे विष्णुमन्दिरे चाऽस्य शिल्पस्थापत्यकला कान्तिसमुज्ज्वला दर्शनीया रम्या च वर्तते।"

वयस्यैर्विहितामिमां दारुवर्मप्रशंसामाकर्ण्य प्रभावितचित्तो दण्डी दारुवर्माणं प्रश्नवाचकदृष्टिमुन्नमय्य पप्रच्छ -

"भद्र ! को हेतुर्भवतामिहागत्यास्मान् कृतार्थयितुम्?"

निजप्रशंसाप्रयुक्तवचनैः सङ्कुचितमनाः दारुवर्मा पुनर्दण्डिनश्चरणयोः प्रणम्य मन्द्रस्वरेण प्रोवाच -

"कविवर ! नाहं प्रशंसावचनयोग्यः। अहन्त्वेकोऽतितुच्छस्तृणसमः शिल्पी सततं निजशिल्पेन कलाकौशलेन च सर्वेषां जनानां प्रसादनाय प्रयते। तथाऽप्यत्र सविशेषेण हेतुना भवच्चरणसेवायां समुपस्थितोऽस्मि। मयि कृपां कृत्वा भवान् कष्टं करोत्विति कथनमपि मे भृशं सङ्कोचयति मनः। तथाऽप्याशासे मे प्रार्थनां भवानङ्गीकरिष्यति।"

महाकवेः स्मितोज्ज्वलदृष्टिनिक्षेपेण नितरां समाश्वस्तहृदयोऽसौ शिल्पी दारुवर्मा क्षणं विरम्य पुनः प्रोवाच -

"भगवन् ! काञ्चीपुरात् किञ्चिदेव विप्रकृष्टान्तराले पूर्वसमुद्रतटवर्ति मामल्लपुरं नाम प्रसिद्धं तीर्थस्थलं वर्तते। कदाचन पुरातने समये चक्रधारी भगवान् विष्णुरस्मिन्नेव स्थाने देवद्वेषिणो सुरान् निहत्य क्षीरसागरे शेषशयने विश्रामाय सुष्वाप। इयमपि पुराणेषु प्रसिद्धिर्यदत्रैव देवाः दानवाश्च नागराजं वासुकिं रज्जुं विधाय मन्दरपर्वतञ्चापि मथिं कल्पयित्वा समुद्रमन्थनञ्चक्रुः।

अधुनाऽत्र सलिलनिधितीरे भगवतश्चतुर्भुजस्य शंखचक्रधनुर्गदाधरस्य शेषशायिनः प्राचीनमतिभव्यं विशालाकारं मन्दिरं वर्तते। मन्दिरस्यास्य स्वर्णमण्डितशिखरसमूहो गगनं विदारयन्निव नक्षत्रमण्डलं स्पृशति। मन्दिरस्य गर्भगृहे शेषशायिनो भगवतो विष्णोरतिविशाला भव्या च प्रतिमा प्रतिष्ठिता वर्तते। शेषशय्यामधिशयानस्य चतुर्भुजस्य भगवतश्चरणौ संवाहयन्ती सागरसम्भवा भगवती लक्ष्मीरपि तत्र प्रतिष्ठिता। नाभ्याः समुद्गते कमलदलविष्टरे समुपविष्टो भगवान् सृष्टिकर्ता ब्रह्माऽपि तत्र वर्तते। नारदादयो भक्ता ऋषयस्तत्र शेषशायिनं सततं प्रणमन्ति। वियति तिष्ठन्तो महेन्द्रादयो देवास्तं दिव्यैः स्तवैः सततं स्तुवन्ति। तथैव चासौ प्रभुर्जगत्पालको दक्षिणं करमुन्नमय्याऽभयप्रदानमुद्रया तान् देवान् सम्भावयति। भवभयहरस्य भगवतो नारायणस्यान्येषाञ्च देवानां प्रतिमाः दर्शनमात्रेणैव भक्तजनहृदयानि श्रद्धया विश्वासेन भक्त्या च स्नपयन्ति। मन्दिरस्य निर्माणशिल्पे तथाविधं कौशलं शिल्पिभिः कल्पितं यदनन्तपारस्य पयोनिधेश्चञ्चलस्वभावा अपि वीचिराशयः शनैः शनैरागत्य भगवतो

विष्णोश्चरणस्पर्शं विधाय तथैव निवर्तन्ते।

कस्मिंश्चित् समये भगवतः शेषशायिनो देवस्य प्रतिमारूपमास्थितस्य लक्ष्मीबल्लभस्योपर्युद्गतो दक्षिणकर आशीर्वादमुद्रया स्थितः कफोणिप्रदेशाद् भग्नतां गतः। विष्णोरुपासकैर्दैनिकपूजनकारिभिः नियमनिष्ठैकव्रतैः पण्डितैराहूतेन मया दारुवर्मणा भग्नतां गतस्तत्करस्तथा सन्धितो यथा तत्र सन्धानयोगश्चिह्नमात्रमपि नालक्ष्यत। मम निर्माणशिल्पमवलोक्य सर्वेऽपि पण्डिताः भक्तजनाश्च तथाऽतिशयेन प्रभाविताः बभूवुर्यथा ते प्रशंसावचनैर्मां स्नपयामासुरभिवादनैश्च सभाजयामासुः। परन्तु न मया तेनाऽपरिमितेन साधुवादेन तावत्सन्तुष्यते यावद् भवान्मे शिल्पकौशलमवलोक्य सन्तुष्टो न भवति। सन्तुष्टे भवत्येव भवति मे मनसः परितोषः। भवन्तं विहाय कोऽन्यः कलामर्मज्ञः? रत्नपरीक्षका एव रत्नानि परीक्षितुं प्रभवन्ति। अतः सविनयं प्रार्थयेऽहं भवन्तं प्रणतशिरसा, मया सह मित्रसमवेतो भवान् मामल्लपुरं गत्वा सन्धितां तां प्रतिमामवलोक्य मम शिल्पकौशलस्य समीक्षां विदधातु। कां कोटिं वा श्रेणीं वा मम कला स्पृशति। परीक्षोत्तीर्णोऽहं धन्यमात्मानं मन्ये। आपरितोषाद् भवतो न तच्छिल्पं प्रशंसनीयं सम्मानार्हं वा मया मन्यते।"

शिल्पिनो दारुवर्मणस्तानि विनयभावसम्भृतानि वचनानि निशम्य दण्डिनश्चित्तं किंकर्तव्यविमूढञ्चिन्ताग्रस्तञ्च बभूव। काञ्चीपुराद् बहिर्मामल्लपुरं गन्तुमुत्साहरहितोऽसौ तूष्णीम्भावेन तस्थौ। दारुवर्माऽपि आशासम्भृतेन मनसा नेत्रनिमीलनस्याऽपि विस्मृत्य तन्मुखासक्तदृष्टिर्निश्चलः स्थितः। परन्तु तत्र गोष्ठ्यामुपस्थितस्य सेनापतिसुतस्य देवपतिसिंहस्य कलासु, विशेषतः शिल्पकलायामभिरुचिः सर्वत्र प्रसिद्धा। दारुवर्मणः शिल्पकौशलमवलोकयितुं समुत्सुकमनाः दण्डिनमसौ बभाषे -

"मित्र ! अतिदूरात्समागतोऽयमाशाविश्वाससम्भृतहृदयः कलाकुशलः प्रतिभाशाली शिल्पी भवद्गृहद्वारमुपस्थितो नावमन्तव्यः। अस्य विश्वासं स्नेहञ्च सम्मानयतु भवान्। अस्मिन् समये केरलजनपदात् समागतानि मातृदत्तादीनि भवतो मित्राण्यप्यत्र वर्तन्ते। वयं सर्वे भवता सह मामल्लपुरं गत्वा भगवतः शेषशायिनो दर्शनेनात्मनः पुनीमहे अथ च जीवनसाफल्यमधिगच्छामः। शिल्पिनश्चास्य शिल्पकौशलमप्यवलोक्य प्रसन्नताञ्च वयं प्राप्स्यामः।"

सेनापतिसुतस्य देवपतिसिंहस्य वचांसि निशम्य दण्डी मामल्लपुरं गमनायोत्साहितो बभूव। दारुवर्मणः प्रार्थनामङ्गीकृत्यासौ शिल्पिनं मित्राणि च प्रोवाच -

"वयं सर्वे श्वः प्रभातसमये पद्मनाभस्य भगवतः शेषशायिनो दर्शनाय मामल्लपुराय प्रस्थास्यामहे। सूर्योदयेन साकमस्माकं यात्रा प्रवत्स्यति।"

अपरेद्युः प्राचीदिशि द्यावापृथिव्योः सन्धिप्रदेशे क्षितिजे समुद्गच्छन्त्या देवनर्तक्या उषसा समुज्ज्वलारुणवर्णोत्तरीयवसनधारिण्या वदनमुन्नामितम्। तदानीमेव दारुवर्मा महाकवेर्दण्डिनो गृहं समायातः। दण्डिनो वयस्याः देवपतिसिंहमातृदत्तादयोऽपि मामल्लपुरगमनोत्कण्ठितहृदयास्तत्र समाजग्मुः। प्रस्थानसम्भारसमायुक्तो दण्डी यात्रायै समुद्यत एवासीत्। वाहनभूताश्चत्वारः पुष्परथाः सकलविधयात्रासामग्रीसहिताः पुरुषहस्तोच्छ्रायधवलवर्णघोटकयुगलयुतास्तत्र द्वारि समुपस्थिता अवर्तन्त।

शनैः शनैरुदयन्तं भास्वरं भास्करमवलोक्य सञ्जातलज्जयेव उषसा क्वचिदन्तर्हितम्। दिनकरेणोद्गन्तुमारब्धम्। सन्तप्तकाञ्चनसमुज्ज्वलाः दिनकरमण्डलस्यारुणरश्मयः स्यन्दनशिखरसुसम्बद्धेषु स्वर्णद्रवलिप्तेषु कलशेषु प्रतिक्षिप्ताः सन्तश्चाकचक्यैरवलोकयितॄणां नयनानि मुद्रितानीवाकुर्वन्। दण्डिनि मित्रवर्गे दारुवर्मणि च सर्वेषु रथेष्वारूढेषु सत्सु प्राप्तसङ्केतैः सारथिभिः पुष्परथरथ्याः मामल्लपुरं प्रति प्रचोदिताः।

वैशाखमासस्येयं पौर्णमासी तिथिरवर्तत। अवसानोद्यते वसन्तर्तौ ग्रीष्मर्तोरागमनप्रभावाः विस्तारविस्तीर्णायां भुवि सर्वत्र प्रालोक्यन्त। मार्गमभितो वातामवर्णाः परिपक्वकल्पाः गोधूमशूकाः प्रातःकालीनेन समीरणेनान्दोल्यमानाः पथिकदृष्टीनां हठादाकृष्टिकरा अभूवन्। रसालतरूणां विटपेषु मञ्जर्यो लघ्वाकारेष्वम्बरूपेषु परिणताः समदृश्यन्त। तासां भक्षणेनोन्मादकसौरभग्रहणेन चाप्यायितानां कोकिलानां कुहूरुतैः सुदूरं दिगन्तेषु प्रसृत्य यायावराणां कर्णेषु पीयूषद्रव इवाघोलितः।

रथारूढः सहायसहितो दण्डी नयनानन्दकराणि विविधपुष्पफलपत्रसम्भृतवनस्पति-वानस्पत्यलतावल्लरीक्षुपसम्भृतानि वनान्युपवनानि कमलिनीहरितान् विकसितारवि-न्देन्दीवरतामरससुशोभितान् कासारांश्च वीक्षमाणः सूर्यास्तङ्गमनवेलायां मामल्लपुरं सम्प्राप्तः। रथवाहकानां हरितां पदटापैर्हरितपाषाणनिबद्धान् नगरमार्गान् ध्वनिप्रतिध्वनि-गुञ्जरितान् कुर्वन्तस्ते सर्वे रथारूढाः यात्रिणः शीघ्रमेव विष्णुमन्दिरद्वारं समुपतस्थुः।

तस्मिन् समये भगवतोऽनन्तशयनस्य पूजनार्चनविधिं सम्पाद्य भगवते पूजाद्रव्याणि समर्प्य प्रसादपत्रपुटकानि गृहीत्वा भक्तजनाः स्वगृहेभ्यः प्रस्थानाय समुद्यता अवर्तन्त। भगवतो दर्शनानि प्रभातवेलायामेव भविष्यन्तीति मन्दिरद्वाररक्षकैः द्वाराणां कपाटा अर्गलिताः।

निरुपायो दण्डी सहायकैः सह मन्दिरसमीपस्थितमेकं समुद्रतटवर्ति पान्थागारं गत्वा रजनीं व्यत्यापयितुं प्रबन्धमकरोत्। रथयात्रापरिश्रान्तेषु सर्वेषु गहननिद्राधीनत्वङ्गतेषु सत्स्वपि दण्डी न कथञ्चिदपि निद्रयोपकृतः। शयनादुत्थाय तेन दारुवर्माऽपि जागरन्ने-

वाऽवलोकितः। सङ्केतेनैव दारुवर्माणमाहूय दण्डी तेन सह सलिलनिधितीरे समुद्रफेनवराटिकाशङ्खशुक्तिप्रवालादिसमवकीर्णे पादचारेण चलितुं प्रवृत्तः।

परिपूर्णमण्डलस्य रजनीकरस्य हिमगर्भितरश्मिभ्यः क्षरन्त्याः कौमुद्या आकर्षणेन गभीरसलिलः सागरोऽपि मदोन्मत्त इवोच्छलन्नासीत्। वेलावृद्धिकरा उच्छलन्तस्तरङ्गाः प्रोद्दामवेगास्तटबन्धं खण्डयितुं पुनः पुनः सवेगं प्रवृत्तनवोत्साहाः पान्थागारस्य देवमन्दिरस्य च भित्तिभिः सुतीक्ष्णं संघट्टनमवाप्य प्रयत्ननिष्फलाः सन्तः सहाहाकारमिव निवर्तमानाः पुनरपि सागरे विलीयन्ते स्म। काञ्चनद्रवार्द्रैरिव शशिरश्मिभिः समुज्ज्वलं गहननीलसलिलनिधेरिदं मनोहारि दृश्यं सुदीर्घकालमनन्यचेताः विस्मृतसकलजगद्व्यापारो दण्डी मन्त्रमुग्ध इवालुलोके।

परं तस्मिन् समये निशीथसमयसूचकः घण्टानादो मन्दिरगर्भगृहात् समुत्थितः। यात्राश्रमपरिश्रान्तोऽपि दण्डी हिमकरकराभिषिक्तरत्नाकरदर्शनसमुत्सुको विगतान्य-कर्तव्यचिन्तोऽर्धरात्रपर्यन्तं निद्राविहीनस्तत्र पादचारेण बभ्राम। परं पदचरणजन्यश्रान्ति-समुद्दीपितां निद्रामनुभवन् स दारुवर्मणा सह पुनः पान्थागारशयनागारमागत्य सुकोमलस्वच्छतूलशय्यामारुह्य गभीरं सुष्वाप।

प्रभाते सूर्योदयात् प्रागेव ब्राह्मे मुहूर्ते दण्डी निद्राभरविमुक्तो भास्करोदयजनितप्रकृति-सौन्दर्यशोभां पूर्वसमुद्रमध्यगतां दिदृक्षुः सुमन्दमपि पादनिःक्षेपध्वनिं परिहरन्नेकल एव शयनादुत्थाय बहिरागत्य समुद्रतीरमुपाजगाम। सुदूरे पश्चिमक्षितिजप्रान्तभागे महोत्तुङ्गनारिकेलपूगतालतमालतरूणां पृष्ठभागे मातुर्धरित्र्याः क्रोडे क्रीडनलालस इव शशी सततमधोगच्छन् नयनानामगोचरतां शनैः शनैः प्रापद्यत। सूर्योदयात् पूर्ववर्तिनि ईषद्द्युतिप्रभे प्रकाशे सुदूरं विस्तृते प्रशान्तनीलसलिले बङ्गसागरे यत्र तत्र जलजन्तूनां नक्रतिमितिमिङ्गलादीनां सलिलाद् बहिरागमनस्य पुनश्च तत्क्षणमेव तत्रैव निमज्जनस्य मनोरमाणि दृश्यानि तत्र प्रावर्तन्त। वेलावृद्धिसमयावसानत्वात् समुच्छलतः समुद्रजलस्य प्रत्यपसारणभावात् सैकतप्रदेशे शुक्तिशङ्खवराटप्रवालसमुद्रफेनादीनां सामुद्रिकद्रव्या-णामनन्ताः सघनराशयो यत्र तत्राऽवाकीर्यन्त।

सहसा सर्वासु दिक्षु सन्तप्तहेमनिभः प्रकाशराशिः प्रससार। पूर्वसमुद्रस्य सुदूरेऽन्तरिक्षप्रान्तभागे सुनीलसलिलमध्यादरुणवर्णया उषसा समुज्ज्वलदीप्तिपरिवृतं वदनमुन्नामितम्। सकलमेव प्रकृतिमण्डलं सुतप्तपिङ्गलकाञ्चनद्रवेणेवोपलिप्तं ददृशे।

शनैः शनैः सलिलगर्भाद्दिवसमणेररुणमण्डलस्य रेखाः समुद्दीप्ता इवाऽदृश्यन्त। क्रमशश्च परिपूर्णताङ्गतेन बालभास्करमण्डलेन समुदितम्। विस्मयविमुग्धो मन्त्रबद्ध इव दण्डी विस्मृतसकलजगद्व्यापारः प्रकृतिनट्यास्तमनुपमं हृदयहारिणं सौन्दर्यराशि-

मपगतनिमेषाभ्यां लोचनाभ्यां पिबंस्तत्र निश्चलो निष्कम्पश्च तस्थौ। सहसा देवपतिसिंहमातृदत्तादयो वयस्या: दारुवर्मा चापि शिल्पी तत्र समाययु:। एतस्मिन्नन्तरे विष्णुमन्दिरे देवपूजनसमारम्भसूचकानां वाद्यमानानां कांस्यधातुघटितानां घण्टानां निनादास्तत्र कर्णेषु पतिता:। झटित्येव परावृत्य नित्यकर्मनिवृत्तो दण्डी भगवद्भक्तिसम्भृतहृदय: सहायै: सह प्रभो: मन्दिरं प्रविवेश।

सागरतीरे सन्निविष्टस्य मामल्लपुरस्यास्य विष्णुमन्दिरस्य निर्मिति: कदा सञ्जाता केन वा कारितेति न कोऽपि जानाति। सुविशालां सुविस्तृतां भूमिं समीकृत्य सुपरिष्कृत्य च जलनिधितीरे समुत्तुङ्गशिखरयुतस्य देवमन्दिरस्य भक्तजनविस्मयोत्पादिनी कुतूहलकारिणी वास्तुकलाऽत्यद्भुताऽवर्तत। भव्ये गर्भगृहे प्रतिमानां शुभ्रहरितताम्रचित्र-विचित्रघटितपाषाणविरचितानां स्थापना गवाक्षाणां द्वाराणां च व्यवस्था तथाविधशिल्पकौशलेन संविहिता, यथा प्रातरुदितस्य रश्मिमालिनो रश्मय: सर्वेष्वेवर्तुषु प्रभो: शेषशायिन: पाषाणशरीरं स्पृष्ट्वा सकलं गर्भगृहमालोकभरेणालोकयन्ति स्म। अकूपारनीलनीरराशिभ्य: समुद्गच्छन्तीनां लहरीणां भङ्गय: शनैरागत्य प्रभोश्चरणस्पर्शं विधाय निवर्तन्ते स्म।

मन्दिरे प्रधानभूता प्रतिमा शेषशायिनो विष्णोरवर्तत। शेषशयने शयानस्य विष्णोश्चरणौ संवाहयन्ती लक्ष्मीश्चापि तत्र प्रतिष्ठिता। जयविजयौ द्वारपालौ मूर्तिरूपिणौ द्वारि तस्थतु:। नारायणस्य नाभ्या: समुद्गते मृणालदण्डे विकसितकमलदलपटलमध्ये सृष्टिस्रष्टा चतुर्भुजो ब्रह्मा ऋग्यजु:सामाथर्वलक्षणांश्चतुरो वेदान् करेषु चतुर्षु धारयन् विराजमानोऽवर्तत। गर्भगृहस्य पश्चिमदिग्वर्तिन्यां भित्तौ सप्तर्षिमण्डलभित्तिचित्राणि समालिखितान्यवर्तन्त। पूर्ववर्तिन्यां भित्तौ स्तुतिगानमुद्रासुशोभमाना: महेन्द्रादयो देवा:, दक्षिणोत्तरवर्तिन्योश्च भित्त्योर्यक्षगन्धर्वविद्याधरसिद्धाप्सरसोऽर्धदेवाश्चित्रिता आसन्। ते सर्वेऽपि परमप्रभुमनन्तं शेषशायिनमुपासमाना: ध्यानावस्थिता अवर्तन्त। यत्र तत्र महर्षीणां भृगुनारदादीनां चित्राण्यविद्यन्त। तस्य महतो देवस्य विष्णोर्वाम: कर: शिरसोऽधस्तादुपधानरूपो विरचितो दक्षिणश्चाशीर्वादमुद्रयोपर्युद्गतोऽवर्तत।

प्रभोश्चरणयो: प्रणम्य सुसूक्ष्मदृशाऽपि निरीक्षमाणेन दण्डिना कस्मिन्नपि करे कुत्रचिदपि न किमपि लक्षणमभिज्ञानं वा सन्धानस्याऽवलोकितम्। सकला प्रतिमा एकमेव श्यामवर्णसुचिक्कणसमुज्ज्वलशिलाशकलमुत्कीर्य निर्मिता प्रतीयते स्म। भव्यतमां भावपूर्णमुद्राभिरङ्कितां तां प्रतिमामवलोक्य शिल्पिनो रचनाचातुर्येण परमविस्मितो दण्डी मन्त्रमुग्ध इव निश्चलनिष्पन्दस्तस्थौ। कतिपयक्षणानन्तरं प्रश्नसूचकदृक्पातं कुर्वति दण्डिनि पदद्वयमग्रेसरीभूय दारुवर्मा मृदुविनम्रविनययुतवचोभिर्न्यवेदयत् -

"आर्य! भगवतो नारायणस्य प्रतिमाया: दक्षिणकरमवलोकयतु भवान्। आशीर्वाद-

मुद्रयोत्थितोऽयं करः कफोणिप्रदेशे खण्डितो मया सन्धितः।”

ध्याननिमग्नचेताः सुसूक्ष्मं निरीक्षमाणोऽपि दण्डी तत्र किमपि सन्धानचिह्नमनवलोक्य दारुवर्मणः शिल्पकौशलं भृशं प्रशशंस। दण्डिनः सहायाश्चापि शिल्पिनः कलां प्रशशंसुः।

तस्मिन्नेव क्षणेऽतिविस्मयोत्पादिनी घटना घटिता। जलनिधेरन्तरालादेवैका लघ्वी लहरी प्रतिपदं मन्दिरमुपसर्पन्ती सर्वैर्जनैरवलोकिता। तस्या अग्रभागे बृहदाकारमरुण-वर्णमुदयन्तमादित्यमपि तेजसाऽरुणवर्णेन तिरस्कुर्वद् रक्तकमलकुसुममपि तत्र ददृशे। शनैः शनैरियं लहरी मन्दिरद्वारमुल्लंघ्य क्रमशः सोपानपङ्क्तिमारोहमाणा प्रभोः प्रतिमामुपजगाम। दिव्यकमलसौरभेण मन्दिरस्य वायुमण्डलमापूरितम्। कमलकुसुमं प्रभोश्चरणयोः समर्प्य सा लहरी यथाऽऽयाता तथैव प्रतिनिवृत्य जलनिधौ समाविष्टा। विस्मितैर्विस्फारितानिमिषलोचनैस्तत्रोपस्थितैः सर्वैर्जनैरवलोकितम् -

“भगवतो विष्णोश्चरणस्पर्शमवाप्य तत्कुसुमं दिव्यदेहधारिणि विद्याधरस्वरूपे परिवर्तितं बभूव।”

दिव्यालोकेन मन्दिरगर्भगृहमापूरितं सञ्जातम्। स तु विद्याधरोऽतिसुन्दरो मनोहरस्तेजस्वी तारुण्येन वयसा समलङ्कृतो गौरवर्णश्चासीत्। वपुषो विभिन्नेष्वङ्गेषु नानाविधान्याभरणानि दधानोऽप्यायुधैर्विविधैः कवचेन च सन्नद्धो बभूव। शिरसि हेममयं रत्नजटितं किरीटं, ग्रीवायामेकावली, कर्णयोर्मणिमये कुण्डले, मणिबन्धे च केयूरं, इत्याभरणानि तत्रावर्तन्त। कटिप्रदेशे सन्निबद्धस्य कोशनिहितस्य चन्द्रहासस्य त्सरुः दृग्गोचरीभूतः। वामस्कन्धे दीर्घदण्डं सुदृढप्रत्यञ्चं धनुः पृष्ठभागे शरनिचितं तूणीरं नयनविषयतां गतम्। तूणीरमुखाग्रे नाराचानां शुभ्रवर्णाः शरपुङ्खाः दैदीप्यमानाः बभूवुः। सव्यकरे दीर्घदण्डां सप्ततन्त्रीं धारयन् पीयूषमयीभिरिव भक्तिभावनाभिर्भरित-हृदयोऽसौ विद्याधरः प्रभोश्चरणयुगमुपगम्य तत्रोपाविशत्।

सप्ततन्त्र्यास्तन्त्रीषु स्वरान् सन्दधता तेन विद्याधरेण प्रभुभक्तिभावव्यञ्जकानि गीतानि गातुं प्रारब्धानि। गीतानामारोहावरोहयुतैः सप्तत्रयक्षेत्रसङ्गतैः सप्तस्वरैः माधुर्यगुणयुतभक्तिरसाप्लावकैर्विस्मयानन्दाभिभूता इव सर्वे जनाश्चित्रलिखिता इव तस्थुः। प्रहरार्धमात्रं यावत् सकलमपि स्थावरजङ्गमात्मकं जगत् भक्तिरसाप्लावितं विधाय विनयविनम्रशिरसा पुनः प्रभोश्चरणयोः प्रणम्य चरणरजांसि भालपट्टे संलिप्याऽसौ विद्याधरः समुदतिष्ठत्। तदनन्तरं द्वावपि करौ प्रसार्य गगने समुत्पत्य पूर्वोत्तरस्यां दिशि समुड्डीय कतिपयेष्वेव क्षणेषु नयनयोरगोचरताञ्जगाम।

महाद्भुतं विस्मयसागरनिमज्जनकरमेतद् दृश्यमवलोक्य तत्र विद्यमानाः भक्तजनाः दण्डिनः सहायाश्चापि विस्मयस्तब्धा इव चकितचकिता इव बभूवुः। सोत्कण्ठानि

नयनानि विद्याधरान्तर्धायकपूर्वोत्तरदिग्विभागान्निवर्त्य ते दण्डिनं प्रश्नसूचकदृष्ट्या निरैक्षन्त - किमिदं सञ्जातमिति। कोऽयमासीदसौ विद्याधरः? कथं वा रक्तकमलरूपे परिणतः? कथञ्च तेन भगवतो नारायणस्य चरणस्पर्शानुग्रहेण दिव्यं विद्याधररूपमधिगतम्?

विस्मयाभिभूतो निश्चलसकलगात्रो दण्डी शेषशायिनः प्रतिमामेव निर्निमिषदृशा व्यलोकयत्। तदैव मातृदत्तो दण्डिनमाह -

"मित्र ! कमलरहस्यस्योद्भेदने भवानेव समर्थः। देवी शारदा भवतः समुचितेष्टदेवता। तत्प्राप्तवरप्रभावो भवान् पावनीमिमां कथां श्रावयित्वा हृदयान्यस्माकं कुतूहलसमाक्रान्तानि विनोदयतु।"

मित्रेषु दृशं निपात्य दण्डी सस्मितं प्रावोचत् -

"आर्याः ! नाहं साम्प्रतमेतद्घटितवृत्तान्तरहस्यस्यावबोधने समुद्घाटने वा प्रभवामि। अस्मिन् समयेऽस्माभिः काञ्चीपुराय प्रस्थातव्यम्। गृहाणि च गन्तव्यानि। देवतायाः सरस्वत्या अनुग्रहे सति, ध्रुवमेवाहं घटनाया अस्या रहस्यस्यावबोधने प्रभविष्यामि। इति मे मनः सङ्कल्पते।"



दण्डिनो वचांसीमानि समाकर्ण्य तस्य वचनानि सम्मान्य सकलोऽपि मित्रवर्गः पूर्ववत् पुष्परथानारुह्य काञ्चीपुरं समागत्य दण्डिनं पृष्ट्वा स्वगृहाणि जगाम।

कमलकुसुमवृत्तान्तो दण्डिनो मनो हृदयञ्च महौत्सुक्येनापूर्य भृशं विह्वलयाञ्चकार। सरस्वत्याः विद्याधिष्ठातृदेवतायाः भक्तः साधक उपासकश्चासौ निजभवनस्यैकस्मिन् कक्षे पूजागृहं सम्पाद्य भगवतीं सरस्वतीं देवीं प्रतिमारूपेण संस्थाप्य प्रतिदिनं सायं प्रातः भक्तिभरैः स्तोत्रैस्तां समुपास्त। मामल्लपुरात् काञ्चीं समागत्य तस्मिन्नेव दिवसे प्रदोषवेलायां भोजनादिभिर्निवर्त्य पूजागृहं प्रविश्य धूपदीपादिकं प्रज्ज्वाल्य सरस्वतीमुपासमानो नेत्रे सम्मील्य देवीप्रतिमासमक्षं ध्यानावस्थितो बभूव। याममात्रेणैव तदवस्थं तं निद्रादेवी स्वाङ्के निधाय गहनस्वप्नसंसारं निनाय। स्वप्नपरम्परासु तेनावलोकितम् -

"हंसवाहिनी वीणापुस्तकधारिणी श्वेतवसनावृता समुज्ज्वलगौरवर्णा शारदा साक्षादेव तत्समक्षमाविर्भूता सुमधुरमन्दस्मितसुशोभितरदच्छदा तिष्ठति।"

चरणयोर्निहितशिरसं भक्तं दण्डिनं सव्येतरकरेण परामृशन्ती सप्रसादाऽऽशीवर्दिश्चाभिषिञ्चन्ती सा सकलमेव कमलरहस्यं तत्समक्षं वर्णयामास।

सहसा चमत्कृत्य दण्डी विगतनिद्रः समुत्थाय "निशावसाने ब्राह्मे मुहूर्तेऽवलोकिताः स्वप्नसृष्टयः सत्यं फलन्ति" इति फलितज्योतिषवचनानि संस्मरन् तमेव स्वप्नं विचारयन् प्रसादसागरे निममज्ज। देवी शारदा स्वप्नेषु कमलपुष्पघटनारहस्यं सकलमेव समुद्घाट्य भक्तजनवत्सलतामभिव्यञ्जयामास। दण्डिनः सकलान्येव गात्राणि हर्षविस्मयरोमोद्गमनैर्विषमितानि मनश्चाऽनिर्वचनीयेन प्रसादसन्तोषभरेणाभिभूतम्।

प्रतिदिनमिवाऽद्याप्यक्षतयौवनसम्पत्स्वामिन्या उषसा अरुणाभमुखावरणालङ्कृतया पूर्वदिशि क्षितिजान्तराले स्वकीयं वदनमुन्नामितम्। नित्ययौवना सततसौन्दर्यमयी लावण्यवती रम्या तरुणी नृत्याङ्गनेव सा प्रकृतिसुता सुविस्तृतव्योम्नि सुकोमलान्यङ्गान्यामोट्य मुखावरणं स्वल्पमेवापसार्य सकलं चराचरं विश्वमरुणया आभया सम्बभार।

दिनकरमण्डले नभसि समुद्गते नयनागोचरतां गतायाञ्चोषसि मध्यमलोकनिवासिनः सर्वेऽपि प्राणिनो निद्रां तन्द्राञ्च परित्यज्य निजनिजनित्यनैमित्तिककर्मसु व्यापृताः बभूवुः। देवमन्दिरेषु घण्टानादैः घण्टिकाशिञ्जितैश्च सह मन्त्राणां स्तोत्राणाञ्च शास्त्रीयसङ्गीतलयबद्धाः स्वराः श्रोतॄणां श्रोत्रेषु पीयूषद्रवमिवाश्च्योतयन्। देवोपासनायै समुत्सुकानां पत्रपुष्पाद्यर्घ्यविभूषितकराणां भक्तजनानां सम्मर्दो देवमन्दिराण्यभिलक्ष्य गच्छन् राजमार्गेषु दृग्गोचरीभूतः। नित्यनैमित्तिककर्मनिर्वृतो दण्डी पुनः देव्याः सरस्वत्याश्चरणयोर्निपत्य प्रणम्य नैजं सचित्रकर्मकक्षं प्रविश्याऽऽसन्दीमारुह्य मित्रगण-प्रतीक्षारतो बभूव।

एकैकशश्च दण्डिनः सर्वेऽपि वयस्याः कमलपुष्पघटनारहस्यश्रवणोत्कण्ठितहृदया-स्तत्रोपस्थिताः बभूवुः। दारुवर्मा शिल्पी चाऽपि तत्र समायातः। उत्कण्ठानिर्भरैर्विस्मृतनिमेषैर्लोचनैस्ते दण्डिनं निरैक्षन्त। सोत्सुकान् कथाश्रवणविह्वलमानसान् वयस्यानवलोक्य रदच्छदौ दण्डिनः स्मितरेखाविकासविभूषितौ बभूवतुः। कालक्षेपः कथारसं विरसयतीति विलम्बं परिहरता दण्डिना शेषशायिनो नारायणस्य मन्दिरे घटितायाः कमलपुष्पघटनायाः रहस्यं स्वमित्राणां समक्षं वर्णयितुमारब्धम् -

"वयस्याः सरस्वतीप्रसादानुगृहीतोऽहं शेषशायिनो भगवतो नारायणस्य मन्दिरे घटितस्य कमलपुष्पवृत्तान्तरहस्यस्याऽवबोधने समर्थोऽस्मि। अरुणवर्णं तत्कमलपुष्पं यथार्थरूपेण विद्याधरजातीयो राजपुत्रोऽवर्तत। कस्यचिन्मुनेः शापवशादसौ विद्याधरराजसुतः कमलकुसुमं भूत्वा जलनिधेः सुनीलसलिलराशितरङ्गेष्वितस्ततः तरन्नासीत्। कथमसौ शापग्रस्तो बभूव, केन च विधिना तस्य शापान्मुक्तिः समजायतेति सकलो वृत्तान्तो मया विस्तरेण वर्ण्यते।"

तदनन्तरं प्रशंसागर्भितौत्सुक्यपरिपूरितदृष्टिवृष्टिभिराप्यायित इव स्नपित इवाऽसौ दण्डी महाकविः सरस्वतीकृपाकटाक्षेण प्रोत्साहित इव स्मितविभूषितवदनः तत्सकलं वृत्तान्तमेवं वर्णयामास।

# प्रथमा-पीठिका

# महाराजो राजहंसः

## प्रथमा-पीठिका

# महाराजो राजहंसः

भारतवर्षस्योत्तरवर्तिषु समतलभूभागेषु स्वच्छन्दमुच्छलन्त्याः महर्षिहर्षविहितस्नान-पुण्योदकायाः सगरतनयस्वर्गाधिरोहणाय सोपानपङ्क्तिरूपायाः भगीरथतपःप्रभावान्मध्यम-लोकतलमवतीर्णायाः त्रिभुवनपालकस्य क्षीरजलनिधौ सहस्रफणच्छायाश्रितशयनस्याऽनन्त-शयनस्य चरणाङ्गुष्ठनखपरिस्रुतायाः लोकोपकाराय ब्रह्मकमण्डलुविनिर्गतायाः हिमगिरिगगनचुम्बिहिमाच्छादितशिखरपरम्पराश्रयगिरीशजटाभ्रमणोपहसितगिरिजाखण्डगर्वगर्विताःयाः दर्शनस्पर्शनस्नानस्तवनमात्रेणैव भक्तजनानां सकलकल्मषप्रक्षालनसमर्थायाः सर्वविध-सस्यप्रदायाः भगवत्याः भागीरथ्याः दक्षिणदिग्विभागेषु सुसमृद्धाः मगधजनपदभूमिभागाः वर्तन्ते। अत्रत्येषु गौरीगुरुहिमगिरिहिमशिखरावतीर्णबृहल्लघुसरिदानीतमृत्तिकाप्रभावादुर्वरेषु क्षेत्रेषु गोधूमचणकयवशालिकुलत्थकुलायमसूरकमुद्गमाषतिलादीनि सर्वविधानि धान्यानि समुद्भवन्ति। प्रचुरमधुररससम्भृतैः स्थूलस्थूलैरिक्षुदण्डैश्चालङ्कृतानां क्षेत्रविस्ताराणां शोभा जनजननयनानि प्रीणयति। रसनासु चाऽनिर्वचनीयं रसमाधुर्यं घोलयति। मधुमासे चाऽऽविर्भूते सति सर्षपादिपीतपुष्पाच्छादितविस्तृतभूमयो वासन्तीशाटिकाः परिदधानाः प्रमदा रसरागरञ्जिता इव शोभन्ते। गङ्गाशोणादिसरित्सिञ्चितेष्वपरिमित-सस्यसम्पत्समन्वितेषु मगधजनपदभूमिगर्भेषु नानाविधधातूपधातुरसोपरसमहारसरत्नो-परत्नानां खनिजातानामनन्तराशयः सुरक्षिताः विद्यन्ते। अत एव भूमिरियं यथार्थनामा वसुन्धरेति मनीषिभिर्ज्ञायते।

मगधजनपदस्य राजधानी गङ्गाशोणसङ्गमभूमिष्ववस्थिता सकलभुवननगरीनिक-षायमाणा कुसुमपुरीति नाम्ना प्रसिद्धा पाटलिपुत्रमित्यपराभिधानेनाऽपि प्रसिद्धा जगद्विख्याता महनीया वर्तते। विन्यस्तशिल्पकौशलोपहसितविश्वकर्मकर्मसम्पदः कुसुमपुर्याः गगनोद्भेदिभव्यविमानाग्रभूमिषूल्लसन्तीभिर्मृगाङ्कगर्भाभिः काषायवर्णाभिःपताकाभिरानीतं मगधजनपदयशःसौरभं समनुभूय सुरगणा अपि तत्राऽवतरितुं स्पृहयन्ति। विपणयोऽत्रागण्य-पण्यवस्तुजातैः परिपूर्णाः स्वर्णरजतहीरकमुक्तानीलमरकतपद्मप्रवालशुक्तिशङ्खवराटा-दिरत्नोपरत्नराशिभी रत्नाकरस्याऽपि कीर्तिं मलिनयन्ति। मगधजनपदशेखरीभूताया अस्याः नगर्याः समृद्धिसौन्दर्यवर्णनं न सहस्रजिह्वोऽपि शेषः कर्तुमलम्।

यस्य समयस्य वर्णनमिह प्रस्तूयते, तस्मिन् काले कुसुमपुरीं नगरीं राजहंसो नाम

नरपतिः प्रशशास। शौर्यप्रतापानलसमुद्दीपिततेजोमण्डलः सकलभुवनतलनृपतिजेगीयमान-शुभ्रयशोराशिधवलितदिगन्तरालो राजनयप्रयोगनिपुणो विविधायुधसैन्यसञ्चालनदक्षो वीरः प्रतापशाली मनस्विनामग्रणीः स राजा सकलं विश्वं विजित्याश्वमेधयज्ञसम्पादनेन वैश्वानरनायकत्वे समागतान् देवानाज्यैरितरैश्च हुतैर्द्रव्यजातैरतितरां तोषयामास। यज्ञसमागतेन वैश्वानरेण चापि तस्य कीर्तिकौमुदी हवनसमिधां सितभस्मरूपेण दिग्दिगन्तेषु प्रसारिता। यज्ञान्तविहितदानमहिमसमाकृष्टा अर्थिगणा अपि यथाभिलषितधनसमुपलब्धिपरितुष्टहृदया अष्टासु दिक्षु यथेच्छं विहरन्तो राजहंसस्योदारतातिशयताभिव्यञ्जकानि गीतानि जगुः। कुसुमपुरस्य राजमार्गाः वीथयः शृङ्गाटकाश्चत्वराणि विमानानि प्रासादाः हर्म्याः गृहाणि चान्याश्च निर्मितयो राजहंसस्य गुणगीतिकाभिः गुञ्जरितानि बभूवुः।

राजहंसस्याग्रमहिषी वसुमती सत्यमेव भुवः साम्राज्ञी सौन्दर्येण लावण्यातिशयेन च मन्मथसहधर्मिणीं रतिमपि लज्जावनतां व्यदधात्। न तस्य गुणानां किमप्युपमानं लोकेऽस्मिन्नुपलभ्यते कविभिः। महत्या प्रतिभया विद्यया च समन्विता भर्तुर्धर्मसहचारिणी सर्वेषु कार्येषु राजनयप्रयोगेष्वपि सततं सहायिका सा समजायत।

त्रिभुवनमहिलासंहतिललामभूतां चूडामणिरूपां सुरूपसौन्दर्योज्ज्वलदेदीप्यमानवदन-कौमुदीसमाकृष्टभर्तृहृदयां तां प्रेक्ष्याऽसौ राजहंसः परमसन्तोषामृतानन्दसन्तृप्तहृदयोऽभि-ललाष न कस्यैचिदन्यस्यै प्रमदायै। कस्याञ्चिद् दृष्टिमपि न स व्यापारयामास। रतिपतिसदृशस्य निर्दोषनिर्मलकान्तिसमुज्ज्वलवदनस्य त्रिभुवनतरुणीगणस्पृहणीयरूपस्य तस्य भुवनपालकस्य निष्ठास्नेहानुरागाः केवलं वसुमत्यै बभूवुः। धर्मपरायणा प्राणेश्वरानुरागरसनिर्भरमानसा भर्तारमेव सर्वस्वं मन्यमाना सा पट्टमहिषी विनम्रस्नेहभरेण नयशालिना व्यवहारेण सततं तं प्रफुल्लञ्चकार।

मगधनाथस्य राजहंसस्य राजसंसदि त्रयो मन्त्रिणः प्रमुखाः शासनकर्तार आसन् - धर्मपालः, पद्मोद्भवः, सितवर्मा च। कुलपरम्परासमागताः विविधशास्त्रपारङ्गताः राजनीतिनिष्णाताः शौर्यशालिनः समरकुशलाः स्वामिनि निष्ठावन्तश्च त्रयोऽप्येते स्वामिनो राज्यस्य च सततं हितसाधका अवर्तन्त। अवधीरितदेवगुरुबृहस्पतिनयप्रभावास्ते प्रजारञ्जनकार्येषु व्यापृताः बाह्याभ्यन्तरिकोपद्रवेभ्यो राज्यरक्षणं कुर्वाणाः जनपदहितकर्तारो बभूवुः। तेषां नीतिनैपुण्येन स्वामिभक्त्या शौर्येण दाक्ष्येण च सततमात्मानं रक्षितमनुभवन् विगतचिन्तो भूमिपालः शासनस्य राष्ट्ररक्षायाश्च भारं तेषु निक्षिप्य विलाससुखान्यनुबभूव।

अथ गच्छति काले तेषां त्रयाणामपि मन्त्रिमुख्यानां सप्त पुत्रा अजायन्त। धर्मपालस्य त्रयः पुत्राः समभूवन् - सुमन्त्रः, सुमित्रः कामपालश्च। पद्मोद्भवस्य द्वौ पुत्रौ जनिमलभताम् - सुश्रुतो रत्नोद्भवश्च। सितवर्मणश्चापि द्वौ पुत्रौ समजाये-

ताम् – सुमतिः सत्यवर्मा च। एवञ्च सप्तसु पुत्रेषु सञ्जातेषु त्रयोऽपि मन्त्रिणो लोकसुखाननुभवन्तो ब्रह्मणि सततं संयोजितमानसाः पुत्राणां पालनशिक्षणकर्माण्यनुष्ठितवन्तः।

व्यतीतेषु कतिपयेषु वर्षेषु कैशोरवयसि वर्तमानानां मन्त्रिसुतानामियमवस्था बभूव –

"मन्त्रिसुतेषु सितवर्मसुतः सत्यवर्मा ब्रह्मणि स्वात्मानं संयोजयन् धार्मिकप्रवृत्तिर्भवबन्धनं दुःखमूलं मन्यमानो विरक्तो भूत्वा सकलमेव बन्धुवर्गं परित्यज्य तीर्थयात्रायै निर्गत्य भारतवर्षस्य चतसृषु दिक्षु बभ्राम। धर्मपालपुत्रः कामपालस्तु उद्दण्डप्रकृतिः कुसुमपुरस्य विटैर्धूर्तैरन्यैश्च विलासिजनैः सार्धं स्निग्धात्मीयतामनुभवन् विटेषु वाराङ्गनासु मद्यपानगोष्ठीषु चासक्तः पित्रोरादेशानुपदेशानवहेल्य तत्रैव वेशवासविलासेष्वात्मानं निमज्जयामास। एकस्मिन् दिवसे कुसुमपुरविलाससुखनिर्विण्णचेताः वयस्यानां समव्यसनिनां मण्डलीं विधाय गृहान्नगराच्च निष्क्रम्य देशाद् देशान्तरं विचचार। पद्मोद्भवस्य सुतो रत्नोद्भवोऽर्थोपार्जनरुचिर्वाणिज्ये मनश्चक्रे। स तु व्यापारिकपोतनिकरं सम्पाद्य भारतवर्षोद्भवानि पण्यवस्तूनि संगृह्य तानि च पोतनिकरेषु समारोप्य व्यापाराय समुद्रपारीयद्वीपद्वीपान्तराणां यात्रायै प्रतस्थे। शेषाश्च चत्वारो मन्त्रिपुत्राः सुमन्त्रसुमित्रसुश्रुतसुमतयो गृहेष्वेव निवसन्तः पितॄणां सहायकाः सन्तः राजशासनकार्याण्यपि निर्वाहयामासुः।"

अथ विधेरवन्ध्यतया दिवं यातेषु पितृषु सुमन्त्रादयो मन्त्रिसुताः मगधाधिराजस्य राजहंसस्याऽनुरोधेन विधिवन्मन्त्रिपदेषु नियुक्ताः राजकीयकर्तव्यान्यनुपालयामासुः। तारुण्ये वर्तमाना अपि ते कुलसंस्कारवशात् पितॄणाञ्च शिक्षया नीतिप्रयोगनैपुण्याच्चाऽनायासमेव नरपालस्य प्रजाजनानाञ्च रञ्जनं कुर्वन्तो नृपतिजनपदानां हितकर्तारस्तेषां प्रियपात्रताङ्गताः।

नवनियुक्तमन्त्रिणां कुलपरम्परागतानां राजनीतिनिपुणतां स्वामिभक्तिञ्च प्रति राजहंसो सर्वान्तःकरणेन विशश्वास। राज्यप्रशासनधुरं साकल्येन मन्त्रिभ्यः समर्प्य विगतचिन्तोऽसौ पराक्रमी भूमिपालः प्रियतमया वसुमत्या सार्धं विविधराजसुलभविलाससुखेष्वात्मानं न्यमज्जयत्। ललितचेष्टाभिर्भर्तारं प्रियतमं प्रसादयन्ती सा पतिव्रता पतिप्राणा वसुमती स्वयमपि विविधविलाससुखान्यनुभवन्ती प्रसन्नचित्ता दिनकरस्पर्शप्रमुदिता कमलिनीव प्रफुल्ला ददृशे। एवञ्च भूमिपाले सपत्नीके सुखविलासानन्दाननुभवत्येव सर्वर्तुनायको वसन्तर्तुरप्याविर्बभूव।

सर्वतो वाटिकासु रसालतरूणामग्रभागाः नवोन्मिषितमञ्जरीभारविनम्रा अनिर्वचनीयोन्मादभरेण सौरभेण दिगन्तरालानप्याप्याययामासुः। मञ्जरीणामास्वाद-

नेनोन्मत्तानां पिकानां मधुरकुहूरुतैर्विरहिणां हृदयेषु सन्धुक्षिताः कामज्वालाः। अथ च तेषां निनादाः रसिकजनकर्णकुहरेषु माधुर्यं प्रच्यावयन्तो विषमव्यवहारं प्रकटयाञ्चक्रिरे। किङ्किरातानोकहेषु विकसितानां कपिलानां पुष्पमञ्जरीणां चयैर्युवतयः कृष्णकुन्तलवेणीः सुशोभयामासुः। शुकतुण्डसमनवपलाशपुष्पगुच्छाः वासन्तिकं सुमनोरमं सौन्दर्यं सुदूरं प्रतिदिशं प्रसारयामासुः। राजमार्गमभितः सुदूरं यावत् प्ररूढा आरग्वधतरवः पीतमञ्जरीराशिं वर्षन्तो वसन्तर्तोः स्वागतसमारोहमिव प्रारेभिरे। मलयमरुतां संस्पर्शमवाप्य प्रणयिजनानां हृदयानि समुच्छ्वसितानि वपूंषि च रोमोद्गमैः कण्टकितानि बभूवुः।

परं विधेर्विलसितानि विचित्राणि। प्रकृतिरामणीयकमसहमानो विधिर्वसन्तं प्रस्थातुमादिदेश। दिनानां परिणाहाः सुदीर्घतां प्राप्ताः। कतिपयेष्वेव दिवसेषु कालक्रमेण रसालमञ्जरीषु जीर्णासु भूमिलुण्ठितासु लघ्वाकाराणि हरिद्वर्णान्यम्बकानि तत्र नयनगोचरीभूतानि। ग्रीष्मर्तुराविर्बभूव। दिनकरस्य प्रचण्डः सन्तापो शनैः शनैः ववृधे। प्रचण्डातपवशाद् ग्रीष्मोष्मणा विह्वलानां जनानां गृहेभ्यो बहिर्गमनमपि सुदुर्भरं बभूव। सरित्सु जलाशयेषु कासारेषु शीतलजलावगाहनानि मनोरमाणि रुचिराणि प्रियतराणि च सञ्जातानि। तटवर्तिषु च भूभागेषु जनानां सम्मर्दाः समवालोक्यन्त। शिरीषकुसुमसमलङ्कृतकर्णपालयो महिलासंहतयः सुगठितसुगौरशरीरा अपि प्रस्वेदबिन्दुनिचयश्यानसकलावयवाः व्याकुलचित्ताः शैत्याभिलाषिण्यो न कथञ्चिदपि निर्वृतिमवापुः। प्रकृतिरपि स्त्रीस्वाभावतया तासां पीडामसहमाना दुःखप्रतीकारायोद्यता बभूव। न सदृशानि भवन्ति दिनानि सर्वत्र सर्वेषां सर्वाणि।

सहसा पूर्वदिगन्तरालेषु श्यामवर्णानां कामिनीकृष्णकुन्तलचयानामिव जीमूतानां पङ्क्तयो दृष्टिगोचराः समभूवन्। समुन्नमद्भिर्मेघैः सघनैः सकलमेव वियन्मण्डलं तरसा समाच्छादितम्। कनकरेखाभ्रान्तिमिव निकषोपलेषु समुत्पादयन्तीनां तडितां श्रेणयस्तडत्तडदिति घनगर्जनेन सार्धं व्योममध्यं क्रकचैरिव चिच्छिदुः। घनानां घनघोरगर्जनैर्विद्युताञ्च चाकचक्यैर्लोकानां कर्णेषु बाधिर्यमिव समुत्पादितम्। मेघदर्शनेन सन्तृप्तनयनाः जलवर्षणेन च सञ्जातमदाः मयूराः नर्तनाय सम्मोदावसरमिव सम्प्राप्य समतलभूमिभागेषु समवेत्य शिखण्डान् प्रासारयन्। मयूरीणां मण्डलाकारासु परिवृतिषु शिखण्डान् प्रासार्य नृत्यतां शिखण्डिनामभिनन्दनं परितो वर्तमानाः कदम्बतरवः सुन्दरीश्रोत्राभूषणयोग्यानि स्वर्णिमपुष्पाणि विकीर्य सम्पादयामासुः। कदाचित् प्रतनुसलिललवान् विकिरन्तः कदाचिच्च धारासारेण सझंझावातं वर्षन्तो मेघाः नतोन्नतविषमसमभूमिभागान् समानिव चक्रिरे। परदुःखकातराः जलदाः वर्षन्तीभिः सुशीतलजलधाराभिः ग्रीष्मर्तोः सकलमेव तापमपाहरन्। ब्रीहिमकायाद्यन्नप्रसवयितृणि क्षेत्राणि वर्षाजलैराप्यायितानि विधाय मेघाः लोकात् प्रस्थानाय जनानुमतिमिव

ययाचिरे। उत्सेकवतीनां सरितां प्रचुरसलिलसम्भृतानाञ्च जलाशयानां विस्ताराः सुङ्कुचिताः। जलेषु मृत्तिकाविमिश्रितेषु शनैः शनैः नैर्माल्यमाविर्बभूव। वर्षर्तुः प्रातिष्ठत।

प्रस्थिते च घनकाले शरदृतुना धरायामवतीर्णम्। स्रोतसां स्रोतस्विनीनां सरसाञ्च सलिलानि प्रतनुत्वमवाप्य निर्मलानि सञ्जातानि। पुष्करिणीषु विकसितानां कुमुदकह्लारेन्दीवरपुण्डरीकतामरसानां विविधवर्णा शोभाऽवलोकयितॄणां नयनान्यानन्द-भरेणाऽऽपूरयामास। केदारभूमिषु धान्यक्षुपानामग्रभागेषु धान्यमञ्जरीषु पीतिमा पदं निदधौ। मन्दमारुतान्दोलिताभिर्मञ्जरीभिः कृषीवलानां हृदयान्यानन्दोल्लासेन प्रपूरितानि। सूर्यसंतापस्य प्रखरत्वं शनैः शनैरल्पत्वं गतमपि न साकल्येन प्रणष्टम्। शरदृतोः प्राणभूतस्य पूर्णचन्द्रोदयस्य कल्पनाभिरेव सरससहृदयहृदयान्यान्दोलितानि। कौमुदीमहोत्सवस्यायोजने तेषां महोल्लासः सततं प्रवर्धमानो बभूव। पौर्णमास्यां शरदृतुः स्वसाम्राज्यसंहरणसमयमिवाऽनुबभूव। प्रस्थातव्यमेव साम्प्रतमिति। हेमन्तर्तुस्तु तस्मै विकल्पनस्यावसरमपि न प्रायच्छत्। स तु शरदृतुमर्धचन्द्रेणैव प्रकृतिप्राङ्गणाद् बहिरपसार्य स्वसाम्राज्यविस्तारकरणे कृतप्रयासो बभूव।

लोकेऽतितरां कुपित इव हेमन्तर्तुर्भानुप्रतापं सुमन्दितञ्चकार। कमलिनीहरितासु सरसीषु प्रमुदितानि कमलकुमुदानि सूर्योष्मणा विरहितानि विशीर्णानि म्लानतामुपगतानि। हिमशीतलस्तीक्ष्णतरो वायुः प्रखरशैत्येन प्रवहन् जनानां मनांसि वपूंषि च प्रकम्पयामास। ऊर्णावस्त्रधारणाय वह्निसेवनाय गृहाभ्यन्तरेष्वेव च निवासाय ते विवशीबभूवुः। मध्याह्नकालीनोऽपि विवस्वान् नाऽतिसन्तापाय बभूव। प्रातःकालीनै-र्नीहारपृषतैः समाच्छादितेषु वनस्पतिषु पतिता उदयतो बालभास्करस्य रश्मयो विभ्राजमानाः विकीर्णाः सप्तस्वेव वर्णेषु विभक्ता अगणितपुरन्दरधनुषां शोभां दधुः। कुन्दक्षुपेषु बकुलपादपेषु च प्रस्फुटिताः स्वल्पाकारा अप्यसंख्यसंख्याः कोरकाः मन्दं मन्दं जहसुः। एतैरुपद्रवैरशान्तासन्तुष्टचेताः स हेमन्तर्तुः प्रियं सहायं शिशिरर्तुं निमन्त्रयामास स्वयञ्च विवश इव प्रस्थानाय समुद्यतो बभूव। एकस्मिन् वने न संस्थितिर्द्वयोः पञ्चास्ययोः संभवति।

समायाते शिशिरर्तौ सुशीतलाः सुतीक्ष्णास्तीव्रगामिनः सुदुःस्पर्शाः समीरणा. प्रावहन्। तेषां स्पर्शमात्रेणैव प्राणिनां त्वचः प्रपुस्फुटिरे। अत्युत्कटहिमगर्भप्रचण्डशीत-स्पर्शासहिष्णवो जनाः गृहाभ्यन्तरेष्वेवाऽनलोष्मभिः स्ववपूंषि सन्तापयन्तो बहिर्गन्तुं नोत्सेहिरे। दिवसकरोऽपि नीहारसंवृत इव शीतभीत इवोदैत्। पूर्वदिक्क्षितिजप्रान्तरेऽसौ विलम्बेनैव स्वकीयारुणवर्णमण्डलमुपर्युत्थाप्य मध्ये व्योम्नि तिर्यग्भावेनैव प्रसरन्

मन्दसन्तापं रश्मिचयं प्रसारयन् स्वल्पेनैव समयेन पश्चिमदिक्क्षितिजप्रान्तरेष्वात्मानं न्यमज्जयत्। तरवोऽपि प्रचण्डशैत्यमसहमानाः जीर्णतां प्राप्तानि पत्राणि सत्वरं पातयन्तो निष्पत्रा अभूवन्। परन्तु तस्मिन्नतिप्रचण्डनीहारसम्पाते शैत्यकालेऽपि लोध्रवासन्तीकुन्दादिवनस्पतिष्वनुपमा श्रीः कुसुमानां चकाशे। विकसितानां सुमनसां परागाः सुशीतलैः पवनैः सर्वासु दिक्षु प्रकीर्णाः। परं शिशिरस्य प्रचण्डं गर्वमसहनशीला जगन्माता प्रकृतिः नाऽधिकं सेहे। सुदिनानि दुर्दिनानि च चक्रवत् परिवर्तन्ते। वसन्तर्तुराहूतो निर्दिष्टः - सत्वरं गत्वा विद्राव्य शिशिरर्तुं प्रचण्डशीतपीडितानां प्राणान् रक्ष, दुःखानि चापहर। न कस्याऽप्युच्छृङ्खलतां विधिः दीर्घकालं सहते।

महाराजो राजहंसस्तु राज्यप्रशासनधुरं सुनयशालिनां मन्त्रिणां सुशक्तस्कन्धेषु समारोप्याविज्ञाताशङ्को विगतचिन्तः परमसौन्दर्यशालिन्या वसुमत्या सार्धं विविधर्तुयोग्यविलासानन्दाननुभवन् समवर्तत। प्रियतमायाः लावण्यवति सौन्दर्यशालिनि नयनाभिरामे प्रमुदिते प्रफुल्ले मुखमण्डले नित्यमेव नवतामुपायत् सौन्दर्यमसौ निरैक्षत। द्वयोरेव करकमलयोस्तस्याः वदनमनुपमनिधिमिव गृहीत्वा नयनयोर्नयने निक्षिप्याऽधरमुपरि कृत्वा निजौष्ठयोर्मध्ये संस्थाप्य मृदुभावेनादशत्। प्रणयरसनिर्भरा सा वराकी निरुपाया वसुमती कम्पमानगात्रयष्टिर्गद्गदध्वनिना साकं प्रियं राजानं सुकोमलभुजवल्लर्याविष्टं विधाय स्ववदनमवनमय्य तस्य सुविस्तृतवक्षसि संयोजयामास।

सुरभिमासस्य नवशुभाविभवि रजन्यामेकस्यां मृदुतूलशुभ्रपटाच्छादिते शयने शयानेन राजहंसेन स्वप्नोऽवलोकितः -

"दिव्यप्रभाभास्वरैर्गात्रैः सकलं प्रकोष्ठं प्रकाशयन्नेको दिव्यः पुरुषो व्योम्नोऽन्तरालादवतीर्य देव्याः वसुमत्याः पर्यङ्कं परितः परिचक्राम। परिक्रम्याऽसौ तस्याः दक्षिणेतरपार्श्वे स्थितः मुहूर्तं किञ्चिद् विचिन्त्य विस्मयमुत्पादयन् तामरसरूपमास्थाय देव्याः वदनं प्रविवेश।"

सहसैव राजा शयनादुत्थाय देवीमुपजगाम। गहननिद्रावशङ्गताया अपि मधुरस्मितविभूषितरदनच्छदायास्तस्याः मुखं दिव्येनाऽवर्णनीयेन ज्योतिषाऽवबभासे। परमतृप्तिजन्यभावानां दीप्तिस्तत्राऽवर्तत। महिषीं तथैव गहननिद्रापरवशां विहाय महीपतिरसौ दैनिकनित्यव्यवहारेषु सम्पृक्तो बभूव।

व्यतीतेषु कतिपयेषु दिवसेषु वसुमत्याः विश्वासपात्री हृदयनिर्विशेषा सेविका वसुधा राजानमुपेत्य सविनयं सपादस्पर्शञ्च प्रणम्य समाचारमेनं श्रावयामास -

"देवी गर्भं विभर्ति" इति।

वसुमतीगर्भविषयकं समाचारमाकर्ण्य परमानन्दभाजो महीपालस्य प्रसादातिशयो

न वपुषि समाविवेश। सर्वत्र प्रसरताऽनेन वृत्तान्तेन हर्षस्य सागर इव समुद्वेल्लितः। राजप्रासादे राजधान्यां कुसुमपुर्याञ्च नृत्योत्सवानामायोजनानि बभूवुः। सेवकेभ्योऽनल्पानि बहुमूल्यानि वस्तून्युपहृतानि। अर्थिनामभिलाषाः प्रपूरिताः। मन्त्रिभिरन्यैश्च राज्याधिकारिभिरुच्चपदप्रतिष्ठितै र्नरपालस्य हस्ताभ्यामेव प्रीतिपात्राणि स्वर्णरत्नादिप्रपूरितानि स्वयमपहृतानि। गर्भस्य द्वितीये षष्ठे च मासे शास्त्रोक्तविधिमनुसृत्य पुंसवनसीमन्तोन्नयनसंस्कारौ प्रतिपादितौ। अस्मिन् समये वसुमतीगर्भावस्थाजन्यसमयावधिमपेक्ष्य लौकिकसुखभोगविलासेभ्यः किञ्चिदुपरतो महीपालो राजकार्येषु मनः संदधार। अथ च मन्त्रिभिः सह परामृश्याऽसौ दिग्विजयाय निस्ससार।

मगधमालवजनपदयोः पुरातनं परम्परागतं सततं प्रवर्धमानं वैरमविद्यत। राजहंसेनाऽनेकशः पराजितोऽपि मालवनाथो मानसारः पुनरप्युपद्रवायोद्यतोऽवर्तत। सत्यं हि स्वाभिमानिनां जनानामामरणान्तं वैरं भवति। न हि सत्त्ववन्तः शौर्यशालिनो परपराभवं सहन्ते।

मानसारं मालवजनपदाधिपतिं पुनरप्युपद्रवोद्यतं गुप्तचरेभ्यो विज्ञाय राजहंसः प्रथमं तावन्मालवदेशं प्रत्यभिययौ। सेनया सह तेन अवन्तिपुर्यै प्रस्थितम्। पदविन्यासैर्धरातलं प्रकम्पयन्ती नायकस्य भूमिपालस्य राजहंसस्य जयजयकारैर्द्यां पृथिवीञ्च प्रकम्पयन्ती सा विशाला चतुरङ्गिणी चमूः दशस्वेव दिवसेषु मालवजनपदं प्रविश्याऽवन्तिपुरीमवरुरोध परितश्च सैन्यशिविराणि सन्निवेशयामास। स्वाभिमानी मानसारोऽपि मालवसैन्यानि सज्जीकृत्य प्राकारद्वाराण्यनावृतानि विधाय नगराद् बहिरागत्य समराङ्गणे निजशौर्यं युद्धदाक्ष्यञ्च प्रकाशयितुं राजहंससमक्षमुपस्थितो बभूव। समरक्षेत्रे परस्परं प्रहरणानि हिंसनान्याघाता अभिमर्दाश्च प्रारेभिरे।

मालवमगधसैन्ययोर्मध्ये भयानको रोमहर्षणो युद्धसमारम्भो बभूव। तस्मिन्नवसरे "हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीमिति" भगवद्गीतावाक्यं संस्मरन्तीनां युद्धाभिलाषिणीनां पदातिरथगजाश्वचमूनां पादाघातैरूर्ध्वमुत्थापिताः धूलिराशयः सुदूरं यावद् वायुमण्डलं तथाऽऽवव्रुर्यथा निकटसंस्थितान्यपि वस्तूनि नयनागोचरताङ्गतानि। तस्मिन्नेव क्षणे गजरथाश्वपदातिसैनिकानां तद्वाहनानाञ्च गात्रेभ्यो निस्सरन्तीभिः शोणशोणितधाराभिः, मदमुचां दन्तिनाञ्च गिरितुल्यगात्रेभ्यः प्रसवन्तीभिर्मदजलधाराभिरार्द्रीकृतास्ते रजोराशयो धरातलं प्राप्ताः। निर्मलीभूते च व्योम्नि परस्परं स्पष्टमवलोकयन्तो युद्धायाऽऽहूयमानाः वीरभटाः प्राणांस्तृणानीव मन्यमाना आयुधप्रहारैः प्राहरन्। तूर्यढक्कानिःसाणपणवादियुद्धवाद्यानां निनादैः प्रोत्साहितैरुत्तेजितैश्च योद्धृभिः प्रयुक्तानां प्रहरणानां संघट्टनेनोत्पन्नाः सुतप्तकनककणसमुज्ज्वलाः स्फुलिङ्गाः सनिर्घोषं ववृषुः।

तस्मिन्नेव महामृत्युमये भयावहयुद्धप्रसङ्गे मगधराजो राजहंसो मालवराजो मानसारश्च द्वावपि रथारूढौ सम्मुखमाजग्मतुः। रक्ताक्तनेत्रैः परस्परमवलोकयन्तौ जयाभिलाषिणौ तौ प्रथमं तावन्नाराचवर्षाभिः शत्रुं पराजेतुं प्रायतेताम्। परं शीघ्रमेव तयोर्निषङ्गाभ्यां शररहितत्वं कार्मुकाभ्याञ्च छिन्नधनुर्दण्डत्वं समासादितम्। तस्मिन्नेवावसरे परमोत्साहवान् मगधनाथोऽसिकोषात् खड्गमाकृष्य निकटं समागतस्य मानसारस्य स्यन्दने विधायोत्फालनं तं जीवन्तमेव जग्राह। गृहीते च तस्मिन् मालवनाथे मानसारे मालवीयाऽनीकिनी हतोत्साहा भग्नहृदया स्वकीयशस्त्रास्त्राणि परित्यज्य पराजयमात्मसमर्पणञ्च स्वीचकार।

पराजिते मालवसैन्ये बन्दीकृते च मालवनाथे स्वाभिमानी परमोदारस्वभावो राजहंसः शत्रुवीराणामपि सम्मानयिता पराजयं स्वीकुर्वन्तं मानसारं बन्धनरहितं कृत्वा स्वाधिकारानवन्तीषु संस्थाप्य मगधाधिकारमङ्गीकुर्वाणं पुनः मालवजनपदराज्यसिंहासने प्रतिष्ठापयामास। तदनन्तरं मानसारेणावन्तिराजेन सम्मानितोऽन्येष्वप्युद्दण्डप्रकृतिकेषु रिपुराजसु स्वकीयं वर्चस्वाधिकारं संस्थापयन् स चक्रवर्ती महीपतिः कुसुमपुरीमेव प्रत्याजगाम।

अनल्पानि दिनानि व्यतीतानि। एकस्मिन् दिवसे शौर्याभिमानी विद्याव्यसनी भूमिपालो राजहंसो राजसंसदि राजसिंहासनमधिरूढो व्योम्नि दिनमणिरिव शुशुभे। कविगणस्तु नवसृष्टरसगर्भितकाव्यपाठगाने रतोऽवर्तत। तस्मिन्नेव समये द्वारपालेनाऽन्तः प्रविश्य राजानं प्रणम्य निवेदितम् -

"देव! द्वारदेशे तेजःसमुद्दीप्तवदनः काषायवस्त्रधारी कश्चिद् यतिर्भवद्दर्शनाभिलाषो भवदादेशं प्रतीक्षमाणस्तिष्ठति।"

राज्ञोऽनुमतिं प्राप्य द्वारपालस्तं यतिं राजसंसदि समानिनाय। यतिमवलोक्यैव राजहंसस्तं परिचिक्ये। अयं काषायवसनपरिधानो यतिवेशधारी माधवाभिधानो गुप्तचरनायकोऽवन्तिजनपदसमाचारान् प्रेषयितुं नियुक्तोऽवर्तत। निश्चयेन कोऽप्यतिमहत्वपूर्णः समाचारो वर्तते, यदयं स्वयमेव सुदूराध्वानं समतिक्रम्य कुसुमपुरं समायातः। मनस्येवं विचार्य चारनायकं यतिरूपिणं तं सन्निकटवर्तिनि सुगुप्तद्वारे मन्त्रणागृहे समानीय समुचितासने समुपविष्टः। चत्वारो मन्त्रिणोऽपि सुश्रुतसुमन्त्रसुमित्रसुमतयस्तत्र समाजग्मुः। यथायोग्येषु स्वकीयासनेषु समुपविष्टेषु सर्वेषु तेषु राजा सस्मितं तं यतिं पप्रच्छ -

"सन्यासिन्! सर्वास्वेव दिक्षु सर्वान् देशान् भ्रमति भवान्। अस्ति कोऽपि नवीनः समाचारः? श्रावयतु भवानत्र।"

बद्धाञ्जलिर्यतिर्निवेदयामास -

"देव ! भवदादेशेन काषायवसनावृतः संन्यासधर्मं प्रतिपालयन्नहमवन्तिपुर्यां निवसामि। मालवजनपदे सर्वत्र परिभ्रमन्नहं समाचारान् संगृह्य भवदन्तिकं प्रेषयामि। परन्त्वेकोऽतिमहत्त्वपूर्णः समाचारः सुगुप्तो येनातिचिन्तितोऽहं स्वयमेवाऽत्र कुसुमपुरं समायातः। महाभिमानी मानसारो मालवजनपदनायकः समराङ्गणे भवत्सकाशात् पराजयमवाप्याऽतिलज्जितो निर्विण्णहृदयो देवसाहाय्यमधिगन्तुं पुत्रेषु मन्त्रिषु च राज्यशासनधुरं निक्षिप्य भगवन्तं त्रिनयनमाराधयितुं शिप्रातटवर्ति महाकालमन्दिरं प्रविष्टः। सर्वेषामेव प्रजाजनानां राज्याधिकारिणामन्येषाञ्च प्रवेशं तत्र निरुध्यासौ सुकठिने तपसि वर्तमानो देवाधिदेवं महादेवमारराध। दीर्घकालिकतपोऽनुष्ठानेन भक्त्याऽऽराधनया च परितुष्टेन भगवता त्रिपुरारिणा स्वयमेव प्रत्यक्षीभूय मानसारस्य मनसोऽभिलाषः प्रपूरितः। एकस्मिन् प्रहारे नियतमेकरिपुविनाशकं खड्गं तस्मै दत्त्वा भगवानन्तर्हितो बभूव। सोऽपि मानसारो रिपुप्रभावपराभवकरं तं खड्गं सम्प्राप्याऽतिगर्वितः प्रोत्साहितश्च वर्तते। चतुरङ्गिणीमनीकिनीं सज्जीकृत्याऽसौ कतिपयदिवसपूर्वमेवोज्जयिनीतो निर्गतः कुसुमपुराय प्रातिष्ठत। अनल्पेनैव कालेन तस्येहागमनसम्भावना। समाचारमेनं निशम्य यत्करणीयं तत्र महाराज एव प्रमाणम्।"

यतिवरस्य गुप्तचरनायकस्य वार्तां निशम्याऽतिगम्भीरो महाराजो मन्त्रिभिः सह मन्त्रणाञ्चकार। परस्परं विचारविनिमयं परामर्शञ्च कृत्वा कर्तव्यनिर्धारणं विधाय मन्त्रिणः प्रोचुः -

"देव ! समधिगतदैवतसहायोऽयं रिपुः न जेतुं शक्यः समरक्षेत्रे। अत एवाऽस्मिन्नवसरे सम्मुखसमरे तस्य विरोधो नोचितः। दुर्गाश्रयणमेव समुचितम्। दुर्गमाश्रित्याऽस्माभिः स्वरक्षा विधेया। प्रतिपक्षे प्रबलीभूते पराजये च सुनिश्चिते ह्यात्मरक्षैव धर्मः। जीवन्नरो भद्रशतानि पश्यति। जीवतामस्माकं पुनरपि विजयः सम्भवति। नष्टेषु प्राणेषु सर्वं नष्टमेव हि वर्तते।"

परन्तु स्वाभिमानिने पराक्रमशालिने गर्वभरेणाऽऽक्रान्तमनसे मगधाधिपाय राजहंसाय परामर्शोऽयं न रुरुचे। मन्त्रिणां नयगर्भितान् सुविचारान नङ्गीकुर्वन्नसौ प्रोवाच -

"मन्त्रिवराः ! संसारोऽयमसारः शरीरञ्च क्षणभङ्गुरम्। कीर्तिरिव चिरस्थायिनी। यशसि च विनष्टे सर्वमेव हि नष्टम्। भयाद् रणाद् विद्रुतोऽयं राजेति समुत्पन्नकलङ्कस्य पीडा मृत्योरप्यधिकभयङ्करी कष्टदायिनी च वर्तते। अतः सङ्गरे जयो वा भवतु पराजयो वा भवतु, प्राणाः सन्तु न वा सन्तु, प्राणरक्षायै रणाद् विमुखीभवनं न

कासुचिदप्यवस्थासु समुचितम्। जातस्य हि ध्रुवो मृत्युः। पञ्चभूतनिर्मितस्य कायस्यास्य रक्षणापेक्षया यशःशरीररक्षैव मे काम्यतरा।"

वचनानीमानि समुच्चार्य मन्त्रिणां मन्त्रणामवहेल्य स राजा युद्धाभिमानी युद्धायैव सङ्कल्पं प्रकटयाञ्चकार।

परन्तु मन्त्रिणः नृपतिजनपदहितकर्तारः पुनरपि राजानं समवबोधयितुं प्रयेतिरे। सुमतिः प्रोवाच -

"देव ! सत्यमेवायमसारः संसारः। भयविह्वला एव जना अस्मिन् जीवलोके जीवितमात्मानमिच्छन्ति। यश एव परमं धनं, तदेव च परमो धर्मः। राजलक्ष्मीरियमतिचञ्चला क्षणमपि स्थिरीभूय नैकस्मिन् स्थाने तिष्ठति। तथाऽपि भवादृशाः धैर्यौदार्यशौर्यनयविशिष्टगुणोपेताः जनास्तां स्थिरयितुं प्रयतन्त एव। समयमपेक्ष्यैव मनुष्येण व्यवहरणीयम् इति राजनीतिविशारदानां मतम्। भवान् नरपतिर्महीपतिः प्रजापालको राजा। प्रजारक्षणं भवतः कर्तव्यम्। राजनीतिप्रयोगेषु भवान् विचक्षणः। अत एतादृशेष्वसरेषु युद्धायोन्मुखीभवनं नोचितम् न च श्रेयस्करम्। कलिध्वस्तोऽपि नैषधीयो नलः पुना राज्यलक्ष्मीं प्रियां दमयन्तीञ्च समाससाद। अज्ञातवाससहितं त्रयोदशवर्षदेशीयं वनवासं परिभुज्याऽपि पाण्डवाः भुजबलेन नीतिबलेन च महाभारतीये युद्धे कौरवान् विजित्य राज्यलक्ष्मीमधिकृत्य वैरनिर्यातनञ्चक्रुः। अतो दैवबलेन सुसज्जितस्य जेतुमशक्यस्य मानसारस्य साम्मुख्यमधुना नोचितम्। नीतिरियमेव यद् भवान् कुसुमपुरप्रासादान् परित्यज्य सुदुर्गमविन्ध्यवनभूमिषु किमपि सुरक्षितं रिपुदृष्टिभिरगोचरीभूतं स्थानमाश्रित्योचितावसरं प्रतीक्षमाणः शक्तिसञ्चयं विदधातु।"

परं क्षात्रतेजोगर्वितः परमपराक्रमी स राजा न मन्त्रिणां वचांसि मनसि चकार। न रुरुचे सा मन्त्रणा तस्मै। युद्धायैव कृतनिश्चयोऽसौ बभूव। पराजयं वा मृत्युं वाऽवश्यम्भाविनं मन्यमानोऽपि युद्धात् पराङ्मुखीभवनमसौ नोचितं मेने। स मन्त्रिणः प्रोवाच -

"मन्त्रिवराः ! मरणं वरं, न पुनः भयाद् रणात् पलायनम्। तथाऽपि वंशरक्षणं परमं कर्तव्यम्। भवन्तस्तावद् वसुमत्या देव्या परिजनेनाऽन्येन च परिवारेण सह विन्ध्यवनस्य किमपि सुरक्षितं दुर्गमाश्रयन्तु। अनेन परिवारजनानां रक्षणं भविष्यति, भविष्यति च काले काऽपि मे सन्ततिः पुनरपि शक्तिसञ्चयं विधाय राज्यमधिकरिष्यति। अहं तु निश्चयेन रणयज्ञे होताऽस्मि स्वात्मानम्। यदि वा शत्रवो मां रणे हन्युस्तदपि मे क्षेमकरं भवेत्। अथवा सम्प्राप्ते विजये पुनरपि सर्वानिव भवतो राजधानीमानीय सुखेन निवसन् प्रजापालनरूपं कार्यधुरं निर्वोढा।

युद्धाय कृतनिश्चयं विज्ञाय नृपं मन्त्रिभिस्तथैव व्यवहर्तुं निश्चितम्। राजवंशस्य मूलच्छेदो मा भूद्, भविष्यति च काले राजवंशस्य कोऽप्युत्तराधिकारी पुनरपि मगधजनपदस्य राजसिंहासनमधिकुर्यादिति विचार्य चत्वारोऽपि मन्त्रिणः सुमन्त्रसुमित्रसुश्रुतसुमतयो गर्भभरालसां राजमहिषीं, राजपरिजनवृन्दं निजपरिवारसदस्यानपि संगृह्य सकलमेव राजकोषं सुगुप्तरूपेण संरक्ष्य परिमितसंख्यैः परीक्षितप्रभुभक्तिभिः प्रदर्शितानेकवाररणशौर्यैः सैनिकैः सह विन्ध्यवनमाशिश्रियुः। कुसुमपुरादविप्रकृष्टान्तराले पञ्चदशक्रोशपरिमिते स्वर्णसरितस्तटे महर्षेः कुलपतेर्वामदेवस्याऽऽश्रमपदमवर्तत। आश्रमं निकषैव तस्मिन् वनप्रदेशे स्वच्छं समतलं सुरक्षितं विविधसुविधासम्पन्नं शत्रुभिरगम्यं स्थलं पूर्वमेव सुनिश्चितमविद्यत। मन्त्रिभिस्तत्रैव शिविरस्य स्थापना विहिता।

इतस्तु कुसुमपुरस्थितेन महाराजेन राजहंसेन विज्ञातसकलवृत्तान्तैश्चारैरधिगतं यदवन्तिपतिर्मानसारः मगधान् प्रविश्य शोणनद्यास्तटे स्कन्धावारं संस्थाप्य श्वो वा परश्वो वा राजधानीं कुसुमपुरमवरोद्धुमिच्छति। युद्धाय कृतसङ्कल्पो मगधराजोऽपि रणमदमत्तान् सैनिकान् सुसज्जितान् सुसंनद्धान् व्यूहबद्धांश्च व्यदधात्।

सहसैव भयङ्कराणां विस्मयोत्पादकानां दुर्निमित्तानां परम्परा प्रारब्धा। राजहंसस्य वामनयने वामभुजे च प्रस्पन्दनानि भृशं बभूवुः। मध्याह्नकाले व्योम्नि सर्वासु दिक्षु सुचिक्कणकृष्णवर्णानां द्रोणवायसानां कर्णकटुध्वनिभिः श्रोतॄणां हृदयानि भीतिभावैराक्रान्तानि। सहसैव भूमिः किञ्चिच्चकम्पे। किं भविष्यति भविष्यतीति विचारसरणीसमाहितचेतसि राजहंसे मालवजनपदाधिपतिना मानसारेण प्रेषितो दूतस्तत्र समुपस्थितो बभूव। मगधाधिपेन समुचितं सत्कृतः सुप्रसन्नहृदयो विनम्रभावेनाऽसौ न्यवेदयत् -

"राजन्! मालवजनपदाधिपतिना प्रेषितः सन्देश एव मां वक्तुं व्यवसाययति। स तु मन्मुखेन भवन्तमिदं कथयति -

आवां द्वावपि वीरौ पराक्रमशालिनौ रणशौण्डावुत्साहवन्तौ वर्तावहे। भवता सह समराङ्गणे परस्परशक्तिपरीक्षणे मे महानभिलाषो हृदये वर्तते। स्पन्दते मे दक्षिणभुजः। पूर्वमप्यावाभ्यामनेकशः शक्तिपरीक्षणं विहितम्। यदि च भवान् क्षात्रधर्मोचितं कमप्युत्साहं वाऽभिमानं वा गौरवं वा पराक्रमं वा शस्त्रसंचालनदाक्ष्यं वा दधाति, रणाह्वानमङ्गीकरोतु। तत्राऽऽवयोः शक्तिपरीक्षणं जायेत।"

मालवाधिपदूतस्येमानि गर्वितानि वचांस्याकर्ण्य रोषाभिमानगर्वसंभृतहृदयस्य राजहंसस्य युद्धोत्साहस्तत्क्षणमेव जजागार। स्वाभाविकरूपेण दक्षिणकरस्तस्य कटिप्रदेशे कोशबद्धं खड्गत्सरुं पस्पर्श। दक्षिणेतरकरेणौष्ठलोमानि व्यावर्तयन् प्रस्फुरिताभ्यां रदच्छदाभ्यामसौ बबाषे -

"दूत ! मालवाधिपस्य वचांस्येव त्वया सन्देशहरेण प्रोक्तानि, तदहं त्वां क्षमे। मालवराजस्य यदि युद्धमेवाभीप्सितं, तद् भवतु तत्। अहमपि सन्नद्धोऽस्मि। कुसुमपुरप्राकाराद् बहिः बाह्यभूमिषु समरपवित्रासु शौर्यस्य पराक्रमस्याऽऽयुधसञ्चालनस्य युद्धदाक्ष्यस्य च परीक्षा भवतु। लोको द्रक्ष्यति - को बलवत्तरः।"

तदनन्तरं यथोचितं सत्कृतो यथायोग्योपहारैश्च सम्मानितः स ब्राह्मणो मालवराजदूतो मगधराजेन विसृष्टः। महाराजो राजहंसश्चमूपतिमादिदेश -

"प्रातः सूर्योदयात् प्रागेव सेनाः प्रयाणं कुर्वन्त्विति।"

कुसुमपुरस्य नागरिकाः युद्धजन्यविभीषिकाणामातङ्कैर्विकलचित्ता अपि उत्साहवन्तो बभूवुः। तस्मिन्नगरे निशा सा सैन्यवाद्यानां मगधराजजयजयकाराणाञ्च निनादैर्ध्वनितप्रतिध्वनिता व्यतीयाय। अस्माकं प्रजानाथो विजयतामिति अभिलाषेण महिलाजनसंहतिः प्रार्थनासु देवपूजासु च दत्तचित्ता बभूव।

ब्राह्मे मुहूर्ते मुखावरणमपसारितमुषसा। बालभास्करस्यारुणाभा प्राचीदिक्क्षितिजे चकाशे। नगरस्यान्तरालमालोकितं दिव्यप्रकाशेन। अनीकिन्यः प्रभातवेलायामेव युद्धप्रयाणाय सुसन्नद्धा अवर्तन्त। सूर्योदयेन सार्धं तूर्यनिस्साणढक्काभेर्यादियुद्धवाद्यानां निनादैः प्रोत्साहिताः मागधभटाः पदविन्यासैर्धरित्रीमपि कम्पयन्तः कुसुमपुरराजमार्गेषु प्रचरन्तो नगरद्वारेभ्यो बहिः प्रस्थिताः।

मृगाङ्कचिह्नगर्भितया काषायरागरञ्जितया पताकया सुशोभमानं चतुर्भिः सिन्धुजातीयैरुद्बाहुपुरुषोत्सेधप्राप्यपृष्ठभागैः शुभ्रवर्णैरश्वैः सन्नीयमानं राजकीयस्यन्दनमारूढो महाराजो राजहंसः सैन्यनेतृत्वञ्चकार। तदनु श्यामवर्णमश्वमारूढः सेनापतिरासीत्। सत्वरमेव कुसुमपुरनागरिकाणां जयजयघोषैः पुराङ्गनानामक्षत-विकिरणविमिश्रैर्मङ्गलगीतैर्विप्रजनानाञ्चाऽऽशीर्वादैः संसिक्ता रथाश्वगजपदातियुता चतुरङ्गिणी प्रलयकालीनसमुद्र इव विस्तृता तरङ्गायिता मागधभटचमूः कुसुमपुरस्य पश्चिमद्वारतोरणाधस्तात् प्रासरत्। झटित्येव सा मानसारस्याऽवन्तिनाथस्य स्कन्धावारसमक्षमाससाद।

इतस्तु मानसारोऽपि युद्धाय कृतनिश्चयः सुसन्नद्ध एवाऽऽसीत्। राजहंसं तस्य सैन्यसंहतिञ्चाऽऽलोक्य तस्य चमूनामपि युद्धवाद्यानां निध्वानाः ध्वनिप्रतिध्वनिभिर्दिगन्तान् बधिरयामासुः। मानसारस्तु स्वसैनिकानादिदेश -

"अग्रे भूत्वाक्रमध्वम्।"

तत्क्षणमेव द्वयोरेव सैन्यसमूहयोः संघट्टनं सञ्जातम्। पदातीनां पदातिभिरश्वारोहिणामश्वारोहिभिर्गजारोहिणां गजारोहिभिः स्यन्दनाधिष्ठितानाञ्च

स्यन्दनाधिष्ठतैस्तुमुलः सङ्ग्रामो बभूव। नाराचानां खड्गानाञ्चन्द्रहासानां कुन्तानां प्रासानां गदानामन्येषाञ्चाऽप्यायुधानां प्रहारैः कर्तितानां कुट्टितानां सम्मर्दितानां भटानां शरीरावयवानां राशयः सर्वत्र विकीर्णाः। मृतकलेवराणां समूहैः धरित्री व्यापृता बभूव। मांसरुधिरमज्जाकर्दमेषु पदातिसैनिकानामश्वानां करिणाञ्च पादाः पौनःपुन्येन प्रचस्खलुः।

सकलजनप्राणहरे घोरे दारुणे क्रूरे नृशंसे तस्मिन् सङ्गरे राजहंसो मानसारश्च द्वावपि युद्धसमुत्सुकावुत्साहवन्तौ परस्परजिघांसुकौ प्राणाननपेक्षमाणौ सम्मुखमायातौ। नाराचाणामर्धचन्द्राकाराणाञ्च तीक्ष्णाग्राणां शराणां वर्षणमभिवर्षन्तौ तौ द्यावापृथिव्यौ समाच्छादयताम्। मानसारेण प्रक्षिप्तान् शरान् राजहंसो बिभिदे, अथ च राजहंसेन प्रहितान् बाणान् मानसारो मध्य एव चिच्छेद। शरसम्पातैः द्वयोरेव पार्थिवयोर्हयंकषौ गतप्राणौ बभूवतुः, रथवाहकाः हयाः विच्छिन्नकायाः सञ्जाताः, स्यन्दनौ चूर्णीभूतौ। तदनु शरासने चाऽपि खण्डशोभूते धरायां पेततुः। तदनन्तरं कटिनिबद्धकोशाभ्यां सुतीक्ष्णधारौ खड्गावाकृष्य परस्परप्रहारव्यग्रमानसौ तावयुत्साताम्। तदैव भीषणनरसंहारावलोकनजनितविरागभावमापन्नः सूर्योऽप्यस्ताचलशिखरमारुह्य पश्चिमाकूपारपयस्यात्मानं निमज्जयितुमुत्सुक इव ददृशे। भारतीययुद्धाचारपरम्परामनुपालयद्भिर्द्वयोरेव पक्षयोर्भटैः स्वकीयान्यायुधान्युपसंहृतानि। राजहंसो मानसारश्चापि युद्धादात्मानं सन्निवर्त्य स्वं स्वं स्कन्धावारं प्रविवेश।

अपरेद्युर्मगधराजो राजहंसः सुविशालवपुषं हेमकूटाभिधानं दन्तिनमारुह्य समराङ्गणमाससाद। मालवाधिपतिरपि समुन्नतकायं श्यामवर्णं भद्रजातीयमखण्डाभिधानं करिणमारूढस्तत्र समायातः। तुमुलेऽस्मिन् सङ्ग्रामे निशितधारैर्नाराचैः कुन्तैः प्रासैश्च विद्धकायौ पर्वताधित्यकातः प्रवहद्भिर्गैरिकधाराभिरिव शोणशोणितधाराभिः संलिप्तशरीरौ सुतीव्रव्यथाभिश्चीत्कुर्वन्तौ द्वावपि तौ द्विपौ युद्धधरायां निपतितौ। तत्पतनसमकालमेव-निजनिजदन्तिपृष्ठादुत्प्लुत्य तौ भूमिपालौ सैन्धवारूढौ युयुधाते। निजनिजसैन्धवे चाऽपि निपतिते तौ सैवकैरानीतं विविधायुधालङ्कृततलं निजनिजस्यन्दनमारूढौ परस्परप्रहारसमुत्सुकौ विजयाभिलाषिणौ समरवह्नावात्मानौ जुहवाञ्चक्रतुः। प्रहरणजन्यैराघातैः क्षतविक्षतयोः शोणशोणितकाययोरपि तयोरुत्साहः समरोन्मादो वा न लेशमात्रमपि न्यूनतां जगाम।

स्वल्पावशेषे दिवसेऽस्तगिरिशिखरसमाश्रयोत्सुके सञ्जाते सकलभुवनभास्करे भास्करे, मानवीयैरायुधैर्नाऽयं मगधाधिपतिर्विजेतुं शक्य इति विचार्य मालवाधिपतिर्भगवता महाकालेन प्रत्तं खड्गमेकवीरविनाशकरं कोशान्निस्सार्य राजहंसस्य लोहवर्मसुरक्षितं हृत्स्थानं लक्ष्यीकृत्य सम्पूर्णशक्त्या प्रचिक्षेप। तत्क्षणमेवाऽसंख्यतडित्समभासमानः

सकडकडाशब्दं महावेगेन समापतन् स खड्गो राजहंसेन निशितशरनिकरैः खण्डशः कृतोऽप्यखण्डरूपस्त्रिपुरप्रभावातिशयसम्पत्त्या समन्वितो मगधराजस्य सारथिं निहत्य वर्म विभिद्य वक्षःस्थलत्वचं विदार्य हृदयमर्म प्रविवेश। हृदयं विभिद्य महादेवप्रभावास्पदोऽसौ खड्गो मगधाधिपं परित्यज्य व्योम्न्यन्तर्हितः पुनरपि स्वस्वामिनं नीलकण्ठं कैलासशिखरस्थितमुपजगाम। परं तमातङ्ककरं प्रहारमसहमानोऽपि राजहंसः शङ्करोपासको न प्राणेभ्यो वियुयुजे। प्रगाढान्धकारजलनिधिनिमग्नचेतनोऽसौ मूर्छामापन्नो रथ एव निपपात।

प्राणहरे तुमुलेऽस्मिन् सङ्गरे हेतिततिहतिक्षतिव्याकुलाः निहतसारथिनियन्त्रणरहिताः स्यन्दनसैन्धवाः रणभूमिं परित्यज्य वेगेन धावन्तो रथं विन्ध्यवनभूमिं प्रति निन्युः। दैवगत्या ते तमेव वनप्रदेशं प्राप्ताः, यत्र मन्त्रिभी राजशिविरस्य स्थापना कृताऽवर्तत। गहनं वनं प्राप्य क्लान्तिशिथिलकायास्ते हयाः सुविस्तृतगर्तसन्निकटे शाल्मलिवृक्षस्याऽधस्तात् तस्थुः। निशीथान्धतमसेन समन्तादावृतायां झिल्लीझंकारझंकृतायां वनभुवि महाराजराजहंसाधिष्ठितोऽसौ स्यन्दनस्तत्रैव स्थिरो बभूव।

समरप्राङ्गणाद् विद्रुते राजरथे मागधसैनिकाः विगतरणोत्साहाः प्राणरक्षाविकल-मानसाः कान्दिशीकाः बभूवुः। स्वल्पावशिष्टैः सैनिकैः स्वात्मसमर्पणं विहितम्। समरविजयिना मालवाधिपतिना कुसुमपुरं प्रविश्याऽन्तःपुरिकाजनशून्यो राजप्रासादो-ऽधिकृतः। तदनन्तरं शासनं सुव्यवस्थितं कृत्वा जयसिंहाभिधानं सैन्यनायकं शासनप्रबन्धाधिकारे नियुज्य पुनरपि स्वराजधानीमुज्जयिनीं निववृते।

विन्ध्यवने राजहंसस्यन्दनाधिष्ठितस्य स्थानस्य सन्निकट एव मगधमन्त्रिभिः शिविरसंयोजनं विहितमासीत्। समराङ्गणाद् विन्ध्यारण्यदिशि पलायमानाः बहवः सैनिकास्तत्र समागत्य सूचयामासुः -

"मानसारखड्गाहतो महाराजो राजहंसः स्यन्दने निपतितः। स्यन्दनवाहा अपि रथेन सह कस्यामपि दिशि विद्रुताः। न जानीमो वयं कुत्र ते गताः। कुसुमपुरमपि मालवनाथेन मानसारेणाऽधिकृतम्। मागधसैन्यं त्ववसन्नमात्रमेव वर्तते।"

विध्वस्तमागधसैन्येन मालवनायकेन कुसुमपुरमधिकृतं, भ्रष्टो मगधाधिपरथ इति च समाचारान् निशम्य पट्टमहिषी वसुमती भर्तृविरहव्यथामसहमाना समधिकपीडाव्याकुला पतिविहीने जगति जीवनरक्षणं व्यर्थमित्यनुभवन्ती प्राणपरित्यागसमाहितचित्ता रमणानुगमनकृतनिश्चया बभूव। परं मन्त्रिणः पुरोहिताश्च तां समवबोधयन् -

"देवि ! महाराजः स्वर्गङ्गत इति न निश्चितम्। तेन सार्धं भवत्याः सम्मिलनं सम्भाव्यते। पुनश्च महाराजस्य न्यासो भवत्याः गर्भे निवसति। रिपून् समूलं विनाश्य

विजययात्रां कृत्वाऽयं बालकः सार्वभौमः सम्राड् भवितेति ज्योतिर्विदः प्रमाणयन्ति। अतो मरणं ध्रुवमेव नोचितमिति हृदये संप्रधार्य स्वात्मानं संस्तभ्य भवती समयं प्रतिपालयतु। समयः सर्वेषां विकाराणामौषधम्।"

पुरोहितानां मन्त्रिणाञ्च सान्त्वनासम्भृतानि वचांस्याकर्ण्य वसुमती निःशब्दाऽप्य-कथनीयं विरहविह्वलत्वमवाप। अथ व्यतीतेऽर्धरात्रे गहननिद्रानयननिमीलनपरवशाखिलपरिजने शिविरे निद्रया परित्यक्ता दुःसहापारशोकसागरनिमग्नमानसा सा किमपि कर्तुमक्षमा शयनादुदतिष्ठत्। मनसि सोढुमशक्यं गहनमुद्वेजनं धारयन्ती चिन्ताशोकदुःखग्लानिशङ्कादिभावपरिवेष्टिता जीवितमोहविवर्जिता पतिपरायणा यशोमात्राभिलाषिणी चरणनिक्षेपध्वनिमपि परिहरन्ती सा वसुमती सैन्यशिविरस्थानमुल्लंघ्य दैवगत्या तस्यामेव दिशि पादाभ्यां सञ्चचार, यत्र मूर्छितभूभृदधिष्ठितरथयुताः पलायनपरिश्रान्ताः गमनाक्षमाः रथ्याः पूर्वमेवाऽऽगत्य तस्थुः।

ब्राह्ममुहूर्तागमनसमयोऽतिनिकटवर्ती बभूव। गहननिस्तब्धतायुते वनप्रदेशे ग्रीष्मर्तुमध्यकाले सदागतिरपि पवनोऽगतिकः प्रशान्तो ववृते। निश्चलनिष्पन्देषु वनप्रान्तरेषु मध्ये मध्ये कृपणजनहृदयभीतिदायिकाभिः मृगमांसगृध्नुहिंस्रपशुगर्जनाभिः सह क्षुद्रजन्तूनामार्तनादचीत्काररवा अश्रूयन्त। चेतसि वेदनाशङ्कादिभावविह्वला सन्निकटस्थितमपि वस्तुजातमवलोकयितुमपारयन्ती विधिनैवाऽऽकृष्यमाणा सा कीर्तिशालिनी राजपत्नी राजमूर्तिमिव हृदये दधाना तमेव शाल्मलितरुमाससाद, यत्राऽसौ मगधनायकाधिष्ठितो रथोऽतिष्ठत्। तद्रथमपश्यन्ती सा किञ्चिदधोऽवनतां तरुशाखामेकां स्वर्गगमनपथरेखासूचिकामिवाऽऽलुलोके। प्राणपरित्यागकृतनिश्चया सा तत्रैव स्वल्पोच्छ्रायमेकं शिलातलमधिरुह्य कण्ठवेष्टनमुत्तरीयमेव मरणसाधनं विरच्य तस्यार्धभागं तरुशाखायामाबध्य शेषभागञ्च मृणालमृदुले शुभ्रशङ्खसमे कण्ठे सम्पुटीकृत्य कदुष्णनयनजललवान् विमुञ्चन्ती सगद्गदवचोभिर्विलपितुमारेभे -

"प्राणबल्लभ ! त्वद्विरहिता विरसेऽस्मिन् लोके न जीवितुमुत्सहे। भवानपि स्वर्गलोकं गत्वा मां विना विरहव्याकुलहृदयो वर्तिष्यते। आगच्छाम्यहं त्वरितमेव भवदन्तिकम्।"

इति विलप्य सा कण्ठवेष्टनमुत्तरीयग्रन्थिं द्रढयितुमियेष। तस्मिन्नेव क्षणे नीहारनिचयार्द्रनवविकसितकुसुमचयमकरन्दसुवासितशीतलपवनमृदुसरणस्पर्शेन विनष्टसंमोहः समागतचेतनो महीपतिर्वसुमत्याः क्रन्दनध्वनिं शुश्राव। अर्धचेतनावस्थोऽप्यसौ प्राणबल्लभायाः स्वरसंयोगं पर्यचिनोत्। गम्भीरव्रणवेदनासंपीडितोऽक्षम उत्थापयितुमात्मानं क्षीणकण्ठेन स प्रियामाह्वयत् - "वसुमति !"

स तु क्षीणः स्वरो राजपत्न्याः कर्णकुहरं पीयूषबिन्दुवर्षणमिव प्रविष्टः। अहो! अयं तु मगधाधिपतेरेव स्वरसंयोगः। हर्षभरेण समापूरितहृदयायास्तस्याः चित्तमानन्देन पूरितं, चक्षुषी चौत्सुक्येन विशालतां गते। प्राभातिकबालभास्करकरस्पर्शैः पुण्डरीकमिव वदनं विकसितं सञ्जातम्। कण्ठावेष्टनभूतमुत्तरीयं झटित्यपसार्य सा तमेव स्वरसंयोगमनुसरन्ती राजाधिष्ठितं रथमुपजगाम। उपवासावसानसमये व्रतपारण-द्रव्यजातमिव समुत्थानचेष्टापरस्य महीपालस्य वदनं निरीक्षमाणा सा कतिपयक्षणं तथैव तस्थौ। तदनु प्राणबल्लभं निकषा समागत्योपविश्योत्तमाङ्गमुत्सङ्गे निधाय ललाटे कपोलयोर्नयनयोरोष्ठयोश्चिबुके सहसशश्चुचुम्ब। प्राणबल्लभस्याननं वक्षस्यासज्य सा सगद्गदं रुदन्ती मुहूर्तं निःशब्दमश्रूणि मुमोच। तदनु राजानं सावधानतया संवेश्य तरसा रथादवतीर्य त्वरितगत्या धावन्तीव शिविरं सम्प्राप्य सुतीक्ष्णोच्चैः स्वरेण मन्त्रिणः परिजनांश्चाह्वयत्।

विह्वलत्वकातरत्वहर्षानन्दनिर्भराण्यमन्द्रस्वरेणोच्चरितानि वसुमतीवचांस्याकर्ण्य शिविरे प्रभातकालीनगभीरनिद्रानिमग्नानां सर्वेषामेव जनानां निद्रा वा तन्द्रा वा झटिति व्यपगता। प्रियतमो भास्करश्चुम्बिष्यतीति तस्यामुषसि प्राचीदिग्वधूमुखं त्रपयाऽरुणवर्णतां प्रपेदे। सुमतिसुमन्त्रसुमित्रसुश्रुताश्चत्वारोऽपि मन्त्रिणः पुरोहिताः सर्वेऽन्ये च परिजनाः शय्याः परित्यज्य त्वरितमेव समागत्य वसुमतीं परितः समवेत्य सोत्सुकैर्नयनैस्ताम-वलुलोकिरे। मौक्तिकसमोज्ज्वलनिर्मलशुभ्रप्रस्वेदपृषतचर्चितललाटा श्रमजलनिचितमुख-मण्डला दीर्घत्वरितश्वासनिःश्वासपरम्परा सुमनोहरस्तनी सा वसुमती मुखादेकस्यापि शब्दस्योच्चारणेऽक्षमा सङ्केतेनैवाऽनुगमनं निवेदयन्ती त्वरितगत्या शाल्मलिशाखिनं समाससाद। तत्र चार्धचैतन्यावस्थं मगधपालकं पालयितुं स्यन्दनमारुरोह। भर्तुरुत्तमाङ्गमुत्सङ्गे, निधाय सकपोलवदनञ्च वक्षस्यासज्य वाष्पबिन्दुनिचितलोचनैः सावहितं ददर्श।

अनुगामिनो मन्त्रिणः पुरोधसोऽन्ये च परिजनास्तूलपादपच्छायायां संस्थिते राजस्यन्दने शयानं महीपालं ददृशुः। प्राणान् धारयन्तं स्वामिनमवलोक्य तेषां हृदयान्यानन्देन सम्पूर्णानि सन्त्यपि हेतिहतिक्षतावलोकनेन विषादमपि भेजुः। एकैकशस्ते शिष्टाचारक्रमेण स्वामिनं प्रणेमुः। तदनन्तरं सुमतिः प्रणतः करावायोज्य किञ्चिदधिगतचेतनं राजानमुवाच –

"देव! दैवस्य महिमा केन ज्ञातुं पार्यते? भवितव्यता बलीयसी। निहते सूते छिन्नेषु प्रग्रहेषु नियन्त्रणरहिताः रथ्याः विधेरेवाऽऽदेशेन स्यन्दनमाकृष्यैतं वनोद्देशं समानिन्युः। अत्रैवाऽतिसन्निकटमेव राजशिविरम्। शिविरे विश्रामः समुचितः। तत्र समुचितचिकित्सायाः सकलः प्रबन्धो भविष्यति।"

तत्कालमेव सावहितैः सेवकजनैर्महीपतिः शिविरे समानीतः। सुयोग्यानां दक्षाणां भिषजां समुचितचिकित्सया, वसुमत्याः सेवया, सेवकानां परिचर्यया, परिजनानां शुभकामनया मगधजनपदस्य च सौभाग्येन स राजा स्वल्पैरेवाऽहोभिरारोग्यतां प्रपेदे। स्वास्थ्यमापन्नोऽसौ राजा समरक्षेत्रवृत्तान्तमचकथत् -

"तुमुले निहतोभयपक्षभटे रणे लब्धकल्पविजये क्षणे मालवाधिपतिर्मानसारस्त्रिपुरारिलब्धवरबलसंयुतः खड्गेन वक्षःस्थले मे प्रजहार। नीललोहितशक्तिप्रभावाव्यर्थप्रभावेण शतशः खण्डितेनाप्यखण्डितेन तेन खड्गेनाऽऽहतोऽहं स्यन्दनभूमावेव न्यपतम्। दैवगत्या रथ्या अपि घुणाक्षरन्यायेन विन्ध्यवनोद्देशं तत्रैव समायाता यत्राऽस्माकं शिविरमवर्तत।"

करावायोज्य तदा सुमन्त्रो मन्त्री विनयसम्भृतवचोभिरुवाच -

"देव! विधिर्बलवत्तमः। सहायीभूते विधौ पुरुषार्थाः फलन्ति। पुरुषार्थान् विना यद्यपि न फलन्ति कार्याणि, तथापि विधेरानुकूल्यमनिवार्यम्। विपरीते विधौ वयमद्य दशामेतां सम्प्राप्ताः। परमनुकूले तस्मिन्नेव पुनर्वयं मानसारं पराजित्य वैरनिर्यातनं करिष्यामः। अनुकूलं कालं प्रतीक्षमाणैरस्माभिः सैन्यव्यवस्था सुदृढीकरणीया। अर्थव्यवस्था च संसाधनीया।"

तदैव मृदुभाषिणी वसुमती स्मितविभूषितरदनच्छदा मन्द्रमधुरस्वरेण प्रोवाच -

"आर्यपुत्र! निखिलेऽस्मिन् भरतखण्डे सकलभूमिपालमण्डले तेजस्विनामपि तेजस्वितमो भवान् राज्ञामप्यधिराजो राज्याद् भ्रष्टोऽस्मिन् निविडतमे पथिकैरप्यगम्ये विन्ध्यवने निवसतीति विधिरेव बलवान्। जलबुद्बुदसदृशीयं राजलक्ष्मीः सततञ्चञ्चलाऽस्थिरा च। सम्पत्तयो भवन्ति नश्यन्ति च। अद्य भवान् राज्याद् भ्रष्टोऽपि पुना राज्यमधिकरिष्यति। दैवादेव धनानि भवन्ति यान्ति च। प्राचीनेतिहासमपि विलोकयतु भवान्। विधिना राज्याधिपत्येभ्यो विभ्रष्टाः नलहरिश्चन्द्ररामयुधिष्ठिरादयो नरपतयो महाप्रतापशालिनः पुनरपि राजसिंहासनपदेषु सुप्रतिष्ठापिताः। धैर्यं धृत्वा भवान् कालोचितं प्रतीक्षताम्। बलसञ्चयार्थञ्च प्रयतताम्। पुनरप्यनुकूलो विधिर्भविष्यति।

मन्त्रिणां राजपत्न्याः वसुमत्याश्च वचोभिर्नितरामाश्वस्तहृदयो राजा प्रशान्तचित्तो बभूव। धैर्यं धृत्वा सैन्यस्य कोशस्य च सङ्ग्रहे प्रयत्नशीलोऽवर्तत। एकस्मिन् समये मगधाधिपो मनसि चिन्तयामास -

"शिवसहाय एव मानसारो मां पराजेतुं समर्थो बभूव। मयाऽपि तस्य देवाधिदेवस्य साहाय्याधिगमनार्थं प्रयतनीयम्।" इति विचार्य वसुमत्या सहाऽसौ नियमपरायणो भूत्वा एकाग्रचित्तः शिवोपासनायै ; ह्यात्मानं समर्पयामास।

राजहंसस्य महीपतेः स्कन्धावारस्य नाऽतिदूरे विन्ध्यारण्ये रेवासरित उद्गमनस्थानभूतोऽमरकण्टकाभिधानः शिलाखण्डगहनः पर्वतीयप्रदेशोऽवर्तत। अस्यां शैलप्रस्तरभूयिष्ठायां

भुवि तालतमालसालशिंशपाशाकशाल्मलिबिल्वामलकीकिङ्किरातादयो वृक्षाः विविधाः क्षुपाः लताः वल्लर्यश्च सघनत्वाद् दिवाकरकराणामपि भूमिस्पर्शं निवारयन्ति स्म। तत्र विविधप्रजातयो वन्यजन्तवः - सिंहव्याघ्रचित्रकवृकमेषगण्डकमहिषगजशृगाललोमशमृगशशकादयो न्यवसन्। नानाविधाः सरीसृपाः कीटाश्च प्रासरन्। विस्मयकारिणां विविधानां वयसां विरावैस्तद्वनं प्रतिध्वानितं सततमभवत्। पर्वतीयवनभुवो मध्ये स्वर्णसरितस्तटे कुलपतेर्वामदेवस्याऽऽश्रमपदं गुरुकुलं विद्याध्ययनकेन्द्रस्थानमुच्चशिक्षाप्रबन्धसमन्वितं समवर्तत। गुरुकुलस्याऽऽचार्येभ्योऽग्रजन्मभ्योऽभीप्सितविविधविद्याकलाज्ञानविज्ञानानि शिक्षितुं सुदूरवर्तिभ्योऽपि प्रदेशेभ्यो विद्यार्थिनः समागत्याऽत्र ब्रह्मचर्यव्रतं पालयन्ति स्म। मगधजनपदनिकटवर्तित्वादत्र मागधपौरजानपदसन्ततयो बाहुल्येनाऽवर्तन्त। एकस्मिन्नवसरे मगधराजेन महर्षिवामदेवचरणेषु प्रणामाय गन्तुं निश्चितम्।

दिव्यकान्तिसमुज्ज्वलवदनमण्डलेन त्रिकालज्ञेन कुलपतिना तपोधनेन वामदेवेन विनयभावभावितो मगधाधिपतिः समुचितशिष्टाचारवचोभिः सम्मानितः। चरणयोः प्रणमन्तं तं नरपालं स कुलपतिर्द्वयोरेव करयोः समुत्थाप्य स्नेहभरितदृष्टिवृष्टिभिरार्द्रीचकार। राजानुगामिनो मन्त्रिणः पुरोधसः परिजनाश्चाऽन्येऽपि महर्षेः पादपङ्कजयोः प्रणामाञ्जलीन् निवेदयामासुः। महर्षिरपि द्वौ करावुत्थाप्य साशीर्वादवचोभिस्तान् कृतार्थयामास। तदनु विहितातिथ्यं विगतपथश्रमं मगधराज्याभिलाषिणं सोत्सुकनयनावलोकनपरं चन्द्रवंशचूडामणिं नरपालं विदितहृदयान्तर्गताभिप्रायस्त्रिकालज्ञस्तपोधनः समुवाच -

"राजन्! साम्प्रतं नाऽनुकूलो विधिस्त्वयि। अनुकूलस्य समयस्य प्रतीक्षा करणीया। वसुमतीगर्भजातो राजसुतः सर्वानपि रिपून् विजित्य वैरनिर्यातनं कृत्वा नूनं राज्यमधिकरिष्यति। कञ्चन कालं तूष्णीम्भावेन भवता शक्तिसञ्चयप्रयासरतेन भाव्यम्।"

तपोधनवचांसि निशम्य राजाऽपि विगतचिन्ताभारः परमाशाप्रहृष्टचेताः स्वस्कन्धावारं निववृते।

एकस्मिन् प्रातःकाले बालभास्करकरनिकरारुणे सकलभुवने प्रहर्षोज्ज्वलमुखमण्डलो मगधराजो मन्त्रिणो वसुमतीञ्चाऽऽहूयाऽचकथत् -

"परमपुरुषमहादेवध्याननिमग्नोऽहं रजन्यां गहननिद्रासमालिङ्गितकायोऽस्वपम्। सहसा काश्चन दिव्यानुभूतयो निद्रां मे बभञ्जुः। सहसैव शयनं परित्यज्योत्थिते मयि गिरिजासहितगिरीशसमधिष्ठितः शिववाहनो वृषभाधिपतिर्नन्दी नभसोऽवतरन् नयनगोचरीभूतः। स्मितसुशोभितविकसितवदनपुण्डरीकस्य भवस्य दिव्याभया सकलं जगदालोकितं बभूव। निकषा मां समागत्य जगतः पितरौ पार्वतीपरमेश्वरौ वृषभादवरुरुहतुः। चरणयोः प्रणमन्तं मां सकलजगज्जननी भगवती भवानी शिशुमिव

द्वयोः करयोर्वहन्ती जगत उत्पत्तिस्थितिप्रलयहेतोरगदङ्करस्य शङ्करस्य मुखमण्डले नयने व्यापारयामास। प्रभुरपि ललाटे मे दक्षिणकरतलं निधाय शब्दसमुच्चारणासमर्थमौत्सुक्यगर्भप्रहर्षाविष्टचित्तमाशीर्वादवचोभिरुपचकार। स्मितविभूषितवदनोऽसौ मामुवाच -

"राजहंस ! त्वं मे परमो भक्तः। मानसारोऽपि भक्त उपासको मे प्रियः। मया दत्तेनाऽऽयुधेन स ते वक्षसि प्रजहार। स प्रहारस्तु मद्दत्त एवाऽभवत्। परमधुना तस्य शस्त्रस्य प्रभावो निःशेषीभूय व्यपगतः। अनया ते भक्त्याऽतितरां प्रसीदाम्यहम्। अहर्निशं त्वं सपत्नीको मां भजसे समाराधयसि। वसुमती ते महिषी परमतेजस्विनं सुतमचिरेणैव प्रसविष्यति। अमिततेजःपराक्रमसमन्वितोऽसौ बालकः सकलविद्याकलामर्मज्ञश्चतसृणां दिशां जेता भरतखण्डस्य सर्वेषां महीक्षितां शिरस्सु विनयावनतेषु पदसञ्चारणं कृत्वा चक्रवर्तिपदमलङ्करिष्यति। विद्याग्रहणयोग्यायुषा समलङ्कृतोऽसौ बालकस्त्वया महर्षेस्तपोधनस्य कुलपतेर्वामदेवस्य गुरुकुलं प्रेषणीयः। षोडशवर्षीयं तं सर्वाः विद्याः कलाश्च समुद्रं सरिज्जलानीव प्रवेक्ष्यन्ति। सम्पूर्णे दीक्षान्तसंस्कारे गुरुभिर्गुरुकुलाद् विसृष्टः स दिग्विजयाय प्रतिष्ठास्यते। तव मन्त्रिणां कुमारास्तस्य सहायाः भविष्यन्ति। समयं प्रतीक्षमाणस्त्वमधुना पराक्रमस्य विचारांस्त्यज।"

इति कथयित्वा भवो भवानीसहितः पुनरपि वृषभमारुह्य व्योम्न्यन्तर्हितः। अहमपि प्रभुप्रसादप्रसन्नचेताः शय्यायां पतितो निद्रादेव्याऽनुगृहीतः।"

राज्ञस्तदद्भुतं सकलभुवनजनानन्दकरं पुनरप्युन्नतिसूचकं स्वप्नवृत्तं निशम्य सर्वे जनाः हर्षातिशयं प्रापुः। तदनन्तरं मन्त्रिणो रेवारोधसि स्थायिनिवासं समुचितं मत्वा सकलं प्रबन्धमकुर्वन्। सर्वतो गहनवनवनस्पतिवानस्पत्यक्षुपवल्लरीलतासमाच्छादितानि स्थानानि स्वच्छीकृत्य समतलानि च विधाय कुशलशिल्पिभिः कारुभिः कुटीराणि निर्मितानि। राजपरिवाराय, मन्त्रिभ्यः, पुरोधोभ्यः, सेवकेभ्यश्चाऽन्येभ्यः प्रजाजनेभ्यो यथायोग्यानां निवासानां प्रबन्धरचना विहिता। सैन्यसमूहस्य च कृते विस्तृतभूमिस्थितस्य स्कन्धावारस्य निर्मितिर्बभूव। पुष्पपुरादानीतो राजकोषोऽतिशयेन सहायकोऽवर्तत। तत्रत्यानां वन्यजातिजनानामपि सहयोगः साकल्येन राजहंसेनाऽधिगतः। शत्रवस्तत्र न समागच्छेयुरिति सकलः सुरक्षाप्रबन्धोऽपि विहितः। राजकीयचाराः मन्त्रिभिः सकलासु दिक्षु प्रहिताः। प्रचरन्तश्च ते सकलभुवनवृत्तान्तान् सततं प्रेषयामासुः।

# द्वितीया-पीठिका

# कुमाराणां जन्म, शिक्षा प्रयाणञ्च

# द्वितीया-पीठिका

## कुमाराणां जन्म, शिक्षा प्रयाणञ्च

अथ स्वल्पैरेवाऽहोभिः सम्पूर्णे गर्भावधौ राजपत्नी वसुमती शुभलक्षणसम्पन्नं हस्तयोः पादयोश्च चक्रवर्तिपदरेखालाञ्छितं परमतेजस्विनं सुतं सुषुवे। सकलं तद् राजशिविरमानन्दातिरेकसमुच्छ्वसितं समजायत। हर्षसमारोहसूचकानां वाद्यानां निनादैर्वनप्रान्तराणामन्तरालानि निनादितानि।ताललयरसज्ञानां नृत्यन्तीनामङ्गनानाञ्चरणनिःक्षेपध्वनयः कङ्कणपायलनूपुराद्यलङ्काराणां रवाः सुमधुरगीतिकास्वराश्च कर्णेषु पीयूषद्रवमिवाश्च्योतयन्तो शिविरनिवासिजनैः सह वन्यजन्तूनप्यनिर्वचनीयेन हर्षामोदभरेण सम्भृतान् विदधुः।

सुतोपब्धिजन्योल्लाससम्भृतमानसो महीपतिः समयानुरूपैर्महार्घैः पारितोषिकैः सेवकवृन्दं, दानदक्षिणादिभिश्च विप्रवर्गं प्रसादयाञ्चक्रे। कुलपतिर्वामदेवोऽपि राजचरैः सुसमाचारान्निशम्य शिविरमागत्य राजोचितजातकर्मसंस्कारसम्पादनेन तं राजसुतं विभूष्य दश दिनानि तत्रैव राजशिविरे स्थितो नामकरणसंस्कारेण राजवाहननाम्ना समलञ्चकार।

वसुमतीगर्भधारणसमये चतुर्णामपि मन्त्रिणां सुमतिसुमन्त्रसुमित्रसुश्रुतानां पत्न्योऽन्तर्वत्न्योऽवर्तन्त। ताश्चाऽपि क्रमशः सुतान् सुषुविरे। मगधाधिपतेः शिविरमानन्दततियुतं नित्यमेव नवनवैर्हर्षोत्पादकोत्सवैर्भासमानमलक्ष्यत। जातकर्मसंस्कारानन्तरं नामकरणसंस्कारे सम्पन्ने सुमतिसुतः प्रमतिः, सुमन्त्रसुतो मन्त्रगुप्तः, सुश्रुततनयो विश्रुतः, सुमित्रसूनुर्मित्रगुप्त इति संज्ञामवाप। अथ च ते चत्वारोऽपि शिशवो राजनन्दनेन राजवाहनेन सह बालकेलिभिर्महीपालं मन्त्रिणश्चानन्दपयोनिधिसलिलेषु स्नपयन्तो बालशशिनिभाः शिविरान्तरालं सन्दीपयन्तः क्रमशोऽवर्धन्त।

अथैकस्मिन् दिवसे मनोरथसारसर्वस्वया प्रियया वसुमत्या सार्धं राजहंसो मगधेशः परमशिवस्य जगदीश्वरस्य लीलाविषयकं जगतश्च वैविध्यविषयकं वार्तालापञ्चकार। संनिकटञ्च पञ्चाऽपि बालकाः बालोचितक्रीडासु निमग्ना आनन्दोल्लासैरव्यक्तवर्णरमणीयवचोभिः सर्वानानन्दयन्तोऽवर्तन्त। तस्मिन्नेव समये शिरसि पिङ्गलजटाजूटसुशोभितो मुखे कर्बुरश्मश्रुस्त्वचि भस्मावलिप्तः समुद्गतशिराजालजटिलस्तापसः स्वल्पवयसं सुकुमारं शिशुमङ्के दधानस्तत्र समायातः। अवनतेन शिरसा राजानं प्रणम्य शिशुं राज्ञश्चरणयोर्निधाय विनयवचोभिरसौ कथयामास-

"राजन् ! महर्षेर्वामदेवस्य शिष्योऽहं तपोधनस्तत्रैवाऽऽश्रमे निवसामि। गुरोरादेशेन कुशसमिदाहरणाय सुदूरं गहनं वनमहमगच्छम्। तत्र सघनपत्राच्छादितपर्कटपादपस्याऽधस्तादधोनिहितवदना निःशब्दं रुदन्त्यश्रूणि निपातयन्ती श्यामवर्णैका प्रमदा मयाऽवलोकिता। निकटं गत्वा रोदनकारणं मया पृष्टा सा मुखमुन्नमयामास। चक्षुर्भ्यां प्रवहन्त्यश्रुधारा कपोलयोः संसरन्ती समुन्नतपयोधरतटसंघट्टनेन विशीर्यमाणा क्रमशः परितो विसरन्ती यवससमाच्छन्नायां भुवि निपत्य धरागर्भमेव समाविशत्। पुनः पुनरनुरुध्यमाना सादरं सविनयं च पृष्टा मयि सकरुणां दृष्टिं निपात्य नलिनमृदुलसुकुमारकरसाहाय्येन वस्त्रमुत्थाप्य नयनस्रुतसलिलकणान् तनुवस्त्राञ्चलेन प्रोञ्छ्य सा सगद्गदमित्थं बभाषे -

तपोधन ! मगधराजमालवराजयोरन्योन्यं सकलजनघस्मरस्य तुमुलस्य सङ्गरस्य सम्प्रवर्तनात् कञ्चित्कालं पूर्वमेव वसन्तमहोत्सवप्रसङ्गे महाराजेन राजहंसेनाऽऽमन्त्रितो मिथिलाजनपदाधिपतिः प्रहारवर्मा सपरिवारं सपरिजनं कुसुमपुरं समाजगाम। वसन्तोत्सवे प्रमोदानन्दमहासवेषु मासमेकं हर्षभरेण मित्रैः सार्धं व्यतियाप्याऽसौ पुनर्मिथिलां प्रति निववृते। भागीरथीं समुत्तीर्य मिथिलागामिनं पन्थानमवलम्ब्यासौ प्रातिष्ठत। वनमार्गेण च स्वल्पसंख्यसैन्येन सह प्रयान्तं तं महाबलं सुविशालशबरसैन्यं प्रबलवेगेनाऽऽचक्राम। मिथिलेश्वरस्य सा स्वल्पीयसी सेना सहसा सम्प्राप्तां तां विपदं सोढुमक्षमा बभूव।

मिथिलेश्वरस्य धात्रीभावेन नियुक्ताऽहं तस्य द्वयोरर्भकयोः स्तनन्धययोः परिपालिका वर्ते। एकस्तु स्तनन्धयो ममोत्सङ्गमलङ्करोति स्म द्वितीयश्च मम त्रयोदशवर्षकल्पायाः दुहितुरुत्सङ्गम्। शबरसैन्यस्य प्रचण्डमाक्रमणमसहमानं मिथिलेश्वरसैन्यं विनष्टम्। केचन भटाः शौर्यं प्रदर्शयन्तस्तस्मिन्ननाहूतेऽसम्भाविते समरे निहताः नाकपृष्ठमारुरुहुरन्ये च व्रणविद्धशरीराः धराचुम्बनमकुर्वन्। अपरे च भयविह्वलाः प्राणान् रक्षन्तो कान्दिशीकाः सन्तः पलायनञ्चक्रिरे। सः सुसमृद्धः समुज्ज्वलः सुसंस्कृतो राजपरिवारोऽपि विप्रकीर्णो बभूव। प्राणरक्षणमेव परमं धर्मं मन्यमानास्ते सर्वेऽपि यामेव दिशं लेभिरे तामेवाऽऽशिश्रियुः। तदनन्तरं भयानकाकारैः शबरैः सकलं सामग्रीजातं प्रसह्याऽपहृतम्।

तस्मिन् प्रलयकाले मरणभयदायिनि जननीदुहितरावावां भीतभीते केनाप्यलक्षिते तूष्णीम्भावमवलम्बमाने निष्क्रम्य निकटवर्तिनि गहनकटम्बस्तम्बावृतमुखे गर्ते प्रच्छन्नभावेन समाशिश्रियाव। प्रस्थिते च शबरसैन्ये गर्ताद् बहिरागत्य पूर्वकथितसङ्गरस्थलीसमीपं सम्प्राप्तयोर्द्वयोरप्यावयोर्हृदयगतिर्निरुद्धेवाऽभवत्। अतिभयजनकं हृदयविद्रावणं नयनोद्वेग-

करञ्च तत्रत्यं दृश्यमवर्तत। सर्वतो रुधिरपङ्कसंलिप्तानि मृतसेवकशरीराणि परमप्रभुसन्देशमिव प्रासारयन् - "क्षणभङ्गुर एष लोको जलबुद्बुदवच्च जीवनमिति"। कश्चिदपि जीवितंजनस्तत्र न मे नयनगोचरतां गतः।

किं कुर्वः, क्व गच्छावः, कोऽन्योऽनयोः राजसुतयोः सुरक्षां विधास्यति? इति प्रश्नचिन्तासन्तानविलोडितचित्तयोरावयोः कर्णेषु कस्यचिच्छार्दूलस्य हृदयविदारणकराणि गर्जनानि प्रविष्टानि। आवाभ्यां सम्मुखमवलोकितम् -

"प्रज्ज्वलद्वक्त्रनेत्रो विशालाकारो हृदयगतिनिरोधकश्चित्रविचित्रचित्तिकाचितसकल-गात्रः शार्दूलो मुखं व्यादाय सुतीक्ष्णदन्ताग्रान् प्रदर्शयन् यमदूत इवाऽऽक्रमितुमुद्यतते।"

तथाभूतं प्राणभयोपस्थापकं दृश्यमवलोक्योत्सङ्गनिहितार्भकयोरावयोः पलायनप्रक्रमचित्तयोः शिवगण इव पराक्रमशौर्यसम्पन्नः शबरयुवको वामस्कन्धे धनुः वामेतरस्कन्धपृष्ठभागे च शरपुङ्खचितं तूणीरं दधानस्तत्र सहसा समाजगाम। एकेनैव शरेण शूरस्य तस्य कर्णान्ताकृष्टधनुर्ज्याप्रक्षिप्तेन प्रहतोऽसौ वराकः शार्दूलो यमलोकमार्गं प्रातिष्ठत। परं तस्मिन्नव्यवस्थासम्भ्रमप्रसङ्गे राजतनयो ममोत्सङ्गात् प्रभ्रष्टो विक्षिप्य सुदूरं पतितः। द्वितीयं राजतनयं क्रोडे वहन्ती सुता मे न जाने कुत्र गता। आघातेनाऽनेन विगतचेतनाऽहं धरायां पतिता।

तस्मिन्नेव समये दयार्द्रोदारस्वभावो गोपस्तत्रैकः समायातः। कथञ्चिन्मयि चैतन्यं सञ्चार्याऽसौ मधुरवचनैः समाश्वास्य मां निजकुटीरं समानिनाय। स्वस्थीभूताऽहं गोपकुटीरान्निष्क्रम्य तं राजतनयं स्वात्मनश्च दुहितरं गहने वनोद्देशेऽनुसंदधती यत्र तत्र परिभ्रमामि। श्रमक्लान्तशरीरा पर्कटवृक्षच्छायामिमामाश्रयमाणा, किं कुर्यामिति नयनयोर्निस्सरद्भिरश्रुपृषतैर्धरित्रीमार्द्रयामि।"

श्यामवर्णकायायास्तस्याः प्रमदायाः वृत्तान्तं श्रावयंस्तपोधनोऽसौ क्षणं विरम्य पुनरपीत्थं बभाषे -

"मिथिलेश्वरसुतो निश्चयेन तेनैव शबरसूनुना नीतो भवेदिति मया विचारितम्। कदाचिदेते शबरा वन्यास्तं बालकं विन्ध्यवासिन्यै देव्यै समुपहरेयुरिति तस्य प्राणभयमाशङ्क्य तरसा धावन्नहं देवीमन्दिरं प्रति प्रस्थितः। मन्दिरं निकषा समागत्य मया तत्राऽवलोकितम् -

महान् समुदायः शबराणां तत्र मन्दिरस्य प्राङ्गणे शिशुमेकं परिवृत्य समवेतो विद्यते। क्रूरहृदयशबरजनमध्ये भूमौ शयानो हस्तपादमितस्ततो प्रक्षिपन् स शिशुस्तारस्वरेण क्रन्दति। बलिपशुमिव तं नरशिशुं देव्यै विन्ध्यवासिन्यै समुपहर्तुं शबरास्ते विचारयन्ति स्म।"

तस्य शबरसम्मर्दस्य पृष्ठभागेऽहमतिष्ठम्। एकेन शबरेण प्रोक्तम् -

"देव्याश्चरणयोः समर्पितमेनं बालकं खड्गेन शिरोविच्छिन्नं कुरुत।"

अन्यः प्रोवाच -

"तरुशाखायां लम्बमानतया बद्ध्वा कुठारेण शिरच्छित्वा देव्याश्चरणयोरर्पणीयोऽयं पशुबलिः।"

इतरोऽचकथत् -

"भूमावर्धप्रमाणं गर्ते निधाय शिरच्छित्त्वा देव्यै बलिरूपेणाऽर्पणीयः।"

परं मया तस्य शिशोः प्राणानां रक्षा विहिता। केचन शबराः मे परिचिता अवर्तन्त। झटित्येव तानुपगम्य मया कथितम् -

"हे हे शबरयुवानः ! महर्षिवामदेवशिष्योऽहं तत्रैव तपोवने निवसामि। मम भगिनी स्तन्धयं क्रोडे वहन्ती मया सह समागच्छति स्म। मार्गश्रमजनितक्लान्तशरीरावावामेकस्मिन् गहनवनप्रदेशे शिलातले विश्रामाय स्थितौ। अथ चाऽहं तृषा शुष्कविह्वलकण्ठायै भगिन्यै जलान्वेषणार्थमगच्छम्। अविलम्बेनैव जलमानीय मया दृष्टा भगिनीबालकशून्यं तत्स्थानम्। सावहित्थं चिरमन्विष्यन्नपि नाऽहं तयोः कमपि जनं प्रेक्षे। यदि भवत्सु कस्यापि सहृदयस्य जनस्य दृष्टिपथं समायातः कोऽपि, वदतु मां तयोर्वृत्तान्तम्।

तेषामतिनृशंसचरितानामपि काऽपि सहृदयता तत्राऽवशिष्टाऽविद्यत। तत्रोपस्थितशबर-जनेष्वेव कश्चिन्मामुवाच -

"तपस्विन् ! भवद्भगिनीविषयकं न त्वहं किञ्चिदपि जाने। परन्त्वत्र शिशुरेको वर्तते। यद्ययमेव भवतां भागिनेयस्तन्नयतु भवानेनम्।"

कथयत्येव शबरनायके तस्मिन्, मम भागिनेयोऽयमिति कथयित्वाऽहं तं शिशुं झटित्युत्सङ्गे कृत्वा शबरेभ्य आशीर्वादान् वितीर्य तत्स्थलं परित्यज्य तरसा प्राचलम्। तदनन्तरं चिरमन्विष्यताऽपि मया सा धात्री नाऽवलोकिता। अथ तं बालकं वक्षसि संश्लिष्याऽहं तपोवनं गत्वा महर्षये सकलं वृत्तान्तं न्यवेदयम्। महर्षिणा प्रोक्तम् -

"वत्स ! मगधाधिराजराजहंसस्य मित्रस्य प्रहारवर्मणोऽयं सुतः। अतस्तत्रैवाऽयं प्रापणीयः। गच्छ त्वं मगधेशम्।"

गुरूणामादेशं परिपालयन्नहं शिशुनाऽनेन सहाऽत्र समायातः। साम्प्रतं बालकस्याऽस्य विषये भवानेव प्रमाणम्। भवानेवाऽस्य पालकः।"

इति निवेद्याऽसौ तपोधनोऽर्भकं तं प्रहारवर्मसुतं राज्ञे समर्प्य आशीर्वादान् वितीर्य ततः प्रातिष्ठत। राजहंसेनाऽपि महाराजेन मित्रस्य मिथिलेश्वरस्य सन्ततिर्वसुमत्यै

समर्पिता। स तामुवाच -

"आर्ये ! प्रहारवर्मसुतोऽयमर्भकः। पुत्रवदयं पालनीयो रक्षणीयश्च।" वसुमत्यपि तं शिशुमङ्के निधाय वक्षस्याशिश्लेष। नामकरणसंस्कारेण स शिशुरुपहारवर्माभिधानेन विभूषितः।

अथाऽन्यस्मिन् दिवसे मगधनायकः स्नानाय महिष्या वसुमत्या महता च परिजनेन सार्द्धं नर्मदातीरं जगाम। प्रतिनिवर्तमानास्ते सर्वेऽपीतस्ततो भ्रमन्तः शबरग्राममेकं निकषा गच्छन्तो मार्गनिकटस्थितमेकं पर्णाच्छादितमुटजमवलोकयामासुः। पर्णोटजाद् बहिरेव प्राङ्गणेऽतिश्यामवर्णशरीरा द्रोणकाकसदृशी शबरयुवतिर्वयसा षोडशवर्षीया हिमशुभ्रवर्णमेकं शिशुमङ्के दधानोल्लासयन्तीवाऽविद्यत। कुतूहलसमाकृष्टो राजा शङ्कितो बभूव। कोऽयं कस्य चाऽयं शिशुः कथञ्चाऽस्याऽत्राऽऽगमनं सम्भवेदिति समीपमागत्याऽसौ राजा शबरकामिनीं पप्रच्छ -

"शबरबालिके ! शुभ्रगौरवर्णः प्रशस्तलक्षणलाञ्छितोऽयं शिशुर्न तव कुलालङ्कारो लक्ष्यते। सत्यं ब्रूहि, कथमस्याऽत्राऽऽगमनं सञ्जातम्?"

सा शबरप्रमदा श्यामसुरूपं वदनमुन्नमय्य सुविशालनयनाभ्यां नरपतिमवलोक्य भयसंभृतावरुद्धेन कण्ठेन राजानं प्रोवाच -

"आर्य ! जनकेन सह पुष्पाणि फलानि चाऽऽहर्तुं वनाभ्यन्तरं भ्रमन्त्या मया कासारस्यैकस्य तटवर्तिनि भूभागे श्यामाङ्गी काचिद् युवतिः क्षतविक्षतकाया भूमौ शयाना निरीक्षिता। तत्समीपमेकः शिशुस्तारस्वरेण क्रन्दमानो दिशामन्तरालानि व्याकुलयति स्म। समीपमागतेन जनकेन कुतूहलगर्भैर्वचोभिः पृष्टा सा उवाच -

विदेहेश्वरस्य प्रहारवर्मणोऽर्भकस्य प्रतिपालिकायाः धात्र्याः दुहिता कदाचिन्नरपालेन सह कुसुमपुरान्मिथिलां निवर्तते स्म। मार्गे शबरसैन्येनाऽऽक्रान्ते राजपरिजने शिशुमेकं स्वोत्सङ्गे वहन्ती सा प्रतिपालिका तत्सुता च उभे अपि प्राणरक्षायै इतस्ततो भ्रमन्त्यौ मार्गभ्रष्टे परस्परं वियुयुजाते। शिशुमेनं क्रोडे धारयन्ती धात्रीसुता वने भ्रमन्ती मार्गाद् विभ्रष्टा शिलाखण्डेनैकेन सव्येतरपादे प्रहता प्रस्खलन्ती क्लान्तकायाऽत्र विश्रामाय समुपविष्टा। समीपस्थशबरपल्लीनिवासिनी वनेषु विचरन्ती करुणार्द्रचित्ताऽहमत्र समायाता। कुशलं पृष्टा सा धात्रीदुहिता शिशुमेनं मे क्रोडे निधाय तृषार्ता जलमन्वेषणाय गता नाऽधुनाऽपि निवर्तते। तामन्विष्यन्ती तीक्ष्णशिलाग्रविद्धा क्षतविक्षतकायाऽहं भूमौ न्यपतम्। प्राणान्तो मे सत्वरमवश्यम्भावी। न जाने क एनां राजसन्ततिमभिरक्ष्यति पालयिष्यति वा। इति कथयित्वा सा सुदीर्घमुष्णञ्च निःश्वस्य मूर्छयाऽभिहता चेतनां तत्याज। अथ क्रन्दमानं शिशुमङ्के निधायाऽहमत्र निजशबरपल्लीमाजगाम।"

"प्रहारवर्मणो मिथिलेश्वरस्य द्वितीयोऽयमर्भक इति उपहारवर्मणो भ्राता", मगधनाथेनेदं विचारितम्। शबरप्रमदायै तस्यै किञ्चिद् धनं दत्त्वा स राजा शिशुमग्रहीत्। मनसि प्रसन्ना वसुमत्यपि तं शिशुं निजमेवाऽपत्यं मन्यमाना स्वाङ्के कृत्वा वक्षस्यासज्य शिविरमाजगाम। ससमारोहं स बालकोऽपहारवर्मेति नामधेयेन चिह्नितः।

अथैकस्मिन् दिवसे मगधमहीपती राजहंसः, राजपत्नी वसुमती, सुमतिसुमन्त्र-सुश्रुतसुमित्राश्चत्वारोऽपि मन्त्रिणो मध्याह्नोत्तरवेलायामाहारादिव्यापारेभ्यो निवृत्ताः सन्तः शिविरमण्डपाद् बहिरागत्य सूर्यसन्तापसंवरणसमर्थस्य सप्तपर्णवृक्षस्याऽधस्ताच्छायायां वेद्यां समुपविष्टाः मिथो विनोदवार्तासु संलग्नचित्ता अवर्तन्त। तस्मिन्नेव समये तत्र महर्षेर्वामदेवस्याऽन्तेवासी सोमशर्मा तपोधनस्तत्र उत्सङ्गेऽतिसौन्दर्यगुणसुशोभितं गौरवर्णं तेजःसमुद्दीप्तवदनं शिशुमेकं दधानः समाजगाम। स्तनन्धयं पृथिवीपालकस्य मगधनाथस्य चरणयोर्निधाय मन्त्रिभिरुपहृतमातिथ्यमुपभुज्य सोमशर्मा राजानमुवाच -

"राजन्! सूर्योदयात् प्रागेवाऽहमुषसि प्रातःकालीनशौचस्नानादिनित्यकर्मसम्पादनाय स्वर्णसरितस्तीरमुपायातः। निवर्तमानोऽहं वनमध्यभूमिभागमार्गेणाऽऽश्रमं गच्छन् वन्यसमिधां पुष्पफलमूलाना ञ्च चयनचिन्तया मुख्यं मार्गं परित्यज्य गहनतरुलताक्षुपाच्छन्नं दुर्गमप्रवेशमरण्यमध्यं प्राविशम्। तत्र मया वृद्धैका आकृतिवेशभूषादिभिर्विदेशीया प्रतीयमाना नवजातं शिशुमेकं वस्त्राञ्चलेषु धारयन्ती कस्याऽपि जनस्याऽन्वेषणे रता इतस्ततो भ्रमन्ती अवलोकिता। समुपगम्य प्रणम्य च मया सविनयं पृष्टा सा करुणरसधारामिवोद्गिरन्ती वाष्पगद्गदकण्ठा समुदतरत् -

"तपोधन! बङ्गसमुद्रस्य परे पारे विद्याव्यापारसंस्कृतिसमुदयसमृद्धः सुवर्णद्वीपो वर्तते। पुरा कदाचिद् दक्षिणभारतभुवः समागत्य कश्चित् पल्लववंशीयो राजकुमारो द्वीपमेतं विजित्य सुशासनव्यवस्थां समस्थापयत्। क्रमशश्च समयक्रमेण परम्परया समधिकृतशासनभरैस्तद्वंशीयैर्नरपतिभिर्दक्षिणपूर्ववर्तिनः सर्व एव द्वीपाः विजिताः सुविस्तृतं साम्राज्यञ्च निर्मितम्। अधुनाऽप्यस्य सुवर्णद्वीपस्य सम्राजां सुशासनं परःसहस्रक्रोशान्तरालसुविस्तीर्णनीलनीरपयोनिधिस्थितेषु द्वीपेष्वप्रतिहतगतिकं वर्तते।

सुवर्णद्वीपस्य राजधानीं स्वर्णपुरं साम्राज्यशासनकेन्द्ररूपेण वाणिज्यसंस्कृतिधर्म-शिक्षातत्त्वानामपि केन्द्रं वर्तते। द्वीपद्वीपान्तर्गतायातनिर्यातव्यापारपरायणाः वणिजः सार्थवाहाः पोतस्वामिनः पुरमेतत् सततं धनैर्धान्यैश्च संवर्धयन्ति। एतस्मिन् पुरे धनगुप्तो नाम वणिजामधिपतिः कोटिकोटिसुवर्णरत्नानां स्वामी तिरस्कृतयक्षाधिपतिसमृद्धि-र्निवसति। व्यापारिकपोतसमूहास्तस्य द्वीप-द्वीपान्तरेषु जलनिधिनीलनीरेषु संतरन्ति।

तस्य सुवृत्ताभिधाना सुता सौन्दर्येण दिव्याप्सरसोऽपि लज्जयन्ती साक्षाल्लक्ष्मीरिव कान्त्या हर्म्यं प्रकाशयन्ती वर्तते। तस्याः यौवनरूपसुरभिः द्वीपद्वीपान्तरेषु व्यास्तीर्यत।

तेष्वेव दिवसेषु मगधाधिपमन्त्रिणः पद्मोद्भवस्य तनयो रत्नोद्भवो व्यापारिकपोतनिकरेण सह स्वर्णपुरमाजगाम। तत्र तस्य परिचयो धनगुप्तेन समजनि। व्यापारकार्येषु भूयोभूयः सम्मिलनावसरेषु स परिचयः घनिष्ठतां संप्राप। रत्नोद्भवस्य व्यापारिकप्रतिभां परिश्रमं नवं वयः सौन्दर्यसौष्ठवसुशोभितञ्च शरीरमवलोक्य भृशं प्रभावितेन धनगुप्तेन स्वकीया कन्या सुवृत्ता सपाणिग्रहणसंस्कारं तस्मै प्रदत्ता।

सर्वगुणसम्पन्नां पतिव्रतां पतिपरायणां अनुपमरूपलावण्यकान्तिसमुज्ज्वलां स्मितपरिलसितदन्तपंक्तिभिः कुसुमराशिमिवोद्गिरन्तीं दाडिमकणपंक्तिमिव वर्षन्तीं जीवनसहचरीमनेकानेकजन्मपुण्यसञ्चयामिव पत्नीमुपलभ्य कृतकृत्यमिवाऽऽत्मानं रत्नोद्भवो मेने। सुवृत्तां विहाय धनगुप्तस्य न काप्यन्या सन्ततिर्बभूव। तेन धनगुप्तेन स्वकीया सम्पूर्णा स्थावरजङ्गमसम्पत्तिः दुहित्रे जामात्रे च समर्पिता। रत्नोद्भवोऽपि श्वसुरगृहे निवसन् धनगुप्तस्य सकलं व्यापारजातं प्रबबन्ध। क्रमेण समये व्यतीते पतिप्रिया सुवृत्ता गर्भिणी बभूव।

अथ कदाचिद् रत्नोद्भवो जनकस्य जनन्याः परिवारवर्गस्य च संस्मरंस्तेषां दर्शनायाऽतिविह्वलतां जगाम। श्वसुरेण धनगुप्तेनाऽपि स्वकीयानुमतिः प्रदत्ता। कुसुमपुरे स्वल्पसमयं व्यतियाप्य पुनरागन्तव्यं व्यापारप्रबन्धश्चाऽवलोकनीयः। श्वसुरकुलं सुवृत्ताऽपि गच्छतु। तत्र गुरुजनानामाशीर्वादैरात्मानं कृतार्थयतु।

जामातरं दुहितरञ्च सुदृढे सुघटिते सुभूषिते सर्वविधावश्यकसामग्रीचयसङ्कुले पोते समारोप्य यौतुकरूपेण प्रचुरस्वर्णादिकं महार्घरत्नराशीनन्यांश्च विविधानुपहारान् समर्प्य वाष्पनिरुद्धकण्ठेनाऽऽशीर्वादवचांसि शुभङ्कराणि कथमपि समुच्चार्य धनगुप्तो स्वगृहमाजगाम। सुवृत्तारत्नोद्भवाधिष्ठितः पोतोऽपि पोतसञ्चालकैर्बङ्गसमुद्रे पश्चिमोत्तरस्यां दिशि सञ्चालितः।

अनल्पेतरदिवसं यावत् पोतस्तु सौभाग्येन बङ्गसमुद्रे प्रशान्तनीलसलिलेऽहर्निशं नाविकैः शतसंख्यकैः क्षेपणीभिरग्रे नीयमानो बङ्गप्रदेशसमुद्रतीरवर्तिताम्रलिप्तिपत्तन-समीपमाजगाम। त्रिंशद्दिवसकल्पां यात्रां कृत्वाऽगाधनीलनीरस्य परे पारे सुदूरक्षितिजे समुद्रतटवर्तिभूमिभागः पोताधिरोहिणां यात्रिणां दृष्टिगोचरीभूतः। तेषां हृदयान्युल्लासितानि। नृत्यन्तो गायन्तश्च ते चित्तोल्लासकरान् मनोभावान् प्रकटयाञ्चक्रुः। परन्तु विधिर्न तथा ऽनुकूलोऽवर्तत। निष्करुणस्य विधेः रहस्यं को जानाति। भवितव्यता खलु बलवती।

सायंसमय आसीत्। सहसा प्राचीदिक्क्षितिजे श्यामवर्णो जलबिन्दुरेको जनैः पोताधिरूढैरग्रे वर्धमानोऽवलोकितः। कतिपयेष्वेव क्षणेषु घोरकृष्णवर्णाः जीमूताः तीक्ष्णप्रभासमुज्ज्वलाभिर्विद्युद्भिर्विदीर्यमाणा इव सकलं गगनतलमाच्छादयामासुः। सुतीक्ष्णाः वातसंघाताः प्रावहन्। सौम्यभावं परित्यज्य जलनिधी रौद्ररूपधारी बभूव। सोच्छ्रायवन्तो भयावहास्तरङ्गसंघाता रोषावेशविवशसमुद्गतफणनीलोरगसमूहा इव प्रसरन्तः पुनरपि पुनः समागत्य पोतेन संघट्टमानाः प्रलयकालीनं दृश्यं जनयामासुः। आमोदमदमत्तानां नृत्यतां नाविकानां भयविकम्पितहृदयानां शरीराणि जडीभूतानि। भीत्यभिभूतचित्तास्ते किंकर्तव्यताविमूढतया चित्रलिखिता इव गतिरहिता अवर्तन्त। अकाले प्रसरद्भिः ससुकठोरगर्जनं स्थूलातिस्थूलबिन्दुयुतघनघोरवर्षणैः संवर्तकावर्तकैरिव जलदैः प्रबलवेगेन संसरद्भिः प्रभञ्जनसंघातैर्गगनभेदकैः सुतीक्ष्णैस्तडत्तडदिति हृदयविदारकैस्तडिच्चयैः प्रचण्डवात्यावेगोच्छालितोत्तालतरङ्गैः कल्पान्तकाल इव समुपस्थापितः। नभसः पतन्तीभिः स्थूलस्थूलधारासारजलधाराभिः सागरतलोच्छल-त्स्वच्छन्दविसर्पिरश्मिनिचयैः पोताधिरूढजनप्राणभयोत्पादकैस्तत्र जलौघदृश्यं समुत्पादितम्।

सकलमिदं सृष्ट्यन्तकरं दृश्यमवलोक्य रत्नोद्भवस्य सुवृत्तायाश्चोभयोरपि हृदये भयविकम्पिते बभूवतुः। शरीराङ्गानि प्रभञ्जनाघातनिहताकाशवल्लर्य इव स्पन्दितानि। परन्तु किमपि प्रतिकर्तुमसमर्थौ निरुपायौ तौ तस्यां सङ्कटवेलायां प्रभोः परमात्मन एव सर्वशक्तिमत्तमस्य नामसंस्मरणं चक्रतुः। अधस्तात्तु बङ्गसागरस्य प्रबलशक्तिशालिनीनां प्रलयङ्करीणां लहरीणामाघाता उपरिष्टाच्च धारासारसम्पातजलमयत्वप्रतिपादकं मेघवर्षणम्। वात्याचक्रप्रहारजर्जरित इव दोलेव लहरीषु संसर्पन् स सुदृढं संघटितोऽपि पोत उपद्रवानेतान् सोढुमसमर्थो बभूव। प्रलयङ्करघनघोरगर्जनकराणां गडगडेति निनादानां चमच्चमेति चमचमायमानानां गगनं क्रकचधाराभिरिव द्विधा छेदिकानां लोचनेषु सुतीक्ष्णज्योतिर्भिश्चमत्कृतिमादधानानां कडकडेति विद्युतां ध्वानानां मध्ये महोत्तालतरङ्गाघातैर्दोलायमानो भयप्रदं चडचडदित्यार्तनादमिव समुच्चारयन् स पोतः खण्डशो विभक्तः। तत्रारूढाः सर्वे च प्राणिनः प्रकुपितसागरसलिलमध्ये निपेतुः सकलञ्च सामग्रीजातं जलसमाधिमध्यमगच्छत्।

अत्यौत्सुक्यगर्भहृदयं सावहितं मां तपोधनं स्ववृत्तान्तं श्रावयन्ती सा वृद्धा क्षणं विरम्य पुनरपि कथयितुं प्रवृत्ता। तया प्रोक्तम् -

अहं तु तस्य धनगुप्तस्य वणिजो गृहे कुलपरम्परागता धात्रीकर्मनिरता बाल्यादेव सेविका वर्ते। सुवृत्ता प्राणेभ्योऽपि गरीयसी शैशवादेव ममाऽङ्काश्रयप्रणयिनी समवर्तत। जामात्रा सुतया च सहाऽहमपि धनगुप्तेन सेवाकमहितोः प्रेषिता। वातचक्रमेघोत्तालतरङ्ग-

प्रहारजनितमहोपद्रवेऽस्मिन् विभ्रान्तचित्ताऽहं पोते खण्डशो विदीर्णे सत्येव मूर्छितां सुवृत्तां क्रोडे स्थापयन्ती अगाधे सलिलनिधिमध्ये न्यपतम्। परं विधेरनतिक्रमणीयत्वात् सावशेषत्वाच्चाऽऽयुषः सुदीर्घः काष्ठपट्टः पोताद् विच्छिन्नो मया संप्राप्तः । सावधानतया गर्भधारिणीं सुवृत्तां वहन्ती काष्ठपट्टमेवाऽहमाशिश्रिये। पोतं खण्डशो विभक्तं समवलोक्य इन्द्रवरुणयोरपि कोपः प्रशान्तः । द्वाभ्यामेव कराभ्यां क्षेपणीकार्यं सम्पादयन्ती कथमपि महता प्रयासेन तटवर्तिनीं भूमिमहं समायाता। शुष्कां भुवं समासाद्य क्लमश्रमक्लान्तनिश्चेष्टशरीरे उभे अप्यावां सलिलनिधितीरवर्तिसिकताराशिषु शिश्याते । सुवृत्ताभर्तुः रत्नोद्भवस्य का दशा सञ्जाता, तमधिकृत्य का घटना घटितेति वृत्तान्तानभिज्ञे द्वे अप्यावामवर्तेताम्। न जानेऽसौ समुद्रगर्भे विलयं प्राप्तः कथमपि वा कमप्याश्रयं लब्ध्वा समुद्रतीरमाजगाम।

दीर्घकालं सुवृत्तया सहैकाकिनी जनरहिते तस्मिन् सागरतीरे शयाना समधिगतचैतन्याऽहं कुसुमपुरगमनमेव श्रेयस्करं मेने। जीवन् रत्नोद्भवोऽपि ध्रुवं स्वपितृगृहं गन्ता। तस्याऽत्राऽन्वेषणं विफलप्रयासमेव भविष्यति। इति विचार्य प्राप्तसंज्ञया सुवृत्तया सह पश्चिमोत्तरदिशमवलम्ब्य मया प्रस्थितम् । क्लान्तिजनितपीडया विह्वले क्षुत्पिपासाव्याकुले प्रस्खलच्चरणविन्यासे आवां समुद्रतीरवर्तिन्यामेव भुवि केनाऽपि तपोधनेन समधिष्ठितं पर्णोटजमेकमवलोकयामासिव। अतिथिसत्क्रियां संप्राप्य कञ्चित्कालं विश्रम्य तेनैव तपस्विना सङ्केतितं पन्थानमाश्रित्याऽऽवां कुसुमपुराय प्राचलाव । त्रिंशद्दिवसकल्पं कालं गर्भभरालसां मन्दमन्दपदसञ्चारिणीं धैर्यदिवतामिव मूर्तिमतीं सुवृत्तामावहन्ती तस्या धात्री सेविकाऽहं गहनवनमिदं सुदुर्गमं समाजगाम।

अत्राऽऽगत्य प्रसववेदनया विह्वलां व्याकुलां स्वामिनीं सुवृत्तां सुविशालशाकपादपस्याऽधस्तात् करपरिष्कृतधरायामेव संवेशयामास। प्रसवपीडाविकलाङ्गी विचेष्टमाना क्रन्दमाना सा सुवृत्ता सूर्योदयेन सार्द्धं सौन्दर्यप्रभासमुज्ज्वलं सुतरत्नमेकं प्रासूत। घनपत्रपादपच्छायासुशीतलायां भुवि सा सुवृत्ताऽर्धचैतन्यावस्थायामेव शयाना वर्तते। कुसुमपुरगामिनं मार्गं मृगयमाणा नवजातमेनं शिशुमुत्सङ्गे वहन्ती इतस्ततोऽहं भ्रमामि।"

रत्नोद्भववृत्तान्तमिमं निवेदयन् वामदेवशिष्योऽसौ तपोधनः पुनः क्षणं विरम्य बभाषे -

धात्र्यां वृद्धायां तथा कथयन्त्यामेव तस्यां गहनारण्यमध्यादेको विशालाकारो विपुलोच्छ्रितशुण्डादण्डसमन्वितः श्यामवर्णः सुदीर्घतीक्ष्णदन्तद्वयभयानको गजराजस्तत्राऽऽजगाम। यमकिङ्करमिव भयानकाकारं दीर्घदन्तं दन्तिनमवालेक्य भीतिवि-

हृलविकम्पितगात्रयष्टि: सा वृद्धा स्वप्राणरक्षामेव बहु मन्यमाना नवजातं तं शिशुं तत्र भूमावेव निधाय तरसा पलायिता। विकरालवपुषं भद्रजातीयमिव तं गजमवलोक्य भयविकलचित्तोऽहमपि जीवनमिच्छन् समीपवर्तिलतागहनानि प्रविष्ट:। समीपमागत्य मुहूर्तं सहसा निरुद्धगति: स दन्ती किसलयचयमिव तामरसराशिमिव पद्मरागमणिनिकरमिव हस्तपादं विचेष्टयमानं निमीलितनयनकुवलयं तं शिशुं धरायामेव शयानं निरीक्षाञ्चक्रे। तदनन्तरं न जाने केन विचारेण तं शुण्डाग्रेण कमलपुष्पमिव विचित्य किञ्चिदुपर्युत्थापयामास।

तस्मिन्नेव क्षणे वनमध्यभागाच्छार्दूलस्य कस्यचिद् भयदायि घोरं गर्जनं कर्णगोचरीभूतम्। मदजलस्रावी स गजो दानवारिभिर्दिशां प्रान्तराणि सुवासितानि कुर्वन् शार्दूलगर्जनैरुत्तेजित इव रोषाविष्ट इव प्रतिद्वन्द्विभावेन योद्धुमुत्सुक इव समुद्यतो बभूव। गजोऽसौ शिशुं शुण्डादण्डेनोपर्युच्छाल्य स्वयमपि घनघोरबृंहितै: कण्ठघर्घरध्वनिं कुर्वन् तामेव दिशं प्राधावद् यतस्तद् भीतिप्रदं शार्दूलगर्जनं समुद्भूतं शुश्रुवे। मुहूर्तेनैव घनारण्यवृक्षक्षुपलतान्तरालमध्याद् गजशार्दूलयोर्द्वयोरपि घोरयुद्धसूचका: ध्वानप्रतिध्वाना: समश्रूयन्त।

करिणा प्रबलवेगेनोपरि गगने समुच्छालित: स शिशुस्तत्रैव समुत्सेधवति शाकवृक्षे समुपविष्टेन सुदीर्घलाङ्गूलेन कृष्णवर्णमुखेन गोलाङ्गूलेन द्वाभ्यां प्रसारिताभ्यां कराभ्यामनायासेन परिपक्वफलमिव गृहीत:। फलभक्षणाभिलाषी गोलाङ्गूलोऽसौ यदैव मुखं व्याददे, प्राणवन्तं विचेष्टमानं तं शिशुमवालुलोके। स तु निरामिषभोजी पशु: शिशुं शाकवृक्षच्छायायां शाखायामेकस्यां सावधानतया निधाय यथाभिलषितं जगाम।

भयभीतोऽपि कम्पमानगात्रोऽपि त्वरितस्पन्दमानहृदयोऽपि लतागहनमध्यादहं सकलमेव घटनाचक्रं विलोकयन्नासम्। प्रशान्तेषूपद्रवेषु लतागहनान्निष्क्रम्याऽहं तं महोत्तुङ्गं शाकतरुमारुह्य सावधानतया तं शिशुमङ्के निधाय वृक्षादवातरम्। जातमात्र एवाऽयं शिशुरतितरां बलसम्पन्न: सुरूप: सौभाग्यशाली चाऽवर्तत। सत्स्वपि य: महोपद्रवेषु प्रचण्डाघातपरम्परास्वपि स्वस्थशरीर: स्थित:।

तदनन्तरं तां वृद्धां धात्री सेविकां शिशुजननीं रत्नोद्भवभार्यां सुवृत्ताञ्च बहुकालमन्विष्यन्नप्यहं कञ्चिज्जनं न निरैक्षि। तदनन्तरं मया चिन्तितम् -

"नूनमयं शिशु: सुश्रुतस्य भवन्मन्त्रिणो भ्रातु: रत्नोद्भवस्य सुत:, अत: भवदन्तिकं मया प्रापणीय:। इत्थं विचार्य तमादायाऽहं भवदन्तिकं समायात:। "भवानेवैतस्य पालने पोषणे शिक्षणे च प्रमाणम्।" इति तं शिशुं महीपतये समर्प्य आशीर्भिश्च तं समभिषिच्याऽसौ तपोधनो जगामाऽऽचार्यसमीपमेव।

बालकं तमुत्सङ्गे समुत्थाप्य करुणार्द्रस्नेहसम्भृतनयनाभ्यां विलोक्य राजहंसो

मन्त्रिणि सुश्रुते दृष्टिं व्यापारयामास। चिरकालाद्दृष्टस्य सहोदरस्य सुतं वीक्ष्य सुश्रुतस्य हृदयमपि वात्सल्यममत्वभावैः सम्भृतम्। विधेरानुकूल्यं सर्वमेव साधयतीति स सजलनयनाभ्यां निरीक्ष्य तं नवजातं भ्रातृसुतमङ्के कृत्वा वक्षसाऽऽलिलिङ्ग। भ्रातुः भ्रातृजायायाश्च वृत्तान्तं निशम्य दुःखराशिभिस्तस्य हृदयं क्रकचधारया काष्ठखण्डमिव विदीर्णम्। नामकरणसंस्कारं संसाध्य स शिशुः पुष्पोद्भवनाम्ना समलङ्कृतः। महीपालेन तस्य पालनपोषणाय समुचितः प्रबन्धो विहितः।

पुष्पोद्भववार्तानन्तरं व्यतीतेषु त्रिषु दिवसेषु शिविरान्तःप्रकोष्ठे निशि शय्यायां शयानायां महिष्यां वसुमत्यां, पार्श्वे च गहननिद्रावशङ्गते कुमारे राजवाहनेऽर्धरात्रे कृष्णपक्षस्याऽन्तिमतिथिवर्तिनि प्रगाढान्धकारे सर्वदिग्व्यापिनि सति कश्चिदप्रत्याशितो ध्वनिः समुत्थितः। सहसैव वसुमती जजागार। निद्रा सुदूरमपसृता। तयाऽवलोकितम्-

"दिव्यप्रभया प्रकोष्ठमालोकयन्ती सौन्दर्यसारसरसा काचिदनुपमरूपलावण्यवती तरुणी न जाने केनाप्यलक्षितमार्गेण तत्रोपस्थिता बभूव। सकलविश्वसौन्दर्यसामग्रीनिचयैरिव विधिना निर्मिता त्रिभुवनमहिलाजनसंहतिं रूपसौष्ठवेन तिरस्कुर्वन्ती सा वनिता मासैकदेशीयं शिशुमेकमुत्सङ्गे कृत्या जयन्तमङ्के दधाना शचीव तत्र शुशुभे।"

निश्चलनिष्पन्दा निस्तब्धा नीरवा विस्मिता च सा पट्टमहिषी मगधजनपदराज-राजेश्वरी निर्निमिषनयनं तामीक्षाञ्चक्रे। मधुरमन्दस्मितशोभमानरदच्छदा सा दिव्या तरुणी मन्दमन्दपदविन्यासैरग्रतः प्रसरन्ती पायलनूपुरकिङ्किणीमृदुमधुररवैः कक्षं निनादयन्ती निजोत्सङ्गाश्लिष्टं शिशुं राजपत्न्याः वसुमत्याः क्रोडे निधाय द्वावपि करौ संयोज्य किञ्चिन्नम्रीभूय सस्मितं बभाषे -

"देवि ! मगधप्रतिपालकस्य महामहिमशालिनो राजहंसस्य मन्त्रिणः सुमित्रस्य सुमन्त्रस्य च सहोदरो भ्राता कामपालो वर्तते। उद्दण्डोद्दामविलासप्रकृतिरसौ कामपालो निजसमानस्वभावैः कैश्चित्सुहृद्भिः सार्द्धं ससमूहं विविधदेशभ्रमणाभिलाषं मनसि दधानो यात्राहेतोः कुसुमपुराद् बहिर्निश्चक्राम। भ्रमन्नसौ हिमगिरिमध्योत्तुङ्गशिखरो-पत्यकाधित्यकासुमनोहरं प्रदेशमाजगाम।

हिमशुभ्रशिखरपरिवेष्टितासु हिमालयोपत्यकासु मणिभद्रपुरं नाम नगरं यक्षाणां प्रधानं स्थानं वर्तते। अत्रत्याः रजन्यो भगवतश्चन्द्रशेखरस्य भाले विराजमानस्य रजनीकरस्य हिमगर्भैः किरणैः सदैवाऽऽलोकिता भवन्ति। विष्णुगङ्गासरस्वतीसरितोः सङ्गमस्थले केशवप्रयागेऽवस्थितस्य मणिभद्रपुरस्य शोभाऽद्वितीया समृद्धिश्च यक्षाधिपस्य कुबेरस्य राजधानीमलकापुरीमप्यतिशेते। मणिभद्रपुरस्य नायको मणिभद्रो यक्षाधिपस्य प्रधानसेनापतिपदमलङ्करोति। अहं तस्य हृदयसर्वस्वभूता तारावली नाम सुता वर्ते।

भुवनमनोरमाभिरामयौवनमधिगम्याऽपि मम बालसुलभचाञ्चल्यं नाऽपगतम्। कैशोरवयसि वयस्याभिः सार्द्धं कदाचिदहं गिरीणामधित्यकासु कदाचिदुपत्यकासु कदाचिद् गिरिसानुषु कदाचित् सकलकलं प्रवहन्तीनां हिमशीतलसलिलानां सरितां शैलखण्डयुतेषु सैकततीरेषु चिरं यावच्चिक्रीड। कदाचिद् गौरीपदविन्यासपवित्रेषु देवतरुसघनारण्यस्थलेषु कदाचिच्च विरलपत्रवनस्पतिषु सञ्जीवनीवल्लरीवेष्टितेषु भोजपादपाच्छादितप्रान्तरेषु भ्रमन्ती मणिभद्रसुताऽहं पार्वत्यप्रकृतिरामणीयकांशधारिणीमात्मानं सततं मेने।

अथैकस्मिन् दिवसे विष्णुगङ्गासरस्वतीसङ्गमप्रदेशे शिलातलमेकं समतलमधिशयाना एकाकिनी मधुरं गीतमेकमगासिषम्। अकस्मादेव तत्र चमरीमृगयुगलमेकं कस्तूरिकामृगयुगलेन सह समागत्य गीतिस्वरैराकृष्टं निभृतकर्णं निष्पन्दं निश्चलञ्च तस्थौ। गीतिस्वरे विरमिते नयनयोरुपरि समुत्थापितयोर्मया कश्चित्तरुणोऽवलोकितः। सुरूपशालिनं नवयौवनेन वयसा सुशोभमानं सुघटितशरीरं युवानं विस्मृतनिमेषाभिर्दृष्टिभिर्ममिव सततमीक्षमाणमहं व्यलोकयम्। रूपेण वयसा च कामदेवमपि तिरस्कुर्वतस्तस्य नयनयोर्न जाने कीदृशोऽनिर्वचनीयोऽनुनयः कीदृशी याचना कीदृशः स्नेहः कीदृशोऽनुरागः कीदृशश्च करुणाभावोऽवर्तत, यन्मम हृदयमनिर्वचनीयैर्मधुरैर्विकलताप्रदैर्भावैः सम्भृतम्।

अथ मोहाविष्टेवाऽहं तमपरिचितमपि जनं निकषा समागत्य सम्मुखमतिष्ठम्। गात्राणि मे वेपथुना कम्पितानि स्वेदबिन्दुभिश्च चर्चितानि। कथमपि महता प्रयासेन निजमनोविकारान् सन्निरुध्य मोहाविष्टं मन्मुखनिवेशितनयनयुगलं युवानं परिचयं पप्रच्छ। असावपि निर्निमिषदृष्टिर्ममिव समवलोकयन् स्खलदक्षरैः स्वात्मानं परिचाययामास यदसौ मगधेशमन्त्रिणो धर्मपालस्य सुतः कामपालाभिधानो वर्तते। निजभवनमानीतोऽसौ जनकेन मणिभद्रेण समुचितातिथ्यविधिना सत्कृतः।

तस्याऽऽगन्तुकस्य सौन्दर्यरूपयौवनमदप्रेमपाशेऽहं मृगीव निबद्धा। मह्यं कामपालं विना किञ्चिदपि न रुरुचे। सर्वकालं तस्य साहचर्यं सख्यं च कामयमाना ववृते। वनपर्वतविहारव्यसनिना तेन प्रियेण सार्द्धं कदाचिदहं गिरिसरितां तटभूमिषु शैलखण्डमध्यवर्तिसिकताभूमिषु पादानां चिह्नान्यचिचित्रम्। कदाचित् सकलभुवनजनपापसन्तापहारिण्याः गङ्गायास्तीरमुपगम्य सजानु समुपविश्य सुशीतलसलिलपृषतैस्तेनाभिषिक्ता स्वयमपि तं प्रियं सलिलबिन्दुभिरसिचम्। कदाचिच्च सुमृदुलमपि सुकठोरसुसंघटितस्य तस्य करमाश्रयमाणा महोत्तुङ्गेषु गिरिशिखरेषु बभ्राम।

अथ आवयोः प्रणयभावं निरीक्ष्य कामपालञ्च सुयोग्यं वरं विचार्य जनको मे मणिभद्रः पाणिग्रहणसंस्कारेण मां तस्मै समर्पयामास। चिरकालमावां पर्वतीयप्रदेशेषु दिवसेषु रविरश्मिसुप्रकाशितेषु हिमजलगर्भितनिर्झरनिनादितेषु रजनीषु च शशिकिरण-

स्पर्शजनितकनकविभ्रमेषु हिमसानुषु विचरन्तौ भवानीसहितं भवं वन्दमानौ सततविहारैमात्मानौ ननन्दिव।

एकदा मम प्रियः कामपालः कस्मिश्चित् प्रसङ्गे कृतरोषो मणिभद्रपुरान्निभृतं निश्चक्राम। वाराणसीं गत्वा तत्राऽसौ काशीराजसुतां कान्तिमतीं प्रच्छन्नरूपेण परिणिनाय। अयं तस्या एव कान्तिमत्याः सुतः कामपालाज्जातः। रहस्योद्भेदशङ्कया राजकोपभयाच्च कान्तिमत्याः सेविका शिशुमेनं श्मशानभुवि परित्यज्य न्यदधात्। भर्तारं परिमार्गमाणाऽहं शिशुमेनं दैवात् सम्प्राप्य यक्षाधिपतिं कुबेरं धनपतिं समाजगाम। तेन कथितम् -

"भद्रे ! कामदेवावताररूपस्य कामपालस्याऽयं सुतो वंशपरम्पराकर्तव्यानि ध्रुवं पालयिष्यति। सकलभुवनरक्षको महाराजो राजहंसो मगधाधिपतिर्विधिनियोगादस्मिन् समये वनेषु निवसति। तस्य सुतो राजवाहनश्चतुरुदधिमेखलां धरित्रीं विजित्य चक्रवर्तिपदमवाप्यैकच्छत्रसाम्राज्यं सार्वभौमं स्थापयिष्यति। असौ यक्षाणामपि चक्रवर्ती भविता। अयं कामपालसुतस्तस्य राजवाहनस्य सेवायै लोके समवतीर्णः। शिशुरयं यथायोग्यं पालन-पोषण-शिक्षणादिकं प्राप्नुयादिति राजमहिष्यै वसुमत्यै समर्पणीयः। तदनन्तरं त्वमपि पत्युः कामपालस्य सेवायां रता स्वधर्मं परिपालय। धनपतिनिदेशमवाप्याऽहमिहागता।

इति वचांसि समुच्चार्य दिव्यरूपा यक्षिणी स्तनन्धयं तं वसुमत्युत्सङ्गे निधाय तूर्ष्णी तस्थौ। विस्मयाभिभूता वसुमती अव्यवस्थितचित्ता न जाने केषु विचारेषु वर्तमानाऽतिष्ठत्। महामहिषीमस्यामेव मनोदशायां परित्यज्य तारावली मन्दमन्दपदविन्यासैर्निवर्तमाना कक्षाद् बहिरागत्य स्वाभीष्टदिशं व्योममार्गेण प्रययौ। किञ्चित्स्वस्थीभूता वसुमती तामवलोकयितुमैहिष्ट, परं बहिरागत्य तया तस्य दर्शनं नाऽधिगतम्।

कामपालतनयस्य स्तनन्धयस्य तेजसा सौन्दर्येण लाक्षणिककररेखाभिश्च परितुष्टा वात्सल्यरसपरिप्लुता वसुमती मासैककल्पं तं स्तनन्धयं वक्षस्याऽऽश्लिष्य अपरिगणितैश्चुम्बनैरुपचकार। सद्य एव प्राभातिकैर्मङ्गलवाद्यैः प्रभातोचितगीतिकाभिश्च दिवसस्याऽऽरम्भो वैतालिकैः सूचितः। तदनन्तरं किञ्चिदुन्नमिते व्योम्नि दिनकरे प्रभासिते चाऽरुणरश्मिभिः प्राचीदिक्क्षितिजे नित्यकर्मनिवृत्ता वसुमती शिशुमङ्के दधाना तां वटपादपवेदीमुपगता यत्र पूर्वमेवाऽऽगत्य समुपविष्टो महीपालो मन्त्रिभिः सह मन्त्रणां कुर्वन्नासीत्। बालकं भर्तुरङ्के धृत्वा सा सकलमेव वृत्तान्तं तारावल्या कथितं श्रावयामास।

धर्मपालसुतस्य कामपालस्य यक्षकन्यया सह सम्मिलनं काशिराजकन्यया सह

प्रच्छन्नपरिणयः सन्तानोत्पत्तिः नवजातशिशोः श्मशानभुवि परित्यागो यक्षवध्वा तस्य प्राणरक्षणमत्र च विन्ध्यवनमानयनमिति सर्वमुदन्तजातं विस्मयकरं निशम्य राज्ञो हृदयमाश्चर्योद्विवेगानन्दादिभावैः समाच्छन्नम्। निश्चयेनाऽयं बालकः परमगुणवान्, बुद्धिशाली, प्रतिभाशाली, नीतिज्ञः पराक्रमशाली च भविष्यतीति तेनाऽनुमितम्। तस्य विविधाङ्गेष्वङ्कितानि सामुद्रिकरेखालक्षणानि भावानेतान् प्रकटयन्ति स्म। कामपालभ्रातृभ्यां तं शिशुं समर्प्य नामकरणसंस्कारं ससमारोहं सम्पाद्य राजहंसस्तं बालकमर्थपालनाम्ना विभूषयामास। पालनपोषणादिप्रबन्धेन सह स सौभाग्यशाली शिशुः बालोचितलालनादिकं लेभे।

कामपालसुतस्याऽर्थपालस्य समागमनानन्तरं सप्तमे दिवसे प्रभातवेलायां मगधाधीशो मन्त्रिभिरन्यैश्च सहायकैः सार्द्धं वटवृक्षस्याऽधस्ताद् भाविकार्यजातं परामृशन्नासीत्। राजमहिषी वसुमत्यपि तत्र समुपविष्टा भावियोजनासु परामर्शसहायिका समवर्तत। राजवाहनोऽन्ये च मन्त्रिपुत्राः कुमारास्तत्रैव सन्निकटवर्तिन्यां भूमौ बालोचितक्रीडाभिर-निमित्तहासैरालक्ष्यदन्तमुकुलैः सर्वानिवाऽऽनन्दयन्ति स्म।

तस्मिन्नेव समयेऽकस्मादेवैको दीर्घश्मश्रुः समुन्नतशिराजालसन्नद्धगात्रो वल्कल-वसनधारकस्तपस्वी स्तनन्धयमेकमतिरूपबलशौर्यशालिनमुत्सङ्गे दधानः समुपातिष्ठत्। सव्येतरकरमुपरिकृत्य राजानमन्यांश्चोपस्थितजनानाशीर्भिः सभाजयन्नसौ समुपविष्टः। सर्वे जनाः समुत्थाय प्रणम्यौत्सुक्यगर्भनयनैस्तं निरीक्षाञ्चक्रिरे। स तपोधनस्तानित्थं प्रोवाच -

"राजन्! महर्षिवामदेवशिष्योऽहं तपोनिधिर्नाम। महर्षिणाऽनुमतोऽहं दक्षिणदिग्गमनं निश्चित्याऽनेकेषु तीर्थेषु भगवतीनां देवतानां दर्शनानि कुर्वन् देवोपासनाञ्च सम्पादयन् कावेरीसरितस्तटं सम्प्राप। तत्र तीरवर्तिनीं भुवं संप्रपन्ने मयि मध्याह्नकालीनस्तपनः प्रखरसन्तापेन लोकं तापयति स्म। तत्रैव तटोपान्ते सुविशालः शाखाभिः सुदूरं प्रसारितकरः सघनपर्णकैर्निवारितरविकिरणसमूहस्तमालतरुरविद्यत। मार्गश्रमक्लान्ति-परिश्रान्तः सूर्यातपसन्तप्तोऽहं तत्तमालपादपच्छायायामेव विश्रामाय समाविशम्। निद्रावशङ्गते नयनपक्ष्मनिमीलनपरे सत्येव मयि महिलारुदनकरुणक्रन्दनध्वनिः कर्णौ प्रविष्टः।

करुणार्द्रचेता अहं तं ध्वनिं समनुसरंस्तामेव दिशं प्राचलम्। किञ्चिद् विप्रकृष्टान्तरालं गत्वा कावेरीसैकततीरे तरुणीमेकां पृष्ठभागेन समाश्रितशुष्कस्थूलवृक्षस्कन्धामङ्के शिशुमेकं वहन्तीमपश्यम्। सौन्दर्यप्रभाभास्वरो गौरवर्णः स शिशुः प्रगाढालिङ्गनवशङ्गतो

निद्रया निमीलितनयनो हठादेव मनो मोहयति स्म। निकटमागत्य मया पृष्टम् -

"भद्रे ! का त्वम्? कस्य चाऽयमर्भकः? रूपेण तेजसा चाऽयं कस्याऽपि सुप्रतिष्ठितकुलस्य प्ररोह इति प्रतिभाति। वक्षसाऽऽलिङ्ग्यैनं केन हेतुना रोदिषि?" सा तरुणी उदतरत् -

"तपस्विन् ! दूरादागतो भवान् प्रतीयते। स्वर्गगमनकालो मे समायातः। यमकिङ्करा अचिरादेव मां पाशेषु बद्ध्वा यमालयं नेष्यन्ति। सकलमेव वृत्तान्तं विस्तरेण तुभ्यमभिदधामि। भवानेव मे साम्प्रतं सहायः।

मगधदेशनायकस्य राजहंसस्य मन्त्रिणः सितवर्मणो द्वौ सुतावास्ताम् - सत्यवर्मा सुमतिश्च। राजकार्येषु निहितरुचिः सुमतिः पितुरनन्तरं मगधाधिपमन्त्रिपदं स्वीकृत्य प्रशासनकार्येषु मतिञ्चक्रे। परं धर्मकार्येषु धृतमतिः परलोकमेव बहु मन्यमानो गुरुजनैरनुमतः सत्यवर्मा तीर्थयात्राहेतोः कुसुमपुरान्निश्चक्राम। तीर्थान्यगणितानि परिभ्रमन्नसौ देवोपासनायां मनो निदधानोऽत्र कावेरीसरितस्तटं सम्प्राप्तः। मार्गजनितश्रमेण भोजनादिव्यवस्थायाश्च व्यतिक्रमेणाऽतितरां कृशशरीरस्तीव्रज्वरेणाऽऽक्रान्तोऽसौ यात्रामार्गपरिक्रमणेऽसमर्थोऽत्रैव कावेरीतटसैकतमेवाऽधिशिश्ये मूर्च्छितश्च बभूव।

कावेरीतटादविदूर एव भोगपुरनामनि ग्रामे कर्मकाण्डप्रकाण्डो विप्रो यज्ञदत्तः पल्लववंशीयैर्नृपतिभिरग्रहाररूपेणोपहृतग्रामसमृद्धिर्निवसति। इला पिङ्गला चेति द्वे सुते तस्य चिन्तासन्तानप्रतानभूते अवर्तेताम्। तारुण्यं सम्प्राप्तयोस्तयोः कृते योग्यवरलाभः कथं भवेदिति चिन्ताभिस्तस्य हृदयं सततं दूयते स्म। कन्यापितृत्वं खलु कष्टकरमेव।

तस्मिन् दिवसे स्नानाय कावेरीसरित्तीरं समुपागतस्तत्र स यज्ञदत्तः बालुकासु शयानमर्धमूर्च्छितं सत्यवर्माणं ददर्श। दयाविगलितचेता असौ समीपं गत्वा तीव्रज्वरेणार्धमूर्च्छितावस्थां परिणतस्य सत्यवर्मणः तीव्रज्वरसन्तप्तं ललाटं पस्पर्श। साऽवलम्बमसौ यज्ञदत्तेन गृहमानीतः। मासत्रयं यज्ञदत्तपरिवारेणाऽवहितेन कृतपरिचर्योऽसौ स्वास्थ्यं लेभे। जीवनदातारं यज्ञदत्तं प्रति कृतज्ञताभावेन परिपूर्णहृदयोऽसौ नैकस्यापि शब्दस्योच्चारणे समर्थो नयनाभ्यामेव स्वहृदयगतभावान् प्रकटयामास। यथार्थतो यज्ञदत्तस्य सुतयोरिलापिङ्गलयोर्दिवानिशं परिचर्यया सत्यवर्मा आरोग्यतां लेभे। तयोरेव सेवया तस्य तीर्थयात्रिणः प्राणानां रक्षा बभूव।

निवृत्तरोगे स्वस्थीभूते सत्यवर्मणि यज्ञदत्तस्तं कुलगोत्रादिकं पप्रच्छ। तद्विषये सन्तुष्टेन यज्ञदत्तेनाऽनुरोधितोऽसौ तस्य कन्याया इलायाः पाणिग्रहणमङ्गीकृत्य कृतज्ञताबन्धनबद्धस्तस्मिन्नेव ग्रामे निवासं स्वीचकार। इलापिङ्गले विहाय नाऽवर्तत काप्यन्या सन्ततिस्तस्य भोगपुरनिवासिनो विप्रस्य। प्रचुरलौकिकसम्पत्तिशालिनो

यज्ञदत्तस्योत्तराधिकारी सत्यवर्मा भविष्यति।

भौतिकसुखसम्पत्तिसुखविलासानपेक्षोऽपि सत्यवर्मा कृतज्ञताभारविनम्रो यज्ञदत्तस्याऽनुरोधमङ्गीचकार। अस्वीकरणं तु कृतघ्नता। तस्य जीवनमधुना प्राणरक्षकेभ्यो वर्तते। इला शुभ्रगौरवर्णी सुघटितकाययष्टिका परममनोहरहृदयाकर्षक-प्रसन्नवदनमण्डला यौवनप्रभोज्ज्वलोदारशोभनस्वभावाऽवर्तत। इलां शास्त्रोक्तपाणिग्रहण-संस्कारविधिना परिणीय सत्यवर्मा तत्रैव भोगपुरग्रामे यज्ञदत्तगृहे निवासमरचयत्। अनुपमः संयोगो बभूव। तत आरभ्य स तु तीर्थयात्री श्वसुरस्य कर्मकाण्डपौराहित्यकर्मस्वपि सहायो बभूव।

चतुर्विंशत्यधिका मासा व्यतीयुः, परमिला नाऽन्तर्वत्नी बभूव। दौहित्रमुखदर्शनाकांक्षिणा यज्ञदत्तेन पिङ्गला स्वकीया द्वितीया सुताऽपि नारीजनोचितसकलगुणगणस्वामिनी साग्रहं सत्यवर्मणे प्रदत्ता। सा खलु सन्ततिं प्रसविष्यतीति। वंशपरम्परा मा व्यवच्छिद्येत। इलाऽपि निजानुजां वात्सल्याभिभूतहृदयेन सुताङ्कलालनप्रणयिनी सपत्नीरूपेण स्वीचकार।

स्वल्पैरेव मासैः पिङ्गला गर्भं बभार। सर्वेषां गृहसदस्यानां पितुः मातुः पत्युरग्रजायाः सपत्नीभूताया इलायाश्चाऽपि स्नेहादरास्पदीभूता हृदयामोदकारिणी सकलदौहृदाभिलाषग्राहिणी सा पिङ्गला सम्पूर्णे गर्भावधौ समागते दशमे मासे शुभेऽह्नि परमरूपलावण्यं तेजस्विनं गौरवर्णं स्वस्थं शुभसामुद्रिकशास्त्रोक्तरेखालक्षणलाञ्छितं सुतं प्रासूत। ज्योतिर्विदा मातामहेन शिशोः बाह्याभिज्ञानानि जन्मनक्षत्रलग्नं चाऽवलोक्योद्घोषितम् –

"राजयोगलक्षणैश्चिह्नितोऽयमर्भकः।"

कुलस्य वंशपरम्परावाहिनोऽवतरणेन प्रहृष्यन्तो गृहजना आनन्दधाराः प्रवाहयन्तो नृत्यन्तो गायन्तः हृदयोल्लासान् प्रकटयाञ्चक्रुः। इला च विमाता अपि सहोदरासुतं निजगर्भजातमेव गणयन्ती नितोत्सङ्गे संश्लेषयामास।

निजवृत्तान्तं सोत्सुकाय मह्यं तपस्विने निवेदयन्ती सा तरुणी क्षणं विरम्य पुनरपि बभाषे –

"हे तपस्विन्! अहं तस्य पिङ्गलासुतस्य यज्ञदत्तदौहित्रस्य धात्रीभावेन नियुक्ता सेविका वर्ते। चन्द्रकलाभिश्चन्द्रेणेव चन्दनवल्लरीभिश्चन्दनपादपेनेव वर्धमानेन तेनाऽर्भकेण शिशुजनसुलभलीलाभिः सर्वेषामेव हृदयान्यावर्जितानि। अङ्काश्रयप्रणयी धूलिधूसरितोऽपि स बालः सर्वेषां स्पृहणीयो बभूव। पुत्रस्य जननी पिङ्गला पत्युः प्रिया पितुः मातुश्च परमस्नेहादरपात्री सञ्जाता। परमत्र सा वराकी इला गृहजनैरुपेक्षिता।

समुपेक्षणेनाऽनेन सपत्नीजन्यया स्वाभाविकयेर्ष्यया तस्य हृदये पदं निधत्तम्। अयं पिङ्गलासुत एव ममोपेक्षाया अनादरस्य च हेतुरिति सा हृदये वर्धमानयेर्ष्यया पुटपाकाग्निनेव दन्दह्यमाना क्षणमपि सुखं न लेभे। परमवैरिभूता सा तस्याऽपत्यस्य मृत्युमेव चकाङ्क्ष। वर्षैकदेशीयस्य तस्य बालकस्य वधाय सा योजनाबद्धषड्यन्त्रकारिणी बभूव।

अथ काले गच्छत्येकस्मिन् दिवसे अस्मत्स्वामी यज्ञदत्तो यजमानेनैकेन सपरिवारं निमन्त्रितः। प्रभातवेलायामेव तत्र प्रस्थानोत्सुको यज्ञदत्तो मां बालकस्य संरक्षायां गृहे स्थातुमादिदेश। इला चाऽप्यस्वस्थताव्याजेन गमनमनिच्छन्ती गृहेऽतिष्ठत्। नयनागोचरीभूतेषु सर्वेषु गृहजनेष्विलाया आदेशेनाऽहं तं पिङ्गलासुतं क्रोडे धारयन्ती कावेरीतीरमुपाजगाम। इला चाऽपि मामनुससार। नद्यास्तटवर्तिसमुद्देशमेकमत्युच्छ्रितं सकच्छकुहरं भयजनकं वर्तते। तस्याऽधस्तात् सरिज्जलधारा प्रचण्डवेगवती गभीरा चाऽस्ति। कपटहृदया सा इला छलेन मां पिङ्गलासुतमङ्के दधानां तत्र निनाय। कावेर्याः प्रचण्डजलधारां निरीक्षमाणां मां सा द्वाभ्यामेव कराभ्यां पृष्ठे प्रहृत्याधः न्यपातयत्। शिशुमङ्के वहन्ती सुतीव्रधारायामहं तया प्रवाहिता।

चकितचकिता भयभीता चाऽपि वामकरेण बालकं धारयन्ती वामेतरकरेण जलधारां कर्तयन्ती तटमधिगन्तुमहं प्रयासमकरवम्। परं तीरन्तु न समीपमासीत्।

सुतीव्रवेगवतीजलधारासन्तरणपरिश्रान्ता निराशजीवना विधिनियोगादहं तत्र कावेर्यां तरन्तं शुष्कपादपस्कन्धं लेभे। अथ च तमेवाश्रयं लब्ध्वा तरन्ती प्रावहम्। तस्मिन् तरुस्कन्धेऽतिभयानकः कृष्णसर्पः कुण्डलीभूतः स्थितोऽवर्तत। अग्निशिखासम-समुज्ज्वलल्लोचनाभ्यामवलोकयन् मां रिपुमेव गणयन् स करशाखां मे वामकरमध्यमामदशत्। परं कमप्यन्योपायमनवलोकयन्ती दंशपीडां सुतीव्रां सहमाना तरुस्कन्धं धारयन्ती प्रावहम्।

सहसा सरिज्जललहरीभिरसौ तरुस्कन्धस्तीरं प्रति प्रचोदितः। लहरीणां वेगेनाऽसौ तटवर्तिशुष्कभूम्यामापतितः। भयावहस्तु स सरीसृपो यमदूत इव तरुस्कन्धादवतीर्य यथाभिलषितं ससार। परमहं विषज्वालादन्दह्यमानसर्वावयवा पृष्ठेन वृक्षस्कन्धमिमं समाश्रित्य स्थिता। विषप्रभावेण निश्चिते मरणे बालकस्याऽस्य का गतिर्भवित्रीति चिन्तया दुःखेन च क्लिश्यमानहृदयाऽहं रोदिमीति।"

वृत्तान्तमिमं वर्णयतो विरक्तस्याऽपि तस्य तपोधनस्य नयनाभ्यां प्रवहन्ती सततमश्रुधारा वल्कलवस्त्राणि क्लेदयामास। कथमपि निरुद्धहृदयावेगोऽसौ पुनः स्ववृत्तान्तमवर्णयत् -

"राजन् ! तस्मिन् जनरहिते प्रदेशे किमपि कर्तुमसमर्थ एवाहमभवम्। सर्पविषप्रभावप्रतिकरणे निर्विषीकरणविद्यायामहमज्ञ एवाऽऽसम्। परं कदाचित् सर्पविषनाशकं किमप्यौषधमहं लभेयेति कावेरीसैकतप्रदेशेषु बभ्राम। अथ भ्रमता मया लघुवल्लरी तनुहरितपत्रसंविभूषिता नीलपुष्पयुता त्रोटनेन शुक्लक्षीरबिन्दुधाराप्रवाहिण्यवलोकिता। सम्भवतो वल्लरीयं सर्वविषविनाशिका भवेदिति तां समूलामुद्धृत्य त्वरितगतिस्तमेवोद्देशं समायातो यत्र सा तन्वङ्गी शिशुमुत्सङ्गे वहन्ती क्रन्दमानाऽवर्तत। परन्तु तावत्सा असम्भावनीया घटना घटिता। सापत्न्यविषदिग्धया यज्ञदत्तसुतया तयेलयैव दष्टा सा प्राणांस्त्यक्त्वा परमस्वामिभक्ता शिशुं रक्षन्ती यममन्दिराय प्रतस्थे।

विषधरस्य कृष्णसर्पस्य प्राणान्तकं गरलं तस्यास्तरुण्याः स्वामिभक्तसेविकायाः प्राणानपजहार। सा मृदुलाङ्गी नवयौवना श्यामा तन्वी भयानकविषज्वालां सोढुमक्षमा मृत्युना गृहीता। भुवि निःसञ्ज्ञं निश्चेष्टञ्च निपतितायास्तस्याः वपुषोऽभ्यन्तरालान्मृत्यु-देवतायाः दूता अङ्गुष्ठप्रमाणमात्मानं निष्कास्य पाशैः दृढं संयम्य यमालयं निन्युः। परमधुनाऽप्यसौ एकवर्षदेशीयोऽर्भको निश्चिन्तभावेन संसारासारदशानभिज्ञस्तस्याः क्रोडे स्वपिति स्म। एतास्ववस्थासु तस्याः युवत्याः धात्र्या अन्त्येष्टिसंस्कारविधानं ममैवोत्तरदायित्वं बभूव। बालकमपि समुचितस्थाने प्रापणं मम कर्तव्यमासीत्।

धात्र्या उत्सङ्गात् तं बालकं मृदुभावेन शनैरुत्थाप्याऽहं समीपमेव मृदुशष्पावृतायां भुवि शायितवान्। तदनन्तरं शुष्ककाष्ठसमूहमानीय तत्र कावेरीतीरे विचितायां चितायां मृतशरीरमारोप्य सा वराकी अकालमरणं प्राप्ता तरुणी वेदमन्त्रध्वनिभिः सार्द्धं मयाऽन्त्येष्टिसंस्कारेण वह्निज्वालाभ्यः समर्पिता।

साम्प्रतं मनो मे महतीभिश्चिन्ताभिः समाक्रान्तम्। कुत्र प्रापणीयोऽयं बालकः? तरुणी धात्री भोगपुरं नाम ग्रामं तस्य निवासमसूचयत्। परं सुदीर्घकालं दीर्घपरिश्रमेणाऽपि भ्रमता मया न तन्निकेतनसङ्केतोऽधिगतः। यज्ञदत्तो सत्यवर्मा वा न मया कुत्राऽप्यवलोकितो न च भोगपुरग्रामः प्राप्तः। तदनन्तरं मया विचारितम् -

सत्यवर्मणो भ्राता सुमतिर्भवन्मन्त्रिपरिषत्सदस्यः। तत्रैवाऽस्य बालकस्य नयनं श्रेयस्करम्।

इत्थं विचार्य मया बालकोऽयं सत्यवर्मसुतः भवतः सेवायामानीतः। किमत्र करणीयमिति भवानेव प्रमाणम्।" इति कथयित्वाऽसौ वामदेवशिष्यस्तपोनिधिस्तपस्वी तं बालकं महीपालस्य चरणयोर्निदधौ। अथ च स्वयं गुरोराश्रमं जगाम।

महर्षिवामदेवस्य शिष्यस्य तपोनिधेस्तानि वचनानि सत्यवर्मणश्च वृत्तान्तं निशम्य महीपालस्य मन्त्रिणाञ्च नयनानि नयनजलार्द्राणि सञ्जातानि। महाराजस्य दृगं निरीक्ष्य

सत्यवर्मणो भ्राता सुमतिस्तं बालकं निजोत्सङ्गे कृत्वा भावविह्वलमानसोऽश्रुपूरितनयनो बभूव। भार्यामुपगम्य चाऽसौ बालकं तस्यै समर्पयामास। सा चाऽपि प्रसन्नचित्ता तस्य बालकस्य पुत्रस्येव पालनपोषणकर्म स्वकर्तव्यमङ्गीचकार। अथ कृतनामकरणसंस्कारः स बालकः सोमदत्तनाम्ना प्रसिद्धिं गतः। अन्यैः कुमारैः सह सोऽपि यथोचितसंरक्षणसंवर्धनादिव्यापारैः पोषणं प्राप्तवान्। इत्थं राजहंसस्य शिविरे दश कुमारा अभूवन् -

१. महाराजराजहंससुतो राजवाहनः

२. महाराजमित्रस्य मिथिलेश्वरस्य प्रहारवर्मणो द्वौ पुत्रौ - उपहारवर्मा

३. अपहारवर्मा च

४. पद्मोद्भवसुतस्य रत्नोद्भवस्य सुतः पुष्पोद्भवः

५. पद्मोद्भवसुतस्य सुश्रुतस्य सुतो विश्रुतः

६. सितवर्मसुतस्य सुमतेः सुतः प्रमतिः

७. सितवर्मसुतस्य सत्यवर्मणः सुतः सोमदत्तः

८. धर्मपालसुतस्य सुमन्त्रस्य सुतो मन्त्रगुप्तः

९. धर्मपालसुतस्य सुमित्रस्य सुतो मित्रगुप्तः

१०. धर्मपालसुतस्य कामपालस्य सुतोऽर्थपालः

अथ कुमाराणां बाललीलासु सुललितचेष्टासु चाऽऽनन्दोल्लासमनुभवन्तो राजराजो राजहंसो राजपत्नी वसुमती राजमन्त्रिणोऽन्ये च जनाः सुखेन समयं यापयन्ति स्म। शनैः शनैर्व्यतीतेषु षट्सु संवत्सरेषु दशभिरपि कुमारैर्विद्याध्ययनयोग्यवयसि पदानि निहितानि।

अस्मिन्नेवाऽवधौ राज्ञश्चाराः सुगुप्तरूपेण सर्वेषामेव देशानां जनपदानां विविधविषयसमाचाराणां गतिविधीनाञ्च सङ्ग्रहञ्चक्रिरे। मगधदेशे मालवजनपदे च तेषां सर्वाधिका सक्रियताऽवर्तत। मालवनाथेन सह समरस्याऽनिवार्यतायाः समाचारस्य श्रवणेन सार्द्धमेव युद्धोपयोगिनां तत्त्वानामुपकरणानाञ्च परिकल्पनमपि मन्त्रिभिः साधितम्। राजशिविरे विद्यमाना स्वल्पीयसी अनीकिनी विशेषरूपेण अभिसम्पाताक्रमणावस्कन्दयुद्धेभ्यः प्रशिक्षिता। क्षत्रियेतरवर्णेभ्योऽपि वन्येभ्यश्चाऽऽर्येतरजातिभ्योऽपि सैनिकाः मन्त्रिभिः स्वसैन्यसंगठनेषु संवेशिताः प्रशिक्षिताश्च। सर्वेऽपीमे सैनिकाः भयरहिताः सोत्साहाः सम्पुष्टकायाः शस्त्रास्त्रसंचालनदक्षाः शौर्यशालिनः स्वामिभक्ताश्चाऽवर्तन्त। विशेषप्रशिक्षणं सम्प्राप्य ते युद्धविद्यासु विविधासु विशेषनिपुणाः समजायन्त।

कुसुमपुरं परित्यज्य विन्ध्यारण्यं समागच्छद्भिर्मन्त्रिभिः सकलमेव कोषजातं सुवर्णरत्नादिसहितमत्र सुगुप्तरूपेणाऽऽनीतम्। अतः प्रचुरधनत्वादर्थव्यवस्था सुदृढा

बभूव।

चूडाकर्मादिसंस्कारयोग्येषु सञ्जातेषु कुमारेषु मगधाधिपस्तेषां यथायोग्यं संस्कारान् ससमारोहं समापादयत्। उपनयनसंस्कारयोग्यास्ते कुलपतेर्वामदेवस्य गुरुकुलाश्रमं नीताः कुलपतेः समक्षं समुपस्थापिताः।

महर्षिः कुलपतिश्चाऽपि तान् कुमारानुपनयनसंस्कारेणाऽन्तेवासिनो विधाय गर्भमन्तः कृत्वा गुरुकुले प्रावेशयत्। गुरुकुलीयकठोरनियमान् परिपालयन्तस्ते विद्याध्ययने रताः दत्तावधानाः संलग्नमनसो बभूवुः। तपश्चरन्तस्ते ब्रह्मचारिणो गुरुकुलाश्रमे वसन्तो ब्रह्मचारिवेशं धारयन्ति स्म। शिरसि काकपक्षबद्धः केशराशिः कटिप्रदेशे मुञ्जमेखलया निबद्धं रुरुमृगचर्ममयमधोवस्त्रं ग्रीवायां ब्रह्मग्रन्थिनिबद्धं यज्ञोपवीतं सव्येतरकरे च पलाशदण्ड इति ब्रह्मचर्यव्रतसूचकवेशधारिण एते बालकाः मधुरस्वरेण वेदमन्त्रोच्चारणं कुर्वन्तस्तस्य गुरुकुलस्य सकलमेव पर्यावरणं धर्ममयं तपोमयं सात्त्विकानन्दमयञ्च व्यदधुः।

समये च वेदारम्भसंस्कारेण सह ते कुमाराः विद्याध्ययनं प्रारभन्त। विविधविद्याविचक्षणेभ्यो विद्वद्भ्य आचार्येभ्यश्च ते विविधविद्यानां स्वमनोऽभिलषितानामभ्यसनञ्चक्रुः। द्वादशवर्षपर्यन्तं गुरुकुल एव निवसन्तः पुरप्रवेशवर्जितास्ते सर्वास्वेव विद्यासु परमपारङ्गततां प्राप्नुवन्।

कुमारैरसंख्याताः विद्या अधीताः। साङ्गानां वेदानां, ब्राह्मणारण्यकोपनिषत्सहितस्य सम्पूर्णवैदिकसाहित्यस्य तैः शिक्षा समधिगता। आर्षाणामनार्षाणां दर्शनानां धर्माणाञ्च वैशिष्ट्यं सम्बुद्धम्। रामायणमहाभारतपुराणकाव्यनाट्यकथाख्यायिकाचम्पूगद्यपद्यादिसाहित्यमधिगम्य काव्यरचनाकौशलमप्यधिगतम्। धर्मशास्त्रार्थशास्त्रनीतिशास्त्रज्योतिर्विद्यायुर्वेदशिल्पतन्त्रादिशास्त्राणामध्ययनं विहितम्। नृत्यगीतवादित्राभिनयानां सङ्गीतविद्यायाः सर्वेषामङ्गानां शिक्षा प्राप्ता। चतुःषष्टिकलानां शिक्षायामभ्यासे च महान् प्रयासो विहितः। चौर्यद्यूतमृगयावञ्चनामायावेशपरिवर्तनादिकलासु विशेषेण नैपुण्यं प्राप्तम्। मणिमन्त्रमायादीनां प्रयोगेष्वपि कौशलमधिगतम्। गजाश्वरथतुरगोष्ट्रादिवाहनानां सञ्चालनं शिक्षितम्। धनुर्बाणखड्गपरशुतोमरशक्तिगदाकुन्तभुशुण्डीशतघ्न्यादिशस्त्रास्त्रेषु नैपुण्यं प्राप्य विविधव्यूहरचनासु सैन्यसञ्चालने चापि दक्षता प्राप्ता। भीष्मविदुरकौटिल्यकामन्दकबृहस्पतिशुक्रादिप्राचीनशास्त्रविदां ग्रन्थानधीत्य राजनीतिविद्यायाः सैद्धान्तिकं प्रयोगात्मकञ्च ज्ञानमर्जितम्। एवञ्च ते कुमाराः नवयौवनावस्थालाभेन सह सुगठितबलशालिसुरूपसुस्वस्थवपुषामपि स्वामिनोऽभवन्। वपुर्मनोमस्तिष्कानां पूर्णविकासभावेन ते कामपि लोकशक्तिं पराजेतुं समर्थाः बभूवुः।

अन्तेवासिनां योग्यतया गुरुकुलस्याऽऽचार्याः परमप्रभाविताः परमाऽऽह्लादिताश्चाऽ-

भवन्। अथ शुभेऽह्नि परीक्षोत्तीर्णेषु कुमारेषु सत्सु कुलपतिना वामदेवेन महाराजं राजहंसं सपरिजनं निमन्त्र्य कुमाराणां समावर्तनसंस्कारस्याऽऽयोजनं विहितम्। दीक्षान्तभाषणे कुमारेभ्यः सदाचरणमुपदिश्य कुलपतिर्महाराजं राजहंसमेवमुवाच-

"राजन् ! साम्प्रतमेते कुमाराः शरीरमनोबुद्धीनां विकासभावात् सर्वास्ववस्थासु योग्यतमाः वर्तन्ते। वपुषां स्वास्थ्येन सौन्दर्येण चैते मन्मथमपि लज्जितं कुर्वन्ति। साहसशौर्यशस्त्रसञ्चालनसमरदाक्ष्यादिगुणैः सम्पन्ना एते देवसेनानीं भवानीसुतं कार्तिकेयमपि पराजेतुं समर्थाः। सकलविद्यापारङ्गता एते विश्वविजये क्षमन्ते। भवान् अधुना राजवाहनं ससहायं ससैन्यं दिग्विजयाय प्रतिष्ठापयतु। अनेन शुभकार्येण निजराज्यं भवान् त्वधिगमिष्यत्येव, सकलमपि भारतवर्षं सुदृढैकसूत्रे सङ्घटिष्यते। एते कुमाराः लोकहितशासनेन राष्ट्रं समाजं प्रजाजनांश्च कल्याणमार्गे समारोपयन्तस्तान् निःश्रेयसोन्नतिसमृद्धिशिखरं नेष्यन्ति।

महर्षेः, कुलपतेर्वामदेवस्य निःश्रेयसकराणि वचनान्याकर्ण्य महाराजो राजहंसो मन्त्रिणश्च परमहर्षभररोमाञ्चितकायाः बभूवुः। तेषां वनवासावधिः सम्पूर्ण इति तैः ज्ञातम्। कुमारकार्तिकेयादप्यतिरिच्यमानोऽयं राजवाहनो रामो दानवानिव मालवान् विनाश्याऽवन्तिजनपदान् विजित्य पुनः मगधदेशानधिकरिष्यति। असौ सकलभरतखण्डं विजित्य सार्वभौमश्चक्रवर्ती समाड् भविता।

प्रत्यागते सकुमारे राजहंसे सैन्यशिविरं कुमाराणां समरयात्रायै सर्वे समारम्भाः समायोजिताः। परिपूर्णकोषो मगधाधिपतिरर्थविषये न कथमपि प्रहीणः। सैनिका अपि सततं युद्धविद्यासु प्रशिक्षिताः विधीयमानाः शस्त्रास्त्राभ्यासं कुर्वन्ति स्म। राजवाहनोऽन्ये च कुमाराः शारीरिकबलेन सार्द्धं मानसबलेनाऽपि सम्पन्ना अभवन्। शौर्योत्साहगुण-समन्वितास्ते सैन्यसञ्चालनयोग्यतां विजयाभियानसामर्थ्यञ्च दधानाः राजनीतिप्रयोगेषु शत्रूणां मायाजालनिवारणेषु रहस्योद्भेदनेषु च नैपुण्यं धारयन्ति स्म। स्कन्धावारे सैन्यप्रयाणसूचकाः दुन्दुभयः आहन्यन्त। पणवदर्दुरशङ्खढक्कातूर्यादिवादित्राणां तुमुलैर्निनादैः सैनिकानां हृदयेषु दुष्कृतां रिपूणां विनाशाय नवोत्साह इव समुत्पादितः। एकस्मिन् शुभेऽह्नि महाराजो मन्त्रिणश्च कुमारानुपदिश्य रिपुविजययज्ञसम्पादनाय प्रस्थापयामासुः।

अथ सुप्रभाते कुमाराणां संरक्षणे राजवाहनः सैन्यसञ्चालने प्रवीणो पित्रा विसृष्टो विन्ध्यारण्यशिविराद् बहिरायातः। अविलम्बेनैव व्यूहबद्धैर्भटैः मागधस्कन्धावारान्नि-ष्क्रम्योज्जयिनी गन्तुं दक्षिणपश्चिमदिशि प्रस्थितम्। द्विदिवसं प्रचलन्तस्ते दण्डकारण्यं प्रविविशुः। मध्याह्नोत्तरं पश्चिमाचलमवलम्बितुं प्रवृत्ते भुवनभास्करे भास्करे रश्मिसंग्रहतत्परे च संजाते प्रतीचीदिक्क्षितिजप्रान्तभागान् सन्ध्यारुणिमरञ्जितान् निरीक्ष्य सुखदसमतलभूमिभागमवलोक्य राजवाहनो रात्रिनिवासाय शिविरं स्थापयितुमादिदेश।

# तृतीया-पीठिका

## मातङ्गो ब्राह्मणः

## तृतीया-पीठिका

## मातङ्गो ब्राह्मण:

पुष्पसमयमतिक्रम्य तपर्तुराजगाम। परं वसन्तर्तो: सहृदयावर्जकानि कतिपयानि लक्षणान्यवशिष्टानि नयनप्रीतिकराणि ह्यधुनाऽपि समदृश्यन्त। तमालतरुषु तमालनीलवर्णानां काञ्चनारविटपिषु शोणशोणितवर्णानां शाल्मलिपादपेषु तूलगर्भितारक्तकान्तियुतानां पलाशपलाशिषु सुतप्तकाञ्चनपिङ्गलवर्णानामारग्वधतरुषु वासन्तिकपीतवर्णानामशोकानोकहेषु च काञ्चन राशिभ्रमजनयितृकुसुमगुच्छकानां राशयो यत्र तत्र प्रेक्षकाणां सहृदयानां हृदयान्यान्दोलयामासु:। शाल्मलिपादपेषु तामरससवर्णपुष्पेषु विकीर्णेषु क्षणानन्तरं तत्र शाखासु फलपुटान्यवालोक्यन्त।

ग्रीष्मकालारम्भसमयेऽस्मिन्नाकाशपथमध्यमुत्तीर्याऽस्ताचलशिखरगामिन्यपि भुवनभास्करे भास्करे काचिदपि सन्तापन्यूनता न बभूव। हरितरक्तकिसलयाच्छादिता: वन्यवनस्पतय: पद्मरागमरकतमणिराशिमया: भूषणैरिव सुसज्जिता: सूर्यतापमवरुध्य सुशीतलच्छायावितरणप्रयासमिव सततमकुर्वन्।

कटकसन्निवेशस्याऽऽमोदभरकोलाहलोपद्रवै: किञ्चिदन्यमनस्क इव कुमारो राजवाहन एकल एव वनप्रदेशे बभ्राम। शिलाखण्डे तत्रैकस्मिन्नुपविश्याऽवनतवदनो भाविकार्यविषयकमसौ चिन्तयामास। कतिपयक्षणानन्तरं तथैव विचारयति तस्मिन् कश्चित् पदध्वनिरिव श्रुतिगोचरो बभूव। निर्जने वनोद्देशे कस्याऽऽगमनमत्र सम्भाव्यत इति विस्मयकुतूहलशङ्काकुलचेतसि राजवाहने किञ्चिदुन्नमितवदने तालतुङ्गश्यामलवपु: कश्चिदपरिचितो युवा तस्य समक्षं संयतकरयुगलो विनयावनतमुख: स्थितोऽवर्तत। प्रश्नसूचकदृष्ट्या विलोकयतो राजवाहनस्य पादयो: प्रणम्याऽसौ कथयितुं किञ्चिदैहिष्ट।

नितरां कृश: समुन्नतशिराजालग्रथितकायोऽपि स नवागन्तुकोऽपरिमितशक्तिसम्पन्न इव प्रतिभाति स्म। कटिप्रदेशे दृढावर्तितरज्जुनिबद्धं कर्बुरमधोवसनं जानुपर्यन्तं लम्बमानं दधानोऽसौ तत्रैव दीर्घं चन्द्रहासं तीक्ष्णधारं मृत्युदूतमिव कोशनिहितं दधार। चेष्टादिभिर्वन्यजातिमध्यनिवासं सूचयन्नपि मुखाकृत्यादिभिर्निजार्यजातिभावं ब्राह्मणत्वञ्चाभिव्यनक्ति स्म। ग्रीवायां वक्षसि च त्रिधावर्तितसूत्रब्रह्मग्रन्थिविभूषितं यज्ञसूत्रमंसोपनीतं धारयन्नसौ भालपट्टे रक्तचन्दनालेपत्रिपुण्ड्रेनाऽलङ्कृतोऽवर्तत। दीर्घे वपुषि क्षताङ्कास्तस्य युद्धव्यसनितां सूचयन्ति स्म।

सोत्सुकनयनाभ्यामवलोकयतो राजवाहनस्य वदनं निरीक्ष्यासावपरिचितो ब्राह्मणयुवा

तत्रैव भूमावुपविश्य सविनयं प्रोवाच -

"कुमार ! शरणमापन्नस्य मे भवानेव सहायकः । भवताऽनुमतोऽहं निजवृत्तान्तं श्रावयितुमिच्छामि ।"

तदनन्तरं कुमारेणाऽनुमतोऽसौ श्यामकायो ब्राह्मण एवं निगदितुमारेभे -

"कुमार ! अस्मत्पूर्वजाः शुक्लयजुर्वेदीयशाखाध्यायिनो मिथिलानगरवासिनो बभूवुः । वेदादिविद्याध्ययनकारिभिस्तैर्ब्राह्मणैस्तत्र समाजे स्थानं लब्धं सम्मानास्पदम् । एकस्मिन्नवसरे पितामहो मे दक्षिणभारतवर्तिसत्तीर्थावलोकनाभिलाषी कतिपयैर्देवभक्तैः सत्सङ्गिभिः सार्द्धं नगरान्निश्चक्राम । भगवतीं सकलकल्मषसन्तापहारिणीं सगरतनयस्वर्गसोपानपंक्तिं भागीरथीं शोणाद्यनेकनदीनदांश्च समुत्तीर्य सर्वे ते तीर्थयात्रिणो विन्ध्यगिर्यरण्यभूमिं प्रविविशुः । सहसैव तत्र ते किरातसमूहेन तीक्ष्णधारभल्लनिचयधरेणाऽऽक्रान्ताः । अथ च सकलेभ्योऽपि सामग्रीजातेभ्यो विलोपितास्ते लुण्ठिताः । तदनन्तरं नृशंसास्ते किराताः वराकानसहायानायुधरहितांस्तांस्तीर्थयात्रिणो हन्तुकामाः समजायन्त । तत्र मम पितामहस्य रूपं स्वास्थ्यञ्च निरीक्ष्य तं देव्यै विन्ध्यवासिन्यै समुचितं बलिपशुं विचार्य ग्रीवायां मुञ्जविरचितरज्जुपाशेन बद्ध्वा स्वकीयां पर्णोटजबहुलां वनपल्लीमानिन्युः । त्रिदिवसानन्तरं पूर्णचन्द्रद्योतितरजनीपर्वणि ते तस्य विप्रस्य शोणितेन देव्याः विन्ध्यवासिन्याः रुधिरपिपासां तर्पयितुं विविधवन्यभोजनैः सत्कुर्वन्तोऽपि कदाचिदयं पलायेतेति रज्जुनिबद्धमपि तं निरीक्षितुं सावहिता अभवन् ।

मृत्युं ध्रुवं ज्ञात्वाऽपि मम पितामहस्य वदने न काचिदपि भयरेखा मालिन्यं वा समुदितम् । अवसरं लब्ध्वाऽसौ किरातानां नायकाय सेवकेभ्यश्च धर्ममुपदिशति स्म । द्वयोरेव दिवसयोः किरातनायको मम पितामहस्योपदेशैः प्रभावितमनास्तस्य बलिपशुकरणविचारं तत्याज । तं गुरुरूपेण मन्यमानोऽसौ देवीपूजकपुरोहितपदेन विभूषयामास । तदारभ्य मम पितामहस्तत्रैव किरातैः सहारण्यनिवासमङ्गीचकार ।

कस्मिंश्चिन्मधुमये समये पञ्चशरबाणविद्धो मोहावृतचित्तोऽसौ मम पितामहः कामपि यौवनमदविकसितसर्वावयवां किरातकन्यां पाणिग्रहेणात्मीयां कृत्वा यौवनसुलभविलासाननुभवति स्म । शनैः शनैः द्विजातिजनोचितान्याचरणानि तस्य विलुप्ततां गतानि किरातभावाश्च प्रादुर्बभूवुः । तथाऽप्याशैशवादभ्यस्तो ब्राह्मणभावो न साकल्येन प्रमृष्टः । परं यज्ञसूत्रं सततं धारयन्नपि वेदादिशास्त्राणामध्ययनादसौ परित्याजितः ।

किरातवधूर्मम पितामहात् सुतमेकमजीजनत् । सोऽपि यौवनदशां प्रपन्नस्तत्र सुलभया किरातकन्यया सङ्गतः । तयोः सुतोऽहमाजन्मनः किरातबालकैः सह

सम्वर्धनसम्पोषणादिकेन सम्पुष्टो यौवनेन स्वाभाविकेन विभूषितः। मयि वंशपरम्परया समागताः पितृपितामहगुणास्तु सङ्क्रान्ताः, परं किरातरुधिरमिश्रणेन वन्यकिरातानामपि व्यवहाराः सम्प्रविष्टाः। परिणामतः पितृपक्षाद् ब्राह्मणत्वं मातृपक्षाच्च किरातत्वं मयि स्वाभाविकमेव। कार्यस्य स्वभावस्य चाऽनुरूपेण मातङ्गनाम्नाऽहं विभूषितः प्रसिद्धोऽभवम्।

तारुण्यं सम्प्रपन्ने मयि जनको मे यमदूतैः पाशेषु बद्धो यमालयं नीतः। तदनन्तरमहं परम्परया किरातैः देवीपूजकपदेऽभिषिक्तः। परं न जाने कीदृशाः संस्काराः मे मनसि हृदये बुद्धौ च समुदिताः, यत् किरातकन्यासु दृष्टिपातमपि मह्यं न रोचते स्म। बहुभिर्मनोरमाभिर्यौवनोन्मादवतीभिः किरातकन्याभिरामन्त्रितोऽपि यौवनसुखान्यनुभवितुमहं सदैव तासां सामीप्यमपि परिजहार। स्वात्मनि द्विजभाावमनुभवन्नहं यज्ञोपवीतं धारयन् देवीं विन्ध्यवासिनीं पूजयामि। अथ च तस्याः पूजनं कारयामि। परं नाऽहं देव्या सरस्वत्या तथोपकृतः न च विद्याध्ययनावसरं लेभे। विद्याकाङ्क्षां कुर्वन्नपि नाऽहं कञ्चिदुपायं पश्यामि। एवमहं हृदयान्तर्गतपीडानिपीडितोऽपि प्राचीनवशंपरम्परा-गुणवञ्चितः किरातैः सह दुर्गमवनेषु मृगयायै परिभ्रमन् पथिकजनान् लुण्ठन् व्यापादयन् समयं यापयामि।

एकस्मिन् समये किरातैः सहाऽहं निशीथे कञ्चिद् ग्रामं प्रविष्टः। तत्राऽनेके ब्राह्मणक्षत्रियविट्परिवाराः निवसन्ति स्म। वयं तेषां गृहाण्याचक्रमुः। ग्रामवासिनो व्यापादयन्तो वयं तेषां सम्पत्तिहरणे व्यापृताः। निहतेष्वनेकेषु ग्रामवासिषु सम्पत्तिमपरिमितां विलुण्ठ्य तेषामेव शकटेष्वारोप्य सर्वे ते किराताः स्वपल्ल्यै प्रतिष्ठिताः। अगणितसंख्यकाः पशवो गावो बलीवर्दाः हयाः गर्दभा अजा अवयश्चास्माभिश्चोद्यमानाः प्राचलन्।

लुण्ठितां सम्पत्तिमादाय प्रचलितेष्वस्मासु कस्मादपि गृहात् कश्चित् पुरुषो बहिरागतः। प्राणभयादेकस्मिन् दिगन्तराले धावन्तमभ्यागतमिव प्रतीयमानं कौशेयोत्तरीयवस्त्रान्तर्दृश्यमानयज्ञसूत्रेण द्विजातिभावं प्रकटयन्तं तं किराताः झटित्येव हठात् पाशबन्धबद्धमकार्षुः। देहपरिच्छदान्वेषणेन ते तस्याधोवस्त्रकटिग्रन्थिमध्यनिहितं स्वर्णमुद्राचयनिचितं प्रसेवमेकं प्रापन्। नृशंसप्रकृतयस्ते वन्यकिराताः ब्राह्मणात्तं काञ्चनमुद्रायुतं प्रसेवमेवं प्राप्याऽपि सन्तोषभावरहिताः मौञ्जरज्जुभिस्तं वराकं बद्ध्वा स्वपल्लीमानयन्। अथ च बहवो युवानो बालकाः वृद्धाः स्त्रियश्चाऽपि तैः किरातैः रज्जुपाशैर्दृढं संयमिताः।

शुक्लपक्षस्य पौर्णमासी तिथिरागता। पौर्णमासी किरातानां विशिष्टपूजनमितिर्वर्तति।

महता समारोहेण विन्ध्यवासिनी देवी पूज्यतेऽथ च पशुबलिभिर्नररक्तैश्चाऽप्यर्च्यते। स वराको ब्राह्मणस्तैर्बलिपशुर्विहितः। शिरश्छेदं हत्वाऽसौ विन्ध्यवासिन्यै देव्यै समर्पिष्यत इति निर्णयः किरातानां नायकेन कृतः। विप्रस्य यौवनावस्थया तेजसा सौन्दर्येण पाण्डित्येन च प्रभावितोऽहं करुणार्द्रचित्तस्तस्य प्राणानां रक्षायै किरातनायकमब्रवम् -

"अरे किरातनायक ! न हन्तव्योऽयं ब्राह्मणः। विप्रहननं तु महापातकमेव। सकललोकविनाशकरमेतत्। धनं त्वयाऽस्य विप्रस्य हृतमेव। तदेव पर्याप्तम्। नाऽपहर्तव्याः प्राणाः। त्यज एनम्।"

परं न तेषु वधव्यापारपरायणहर्षितहृदयेषु करुणभावस्य लेशमात्रमपि वर्तते। ब्राह्मणवधनिवारणपरोऽहं तेन किरातेन क्रोधारुणनयनेन बहुतरं भृशं निर्भर्त्सितः। परं यदैव ते किराताः ब्राह्मणवधाय चन्द्रहासानुदतोलयन्, तस्मिन्नेव क्षणे तस्य प्राणरक्षणेऽतितरां संव्यग्रचेता अहं ह्येकेनैवाघातेन विप्रस्य बन्धनानि छित्वा दक्षिणकरं चाऽवलम्ब्य त्वरितगतिः कौशलेन किरातपल्ल्याः बहिरधावम्। सकलैव किरातपल्ली कोलाहलमयी बभूव। ब्राह्मणवधव्यापारसंविग्नमनसस्ते किरातास्तस्य ग्रहणाय मामनुधावन्तो दूरादेव कार्मुकेभ्यो नाराचानर्धचन्द्राकारान् आवयोः प्रचिक्षिपुः।

परन्तु दैवगतिर्विचित्रा। आवयोर्भाग्यं प्रबलमेवाऽऽसीत्। अरक्षितमपि जनं दैवो रक्षति। किरातानां बलं सामर्थ्यं शस्त्रप्रहारांश्चोपेक्षमाणोऽहं ब्राह्मणस्य तस्य करमवलम्बमानोऽकस्मादेव गहनं वनं प्रविष्टः। वनमार्गपदपद्धतिविशेषज्ञो धावन्नहं तेन सह सुदूरं निर्गतः किराताश्च न मां ग्रहीतुमपारयन्।

किरातभयविनिर्मुक्तः किञ्चित्प्रशान्तहृदयोऽहं मार्गश्रमपरिम्लानकायो वने सघनगुल्ममध्ये स्वच्छं समतलं स्थानमवलोक्य ब्राह्मणेन सह तत्रैवोपाविशम्। परं महता तेन श्रमेण हेतितिप्रहारजनिताघातैश्च क्लान्तकायो निजं शरीरं संस्तम्भयितुमक्षमो विलुप्तचेतनोऽहं भूमौ न्यपतम्।

सहसैव मयाऽनुभूतम् -

"कज्जलकृष्णकायाः भयप्रदाः दण्डधारिणः प्रेतकल्पाः यमदूतास्तत्र समायाताः। स्थूलपार्थिवशरीरान्मे सूक्ष्मशरीरं निष्कास्य प्रतनुसुदृढरज्जुजाले दृढं संयस्य यमलोकं ते प्रातिष्ठन्त।

यमलोकराजसभायां प्रेताधिपो यमो रत्नखचितसिंहासने विराजमानो बभूव। तत्समीपमेव पृष्ठतो वेद्यां समासीनश्चित्रगुप्तः सकलब्रह्माण्डप्राणिनां शुभाशुभकर्मणां पत्रजातगणनाव्यापारपरोऽवर्तत। यमदूतैः प्रस्तुतं पुनः पुनः प्रणमन्तं मामवलोक्याऽसौ प्रेताधिपः मम पापपुण्यविषयकं चित्रगुप्तं पप्रच्छ। पत्रजातमवलोक्य चित्रगुप्तोऽब्रवीत् -

"देव ! नाऽस्य यमलोकागमनकाल: समुपस्थित: । भ्रान्तिविमूढचेतसो यमकिङ्करा: भवद्दूता: समानयन्नत्रैवैनं प्रेतपुरीमध्ये । बहुतरनिन्दितपापकर्मकृदप्ययं पवित्रोत्तमचरित्र-शाली वर्तते । किरातसंसर्गेणैवाऽस्याऽऽत्मा प्रदूषित: । साम्प्रतं पापबुद्धिरस्य प्रलयं यास्यति धर्मबुद्धिश्चाऽभ्युदेष्यति । एवञ्च विगतकल्मषोऽयं पुण्यकर्मसु समुदितरुचि: परोपकारकरणे सततं प्रयतिष्यते। पुनरपि पुरातने तस्मिन्नेव भौतिकशरीरे व्यवस्थितिरस्य सुक्ष्मशरीरस्य समुचिता।"

चित्रगुप्तस्य व्यवस्थां निशम्य यमराज: पुनरब्रवीत् -

"सत्यं तथ्यञ्चाऽभिधीयते भवता। पुरातनभौतिकशरीरे व्यवस्थापनमेवाऽस्य समुचितम् । परन्तु यमलोकसमागतोऽयं पापकृज्जनोचितां दण्डव्यवस्थां तावदवलोकयतु । तेषां दुर्दशां पीडाञ्चाऽवलोक्य दुष्कर्मत्यागे समुद्दीपितचित्तोऽयं पुण्यकर्मसु भृशमवहितचित्त: सावधानो निष्ठावांश्च भविष्यति। अंतो नयतैनं निरययातनास्थलेषु। तदवलोकनं विधाय दुष्कर्मभ्यो विरक्तो भूत्वा मृत्युलोकं गत्वा पुरातनभौतिकशरीरमेवाऽयं प्राप्नोतु।"

तदनन्तरं चित्रगुप्तेनाऽऽदिष्टा: यमकिङ्करा: मां पापिष्ठजनोचितदण्डव्यवस्थां दर्शयितुं निरयस्थानान्यानयन्। तत्र च मया विविधयातनासम्पीडितशरीरा: दुष्कृतपरिणामभोगपरा: पापिष्ठा अवलोकिता:।

"केचन दुष्कृतकारिण: कृष्णलोहायसस्तम्भनिबद्धा: लोहदण्डै: सकीलकैस्ताड्यन्ते । कुत्रचिदन्ये लोहतीक्ष्णकण्टकाञ्चितशय्याशयाना: स्थूलस्थूलैर्मूसलै: सम्मर्द्यन्ते । क्वचिदपरे भूमावेव संवेश्य तीक्ष्णधाराभिराराभि: संतक्ष्यन्ते । केचिद् वह्निसन्तप्तारक्तायसस्तम्भेषु लोहशृंखलाभिर्बध्यन्ते। केचन भुवि शरीरार्धेन निवेशिता: कुक्कुरैर्वृकाकारैर्भक्ष्यन्ते। अथ चाऽन्येऽत्युष्णीकृते विततैतैलसम्पूरितकटाहे ह्युत्क्वाथ्यन्ते। दारुणयातनाभि: सम्परिक्लिष्टानां निरयपतितानां पापकारिणामार्तनादै: प्रेतपुर्या: निरयस्थानानि ध्वनिप्रतिध्वनिनिनादैर्हृदयं मे त्रासेनाऽऽपूरयन्।

अथ च तत्र तपनावीचिमहारौरवरौरवसंहारककालसूत्रतामिस्रान्धतामिस्रासिपत्रपवना-द्यनेकविधनरकेषु दुर्गतिस्थानेषु यातनाशिविरेषु तादृशैर्लोमहर्षकदृश्यैर्हृदयमन:प्राणात्मनां मम कल्मषाणि सर्वथाऽपहृतानि । पापकर्मभ्य: सातत्येन निवर्तितुं मया पुन: पुन: कर्णौ गृहीत्वा प्रतिज्ञातम्। पुण्यकर्मभ्यो वंशपरम्परागता प्रवृत्ति: पुनरप्युदियाय। विविधनरकदृश्यान्यनुभाव्य पितृपतिदासेरा: पुनरपि मम सूक्ष्मशरीरं गहनवनान्तभूमिषु निपतिते स्थूलशरीरे प्रवेश्य स्वलोकमगच्छन्। "

अथ स्वल्पैरेव क्षणै: स्वस्थतां गतेन मया नयने समुन्मीलिते। द्वाभ्यां करतलाभ्यां

चक्षुषी सम्पीडयन्नहं समुदतिष्ठम्। तेषु क्षणेष्वहं विततशिलातले शयानस्तेनैव विप्रेण परिचर्यमाण आसम्। मां प्राणवन्तमवलोक्यातितरां प्रसन्नहृदयोऽसौ प्रावोचत् -

"निकषैव शोणसरितस्तटं मम निवासो ग्राम:। तत्रैवाऽस्माभिर्गन्तव्यम्।" तदनन्तरं तेनैव धर्मात्मना आरुणिनाम्ना विदुषा दत्तावलम्बोऽहं तस्य गृहमायात:। तस्य परिजनैरहर्निशं परिचर्यमाण: स्वल्पैरेव दिवसै: स्वस्थोऽभवम्।

स्वस्थीभूते मयि कृतज्ञताभावपरिपूरितहृदयात्तस्मात् परमविदुषो विप्राद् विप्रजनोचितसदाचरणोपदिष्टोऽक्षरज्ञानमधीयाय। स तु मां धर्मलक्षणमुपदिश्य धार्मिकविधिभिर्यज्ञोपासनादिकर्मकाण्डानध्यापयामास। एवञ्चाहं तस्य गृहे निवसन् वर्षद्वयं विद्याध्ययननिमग्नमानस: सदाचारपुण्यकर्मसु रतिमकरवम्।

अथैकस्यां रजन्यां निद्राङ्कगतस्य मे चक्षुषी निशीथे दिव्याद्भुतप्रकाशेन सर्वत्र प्रसरता समुन्मीलिते। शयनात् समुत्थाय दत्तावधानोऽहं किमिति भवतीत्याशङ्कया व्यालोकयम् -

"वृषभारूढ: पशुपतिर्नीलगगनादवतीर्य मे समक्षमागत्य वृषभादवततार। कटिप्रदेशे व्याघ्रचर्मवस्त्रेण ग्रीवायां कृष्णोरगमालया स्कन्धयोर्गजचर्मणा द्वयोरेव मणिबन्धयो: कफण्योश्च तरङ्गायतस्फटाभयङ्करैर्भुजगैर्ललाटे च जटाजूटमध्ये शशिकलया विभूषितो जगत्सर्गस्थितिप्रलयहेतु: शिवश्चिताभस्मसंलिप्तसर्वावयवस्तत्र तस्थौ।

विस्मयानन्दोद्वेगादिभावैरनिर्वचनीयै: परिपूरितहृदयोऽहं तत्क्षणमेव भगवत: शङ्करस्य चरणयोर्न्यपतम्। द्वाभ्यामेव करतलाभ्यां मां समुत्थाप्य स्मितसुशोभितमृदुलमधुरवचोभिरसौ मां समवाबोधयत् -

मातङ्ग ! प्रसन्नोऽहं त्वय्यतितराम्। किरातादिवन्यजातिजनोचितदुराचारजातं सर्वथा परित्यज्य त्वं विप्रजनोचितसदाचारान् सततं पालयसि। यथेष्टं वरं याचस्व। अभिलाषास्ते पूर्णतां यास्यन्ति।

साक्षात् परमप्रभुं शशिशेखरं समक्षस्थितमवलोक्य भक्तिभावविह्वलोऽहं किमपि वक्तुमशक्त: किंकर्तव्यविमूढ: पुनरपि चरणनिपतित: सगद्गदवाचा व्याहृतवान् -

प्रभो ! ज्ञानरहितोऽहं भवच्छरणमेव प्रपन्न:। किं मे हितकरमहितकरं वेत्यहं न किञ्चिदपि जानामि। किमहं भवन्तं याचे ? यदेव मे श्रेयस्तदेव मङ्गलाय वितरतु।

इति कथयित्वाऽश्रुक्लिन्नवदनमुत्तमाङ्गं मया प्रभोरेव चरणयोर्निहितम्। भगवान् परमप्रभु: कल्माषग्रीवोऽपि द्वाभ्यां हस्ततलाभ्यां मां पुनरुत्थाप्योत्तानस्थितं कृत्वाऽभणत्-

वत्स ! मातङ्ग ! धन्यस्त्वं धन्या च ते भक्ति:। भक्ततमं त्वामहं मन्ये। ध्यानावहितचेतसा मां शृणु तदनुसारञ्च व्यवहर। रहस्यतमं ते ब्रवीमि।

दण्डकारण्ये रेवामुत्तीर्य सरितो वामेतरे तटे तीरभुक्तिर्नाम ग्रामो विद्यते। सरितस्तटं पश्चिमदिशमनुसरंस्त्वं द्विक्रोशमात्रं गत्वा शिवमन्दिरमेकं पुराणं प्राप्स्यसि। शिवमन्दिरं परितः वाटिकायां बिल्वकनेरशालतमालशाकादितरूणां पङ्क्तयो विलसन्ति। मन्दिरस्य गर्भगृहे स्फटिकमणिविरचितं विशालाकारं शिवलिङ्गं जलहर्याः मध्ये स्थापितं विद्यते। सिद्धाः गन्धर्वाः किन्नराश्च विशेषरूपेण तत्र मामर्चन्ति। अहं स्वयमेव वृषभारूढो भवानीसहितस्तत्र पौर्णमास्यां निशीथे समागत्य भक्तजनानां मनसोऽभिलाषं पिपर्मि। त्वमपि पूर्णिमानिशीथे तत्र गत्वा विधिवन्मामुपास्स्व।

तदनन्तरं भवान्या आशीर्भिरनुगृहीतस्त्वं मन्दिरस्य पृष्ठदेशं गच्छ। तत्र त्वं नाऽतिलघुकन्दराद्वारं द्रष्टासि। पृथिवीगर्भगामिन्यां तस्यां गुहायां प्रविश। सहायमेकमप्यवश्यं तत्र नय। मगधजनपदाधीशराजहंससुतो राजवाहनो दिग्विजययात्रायै परिभ्रमंस्तदरण्यप्रदेश-मागमिष्यति। स एव तव सहायको भविता। कैश्चिदप्युपायैस्तेन राजवाहनेन सार्द्धं त्वं कन्दरामुखे प्रविश। तेन पथा प्रचलंस्त्वं पाताललोकमवाप्स्यसि।

राजवाहनेन सह गुहां प्रविश्याऽग्रे पदानि निदधानः प्रगाढान्धतमसाऽऽवृते वातमण्डले कथमपि लब्धमार्गो हस्तपादेन भूमिं भित्तीश्च परामृशन्नग्रेसरस्त्वं यामद्वयं गत्वा मन्दमालोकं द्रक्ष्यसि। स एव द्वितीयः पाताललोकप्रवेशमार्गः। परन्तु स तु सुदृढलोहभित्तिभिः पिहितः। द्वारस्य दक्षिणपार्श्वभित्तौ छिद्रमेकं वर्तते। दक्षिणकरतलेन परामृशंस्त्वं छिद्रमध्यात् ताम्रपत्रमेकं लप्स्यसे। ताम्रपत्रं तत् स्वहस्तगतं कृत्वा मन्दालोके पठित्वा त्वया तदनुसारं व्यवहर्तव्यं कार्यञ्च विधेयम्।"

वृत्तमेतद् वर्णयन् सकौतुकं सविस्मयमाकर्णयन्तं राजवाहनं स मातङ्गः क्षणं विरम्य पुनरप्युवाच -

"कुमार ! एतत् कथयित्वा भगवान् पशुपतिरन्तर्हितः। तस्मादेव कालादहं भवन्तमन्विषन् सततं भ्रमामि। अद्य भवदागमनसमाचारमुपलभ्य एकान्तमिलनसम्भावना-व्यग्रमनाः भवदन्तिकं समायातः। सहायको मे भवान् भवेदिति प्रार्थना भवता स्वीकरणीया। श्व एव पूर्णिमा मितिः। साम्प्रतमावयोः शिवमन्दिराय प्रस्थितयोर्यथासमयं तत्रोपस्थितिर्भविष्यति।

करुणार्द्रचित्तः परहितसाधनैकव्रतः कुमारो राजवाहनो द्विजोत्तमस्य मातङ्गस्य वृत्तं निशम्य तस्मिन् कर्मणि कुतूहलजन्यहर्षमनुभवन् सहायतायै कृतप्रतिज्ञ आसीत्। उदारान्तःकरणवृत्तीनां चेतांसि परहितसाधनाय सदा सन्निहितानि भवन्ति। मातङ्गवचनादेव शिवमन्दिरं गन्तुमुत्कण्ठितः सहचरानविज्ञाप्यैव कुमारो विप्रेण सार्द्धं प्रातिष्ठत। आगामिनि पूर्णिमासमये शिवमन्दिरं रेवातटवर्ति निश्चयेन प्रापणीयं, शिविरं

यावद् गमनेन प्रत्यागमनेन च विलम्बो भविष्यति, इति कार्यमहत्त्वव्यग्रातुरो राजवाहनो न समर्थो बभूव सहायान् सूचयितुमपि। मुहूर्तेनैव तौ नर्मदातटगामिमार्गमभितः स्थितेषूत्तुङ्गसघनपत्राच्छादिततरुराजिषु विलीनावभवताम्।

इतश्च शिविररक्षासंव्यग्रमानसाः सोमदत्तादयः कुमाराः कुमारस्य राजवाहनस्य प्रवृत्तिमनवलोकयन्तः स्वकार्याणि चक्रुः। राजवाहनमेकाकिनं गच्छन्तं ते ध्रुवमेवापश्यन्, परं शीघ्रमेवागमिष्यतीति चिन्तारहिता आसन्। शिविरव्यवस्थां सम्यग् विन्यस्तां विन्यस्यतां तेषां भुवनभास्करोः भास्करः सकलदिवसयात्रापरिश्रान्तोऽस्ताचलशिखरारोहणाभिलाषी बभूव। अहोरात्रसन्धिसमयश्च समायातः। परं राजवाहनो न सम्प्रत्यपि प्रत्यायातः। व्याकुलचेतसस्ते कुमाराः राजकुमारस्याऽन्वेषणाय चतसृषु दिक्षु प्रेष्यानलातग्राहिणः संप्रेष्य स्वयमपि सुदूरं बभ्रमुः। परं न तस्य चिह्नमप्यध्यगच्छन्। प्रसृते च सर्वत्र प्रगाढान्धकारे वर्षतीवाञ्जनं नभसि एकभूतमय इव संभूते जगति विफलीभूतेषु च नयनव्यापारेषु पटमण्डपस्यैककोणे निषण्णास्ते विषण्णवदनाः सकलामेव निशामत्यवाहयन्।

ब्राह्ममुहूर्तानन्तरं समुदितायामरुणाभासन्दीपितायामुषसि प्रसृते च सर्वत्र मन्दालोके प्राभातिके मगधाधिपशिविरे पुनरपि प्रातःकालीनकार्यकोलाहलः समजायत। परं कुमारस्य राजवाहनस्य काऽपि सूचना नाऽधिगता। दिवसत्रयं तत्रैव स्थितैः सोमदत्तादिभिः कुमारैः सकलं तद्वनमालोडितम्। परं न कुत्राऽपि कुमारस्य राजवाहनस्य चिह्नमपि प्राप्तम्। तदनन्तरं निराशीभूय परस्परं परामर्श्य भविष्यत्कार्यक्रमं ते निर्धारयामासुः।

सहायभूतामनीकिनीं सकलञ्च सेवकवृन्दं पुनरपि मगधाधिपं राजहसं निकषा सम्प्रेष्य तैः कुमारैर्नवसंख्याकैर्निश्चितम् - ते स्वयमेव सर्वासु दिक्षु परिभ्रमन्तः स्वामिनं परिमार्गयिष्यन्ति। हायनैकानन्तरञ्च ते कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां मालवजनपदस्य राजधान्यामुज्जयिन्यां सायन्तनसमये महाकालमन्दिरे शिप्रातटे सम्मिलिष्यन्ति। इति सङ्केतं विधाय सर्वेऽपि कुमाराः वीरा उत्साहवन्तो नीतिनिष्णाताश्च विसृज्य परस्परं पृथक् पृथक् विभिन्नासु दिक्षु प्राचलन्।

इतश्च मातङ्गो विप्रो राजवाहनसहायो दक्षिणदिशि त्वरितगतिर्नर्मदातीरमभिलक्ष्य प्रातिष्ठत। सघनवनस्पतिवानस्पत्यकण्टकाञ्चितक्षुपलतावल्लरीजालमाक्रममाणौ मार्गवैषम्यं दुर्गमत्वं काठिन्यञ्चोपेक्षमाणौ व्याघ्रचित्रकवृकगण्डकगजमहिषादिभयजनकहिंस्रजन्तून् परप्राणहरणव्यसनिनः प्राणिनोऽवहेलयन्तौ चित्रकरुरुसारङ्गादिमृगाणां मयूरचातकवर्तकतित्तिरिशुकादिविहगानां हंसबकसारसक्रौञ्चजलकाकादिजलपतत्रिणां

विन्ध्यवनगतकासारजलक्रीडाव्यसनिनां नयनप्रीतिकरसौन्दर्यं निरीक्षमाणौ स्वलक्ष्यं प्रति सततमेकाग्रमानसौ प्राचलताम्।

विन्ध्यारण्यमनल्पैः कमलिनीहरितैः सरोभिः समलङ्कृतमवर्तत। सहसैव ताभ्यां पथतटवर्ती स्वच्छनीलसलिलसम्पूर्णो नातिबृहन्नातिस्वल्पायामो पद्माकरोऽवलोकितः। पुण्डरीकेन्दीवरकोकनदकैरवकुमुदादिजलजपुष्पाभरणं मध्ये मध्ये हरितशैवालाच्छादितं हंससारसक्रौञ्चकादम्बवटकजलकाकादिसलिलवयोनिनादितं तं कासारमवलोक्य पथि श्रमविनोदनाभिलाषौ तटवर्तिशिलाखण्डमुपस्थाय तृट्क्षामकण्ठौ तावञ्जलिभ्यामेव जलसंघुटकानि पातुमारेभाते।

अथ प्रशमितायां पिपासायां पद्माकरसौन्दर्यावलोकनेन हृतहृदयौ परमपरमात्मनः सृष्टयुत्पत्तिपालनप्रलयकारिणो जगत्सर्जनकौशलदर्शनेनाभिभूतचित्तावभवाताम्। तैरवलोकितम् -

"जलचरपतत्रिणस्तु कदाचिन्नीलनिर्मलसलिले तरन्ति, कदाचित् सुविस्तृते सुनीलनिर्मलव्योम्नि पक्षान् प्रसारयन्त उत्पतन्ति कदाचिच्च भूमावेव खाद्यभूतान् कृमीनन्विषन्तो विचरन्ति। केचन जलपक्षिणो यौवनमदोन्मत्तचेतसो मधुरकलरव-क्रेङ्कारनिनादैर्वायुमण्डलं निनादयन्तः प्रेयसीरनुधावन्ति। निर्मलगभीरपारदर्शिनीरे सर्वतस्तरन्तो विविधवर्णकर्बुरचित्रविचित्राः स्वल्पाकाराः मत्स्याः सुतनुतरङ्गान् समुत्पादयन्ति। परितस्तु वनप्रान्तरेषु मधुसमयप्रभावविकसितपुष्पाः लोहितकिसलयसमाच्छा-दिताः लताः सम्प्रत्यपि निकटस्थितवनतरुस्कन्धाश्रयेणाऽऽरोहन्त्यः शाखाबाहुभिस्ताना-श्लिष्यन्त्यः सुविकसितसुममुखैश्चुचुम्बिषया परितः सरन्ति। प्रकृतिजनन्या विसृष्टेऽपि वसन्ततौ समागते चाऽपि तपर्तौ पर्यावरणं तत्र वासन्तिकसुषुमया परिवेष्टितं बभूव।"

जलाशयस्य पर्यावरणमेतद् राजवाहनमातङ्गाभ्यामतितरामरोचत। मुहूर्तं विस्मृत्याऽन्यत् सर्वं प्रकृतिशोभादर्शनमेव तावकुरुताम्। तदनन्तरं निर्मलनीरेण हस्तपादं वदनञ्च प्रक्षाल्य सलिलमाचम्य राजवाहनः सन्ध्यावन्दनञ्चकार। मातङ्गोऽपि तमनुसरन् शिवस्तोत्रं मधुरताललयानुसारिस्वरेण समगायत। तदनन्तरं जलाशयोद्धृतकमलनालकृताहारयोः सम्पीतनिर्मलनीरयोस्तयोः भगवान् दिनपतिः स्वकरान् संजहार। समागतायाः निशायाः तमसा सर्वतो दिक्षु प्रसृत्य तद्वनमावृतम्।

निशान्धकारे प्रगाढे यात्राया असम्भाव्यतां सम्भाव्य तौ राजवाहनमातङ्गौ तत्रैव कासारतीरसमतलशिलायां पत्रविष्टराच्छादनायामशयाताम्। प्रातरेवोदितायामुषसि अरुणमन्दालोके नित्यकर्मभ्यो निवृत्तौ पुनः नर्मदां प्रति प्रतस्थाते। मध्याह्नसमये व्योममध्यमारूढे सवितरि ताभ्यां नर्मदातीरं सम्प्राप्तम्। अथ बाहुभ्यामेव नर्मदां तीर्त्वा

दक्षिणतटवर्तिभूमिभागं प्रपन्नौ।

राजवाहनो मातङ्गश्चाऽपि तत्र रेवाया: दक्षिणतटवर्तिनि भूभागे मुहूर्तं विश्रम्य पुनस्तटमनु पश्चिमाभिमुखौ प्राचलताम्। तीरभुक्तिग्राममुपलभ्य तत्र क्षणं विश्रम्याग्रेसरीभूय सूर्यास्तङ्गमनसमयात् पूर्वमेव पूर्वनिर्दिष्टं भवमन्दिरं तौ प्राप्नुताम्। मातङ्गवर्णितां तामेव स्थितिमुपलभ्य प्रहृष्टमनसौ भगवन्तं त्रिभुवननाथं त्रिपुरारिं शिवसङ्कल्पमन्त्रैरुपास्य जलहर्यां स्थापितं जगल्लयकारिलिङ्गं जलैरभिषिच्य तौ साष्टाङ्गप्रणामेन प्रणेमतु:। तदनन्तरं विगतभोजनादिव्यापारौ व्रतधारिणावेव भवानीसहितं भवमर्धरात्रं यावदवन्देताम्।

अथ निशीथान्धतमसे ह्युल्मुकमादाय पुनरपि शिवानीसहितं शिवमभ्यर्च्य मन्दिराद् बहिरागत्य पृष्ठप्रदेशं जग्मतु:। तत्र ताभ्यां विशालाकारं कन्दरामुखमवलोकितम्। इयमेव भगवदाशुतोषवर्णिता पाताललोकप्रवेशकारिणी कन्दरेति निश्चित्य तौ तां प्रविविशतु:। प्रशस्तायामप्रफुल्लवायुमण्डलयुता साऽवसर्पिणी कन्दराऽवतरन्ती प्रतीयाय। उल्मुकस्यालोकेऽग्रत: प्रसरतोस्तयो: सहसैव पवनवेगेनाऽसौ निर्वापित:। परं कार्यसिद्ध्यै कृतनिश्चययोस्तयोर्मनसो न नैराश्यलेशोऽपि पस्पर्श। अविदितसमयगतिकौ तावग्रेसरन्तौ मन्दालोकमवलोक्याऽतितरां हर्षाभिभूतहृदयौ बभूवतु:।

राजवाहनेनाऽत्राऽवलोकितम्-

"लोहकपाटेन पिहितो द्वारमार्ग:।" किट्टाञ्चितेऽतिपुरातने परमतिदृढे लोहकपाटे नयने व्यापारयन् राजवाहन: पार्श्वभित्तौ छिद्रमेकमवलोकयामास। छिद्रे दक्षिणकरं प्रवेश्य परामृश्य वितस्तिविस्तारयुतं समचतुष्कोणं ताम्रपत्रमेकं स बहिरानिनाय। प्राकृतभाषायामुट्टङ्कितातिकृष्णवर्णानि भ्राजमानान्यक्षराणि पठित्वा तौ तदनुसारेण कार्येषु प्रवृत्तौ।

लोहकपाटं निकषा राजवाहनो भूम्यां विवरमेकं ददर्श। कटिप्रदेशाच्छुरिकामानीय स्वल्पेनैव खननेन तेन दीर्घा पित्तलतालिकैका समधिगता। तामादाय स कुमारो लोहकपाटस्य तनुछिद्रे निवेश्य सम्पूर्णशक्त्या व्यावर्तयामास। व्यावर्तितायाञ्च तालिकायां लोहकपाट: कडकडेति ध्वनिना सहोपरितनभित्तौ विलीन:। तत्क्षणं सा कन्दरा सम्मुखागतेन दिव्यालोकेन सहाद्भुतस्वर्गीयसौरभेण व्यापृता। राजवाहनमातङ्गौ कार्यसाधने सुदृढसुनिश्चितहृदयौ तेनैव कन्दरामार्गेणाऽग्रेसरौ बभूवतु:। पाताललोकस्याऽयं प्रवेशमार्गोऽवर्तत।

कानिचित् पदानि गत्वा कन्दराया: द्वितीयं मुखं समागतम्। सम्प्रति तावुभौ सत्साहसौ वीरौ पाताललोकस्य बाह्यप्रदेशेषु सुविस्तृतव्यावृतगगनमण्डलस्याऽधस्तात् समागतौ। विस्मयाभिभूतचेतसा राजवाहनेनाऽवलोकितम् -

"भूलोक इव पाताललोकेऽपि तथाविध एव भानुप्रकाशः, तादृशा एव वनस्पतयः पशुपक्षिणश्च वर्तन्ते। परन्तु न तत्र कश्चिज्जनोऽवलोक्यते।"

नासिकासमक्षमेवाऽग्रे गच्छन्तौ तौ वाटिकामेकामतिमनोहारिणीमपश्यताम्। अनुपमैव तस्याः शोभाऽवर्तत। विविधतरुक्षुपलतावल्लरीवीथिकाभिः सुशोभितायाः वाटिकायाः मध्यभागे नीलाच्छाम्भःसम्भृतं सरो विविधकमलकुमुदकैरवकह्लारकोकनदेन्दीवरपुण्डरीकचयनिचितमविद्यत। सारसक्रौञ्चादिजलविहारिणां पतत्रिणां क्रेङ्कारध्वनयः सुदूरप्रान्तरेष्वपि प्रतिनिनदुः। जलाशयं परितस्तटभूमिः धवलप्रस्तरखण्डसुनिबद्धा सलिलगर्भगतसोपानपङ्क्तिचिताऽवर्तत। अभितस्तु मरकतमाणिजटिताः पीठिकापरम्पराः पथिकजनोपवेशनसमुचिताः समदृश्यन्त। श्रमक्लान्तवपुर्मनसौ राजवाहनमातङ्गौ पीठिकामेकाभुपवेशनेनाऽलञ्चक्रतुः।

अथ सहसा मातङ्गः पीठिकाया उत्थाय त्वरितगत्योत्फालं विधाय कासाराम्भः प्रविष्टः। सुदीर्घकालं तत्र जले निमग्नस्येव तस्य न किञ्चिच्चिह्नमदृश्यत। प्रहरैककाले व्यतीते सहसा तरङ्गायिते सलिलराशौ तन्मध्ये दिव्यरूपधारिणः पुरुषस्यैकस्याऽऽविर्भावो बभूव। स च तेजसा सकलमेव पर्यावरणं चमत्कुर्वन् सन्तरंस्तटमुपगम्य सलिलाद् बहिरागत्य सोपानमार्गेण तीरभुवमधिरुह्य राजवाहनमुपसृत्य तस्य चरणयोः प्रणनाम।

सविस्मयेन राजवाहनेनाऽवलोकितम् –

मातङ्ग एवाऽयं दिव्यपुरुषो रूपान्तरं गतः। सुदीर्घकालं सलिले निमग्नोऽपि नाऽर्द्रीभूतशरीरो लक्ष्यते। सकलोऽपि तस्य कायस्तप्तकनकराशिरिव तेजसा दिगन्तरालान् प्रकाशयति। सुशोभनपीतकौशेयपरिधानावृतस्य विविधमणिमुक्ताजटिताभरणसुभूषितस्य तस्य वपुषः सुमनोहरा कान्तिः जनानां चित्तानामाकर्षणे हठात् समर्था। स्मितपूर्वाभिभाषी राजवाहनो मातङ्गशरीरे विलोचने व्यापारयामास।

सहसा प्राचीदिगन्तरालात् सौरभराशिः घ्राणेन्द्रियतर्पणः प्रावहत्। दिव्याव्यक्तमधुरमनोमोहककलरवैः कर्णेषु मधुधाराभिरिव प्रविष्टम्। राजवाहनमातङ्गाभ्यामवलोकितम् –

"अनुपमरूपराशिसुशोभिता वपुषः कान्त्या सकलमेवोद्यानोद्देशमालोकचमत्कृतियुतं विदधती मन्दस्मितशोभमानवदना शनैः शनैः पदानि निदधती काचित् प्रमदा सखीभिः परिवृता समायाति। अनुपमं सकलभुवनजननयनविस्मयकरं तस्याः सौन्दर्यमवर्तत।"

तन्वी कृशा पुष्पशरधनुरिव कमनीया स्वर्णमयीव देहयष्टिः, सघनश्यामलघनघटां तिरस्कुर्वन् कुन्तलनिकरः, अलकराशिमध्यात् परिपूर्णचन्द्रमण्डलमिव दीप्तिमन्मुखमण्डलं, भवभालसुशोभितसमुज्ज्वलशीतरश्मिकलेव कान्तिमान् मूर्धा, चकितहरिणीविलोचने इव

चञ्चले नीलकमलनयने, नयनयोरुपरि मन्मथकार्मुकसमे भ्रूलते, किञ्चिद्दीर्घाणिमत्तीक्ष्णाग्रभागा श्वासप्रश्वासराशिभिः सौरभमिव प्रसारयन्ती शुकतुण्डसमा शुभ्रसमुज्ज्वलहीरकमणिजटितलवङ्गविभूषणविभूषिता नासिका, नवविकसितकोकनदपटलसमसुकोमलौ कम्पमानौ पीयूषद्रवपरिप्लुताविवौष्ठौ, तन्मध्याच्च प्रवालराशिराजिजटितमौक्तिकपंक्तिरिव दृश्यमाना दन्तावलिः, ब्राह्ममुहूर्ते नवोदितोषर्वर्णचौरौ सम्भरितौ कपोलौ, पद्मरागमणिजटितकर्णकुण्डलसुभूषिते कर्णपाली, गोलाकारमप्यणिमच्चिबुकं, शुभ्रनीलमौक्तिकैकावलिसमलङ्कृता दीर्घा गोलाकारा तन्वी कम्बुनिभा ग्रीवा, कण्ठाधश्चोभयतः वक्षःसमुद्भवौ पञ्चशराश्रयभूतौ समुन्नतौ शुभ्रकौशेयचोलिकानिबद्धौ चन्द्रहारविभूषितौ कथमपि महता प्रयासेन यौवनोद्दामवेगसंस्तम्भकौ पयोधरौ, चोलिकामपि भेदयन्ताविव तीक्ष्णाग्रौ श्यामिकामिव प्रकटयन्तौ चूचुकौ, सुघटितौ स्मरभारवहनसमर्थौ स्कन्धौ, शेफालिकालतागौरवर्णीविटपाविव तनुमांसलौ तरङ्गायमाणौ भुजौ, वक्षोऽधस्तात् सततं तनुतां गच्छन्ती अवसर्पिणी कटिस्तत्रैव सम्मुखमुदरमध्ये विराजमाना गभीरा नाभिः तस्याधस्ताच्च त्रिभुवनवशीकरणसामर्थ्यशालिनी त्रिधावर्तितरज्जुपंक्तिरिव त्रिवली, तदधस्तनप्रदेशे सूक्ष्मनीलकौशेयाधोवसनावरोधकारिणौ सुपुष्टौ सुघटितौ सुविस्तृतौ नितम्बौ, नीलक्षौमाधोवस्त्रान्तर्निहिते अपि वसनसूक्ष्मभावेन नीलाभयुतहेमराशिनिर्मिते इव श्यामलसघनाडम्बरमध्ये तडिन्मालासमे विद्योतमाने पिचिण्डके, इति सौन्दर्यसारतत्त्वैः लोकसृष्टिकरेण वेधसा रूपैकसारसरसा विरचिता सा प्रमदा ब्रह्मणः सृष्टिरचनाकौशलप्रमाणमिवाऽवर्तत।

मृदुलकिसलयतामरसपटलराशिवर्णचरणौ भुवि निक्षिपन्ती सा स्थलकमलशोभामिव चलन्तीमापादयामास। कलहंसगतिमप्युपमानबाह्यां कुर्वती सा तरुणी भगवतः शङ्करस्याऽऽशुतोषस्य प्रसाद इव राजवाहनमातङ्गयोः समक्षमुपतस्थौ। समवयोरूपराशियौवनसम्पत्तिशालिन्यश्चतस्रः सख्य इव प्रमदास्तां परिवारयन्त्यस्तस्थुः।

साऽसामान्या तरुणी वामेतरं चरणं भुवि संस्थाप्य वामञ्च किञ्चित्पृष्ठतः कृत्वा पार्ष्णिमुन्नमय्याऽङ्गुष्ठेनैव स्थित्वा वामकराङ्गुलिभिश्चिबुकं सन्धार्य ईषत्तिर्यङ्नयने कदाचिद् राजवाहने कदाचिन्मातङ्गे व्यापारयामास। अधरश्च तस्याः कदाचिन्मृदुमधुरस्मितेन कदाचिच्च कम्पेन शुशुभे। किञ्चिद् वक्तुमभिलषमाणाऽपि नारीजनसुलभलज्जावशाद् वक्तुं न पारयामास।

चतसृभिः सखीभिः सहाऽऽयातां परिवृतां तां तरुणीमवलोक्य विस्मयहर्षविमुग्धौ राजवाहनमातङ्गौ नयननिमेषस्याऽपि विस्मृत्य क्षणमात्रं तथैव तस्थतुः। अथ च मृदुगम्भीरवचोभिस्तां तरुणीं राजवाहनः पप्रच्छ –

"बाले ! का त्वं कस्य च पुण्यतमस्य भाग्यशालिनस्त्वं सुता ? किं नामाभिधानमिदं नगरम् ? त्वदतिरिक्तं न कमप्यन्यं जनमहमत्र प्रेक्षे। सर्वमेव खलु वृत्तं विस्तरेण वर्णनीयम्।"

राजवाहनस्यैतां प्रश्नपरम्परामाकर्ण्य प्रकृत्या रक्तावपि कपोलौ यौवन-जनितलज्जयाऽपरिचितजनपृच्छया च प्रगाढमतिप्रगाढमारक्तभावं प्रपेदाते। एकस्याऽपि शब्दस्योच्चारणेऽसमर्थाऽवनतवदना सव्येतरपादाङ्गुष्ठनखेन भूमिं विलिखन्ती सा तस्थौ। अथ तस्याः सखीष्वन्यतमा शशिप्रभा राजवाहनमेवं प्रोवाच -

"आर्य ! प्रतिभाति भवान् मगधजनपदराजकुमारो राजवाहनः। भवतामयं सहचरोऽपि मातङ्गो नाम द्विजो भवेत्। पूर्वमेव प्राप्तसूचनाभिरस्माभिर्भवतोः परिचयो ज्ञायते। भवतोरागमनसमाचारमुपलभ्यैवाऽस्माकं स्वामिनी राजसुता स्वागतायाऽत्र समायाता। भवद्भ्यामप्यस्माकं परिचयोऽवगन्तव्यः। प्रथमं तावदस्माभिः समुचितरूपेणोपस्थातव्यम्।"

अथ आसीनेषु सर्वेषु समीपस्थितमरकतमणिनिबद्धपीठिकासु शशिप्रभा राजवाहनं प्रत्युन्मुखी वचांस्येवं जगाद -

"आर्य ! आसीदत्र कतिपयहायनपूर्वं पाताललोके कलिन्दाभिधानोऽसुरराजो महापराक्रमी ह्यतिशयितसकलभुवनमण्डलराजशक्तिः शासनाधिकारी। तस्य भुजबलपराक्रमस्य युद्धकौशलस्य राजनीतिदाक्ष्यस्य च कीर्तिर्भुवनत्रयं व्यापूर्य व्यवस्थिता। आसृष्टिरचनाव्यापाराद् देवानामसुराणाञ्च प्रकृत्या स्वाभाविकं वैरं प्रवर्तते। तत्र ब्रह्मविष्णुमहेशास्त्रयोऽपि महादेवाः सुराणामेव सहायकाः भवन्ति। असुरराजः कलिन्दो भक्तिविह्वलचेतसा ब्रह्माणं महेशञ्चोपास्य अवध्यत्वं नाम वरं लेभे।

तदनन्तरं पूर्ववृत्तमप्यतिशयानः पराक्रमोत्साहौदार्यगुणैः सुरान् पराजयमान ऐन्द्रलोकं प्रविश्य देवाधिपतिं सुनाशीरं विजित्याऽसुरनायको देवराजधानीममरावतीमधिचक्रे। पराजितोऽसुरनायकैस्तिरस्कृतश्च स देवाधिपतिः स्वल्पैरेव सहचरैरितस्ततो बभ्राम। प्रथमं तावदसौ ब्रह्माणमुपजगाम। तदनन्तरं त्रिपुरवैरिणं शिवमुपासाञ्चक्रे। परमेते महादेवते तस्य साहाय्यार्थमसामर्थ्यमेव व्यानञ्जतुः। तदनन्तरं देवराजः सकल-ब्रह्माण्डपरिपालकं विष्णुमुपजगाम। देवराजेनेन्द्रेण सुमधुरस्वरताललयानुसारं सङ्गीतितानि वेदमन्त्रस्तोत्राणि श्रुत्वा लक्ष्मीबल्लभो विष्णुस्तस्य प्रार्थनां स्वीचकार।

बलपराक्रमशस्त्रसञ्चालनयुद्धदाक्ष्यमदमदोन्मत्तः समयमुपेक्षमाणः कलिन्दोऽसावसुर-राजो मृत्युना परिगृहीत इव शङ्खचक्रगदापद्मधारिणमच्युतमपि तृणाय मन्यमानो विष्णुलोकमपि परितो रुरोध। परन्तु कुत्र तत्र बलसाम्यम्? एकतस्तु त्रिभुवनलोकपालः

शेषशायी क्षीरसागरवासी चक्रपाणिरपरतश्च पातालेलोकाधिपोऽसुरराजः कलिन्दः। प्रकुपितेन विष्णुना सुदर्शनचक्रप्रहारेण दनुजवंशीयोऽसुराधिपतिर्ग्रीवायां द्विधा विभक्तः। विष्णुलोकद्वाररजःसु विलुण्ठमानस्य तस्य स्थूलशरीरादङ्गुष्ठप्रमाणं सूक्ष्मंशरीरं निष्कास्य पाशैर्बद्ध्वा यमकिङ्कराः पापपुण्यनिर्णयाय यमलोकं निन्युः। कलिन्दवधानन्तरं विष्णुर्भगवान् पाताललोकस्याऽवरोधनमपि चकार।

असुरराजः कलिन्दो यमलोकं गतो, भगवता त्रिलोकनाथेन चक्रपाणिना पातालपुरी च परिरोधिता, इति विदितवृत्तान्ता कलिन्दस्यैकला सन्ततिः कालिन्दी भयपरिकम्पितगात्रा स्वेदसलिलकणजालपर्याच्छन्नसर्वावयवा विष्णुमेव भगवन्तं शरणं मन्यमाना तमुपगम्य चरणयोर्निपत्य नयनाम्बुभिः परिषिच्य सगद्गदं करुणं रुरोद। तस्याः जननी स्वल्पेतरवर्षपूर्वमेव पाताललोकं परित्यज्य स्वर्गलोकवासिनी बभूव। त्रैलोक्यरक्षको भगवान् विष्णुरपि तन्निवासमाक्रमते। मातापितृविहीना सा वराकी कलिन्दसुता कालिन्दी सकरुणं रोदं रोदं शशिकलासमुज्ज्वलं निजमस्तकं सकलजगद्रक्षकस्य विष्णोः पादाभ्यां समर्पयामास। उन्मुक्तैः कुञ्चितैरलकराशिभिरच्युतस्य चरणौ समाक्रान्तौ। कलिन्दकन्यायास्तादृशीं करुणापन्नामवस्थामवलोक्य करुणार्द्रचेताः भगवांस्तामुवाच-

असुरराजसुते! विगतभया त्वमत्र पाताललोके निवस। स्वामिभक्तिनीतिशौर्यादिगुण-समन्वितानां सचिवानां साहाय्येनाऽस्य लोकस्य शासिका भव। त्वमस्य कलिन्दस्यैकला सन्ततिः शासनोत्तराधिकारिणी। तवेदं राज्यं मम शक्तिसामर्थ्येन सुरक्षितं भविष्यति। अथ च बाह्याभ्यन्तरिकोपद्रवेभ्यः सदा विरहितं समृद्धिं प्राप्स्यति। तव कल्याणाय मया पुनरप्यभिधीयते। सावधानमनसा मे वचः शृणु।

परमलावण्यरूपतारुण्यसौरभसम्पत्समन्विता त्वं निश्चयेन समये समागते स्वगुणानुरूपं वरं लप्स्यसे। त्रिषु लोकेषु प्रसिद्धं ते रूपं शीलञ्च। अनूढा त्वं मया संरक्षिता तावत्कालपर्यन्तं भवेर्यावत्ते पाणिग्रहीतात्र समागच्छेत्। वर्षत्रयावधौ मगधाधिपराजहंससुतेन राजवाहनेन सार्द्धं मातङ्गो नाम द्विजन्मा समधिगतत्रिनयनप्रसादः पाताललोके समागमिष्यति। स च सरस्यस्मिन्नवगाह्य दिव्यरूपधारी भविता। स एव ते पाणिग्रहीता वेधसा निर्मितः। तस्यावाप्तिरेव तुभ्यं श्रेयस्करी। स तु पाताललोकस्य राजा सकलासुराधिपो भूत्वा लोकानत्र पालयिष्यति।"

चक्रधारिणो नारायणस्यादेशं निशम्यास्माकं स्वामिनी सखी कालिन्दी प्रभाते बालभास्करारुणकरस्पर्शप्रफुल्ला पद्मिनीव प्रमुदिता नवोदितोषःसदृशारुणिममुखमण्डला हृदयोन्मथनकरान् भावान् कथमपि महता प्रयासेन संयम्य स्थिता। वरवृत्तान्तसञ्जात-लज्जावनतं वदनं पुनरपि प्रभोश्चरणयोर्निधाय साष्टाङ्गभावेन प्रणम्य तदनुमतिं प्राप्य

सा प्रासादं गता। भगवाननन्तोऽपि राजसुतायाः सुरक्षाप्रबन्धान् विधाय क्षीरसागरं गतः। तदारभ्य भर्तारं प्रतीक्षमाणा सखीयं कालिन्दी सखीभिरस्माभिः सततं सेव्यमाना पाताललोकोचितभोगान् भुङ्क्ते। अद्याऽयं सुमनोहरः सुशोभनः सुशोभितदिवसः समुपस्थितः। पतिं वरीतुमियमत्र समायाता।”

असुरराजसुतायाः सख्याः शशिप्रभायाः वचनानि समाकर्ण्य दिव्यरूपधारी मातङ्गो विप्रः परमां प्रसन्नतामाससाद। वसन्तसमये पलाशपुष्पषण्डमिव तस्य वदनमण्डलं विचकाशे। पर्वणि प्राचीदिग्भालतिलके परिपूर्णमण्डले शशिनीव प्रियायाः वदनमण्डले सन्निहितनयनस्य मातङ्गस्य हृदयं कामोन्मादतरङ्गैर्दोलायितम्। तदनन्तरं राजवाहनस्याऽनुमतिं प्राप्य मातङ्गः कलिन्दकन्यामुपयेमे पाताललोकराज्यञ्चाऽप्यधिचकार।

भवप्रसादेन समधिगतसर्वविधलौकिकसुखसमृद्धिसुभगो मातङ्गः कालिन्द्याः पीयूषरससम्भृतं विकसितसितपद्मराशिसमं गौरवर्णं मुखमण्डलमवलोकमवलोकं परमं हर्षमवाप। कालिन्दीमातङ्गयोर्हार्दिकमनुरोधमनुरुध्य राजवाहनो माससत्रयमातिथ्यसुखमनुभवन् पाताललोके न्यवसत्। तत्र सुलभैरनुपमैर्भोगद्रव्यैर्मातङ्गराजवाहनौ परमानन्दितौ बभूवतुः।

पाताललोकसुखासक्तचेतसो नवपरिणयगतयुगलसान्निध्यसुखमनुभवतो राजवाहनस्य स समयावधिरविज्ञातरूपेण व्यतीतः। भूलोकवृत्तान्तव्यपगतचित्त इव स तत्र न्यवसत्। परं सहसा एकस्मिन् प्रभाते पुष्करिणीतटं परितः परिभ्रमतस्तस्य मनसि सहचराणां कुमाराणां स्मृतिः जजागार। अविज्ञाप्यैव कुमारान् शिविरं परित्यज्य मातङ्गसाहाय्यसमुत्सुकहृदयः सोऽत्र समायातः। मित्रगणस्य कीदृशः समाचारः सेवकाः सैनिकाश्च किं विचारयन्तीति चिन्तासन्तानवितानव्याकुलचेताः राजवाहनः तत्क्षणमेव कालिन्दीमातङ्गयोः समीपमागत्य स्वस्कन्धावारं गन्तुमनुमतिं ययाचे। राजवाहनसामीप्यसुखमनुभवन्तौ तदुपकारस्मरणव्याकुलितचित्तावनिच्छन्तावपि तौ कालिन्दीमातङ्गौ कुमारसहचराणां कार्यसाधनस्य च विचारं कृत्वाऽश्रुक्लिन्ननयनैरुपकारिणे परोपकारव्रतैकनिष्ठाय तस्मै राजवाहनाय गमनायानुमतिं प्रददतुः।

प्रस्थानोद्यताय राजवाहनाय सा असुरराजकन्या भूलोकासुलभाननेकानुपहारान् उपजहार। तेषूपहारेषु रुद्राक्षगुटिकामालिका शस्त्रविषादिदुष्प्रभावापहरणसमर्थाऽवर्तत। शुभ्रनीलोज्ज्वलहीरकजटितमङ्गुलीयकं तृड्बुभुक्षादिद्वन्द्वक्लेशसहनसामार्थ्यदायि बभूव।

सर्वेभ्योऽपि पाताललोकवासिभ्यः स्रवन्नयनजलेभ्यः हृदयान्तर्निहितदुःखभररोदन-

गद्गदकण्ठेभ्यो जनेभ्यः कथमपि प्राप्तानुमतिः पुनरागमनं प्रतिज्ञाय राजवाहनस्तेनैव गुहामार्गेण पाताललोकाद् बहिरागत्य भूलोकमाजगाम। शिवमन्दिरं यावन्मातङ्गोऽपि तमनुससार। तदनन्तरं वनराजिभिरन्तर्हिते राजवाहने मित्रवियोगदुःखभरहृदयः मातङ्गः पुनरपि प्रत्याजगाम पाताललोकम्। राजवाहनोऽपि मित्रवियोगविह्वलीभूतहृदयस्त्वरितगतिस्तदेव स्थानमाजगाम यतोऽसौ मित्राणि वञ्चयित्वा मातङ्गेन सह पाताललोकाय प्रतस्थे। परं न तत्र शिविरस्य चिह्नमात्रमपि सोऽपश्यत्। नैराश्यमलिनमानसो वयस्यगणपरिमार्गणमभिलषमाणोऽसावितस्ततो बभ्राम।

सुदीर्घकालं कुमारो राजवाहनः काननानि नगराणि ग्रामान् इति विविधस्थानानि पर्याटीत्। परं न कश्चिदपि वयस्येषु बन्धुषु सैनिकेषु सेवकेषु च तेनाऽवलोकितः। मासत्रयं पर्यटनेनाऽपि न साफल्यमधिगतं तेन। ततोऽसौ विचारयामास -

"उज्जयिन्येवाऽऽसीत्तेषां लक्ष्यभूतं गन्तव्यं स्थानम्। मानसारं पराजित्य सा विशाला मालवजनपदराजधानी तैरधिकर्तव्या बभूव। अतः सम्भावनेयमेव यत्ते तत्रैव गताः भवेयुः। कार्यसाधनं विना मगधाधिपान्तिकं गमनं न कथमपि सम्भाव्यते। अङ्गीकृतं कार्यं मनस्विनो जनाः परिपालयन्त्येव। न च साध्यसिद्धिं विना तेषां विश्रामः। इति विचारयन्नेवाऽसावुज्जयिन्यै प्रातिष्ठत।

काननानि सघनवानस्पत्यानि हिंस्रश्वापदसमाकुलानि लंघयन् लघुबृहत्सरितः सन्तरन् प्रकृतिसौन्दर्यनिरीक्षणेन चित्तं विनोदयन्नसौ राजवाहनोऽग्रतोऽग्रतः ससार। ग्रामाणां नगराणाञ्च शोभामवलोकयता तेन गृहस्थगृहेष्वातिथ्यं सेवितम्। इत्थं स्वल्पैरेवाऽहोभिरसौ शुक्लपक्षस्य नवम्यां तिथौ शरदर्तोराश्विनमासे विशालायाः परिसरप्रदेशान् मध्याह्नसमये समाजगाम। नगरप्राकाराद् बहिरेव तेन मनोरमणीयमुद्यानमवलोकितम्।

दीर्घयात्रापरिश्रान्तो राजवाहनः किञ्चिद् विश्रम्य जलादिकमुपभुज्य नगरप्रवेशः करणीय इति विचार्य तदुद्यानं प्रविष्टः। वाटिकायाः मध्यभागे नीलाच्छाम्भःपरिपूर्णा रक्तनीलपीतशुभ्रकमलकुमुदकैरवकह्लारसुशोभिता पुष्करिणी, परितश्च शुभ्रस्फटिकमणिबद्धा भूमिरवर्तत। अरुणाभपाषाणखण्डमयी सोपानपंक्तिर्जलमध्यगता नयनगोचरीभूता। सोपानमार्गेणाऽधोऽवतीर्य जलं निकषा पदं निधाय तेनैव स्वच्छसुशीतलसलिलेन हस्तपादं वदनञ्च प्रक्षाल्याऽञ्जलिना किञ्चिज्जलमाचम्य राजवाहनः पुनस्तेनैव मार्गेणोपरिष्टादाजगाम। पुष्करिणीतीरे बद्धभूमौ संस्थापिते मरकतमणिजटितप्रस्तरषण्डमये पीठासनेऽसौ समुपाविशत्।

पीठासनमलङ्कृतवत्येव राजवाहने किञ्चिद् विप्रकृष्टान्तरालादेव तरुणीनां

हासपरिहासमधुरकलध्वनयस्तस्य कर्णकुहरयोः सुधाधारामिव घोलयन्तः प्रविविशुः। विस्मयकुतूहलाक्रान्तहृदयेन तेन चतसृषु दिक्षु नयने व्यापारयता प्राचीदिशि निरीक्षितम्।

विकसितारक्तकुसुमाच्छादितबन्धूकक्षुपाणां रक्तपीतपुष्पगुच्छावृतपुन्नागतरूणां केदारराजिकामध्ये हरितदूर्वादलास्तीर्णायां भुवि षट्सप्तसंख्यापरिमितेन प्रमदाजनेन परिवृतः कश्चित् सुरूपस्वास्थ्यसम्पत्तिशाली जनस्तिष्ठति। तस्मिन्नेव क्षणे कयाचित् प्रमदया मधुरालापेन सह रतिरससरसगीतिकागानं प्रारब्धम्।ताललयबद्धया मधुबिन्दुविच्छुरितया गीतिकया तया राजवाहनस्य चित्तं व्यामोहितम्। क इमे जना इति कुतूहलोत्कण्ठितचेताः राजवाहनः कानिचित् पदानि तदभिमुखं जगाम।

राजवाहनमायान्तमवलोक्य अपरिचितजनदर्शनेन सर्वा अपि प्रमदाः सञ्चुकुचुः। गीतिकाऽपि विरामं भेजे। वनिताभिः परिवृतो युवा कतिपयक्षणं विस्तृतनिमेषेण चक्षुषा राजवाहनं निरीक्षणमाणो "अरे ! अयमस्मत्स्वामी कुमारो राजवाहन" इति मन्दमुच्चार्य तरसा समुत्थाय समीपमागत्य तच्चरणयुगं सुदूरमवनतेन मौलिना पस्पर्श। राजवाहनोऽपि चरणयोः प्रणमन्तं तं युवानं "अरे ! सोमदत्तोऽसि त्वम्" इति द्वाभ्यां भुजाभ्यामुत्थाप्य वक्षसि सुप्रगाढं बबन्ध।

द्वावपि सुहृदौ चिरमनिर्वचनीयभावसम्भृतहृदयौ नैकस्याऽपि शब्दस्य समुच्चारणे समर्थौ प्रगाढालिङ्गननिबद्धौ रोमाञ्चपुलकितगात्रौ हर्षाश्रुधाराभिरन्योन्यं क्लेदयन्तौ तथैव नीरवं निश्चलं निष्पन्दञ्च तस्थतुः।

चिरकालानन्तरमाकस्मिकसम्मिलनसन्दर्शनजन्यप्रहर्षे प्रशमिते राजवाहनं सादरं सस्नेहं सोमदत्तस्तत्रैव समानिनाय यत्र विस्मयविगतनिमीलनव्यापारैर्नयनैः सततं निरीक्षमाणाः प्रमदा अतिष्ठन्। राजवाहनस्य चरणयोः पुनरपि सप्रश्रयं साष्टाङ्गविधिना प्रणमन्तं सोमदत्तं विलोक्य तरुण्योऽप्येकैकशः क्रमेण प्रणतिपराः बभूवुः। तदनन्तरं राजवाहनः सोमदत्तस्य वामेतरे स्कन्धे वामं करतलं निधाय स्वकीयं वृत्तान्तं संक्षेपेण श्रावयित्वा तं पप्रच्छ -

"मित्र सोमदत्त ! किमिदं सर्वं मया विलोक्यते? स्वप्नोऽयं यथार्थता वा? का इमा युवतयः? एतावन्तं कालं कुत्र कथं वा केषु व्यापारेषु वा भवानत्यवाहयत्? कथं भवानुज्जयिनीमागच्छत्? कुत्र वा सन्ति सर्वाण्यन्यानि मित्राणि? सर्वं वृतान्तं मे विस्तरेण ब्रवीतु।" अकस्मादेव मित्रस्य वा स्वामिनो वा दर्शनप्रफुल्लचित्तः सोमदत्तोऽपि कमलकोरकाकारमञ्जलिं पुरतः कृत्वा विनयमृदुलैर्वचोभिरात्मनीनं वृतान्तं वर्णयितुमारेभे।

# चतुर्थी-पीठिका

## सोमदत्तः

## चतुर्थी-पीठिका

### सोमदत्तः

कुमार ! तस्मिन् दिवसे सायन्तने सन्धिकालेऽस्ताचलशिखरमारूढे सवितरि भवददर्शनसञ्जातनिर्वेदभावात् क्वचिदपि गहनगह्वरप्रविष्टे प्रगाढान्धकारपटान्तरिते च जगति वयं सर्वाण्येव मित्राणि चिन्तासन्तानवितानोद्विग्नचित्तानि तस्मिन् घोरे विस्तृते कानने ऽलातान्यादाय सकलरजन्यां भवन्तमन्वेष्टुं बभ्रिम। परं न कुत्राऽप्युपस्थितिर्भवतो लब्धा। अहोरात्रमेवं भवन्तं परिमार्गमाणा वयं वनेचरेणैकेन सूचिताः यद् भवान् केनचिच्छ्यामवर्णेन द्विजन्मना साकमतित्वरितगत्या दक्षिणदिशं गतः। अन्ततो भवन्मिलनप्रसङ्गे निराशीभूय सहायभूतामनीकिनीं महाराजराजहंससेवायां सम्प्रेष्य वयं निर्णिन्युः -

"हायनैकपर्यन्तं वयं भवन्तमन्विषन्तः कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां मालवजनपदराजधान्यामुज्जयिन्यां महाकालमन्दिरे शिप्रातटे सम्मिलिष्यामः।"

एवं परामृश्य कृतसङ्केताः परस्परं वयं विभिन्नासु दिक्षु प्रातिष्ठामहि।

कुमार ! भवत्सम्मिलनाभिलाषोऽहं तस्माच्छिविरप्रदेशाद् दक्षिणपश्चिमाशायां प्राचलम्। दिवसद्वयं मया यात्रा कृता। क्वचिद् गहनान्यरण्यानि क्वचित् पाषाणखण्डनिचितानि सरितां सैकतानि क्वचिद् बृहल्लघ्वाकाराः कासाराः क्वचिन्नगापगाः क्वचिद् गहनगभीरसलिलपूर्णाः विशालायामाः नद्यः क्वचिच्च वनेचराणां भिल्लकोलकिरातारीनां पर्णोटजैः सङ्कीर्णाः ग्रामा अवर्तन्त। परमुपेक्षितश्रमजनित-शैथिल्योऽहं स्थानात्स्थानमगच्छम्। एवं प्रचलन्नहं वेत्रवतीसरित्तीरमाससाद। कोलजातीयो जन एको मामसूचयत् -

"व्यापारकेन्द्रभूता जगति प्रथिता विदिशा नगरी पञ्चक्रोशमात्रं वर्तते।"

निरन्तरं पथि भ्रमणेनाऽतितरां क्लान्तशरीरोऽहं विश्रमाभिलाषो वेत्रवतीतटमुपगम्य हस्तपादवदनं प्रक्षाल्य स्वल्पं जलमाचम्य तत्रैव विशालस्यैकस्य शाकभूरुहस्य विशालपत्रच्छायामधिशिश्ये। तत्र सरित्तटवर्तिनि उत्स्थलजले समुद्गताः वेतसलताः पवनाघातैरान्दोलिताः विनम्रीभूय नदीदेवतां प्रणमन्त्य इव प्रतिभासन्ते स्म। सहसा मम दृष्टिरन्तरालवर्तिनि दूर्वावृतस्थले कस्मिंश्चिद् भास्वरे वस्तुनि निपतिता। सघनभूरुहकिसलयजालान्तरालनिर्गतरविरश्मिस्पर्शादतितरां भ्राजमानमिदं रत्नं मे चित्तमाचकर्ष। औत्सुक्यपरिपूरितहृदयोऽहं समुत्थाय निकटं गत्वाऽवालोकयम् -

"बृहदाकारमष्टपलकं हीरकरत्नमिदं बभूव।"

नीलाभशुभ्रवर्णस्याऽस्य हीरकस्य मूल्यनिर्धारणं नातिसुकरमवर्तत। तद्धीरकरत्नमङ्गुलिभिर्विचित्य वस्त्रान्तर्हितं कृत्वा तथैवाऽहं भूरुहच्छायामधिशिश्ये। दीर्घपथभ्रमणजनितश्रमशैथिल्यवशीभूतोऽहं वेत्रवतीसलिलस्पर्शाधिगतशैत्येन पवनेन प्रचण्डभास्करकिरणसन्तापनिवारकपृथुपत्रतरुसुखदच्छायाश्रयेण प्रगाढनिद्रया वशीकृतः।

सहसाऽतितीक्ष्णध्वनिभिर्हृदयविदारकैर्निद्रा मेऽपहृता। चमत्कृत्याऽहं झटित्युत्थाय सर्वतश्चक्षुषी व्यापारयन्निरीक्षाञ्चकार। मयाऽवलोकितम् -

"सरित्तीरवर्तिनि सैकते पञ्चभिर्बालकैरतिजीर्णवसनपरिधानैः कृशकायैः परिवृतः कश्चिच्छ्यामलवर्णो जनोऽतिष्ठत्। बुभुक्षाविह्वलास्ते बालकास्तद्वपुःपरिष्वक्ताः भोजनाय चक्रन्दुः। स च तान् सन्तर्ज्य सन्तर्ज्य पृथक्कृत्य दूरं निचिक्षेप। तत्र कनिष्ठो बालको द्विवर्षदेशीयो ज्येष्ठश्च दशवर्षदेशीयोऽवर्तत। तेषु षड्वर्षदेशीया बालिका शेषाश्च बालका अवर्तन्त। स श्यामलः पुरुषः कटिदेशे जानुपर्यन्तमधोवसनमेकं परिदधानः शेषेण कायेन वस्त्ररहितो वक्षसि यज्ञसूत्रेण सुशोभितो ब्राह्मणभावमभिव्यनक्ति स्म।"

दृश्यमिदं विलोक्य करुणार्द्रचित्तेन मया समीपमागम्य सविनयं प्रोक्तम् -

"हे विप्र! को भवान् कस्य चेमे बालकाः कथञ्चेमे बुभुक्षाविह्वलाः कृशकायाः जीर्णवसनाः सन्तो रुदन्ति?"

करुणभावसम्भृतैः विनम्रैर्वचोभिर्मे प्रभावितोऽसौ विप्रो दयनीयतमां दशां प्रपन्नो मामुवाच -

"भद्र युवक! दरिद्रतैवाऽस्मिन् लोके सर्वेषां दुःखानां जननी। बुभुक्षा वा पिपासा वा प्राणिनां सर्वान् गुणानपहरति। विदिशावास्तव्योऽहं माधवाभिधानो द्विजन्मा। भार्याद्वितीयोऽहमानन्देन गृहे न्यवसम्। वेत्रवतीसरिदियं विदिशानगरीं परिवेष्टयन्ती प्रवहति। एकस्मिन् समये व्यापारयात्रायै गच्छता देवगुप्ताभिधानेन सार्थवाहेन धार्मिकसाधुस्वभावेन विदिशायाः सप्तक्रोशान्तरालवर्तिनि प्रदेशे वेत्रवत्यास्तटे मन्दिरस्यैकस्य निर्मितिः कारिता गर्भगृहे च शिवप्रतिमा प्रतिष्ठापिता। माञ्च तत्र देवपूजकरूपेण नियुज्याऽसौ जीविकायै स्वल्पया वृत्त्योपचकार। परं समयान्तरालेनाऽसौ सार्थवाहो देवगुप्तो मृत्युना परिगृहीतः शिवलोकं सम्प्राप्तवान्। पुत्रास्तस्य न तादृशाः धार्मिकस्वभावाः। तैर्मे वृत्तिः प्रतिरुद्धा।

तदनन्तरं ममाऽऽयसाधनानि विलुप्तानि। सहधर्मिणी मे केनाप्यसाध्येन

रोगेणाऽऽक्रान्ता लोकादस्मात् परलोकाय प्रयाता। साधनरहितोऽहं कथमेतान् बालकान् पालयेयमिति चिन्ताभिः परिक्लिष्टः किङ्कर्तव्यविमूढः सततं दुःखमनुभवामि। ब्राह्मणभावान्न कस्मिन्नपि हीने कर्मणि मे प्रवृत्तिर्भवति। कथमपि भिक्षायाचनां कृत्वा कष्टेन महता निजानां बालकानामेतेषां प्राणान् रक्षामि। विशीर्णजीर्णवसनधारकान् कृशकायान् बुभुक्षाविह्वलान् सततं क्रन्दनं कुर्वतो बालकानवलोक्य सम्पीडितमनसो ममाऽयमेवाऽभिलाषः -

"बालकैः सह वेत्रवतीसरिदियं मम शरणं भवतु। दारिद्र्यसन्तप्तस्य जनस्य जीवनं निरर्थकमेवाऽस्मिन् जगति भवति।"

इति कथयन्नेवाऽसौ विप्रः दैन्यविवर्णवदन आशापरिपूर्णनयनो मन्मुखासक्त-दृष्टिर्बभूव। न जाने कीदृशैरनिर्वचनीयैर्भावैः परिवृता सा दृष्टिरवर्तत, करुणाविगलित-चित्तोऽहं तस्य साहाय्यं विधातुं विवशोऽभवम्। हीरकरत्नं मे वसनान्तर्हितमवर्तत। निर्धनोऽयं विप्रः सत्कुलोत्पन्नो विद्वान् मनीषी वृद्धो दानाय सत्पात्रमिति विचार्य तं हीरकमणिं तस्मै दत्त्वा मया प्रोक्तम् -

"विप्र ! गृह्यतामेष महार्घो मणिः। भवानेतान् बालकानादाय विदिशामेव गच्छतु। हीरकमणिं कस्मिंश्चिदापणे विक्रीय प्रचुरं धनं भवानाप्स्यति। लध्वाकारमेकं गृहं स्वल्पेनैव मूल्येन भविष्यति। बालकानामेतेषां पालनपोषणादिकं विधाय ब्राह्मणोचितैः संस्कारैः शिक्षाप्रबन्धोऽपि विधेयः।"

हीरकमणिं लब्ध्वा प्रसन्नचित्तोऽसौ ब्राह्मणो मां शतशः शुभैराशीर्वादैरुपचकार। तदनन्तरं विदिशाजनपदवृत्तान्तं मया पृष्टोऽसौ प्रोवाच -

"भगवन् ! औदार्यगुणसम्पन्नो भवान् विदिशानाम्नि जनपदे समायातः। विदिशानाम्नी चाऽप्यस्य जनपदस्य राजधानी, इतः सप्तक्रोशमात्रमस्या एव वेत्रवत्यास्तटेऽवस्थिता। अस्मिन् समयेऽत्र वीरकेतुर्नामा प्रजापालको वृद्धो नृपो वर्तते। तस्य महिषी कल्याणी सततं प्रजाजनकल्याणी सुतामेकामनुपमरूपलावण्यशालिनीं प्रसूय तां वामलोचनानाम्ना समभूषयत्।

अथ समयेन सा चित्तोन्मादकारिणीं यौवनावस्थां प्रपद्य रूपगुणविद्यायशोभिः सकलमेव भूमण्डलं विस्मयविमुग्धञ्चकार। विधातुः रचनायाः कौशलस्य प्रमाणरूपा सा तरुणीषु रत्नं विश्वस्य शृङ्गारसज्जा वर्तते। तस्याः रूपगुणराशिं श्रावं श्रावं विमुग्धाः बहवो राजानो राजपुत्राश्च सञ्जातवरणाभिलाषाः बभूवुः। परं वीरकेतुरयं विदिशाधिपतिर्न कमपि तेषु निजकन्यायोग्यं वरममन्यत।

विदिशातो दक्षिणपश्चिमदिशि गुर्जरदेशे लाटो नाम जनपदो वर्तते। तत्र

महाराजो मत्तकालो वीरो युवा साहससम्पन्नो नीतिज्ञः सम्पत्तिशाली विशालसेनानायकः प्रजाः परिपालयति। लाटेश्वरो वामलोचनां विदिशाधिपतिसुतामभिलषमाणो विवाहार्थं प्रार्थयामास। परं नाऽङ्गीचकार वीरकेतुस्तस्य मत्तकालस्य प्रस्तावम्।

लाटेश्वरश्च मत्तकालो निषेधेनाऽनेन तिरस्कृतमात्मानं मन्यमानो बलात्कारेणैव वामलोचनामधिकर्तुमनीकिन्या सुविशालया रथघोटकहस्तिपदातिकया चतुरङ्गिण्या सुसम्पन्नस्त्वरितगत्याऽऽक्रममाणो विदिशां परितो रुरोध। पराक्रमिणो लाटेश्वरस्याऽऽक्रमणमसहमानेन विदिशाधिपतिना भयभीतेन स्वकन्या वामलोचना उपायनरूपेण तस्मै प्रदत्ता।

लाटदेशे परम्परेयं प्रसिद्धा - विवाहसंस्कारतः पूर्वमेव कन्या वरगृहमानीयते। तत्रैव सकलान्यनुष्ठानानि विवाहसंस्कारसम्बन्धीनि प्रतिपाद्यन्ते। लाटेश्वरोऽपि प्रसन्नचित्तस्तां वीरकेतुकन्यामादाय स्वनगराय प्रातिष्ठत। विदिशातः प्रस्थितोऽसावत्रैव वेत्रवतीसरित्तीरे सुरमणीयं चित्तविमोहनं विविधमृगव्यवन्यजन्तुसमाकुलमरण्यप्रदेशमुपलभ्य मृगयाव्यसनाभिभूतः शिविरं स्थापयामास। अथ चाऽऽखेटकुशलोऽसौ वामलोचनोपलब्धिप्रहृष्टान्तरात्मा तामेकस्मिन् पटगृहे संरक्ष्य सततमात्मानं मृगयास्वेव समायोजयति।

मत्तकालसैन्यबलभीतेन वीरकेतुना स्वकन्या लाटेश्वराय तु प्रदत्ता, परमपमानानलेन पुटपाकपतितमिवाऽऽत्मानं मन्यमानस्य तस्य हृदयं सततं कोपेन ज्वलति। अथ प्रधानामात्यो मानपालो विदिशाधिपस्य मनोऽवस्थामनुभवन् तेनानुमतः किमपि हृदये सम्प्रधार्य विनयविनम्रवदनो लाटेश्वरमुपगम्य निवेदयामास -

"राजन् ! भवानस्माकं जामाता विदिशाजनपदसीमासु रक्षणीयोऽस्माभिः।"

इति मत्तकालेनाऽनुमतेन तेन मानपालेन केचन प्राणव्ययैरपि स्वामिकार्यसम्पादनशीलाः वीराग्रगण्याः घोटकपादातिकसैनिकाः मत्तकालमनुप्रेषिताः। लाटेश्वरशिविरसन्निकटमेव मानपालसैनिकैरपि सैन्यावासो विहितः। कथञ्चिदवसरं लब्ध्वा तूष्णीकं मत्तकालशिविरं प्रविश्य तञ्च परलोकवासिनं विधाय ते राजसुतां वामलोचनां पुनरपि पितृगृहमानेष्यन्तीति तेषां निश्चयः।"

विप्राच्च तस्माद् विदितसकलविदिशावृत्तान्तेन मया निर्णयो मनसि विहितः, केनाऽप्युपायेन मत्तकालोऽयं दुर्जनः पापकारी राजसुतापहरणकर्ता हन्तव्य इति। वीरकेतोः सुता तस्याऽधिकारान्मोचनीया। महार्घहीरकोपलब्धिजन्यलाभप्रहृष्टस्तु स पञ्चसन्ततिपरिवृतो वृद्धो विप्रो रत्नमेतत् कस्यचिद् रत्नवणिज आपणे विक्रीय प्राप्तेन धनेन बालकान् पालयिष्यतीति कृतनिश्चयः पुनः पुनः मह्यं हृदयेन वचोभिश्चाऽऽशिषो

वितीर्य सरिन्मार्गानुसारी विदिशामगच्छत्। अहमपि विप्रजनोपकृतिसंहृष्टमानसः मार्गश्रमक्लान्तिपरिगतः पुनस्तस्यैव सघनपत्रच्छायस्य शाकतरोरधस्ताद् गत्वा संसुप्तो गहननिद्रया समाश्लिष्टः।

स्वल्पसमयानन्तरमेव कस्यचिज्जनस्य प्रबलपादप्रहारेण मम निद्रासुखं परिहृतम्। ससम्भ्रममुत्थितेन मयाऽवलोकितम् -

"केचन पञ्चषाः शस्त्रसन्नद्धाः भटाः मां परिवृत्य तिष्ठन्ति, सन्निकटञ्च विकटाघातक्षतविक्षतकायो लोहनिगडबद्धश्चाऽसौ माधवो विप्रोऽपि पीडाविह्वलगात्रस्तत्र तिष्ठति।"

सङ्केतिकया करशाखया मां सङ्केत्याऽसावुवाच -

"अयमेवाऽसौ लुण्टाको येन मह्यमिदं हीरकरत्नं प्रदत्तमिति।"

तिरस्कृतिक्रोधानलप्रज्ज्वलितान्तःकरणोऽहं कटिनिबद्धां छुरिकां मुष्टिना गृहीत्वा यदैव तान् प्रहर्तुमुद्युसिषं, तदैव सैनिकैः झटित्याक्रम्याऽहं सुदृढैः रज्जुभिर्हस्तपादे निबद्धः। ब्राह्मणं तु मुक्तं विधाय मां तथैव बलादाकर्षन्तो लगुडप्रहारैश्च ताडयन्तो भटास्ते मत्तकालशिविरं प्रति प्रातिष्ठन्त। विवशः किञ्चिदपि प्रतिकर्तुमशक्तोऽहमपि विकृष्यमाणस्तैः सह प्राचलम्।

अथ च मां प्रसभमाकर्षत्सु लाटेश्वरमत्तकालशिविरसन्निकटवर्तिषु तेषु भटेषु भुवनभास्करो भास्करोऽस्ताचलशिखरमारूढः समलक्ष्यत। मत्तकालसेवितवारुणीसमाऽऽरक्ता सन्ध्या वारुणीदिशमप्यरुणवर्णाभिषिक्तां व्यदधात्। अस्मिन् समये लाटेश्वरो निजैरन्तरङ्गैः संभासद्भिः सार्द्धं वारुणीसेवनानन्दसागरनिमग्नो भवेदिति, प्रातरेव लुण्टाकस्याऽस्य राजसमक्षमुपस्थितिर्विधेयेति निश्चित्य ते मत्तकालभटाः मां समीपस्थितं जीर्णभवनं निकषाऽऽनिन्युः।

गहनदुर्गमकाननमध्यनिर्मितमिदं भवनं जीर्णं पुरातनमपि सुघटितमासीत्। मध्यभागे कक्ष एको सुसंस्थितो निवासयोग्योऽवर्तत। कक्षस्य लोहनिर्मितं कपाटद्वारं तालकयन्त्रमुद्रितं बभूव। तत्र च द्वारि चत्वारो दीर्घतीक्ष्णाग्रफलककुन्तधारिणः प्रहरिणो गतागतं कुर्वन्ति स्म। लोहद्वारस्यैकस्मिन् पार्श्वे दृढजटितलोहशलाकासुरक्षितस्याऽसंवृत-कपाटस्य गवाक्षस्य मध्यात् केचन सुपुष्टसुघटितसर्वगात्राः कौपीनमात्रावशिष्टवाससो लोहशृङ्खलानिगडितकरचरणास्तूष्णींभावेन मलिनविषण्णावसन्नवदना अन्योन्यमेव निरीक्षमाणाः पुरुषाः भूमावुपविष्टाः मम दृष्टिपथमागताः।

सैनिकानां नायकस्तु मामङ्गुल्या निर्दिश्य प्रहरिणमुवाच -

"एनमप्यवरुन्धि लुण्टाकमस्मिन् कारागृहे।"

तदनन्तरं शरीरबन्धनभूतं रज्जुपाशं मे व्यावृत्य लोहशृङ्खलाभिर्हस्तपादं निगडनिबद्धं विधाय ते प्रहरिणो मामपि तस्मिन्नेव कारागृहरूपे कक्षे निचिक्षिपुः। तैः कथितम् -

"कक्षस्याऽन्तस्तव सहचरा अन्ये लुण्टाकास्तिष्ठन्ति। त्वमप्येतैः सार्द्धं सर्वां निशां गमय। श्वो मध्याह्नवेलायां त्वमप्येतैः सह भूमिनिगूढार्धशरीरो बुभुक्षितानां कुक्कुराणामाहारो भविष्यसि। कुरुत चौरकार्यं, लुण्टत रत्नानि, विधत्त वा साहसं नृपशिविरप्रवेशस्य।"

कथयित्वैवं प्रहरिणस्ते लोहकपाटं पिहितं कृत्वा तालकमुद्रितमकुर्वन्।

किमप्यवगन्तुमक्षमोऽहं किङ्कर्तव्यविमूढो पिहितमस्तिष्ककार्यः सुघटितशरीरान् युवकानेकाग्रदृशा व्यलोकयम्। अधो लम्बमानविषण्णावसन्नवदनास्ते दशसंख्यापरिमिताः मौनमेवावलम्बमानाः मृत्योरागमनघटिकामिव गणयन्तस्तत्र भूमावुपाविशन्। शनैः शनैश्चेतनया सह मे बुद्धिरपि चकाशे।

स्वल्पेनैव समयेन पश्चिमगिरिशिखरसमारूढं दिवाकरस्याऽऽरक्तमण्डलं शिखरादुत्फालं विधाय लोकलोचनानामगोचरं सत् पश्चिमाकूपारपयसि निममज्ज। बहुलपक्षनिशायाः प्रगाढान्धतमसेन सकलं जगतीतलं समाच्छादितम्। दर्शनासमर्थानि नयनानि विफलताङ्गतानि। गहनघोरकाननमध्यगतसिंहव्याघ्रतिन्दुकचित्रकादिमांसप्रिय-हिंस्रजन्तूनां हृदयविदारकाः घोरगर्जननिनादाः निहतानां मृगादिनिर्बलप्राणिनां करुणार्द्रनादाश्च समश्रूयन्त। 

तदैवाऽहं सम्प्राप्तचेतनो बुद्ध्या विचार्य तान् युवकान् समवाबोधयम् -

"वीरपुरुषाः! के यूयम् कस्माच्च कारणादस्मिन् कारागारतुल्ये जीर्णभवनकक्षे नियन्त्रिताः? क्व गतानि युष्माकं वासांसि? इत्थं विषण्णभावस्य युष्माकं को हेतुः? केनाऽपराधेन यूयं लाटेश्वरस्य मत्तकालस्य सैनिकैर्मृत्युदण्डपात्राण्युद्घोष्यध्वे? किमिदं सर्वं विद्यते? कृपया सर्वमेतद् वृत्तं मे विस्तरेण वर्णयत।"

मम वचांस्याकर्ण्य तेषामेको युवकोऽब्रवीत् -

"हे वीरपुरुष! प्रथमं तावद् भवानेव निजपरिचयेनाऽस्माननुगृह्णातु। को भवान् कस्माच्च कारणादस्मिन् कारागृहेऽस्माभिः सह लोहशृङ्खलाभिर्निगडितो निक्षिप्तः?"

ततोऽहं तद् ब्राह्मणवृत्तं तदुक्तञ्च मत्तकालवृत्तान्तं श्रावयित्वा न्यवेदयम् -

"तेन विप्रेणैव कृतसङ्केतोऽहं रत्नस्तेयापराधेनाऽस्मिन् कारागृहे निक्षिप्तः।"

तदनन्तरं स युवकः सविस्तरं सकलं निजवृत्तान्तं वर्णयामास -

"हे वीर! मत्तकालसम्बद्धेन वृत्तान्तेन वयमत्र निगडितगात्राः मृत्युमुखे पतिताः।

प्रबलबलगर्वगर्वितो लाटेश्वरो मत्तकालो विदिशाधिपतेः सुतां वामलोचनां हस्तगतामपि विवाहसंस्कारप्रतिपादनमप्रीतिकरमत्र गन्यमानः स्वदेशे च शुभमवगच्छन् विशालवाहिन्या स्वदेशं प्रति निवर्तमानो मृगयाव्यसनी अत्रैव वेत्रवतीतटवर्तिनं शाद्वलं रमणीयं निरीक्ष्य तिष्ठति। अवसरमेनं कार्यसिद्धिप्रयोजकमवगच्छता वीरकेतोः प्रधानामात्येन मानपालेन स्वल्पीयसी स्वप्राणपरित्यागेनाऽपि स्वामिकार्यसाधिका तमनुसरन्ती सेना प्रेषिता। रहसि च तेनादिष्टम् -

"लब्धावसरैर्युष्माभिर्लाटेश्वरस्य शिविरस्याऽन्तः प्रविश्य तस्य मत्तकालस्य दुराचरणस्य वधः करणीयः। स्वामिकार्यमेतदतिपुण्यप्रदम्।"

विगतनिशायां गहनवनमध्यभागादारभ्य मत्तकालशिविरमध्ये निवासभूतपटकक्षपर्यन्तं वयं सुरङ्गामेकां विधायाऽतिनिभृतं प्रविष्टाः। परं मत्तकालसौभाग्येनाऽस्माकमधन्यतया स दुष्टो राजा तत्राऽनुपस्थित एवाऽऽसीत्। चिरमस्माकं तत्रोपस्थितिर्नूनमनर्थकारिणी भविष्यतीति विचार्य कतिपयक्षणान् प्रतीक्ष्य तत्र सन्निहितानि महार्घाणि रत्नानि चोरयित्वा तेनैव सुरङ्गामार्गेण निष्क्रम्य गहनकाननमवगाहमानाः वयं स्वशिविरमेव प्रत्याजग्मुः।

प्रभाते नभसि बालभास्करे पूर्वाचलशिखरमारूढे प्रसरति च सर्वतो बालातपेऽरुणरागरञ्जिते च सकले भूतले मत्तकालसैनिकैरस्माकं शिविरं परिवेष्टितम्। स्वल्पसंख्यका वयं किमपि प्रतिकर्तुमक्षमास्तेषां वशवर्तिनः सञ्जाताः। मत्तकालसेनायां पदविज्ञानपारङ्गता अन्वेषका अन्ये च चराः सन्ति। अपहृतेषु महार्घेषु रत्नेषु ते तेनैव सुरङ्गामार्गेण गहनं वनमागम्य पदचिह्नानुसारेणाऽस्मान् परिमृगयमाणा अस्माकं शिविरं समागताः। मत्तकालसैनिकैरस्माकं देहपरिच्छदादिपरिवीक्षणेन रत्नान्यधिकृतानि। तान्येव रत्नान्यस्माभिर्मत्तकालशिविरकक्षाच्चोरितान्यासन्।

रत्नगणनायां महार्घं रत्नमेकं तत्र तैरनासादितम्। सैनिकैस्ताड्यमानाः सन्तर्ज्यमानाः निर्भर्त्स्यमाना अपि वयं न किमपि तद्विषयकं कथयितुं प्रभवोऽवर्तन्त। नाऽऽसीत्तदानीं किमप्यन्यद् वस्तुजातमस्मदधिकारे रत्नं गोपायितुम्। मार्ग एव क्वचिद्धावत्स्वस्मासु पतितमिति सम्भाव्यते। अस्मांश्चौरान् लुण्टाकान् मन्यमानास्ते मत्तकालसैनिकाः वस्त्रहीनान् कौपीनमात्रावशेषान् दृढलोहशृङ्खलानिगडितान् विधाय कारागाररूपे कक्षेऽस्मिन् निचिक्षिपुः। तैः कथितम् -

"महाराजस्य लाटेश्वरस्याऽऽदेशेन श्व एव यूयं सर्वे रत्नचौर्यापराधेन वधदण्डेन दण्ड्यमानाः यमलोकं गमिष्यथ।

हे वीर महानुभाव ! वयं सर्वे वीरकेतुसैनिकाः श्वः प्रभाते सूर्योदयसमकालं द्विधा

विभक्तशरीरा: यमलोकयात्रां कर्तास्म: ।"

वीरकेतुसैनिकानां वृत्तान्तं निशम्य मया ज्ञातं, वेत्रवतीसैकतप्रदेशादुपलब्धं तस्मै द्विजन्मने प्रदत्तं हीरकरत्नं मत्तकालशिविराच्चोरितमासीत्। मत्तो हीरकमणिमादायेतो गच्छन्नसौ ब्राह्मणो मत्तकालसैनिकैर्निगृहीत: सदेहपरिच्छदं च निरीक्षितो गृहीतरत्नै: सैनिकै: पशुमारं ताडित:। तदनन्तरं तेन विप्रेण निर्दिष्टोऽहमपि तै: सैनिकैर्निगृहीत:।

एवं निजवृत्तान्तं श्रावयता सोमदत्तेन क्षणं विरम्य पुन: राजवाहनसमक्षं कथितम् -

कुमार ! वीरकेतुभटानां वृत्तान्तमाकर्ण्य मया निश्चितं यत् केनाप्युपायेन मत्तकालं यमलोकं सम्प्रेष्य वीरकेतो: सहायता करणीया। वीरकेतुसैनिकान् स्वात्मानं परिचाययित्वा विविधैर्वार्तालापैश्च स्वात्मनि विश्वासमापाद्य तेभ्य: क्षत्रियधर्मोचितमहमुपदिदेश -

"वीरपुरुषा: ! यद्यस्माभिर्मरणीयं, क्षत्रियोचितधर्ममनुसरद्भिरेव मरणीयम्। शौर्यकीर्तिकौमुद्या च जगत् सन्दीपनीयम्। परस्परं संगम्य वयं पराक्रमबुद्धिसंयोगबलेन सर्वाण्येव कार्याणि साधयितुं क्षमा:।"

एवं प्रोत्साहिता: सर्वे मां नायकं मत्वा मन्निर्देशपालनतत्परा: कार्याणि कर्तुं सज्जा अभवन्।

तदनन्तरं व्यतीतेऽर्धरात्रे गहननिद्रावशीभूतेषु प्रहरिषु रिपुविनाशरूपो यज्ञोऽस्माभि: प्रारब्ध:। अन्योन्यञ्च संघट्टनं कृत्वा हस्तपादबन्धनभूता: लोहशृङ्खला: पाषाणेषु रभसाऽवपातमवपातं खण्डिता:। तदनन्तरं हस्तेषु पादेषु च बन्धनविमुक्तेषु द्विगुणोत्साहवन्तो वयं स्कन्धानामेव प्रबलाघातै: कवाटेषु प्राहराम। स्वल्पेष्वेव क्षणेषु प्रहारानस्माकमसहमानास्ते लोहमया अपि कपाटाश्चरमरेति ध्वनिना सह छिन्नभिन्ना: सञ्जाता:। किमिदं किमिदमिति चमत्कृत्य समुत्तिष्ठन्त: प्रहरिणस्तत्रोपलब्धै: बृहत्सपाषाणखण्डै: प्रहृत्य प्रहृत्य वयं पातितवन्त:। तदनन्तरमस्माभिस्तेषां सर्वाण्येवाऽऽयुधानि सैन्यपरिधानानि चाऽपहृत्य कौपीनमात्रावशेषास्ते मारं मारं विद्राविता:। मरणभयात् त्वरितं प्रधावतस्तान् अहं प्रावोचम् -

"गत्वा शीघ्रं सूचयत स्वस्वामिनं लाटेश्वरं मत्तकालं यत्तस्य परलोकप्रस्थानसमय: समागत:। स्वदेशमेवाऽसौ झटिति विद्रुत: प्राणान् रक्षतु। अथवा मरणं तस्य सङ्गरयज्ञे बलिपशोरिव निश्चयेन भविता।"

तदनन्तरं वीरकेतुभटै: मन्निर्देशानुसारं सर्वमावरितम्। विदिशाधिपतेर्वीरकेतोर्जयजयकारध्वनिभि: सकलमेव मार्गं प्रतिध्वानयद्भिस्तै: सार्द्धमहं मानपालमुपजगाम।

मम वंशपरिचयं कार्यकौशलञ्च ते वर्णितवन्तः।

सर्वं वृत्तान्तमाकर्ण्य प्रथमं तावन्मानपालो भयाद् व्याकुलो बभूव। कदाचित् कुपितो मत्तकालो विनाशलीलां न प्रारभेतेति। परन्तु मयाऽऽश्वस्तोऽसौ सैनिकान् पारितोषिकादिना सत्कृत्य प्रभाते भवद्भिरागन्तव्यमिति समादिश्य तान् विससर्ज। माञ्च महताऽनुरोधेन स्वभवने विश्रामाय निमन्त्रयामास। अथ च भोजनादिना सत्कृतं शयने विश्रमन्तं मामुपगम्य मत्तकालविषयिकीं योजनां विचारयामास। रात्रावेवाऽऽवाभ्यां सकला योजना कल्पिता निश्चिता च।

महाराजस्य वीरकेतोः शस्त्रसन्नद्धा वीरभटयुता चमूः रजन्यामेव मानपालेन मत्तकालशिविरं परितः सुगुप्तरूपेण संयोजिता। प्रभातप्रायेऽपि निशावशेषे मन्त्रिणो महताऽनुरोधेन किञ्चिद् विश्रम्य स्वप्नावसरं लब्ध्वाऽपि प्रभाते सूर्योदयात् पूर्वमेव कार्यसिद्धये कष्टान्यगणयन् शयनं परितत्याज। तदनन्तरं प्राभातिकनित्यकर्मादिनिर्वृते महामात्यस्य मानपालस्य सविधौ स्थितवति मयि मत्तकालस्य सन्देशहरास्तत्राऽऽगच्छन्। ते मानपालमब्रवन् -

"मन्त्रिन्! महाराजस्य मत्तकालस्याऽऽदेशेनाऽस्माभिरिदं निवेद्यते। भवतामनुचरैर्विगतरजन्यां सुरङ्गां खनित्वा लाटेश्वरस्य पटशिविरं प्रविश्य महार्घाणि रत्नानि चोरितानि। अस्मत्सैनिकैर्निरुध्य ते सनिगडं कारागृहे निक्षिप्ताः। परन्तु निशीथे ते कारागृहं भङ्क्त्वाऽस्मत्सैनिकानामायुधानि परिधानानि चाऽऽच्छिद्य भवन्तमाश्रिताः। सत्यमेव तेऽनुचराः वा सैनिकाः वाऽस्मदधिकारे प्रापणीयाः। अन्यथा परिणामो भयावहो विनाशकरो भविष्यति।"

मत्तकालदूतवचनानि निशम्य मानपालस्य नयने कोपेनाऽऽरक्तवर्णे सञ्जाते। परं नयज्ञोऽसौ कथमपि हृदयगतान् भावान् नियम्योवाच -

"शीघ्रमेव तद्विषयकमन्विष्य निवेदयिष्यामीति भवन्तो जानन्तु। सम्प्रति भवद्भिर्गन्तव्यमेव। सायंसमयं यावत् सूर्यास्तसमयात् पूर्वमेव सकलोऽपि प्रबन्धो व्यवस्थितो भविष्यति।"

परन्तु सन्देशहरास्ते सनिर्बन्धं साग्रहमूचुः -

"चौरान् निगडैर्बद्ध्वा ते स्वयमेव स्वामिनः सकाशं नेष्यन्ति। इत्येव लाटेश्वरस्याऽऽदेशः।"

श्रुत्वेमानि वचनानि लाटेश्वरसन्देशहराणां कोपेनाऽऽरक्तलोचनो मानपालो वेपमानाभ्यां रदच्छदाभ्यां निर्भर्त्सयंस्तानुवाच -

"दूतभावादवध्याः यूयम्। अत एव न कथमपि किमपि, युष्मान् दण्डयामि।

युष्माकं धाष्ट्र्यस्य दण्डस्त्वयमेव भवेद् भूमिगर्तेऽर्धं निधाय बुभुक्षितैः कुक्कुरैर्भक्षणम्। अथवा मदोन्मत्तानां गजानां पादैः पेषणम्। तथापि कथयत तं मिथ्यागर्वभराध्मातोदरहृदयं मत्तकालं निजमधिपतिम् -

यत् किञ्चिदपि कर्तुमसौ शक्तस्तदेव करोतु। न वयं कथमपि तांश्चौरांस्तस्मै समर्पयिष्यामः।"

प्रस्थितेषु च सर्वेषु मत्तकालसन्देशहरेषु प्रत्यक्षसङ्ग्रामोऽनिवार्यो बभूव। गुप्तचरैरपि सूचितम् -

"मत्तकालो विदिशानगरीमवरोद्धुं सैनिकानादिदेश। सत्वरमाक्रमणं सम्भाव्यते तेषाम्।"

परं रजन्यामेव वयं युद्धाय कृतदृढसङ्कल्पाः विहितसज्जा आस्म। अथ मन्त्रिणो गृहाद् बहिरागतेन मयाऽवलोकितम् -

"सुसज्जितसाङ्ग्रामिकस्यन्दनः कवचावृतशरीरेण सुयोग्येन सारथिना वाह्यमानो धनुर्बाणकुन्तप्रासासिच्छुरिकाचन्द्रहासरज्जुपाशादिविविधायुधसङ्कुलश्चन्द्राङ्कितकाषाय-वर्णपताकया शोभमानो द्वाभ्यां समुन्नतभुजप्राप्यपृष्ठदेशाभ्यां शुभ्रवर्णाभ्यां सिन्धुदेशोद्भवाभ्यां तुरङ्गमाभ्यामाकृष्यमाणो द्वारि तिष्ठति। तदनु चाऽश्वारोहिणां सैनिकानां सहस्रपञ्चकं पङ्क्तिबद्धं युद्धाय सुसज्जितं प्रतीक्षमाणमादेशाय वर्तते। बालसूर्यरश्मिसंस्पर्शेन झिलमिलायमानं वारवाणं परिदधानो वामेतरस्कन्धपृष्ठदेशे निषङ्गं वामे च धनुरारोप्य कटिनिहिततीक्ष्णधारखड्गपिधानः सैनिकवेशसुसज्जितो मत्तकालाय मिथ्यागर्वाध्मातवपुषे पर्याप्तोऽहमेकलस्तन्मन्त्रिणं मानपालं तत्रैव निरुध्य तं स्यन्दनमारुरोह। अथ च पीठिकायां स्थापितं विशालाकारं शङ्खं हस्तयोरादायाऽऽध्मातवान्। स च सुतीक्ष्णः शङ्खध्वनिर्विदिशानगरद्वारान्निष्क्रम्य मत्तकालस्य कर्णयोरपि परापतत्।

अथ सङ्गरारम्भसूचकानि ढक्कानिःसाणतूर्यपणवानकगोमुखादीनि युद्धवाद्यानि सहसैवाऽभ्यहन्यन्त। स च तुमुलो निनादो विदिशानिवासिनां प्रजाजनानां हृदयानि युद्धोन्मादेन समभरत्।

मम सङ्केतमधिगम्य प्रस्थिते स्यन्दने सकला साऽश्वचमूर्मामन्वसरत्। तीव्रगत्या प्रधावद्भिरस्मत्सैनिकैर्मत्तकालसैन्यशिविरं परिवृत्य गरुडव्यूहरचना विहिता। मत्तकालस्य सैन्यमपि विदिशामश्वयितुं सुसज्जितमेवाऽऽसीत्। परं नाऽऽशशासेऽसौ मत्तकालो विदिशासैन्यस्य तथाविधां तत्परताम्। तस्मिन्नेव क्षणेऽस्मत्सैन्यमध्ये समुत्पतितेन तूर्यध्वनिना सङ्केतं प्राप्य रात्रावेव सुगुप्तरूपेण मत्तकालसैन्यसन्निवेशपृष्ठभागे स्थिताऽनीकिनी लाटेश्वरसैन्यमाचक्राम। अग्रतश्चाऽस्माभिराक्रान्तम्। अकाण्डेऽनेनाऽ-

सम्भाव्येनाऽऽक्रमणेन भ्रान्तोऽपि मत्तकालः सावधानो भूत्वा सैनिकान् युद्धायोत्साहितांश्चकार। द्वयोरेव सैन्ययोर्वीरकेतुमत्तकालयोर्भयानकः कातराणां भीतिजननो वीराणाञ्चोत्साहवर्धनः सङ्गरो बभूव।

द्वन्द्वयुद्धाय मत्तकालं मृगयमाणोऽहं शीघ्रमेव तत्समक्षमागम्य तमाजुहाव। वीरः स्वाभिमानी शस्त्रसंचालनदाक्ष्यगर्वगर्वितश्चाऽसौ धनुषि शरमारोप्य मयि चिक्षेप। परं कुत्र वराकस्य तस्य युद्धदक्षता मयि स्थिते। त्वरितगत्या एकेनैव भल्लबाणेन मत्तकालस्य धनुर्भङ्क्त्वाऽपरेण च शल्यबाणेन तस्य हृदयं लक्ष्यं विधाय तथा प्रहृतं यथाऽसौ बाणस्तस्य वर्म विच्छिद्य हृन्मर्म प्रविश्य प्राणानपजहार। क्रकचविच्छिन्नतरुस्कन्ध इवाऽसौ तत्क्षणं रथादधः पतितः।

नायकस्य पतनसमकालमेव लाटदेशचमूर्भयसम्भ्रान्ता हताशा प्राणाभिलाषिणी स्तब्धचित्ता बभूव। तस्मिन् प्राणहरे सङ्गरे केचन सैनिकाः यमलोकं ययुरपरे च क्षतविक्षतशरीराः भूम्यामेव पतिता अन्ये च दिक्षु विद्रुताः। अवशिष्टाश्चाऽस्माभिः शस्त्रपरित्यागिनः प्राणान् भिक्षमाणाः बन्दीकृताः।

तदनन्तरं वर्धितोत्साहैर्विदिशाधिपजयजयकारोच्चारणपरैरस्माकं सैनिकैर्मत्तकालस्य सैन्यशिविरस्य लुण्ठनमारब्धम्। तस्य सकलाऽपि धनसम्पत्तिरस्माभिरधिगता। महार्घाणि रत्नानि सङ्गृहीतानि। सर्वेषु कक्षेषु राजसुतामन्विषन्नहं त्रिभुवनरमणीललामभूतां विदिशाजनपदसौन्दर्यसारां वामलोचनामेकस्मिन् सुसज्जिते कक्षे सुगुप्तरूपेण संरक्षितामपश्यम्। बन्धनान्मोचयितुं गतोऽहं तया हरिणाक्ष्या राजसुतया भयविषण्णवदनयाऽपि कृतज्ञत्वसम्भृतनयनाभ्यामश्रुकणान् विकीर्याऽभिनन्दितः। तथा लावण्यराशिवैभवशालिनी सा राजसुताऽवर्तत, यथा सर्वोऽपि मे शौर्यसाहसबुद्धिगुणगणो तुच्छमेव प्रतिभाति स्म। कथमपि मनः संनियम्य राजसुतां प्रणम्य मत्तकालस्य यमलोकप्रयाणमसूचयम्।

सङ्गरे निहतानामन्त्येष्टिसंस्कारस्य व्रणितानाञ्च चिकित्सायाः प्रबन्धं विधाय लुण्ठितां सामग्रीं यानेष्वारोप्य लाटेश्वरशिविरमधिकृत्य राजकन्यया वामलोचनया सह महामात्यं मानपालमहमुपजगाम। पूर्वमेव विदितवृत्तान्तोऽसौ मत्तकालविजेतारं मां सम्मानयितुं स्वयमेव नगरनिवासिनां राजकर्मचारिणाञ्च सम्मर्देन सह नगरद्वारि समुपस्थितो बभूव। नगराधिष्ठातृदेवताभिरिव दिवसेऽपि मुखशशिप्रकाशितराजमार्गाभिर्नववस्त्राभरणसुशोभिताभिः स्मितेनैव त्रिभुवनविजयक्षमाभिर्नवतारुण्येनोल्लसन्तीभिर्युवतिभिर्विहितारात्रिकोऽहं ससमारोहं नगरमध्यगतराजपथेन राजभवनाय प्रातिष्ठम्। राजमार्गमुभयतो भवनानां वलभीषु छदिषु च समारूढानां वनितानां समूहेन

विप्रकीर्णानामक्षतकुसुमानामुपहारैः सत्क्रियमाणो महाराजस्य वीरकेतोः राजसभायां समुपस्थितो बभूव।

मम शौर्यविजयपराक्रमोत्साहनीतिनैपुण्यादिगुणगणेन पूर्वमिव परिचितो विदितवृत्तान्तो महाराजो वीरकेतुः स्नेहनिर्भराश्रुबिन्दुनिचितनयनाभ्यां मां निरीक्षमाणस्तत्र राजसिंहासनमधितस्थौ। मत्तकालशिविराल्लुण्ठितं सकलं सामग्रीचयं रत्नराशिञ्चाऽहं राजसुतया वामलोचनया सह महाराजाय समर्पिषम्।

स्मितविभूषितवदनस्तु विदिशाधिपः प्रसादपूर्णहृदयो राजसिंहासनादधोऽवतीर्य मामालिङ्गनपाशे निबध्य प्रावोचत् -

"वत्स ! त्वमेव मम सुतः परमस्नेहभाजनम्। प्रभोः कृपया प्रसादेन च मया प्राप्तः। साम्प्रतं त्वयाऽन्यत्र न कुत्राऽपि गन्तव्यम्। इह राजप्रासादे निवसंस्त्वं राजप्रशासनधुरमुद्वहन् मे सहायो भव। मम वृद्धस्येमां याचनामङ्गीकुरु।"

इति वचनान्युच्चार्य स वृद्धो वीरकेतुर्विदिशाधिपतिर्मे दक्षिणं हस्तं गृहीत्वा स्वात्मना सहैव मां राजसिंहासनस्याऽर्धभागे समुपावेशयत्।

तदनन्तरं राजकन्यायाः मम च नेत्रवक्त्रविकारैश्चेष्टाभिर्भाषणैश्च मनोऽन्तर्गत-भावानभिलक्ष्य माञ्च योग्यं वरं ज्ञात्वा बन्धुभिर्मन्त्रिभिश्च परामृश्याऽसौ राजर्षिर्यौवन-भारविनमितवदनां मनःप्रसादभरविकसितचित्तां चकितहरिणीनयनविलसितामनुपम-सौन्दर्यसुरभिशालिनीं प्राणेभ्योऽपि गरीयसीं सुतां वामलोचनां पाणिग्रहणसंस्कारविधिना मह्यं समर्पितवान्। प्रदत्तप्रशासनभारञ्च मां कतिपयदिवसानन्तरं युवराजपदेऽसावभ्य-षिञ्चत्।

युवराजपदमलङ्कुर्वाणोऽपि राजोचितभोगोपभोगसंसक्तोऽपि हृदयसर्वस्वभूतया वामलोचनया सततमनुरञ्जितोऽपि दुःखेनैकेन सदाऽहं सम्पीडितोऽभवम् -"क्व वर्तते कुमारः?" हृदि कीलिता लोहशलाकेव सा पीडा सततं मां पीडयति स्म। मित्राणां स्वामिनो राजवाहनस्य च विरहेण सन्तप्तहृदयेन न कदाचिन्मया शान्तिरधिगता। न जाने कदा शूलदायिनीयं पीडा शममेष्यति।

भवद्गमनानन्तरमस्माभिः सुहृद्भिर्निश्चितं यद्वयं कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां तिथौ पुनः विशालायामुज्जयिन्यां महाकालमन्दिरे शिप्रातटे सम्मिलिष्यामः। स एव समयः समीपमाजगाम। अस्मिन्नेव काले विदिशावासिना सांवत्सरिकेण मया पृष्टेन प्रोक्तम् -

"उज्जयिन्यामेव भवतः स्वामिना सह सम्मिलनं भविष्यति।"

तस्य सांवत्सरिकस्य वचनेषु विश्वासमापन्नोऽहं वामलोचनया सहाऽत्र समागच्छम्।

भवद्दर्शनाभिलाषं हृदये दधानो मित्रविरहशल्योद्धरणकामनां मनसि वहन्नहं प्रातःसायं भगवन्महाकालचरणोपासनायामेव समयमतिवाहयामि। महाकालमन्दिरसन्निकटमेव शिप्रातटवर्तिनि भव्यभवने मया निवासस्य प्रबन्धो विहितः।

अद्योपवनविहारायाऽनुरुध्यमानो वामलोचनया तत्सखीभिश्च सहाऽहमत्रोपवनमागतः। भक्तवत्सलयोर्भवानीभवयोरनुग्रहेण साम्प्रतं भवच्चरणारविन्दयोः दर्शनस्याऽऽनन्दो मया लब्धः।

सोमदत्तस्य पराक्रमसौभाग्यवृत्तमाकर्ण्य परमहर्षभरनिमग्नमानसो राजवाहनस्तस्य गुणगणं प्रशशंस। धैर्येण साहसेन बुद्ध्या च सर्वाणि कार्याणि सिध्यन्ति। महतां क्रियासिद्धिः सत्त्वे भवति नोपकरणे।

एवमेव वार्तालापनिमग्नमनसोस्तयोः सोमदत्तस्य दृष्टिरकस्मादुद्यानस्य बहिः राजमार्गे प्रचलति पुष्पोद्भवे पपात। "अरे ! पश्यतु भवान्, पुष्पोद्भव एवाऽयं समवलोक्यते, त्वरितगत्या पादाभ्यामेवोज्जयिनीं प्रति गच्छति," इति वचनानि तेनोच्चारितानि।

तारस्वरेण पुष्पोद्भवमाकारयन् सोमदत्तः समुत्थाय त्वरितगत्या धावन्नेव तमनुससार। पुष्पोद्भवोऽपि सोमदत्तस्य स्वरं निशम्य, परिचित एवाऽयं कश्चिदिति निरुद्धगतिः प्रतिनिवृत्य निर्निमेषनयनस्तमीक्षाञ्चक्रे। तदैव सोमदत्तः पुष्पोद्भवसमीपमागच्छत्। द्वावपि सुहृदावन्योन्यं परिचित्य प्रहर्षाश्रुभरोपचितनयनौ राजमार्ग एव प्रसारितभुजौ सुदृढालिङ्गननिबद्धौ बभूवतुः। तदनन्तरं पुष्पोद्भवं दक्षिणभुजेन गृहीत्वा सोमदत्तः पुनस्तत्राऽऽगच्छद् यतोऽसौ राजवाहनं कुमारं परिजनञ्च परित्यज्य गतः।

पुष्पोद्भवमवलोक्य राजवाहनस्य प्रसन्नतायाः न कापीयत्ताऽवर्तत। हर्षविकसितवदनोऽसौ राजकुमारो बद्धाञ्जलिं चरणयोः प्रणमन्तं पुष्पोद्भवं दक्षिणभुजेनाऽऽकृष्य सोमदत्तञ्च वामभुजेन गृहीत्वा द्वावपि तौ युगपदेव सुदृढाश्लेषबन्धने निबबन्ध। अथ त्रयो वयस्याः नयनसलिलैरन्योन्यमभिषिञ्चन्तश्चिरकालं तथैव तस्थुः। तदनन्तरं प्रशमं गते चिरनिरुद्धे हृदयावेगे ते त्रयो हरितदूर्वाच्छन्नभूमावुपाविशन्। राजवाहनसोमदत्तौ संक्षेपेण निजवृत्तान्तान् वर्णयित्वा पुष्पोद्भवमूचतुः -

"मित्र ! एतावत्कालं त्वया कुत्र स्थितं कानि च कार्याणि विहितानि किञ्च साफल्यमधिगतमिति विस्तरेण निजवृत्तान्तं वर्णय।"

मित्रयोः स्नेहमनुरुध्य पुष्पोद्भवोऽपि निजवृत्तान्तमनेन प्रकारेणाऽवर्णयत् -

# पञ्चमी पीठिका

## पुष्पोद्भवः

## पञ्चमी पीठिका

# पुष्पोद्भवः

कुमार ! तस्मिन् समये भवन्तं शिविरेऽनवलोक्य महता परिश्रमेण सुचिरं परिमार्गमाणा अप्यनुपलभमानाः विषादोपहितमानसाः म्लानवदनाः सुहृदो वयमुज्जयिन्यां पुनः सम्मिलनस्य समयं सङ्केतञ्च निश्चित्य भवदन्वेषणाय विविधासु दिक्षु प्रातिष्ठामहि ।

सैन्यस्कन्धावारादहं दक्षिणपूर्वीदिशि प्रस्थितः । सघनदुर्गमकाननमध्यात् पदवीथिकाश्रयेण प्रचलन् सहसाऽतिविशालसमतलक्षेत्रमपश्यम् । तरुषण्डमध्यस्थितस्य तस्य प्रदेशस्याऽभ्यन्तरे स्वच्छनीलसलिलधारा प्रवहति स्म । पारदर्शकाम्भसोऽधस्तात् कृष्णहरितनीलपीतकर्बुरवर्णाः लध्वाकाराः प्रस्तरखण्डाः नवोदितबालरविरश्मिसंस्पर्शमवाप्य महेन्द्रचापशोभां बिभ्राणाः नयनाकर्षकाः बभूवुः । समतलभूमिभागस्योत्तरस्यां दिशि महोच्छ्रायवति पर्वतशिखरेऽतिमहति शिलैकाऽग्रत उद्गता समदृश्यत । सलिलधाराया उत्तरवर्तिनि तटेऽतिविस्तारवान् शाकतरुर्विततहरितपत्रैः सूर्यातपमरुणत् ।

शाकतरोरधस्तात् स्रोतस्सलिलं निकषा सारङ्गयूथ एको निर्भरं निश्चिन्तञ्च क्रीडानन्दनिमग्नोऽवर्तत । केचन मृगाः पिपासाकुलाः जलं पिबन्ति स्म । अन्ये च यौवनमदालसाः मृगीभिः साकं प्रणयविलासक्रीडायुता अदृश्यन्त । मृगीणां नयनविभ्रमैरेव तेषां हृदयानि समुत्कण्ठितान्यासन् । मृगशावकास्तु कूर्दन्तो बाललीलां प्रसारयन्ति स्म ।

शनैः शनैः सूर्यातपो वृद्धिमाततान । तृड्बुभुक्षाव्याकुलो मार्गश्रमक्लान्तकायोऽनातपमिच्छन् विश्रमाभिलाषी शाकतरुच्छायामहं संप्राप्तवान् । परं मां दृष्ट्वैव जागरूक इव स मृगयूथस्तरसा धावित्वोत्प्लुत्य सघनवनमध्यगतो नयनागोचरः सञ्जातः । अहं कानिचिच्छुष्कफलानि पोट्टलिकानिहितान्यानयम् । सलिलधारामुपगम्य मुखं हस्तपादञ्च प्रक्षाल्य जलमाचम्य पोट्टलिकाग्रन्थिमुन्मील्य शुष्कफलान्यास्वाद्य प्रशान्तभोजनाभिलाषः पुनः किञ्चिज्जलं पीत्वा तस्यैव शाकतरुशीतलच्छायं समतलप्रदेशं स्वच्छीकृत्याऽधिशिश्ये । स्वल्पेष्वेव क्षणेषु निद्रादेवी मामङ्कशायिनञ्चकार ।

नयनयोर्निमीलने सति कैश्चिदनिर्वचनीयैरचिन्तनीयैर्मनोभावैर्मे निद्रा सुदूरमपसृता । चमत्कृत्य समुत्थायाऽहं परितो दृष्टिं व्यापारयन्नेकाग्रचित्तो व्यलोकयम्- "किमिदं सञ्जातमिति ।" काऽप्यघटनीया घटना घटिष्यतीति विचाराः मे हृदयमुन्मथयितुं प्रावर्तन्त । सहसा मे दृष्टिः समतलभूमिक्षेत्रस्योत्तरस्यां दिश्यवस्थितस्य भूधरस्य शिखरे

पतिता। विस्मयविह्वलः प्रवृद्धहृदयगतिरहमवालोकयम् -

"कश्चिज्जनो गिरिशिखरमारुह्य सर्वाङ्गानि कच्छप इव सङ्कोच्य स्वात्मानं शिखरशिलातलात् पातयितुमीहते।"

करुणाविगलितान्तःकरणो दयार्द्रोऽहं क्षणं तत्रैव किंकर्तव्यविमूढोऽतिष्ठम्। उत्तुङ्गपर्वतमारुह्य तत्र गमनस्य समयो नासीत्। अतस्त्वरितमुदग्रप्लुत्या धावन्नहं तमेव गिरिसानुशिलाधस्तात् तत्प्रदेशमाजगाम।

सावहितेन मयोत्तुङ्गगिरिशिखरादधो वेगेनाऽऽपतन् पुरुषो महता प्रयासेन कौशलेन चाऽवलम्ब्य प्रसारिताभ्यां द्वाभ्यां भुजाभ्यां गृहीतो मृदुभावेन च शनैर्भूमौ शायितः। तत्र हरितदूर्वाङ्कुरमृदुशयनमेव प्रकृत्या समास्तीर्णमवर्तत। परं स पुरुषस्त्वचेतनावस्थ एवाऽवर्तत।

तदनन्तरं पुरुषं तं द्वयोर्हस्तयोरुत्थाप्य समतलप्रदेशमानीय प्रवहन्त्याः जलधारायाः सन्निकटं शीतलोपचारैः सचेतनं विधातुं प्रययास। मे प्रयासाः स्वल्पेनैव कालेन साफल्यं प्राप्ताः। संसज्ञोऽसौ पुरुषश्चमत्कृत्योत्थाय परितोऽवलोकयामास। मयि दृष्टिपातं कुर्वन्नेवाऽसौ चक्षुर्भ्यामश्रुधाराः प्रवाहयितुमारेभे। क्षणानन्तरमुच्चैः स्वरेण चक्रन्द। तं पुरुषमवलोक्याऽनिर्वचनीयैरचिन्तनीयैश्च भावैरुद्वेल्लितहृदयस्य मे मनसि विचाराणां सरणिरुद्बभूव -

"अस्य समादरणीयस्य जनस्य चरणौ भुजयोर्वक्षसि चाऽऽसज्ज्याऽश्रुजल-धाराभिरार्द्रीकुर्याम्।"

कथमपि हृदयोद्वेष्टनकरान् भावान् सन्नियम्याऽहं विनम्रीभूतवदनेन तं प्रौढायुषं पुरुषमपृच्छम् -

"तात! को भवान् कश्च परिचयो भवतः? कस्मात् कारणात् पर्वतशिखरादात्मानं निपात्य भवान् प्राणपरित्यागनिश्चयं विदधाति? कथं वा निर्बन्धमुच्चैःस्वरेण भवता रुद्यते? यदि भवान् मां विश्वासयोग्यं मनुते, सर्वमेतद् वृत्तं विस्तरेण वर्णयतु।"

तदाऽसौ पुरुषः कथमप्यात्मानं नियम्याऽश्रुगद्गदकण्ठेन जगाद -

"वत्स! मगधाधिपस्य राजहंसस्य पद्मोद्भवो नाम नीतिनिष्णातो मन्त्री बभूव। तस्य द्वौ सुतावास्ताम् - सुश्रुतो रत्नोद्भवश्च। सुश्रुतस्तु जनकेन सह कुसुमपुर एव न्यवसत्। राजनीतिनिपुणश्चाऽसौ राजकार्येषु नियुक्तः। परं रत्नोद्भवो वाणिज्याभि-रुचिस्तत्र प्रशिक्षितो निपुणो वाणिज्योपयोगिविक्रेयवस्तुयुतपोतनिकरमारुह्य सागरमुत्तीर्य स्वर्णद्वीपं जगाम। तत्र धनगुप्तनाम्ना वणिजा सह परिचये सञ्जाते तस्य कन्यां सुवृत्तां पाणिग्रहणसंस्कारेण परिणिनाय। कालक्रमेण सा सुवृत्ता गर्भं बभार।

अथ कदाचिदसौ रत्नोद्भवो मातापितृदर्शनाकाङ्क्षया गर्भिण्या भार्यया सह पोतमारुह्य भारतवर्षं प्रति प्रस्थितः। बङ्गसमुद्रे तरंस्तस्य पोतः समुद्रतटादविदूर एव वर्तमानो जलधिजले समुद्गताभिः प्रभञ्जनोत्पादिताभिरुत्तुङ्गप्रचण्डलहरीभिः खण्डशो विभग्नः सागरगर्भे निमग्नः। परं विधिनियोगादासादितपोतखण्डकाष्ठफलकसाहाय्येन तरंस्तरङ्गेष्वसौ तटं समाजगाम।

प्राणेभ्योऽपि गरीयसी प्रियतमा सुवृत्ता विधिना समुद्रप्रभञ्जनव्याजेनाऽपहृतेति महता दुःखेन व्यथितहृदयोऽसौ रत्नोद्भवो न कथमपि मनसि शान्तिं लेभे। दुःखसागरेऽस्मिन् निपतितोऽसावाप्रभातात् सायंसमयं यावद् बङ्गसमुद्रतटे समुपविष्टो जलपुञ्जमेव क्षितिजपर्यन्तविस्तृतं निरीक्षाञ्चक्रे।

एकस्मिन् सायंसमयेऽसौ तीव्रतमदुःखकीलकक्षतमसहमानः समुद्रसमाधिमेव सकलकष्टनिवारणं मन्यमानः प्राणपरित्यागाय समुद्यतो बभूव। परं यदैव तेन सलिलनिधिसलिले पदं निधत्तं, लम्बकूर्चश्मश्रुजटिलो भव्याकृतिस्तपस्वी कश्चित् तत्राजगाम। रत्नोद्भवं तस्मादध्यवसायान्निवार्याऽसौ प्रोवाच -

"वत्स ! मैवं दुस्साहसं कुरु। अपुण्यप्रदं लोकपरलोकविनाशकरमात्महननम्। षोडशवर्षानन्तरं त्वं भार्यां सुतमपि च पुनः प्राप्स्यसि।"

तपोधनस्याऽऽदेशेन षोडशवर्षपर्यन्तं तत्रैवाऽऽश्रमे निवसन् रत्नोद्भवस्तपश्चरन् समयमतिवाहयामास। परं व्यतीते निर्धारिते षोडशवर्षसमये भार्यया पुत्रेण च सह न संयोगमवाप्नुवन्नितस्ततो भ्रमन्नसौ विरहजन्यपीडामसहमानः कष्टप्रदानपुण्यान् प्राणान् परिजिहीर्षुः जीवनमनिच्छन् गिरिशिखरादात्मानमपातयत्। अहमेवाऽसौ रत्नोद्भवो दौर्भाग्यशाली विधिना हतो वर्ते।"

एकाग्रचित्तं राजवाहनं निजवृत्तान्तं श्रावयन् पुष्पोद्भवः क्षणं विरम्य पुनः बभाषे -

ध्रुवमयं पुरुषो मे जनक इत्यवबुध्य तस्य पादयोर्निपत्य दृढमाश्लिष्याऽहं तारस्वरेण चक्रन्द। मया निवेदितं यदहमेव तस्य मन्दभागधेयः सुतः। विधेरेव विलसितं यदहं जात एव मातापितृभ्यां वियुक्तः शैशवे मगधराजराजहंसमहोदयेन पालनपोषणशिक्षणैः संवर्धितः।

तदनन्तरं चिराभिलषितपुत्रसंयोगसुखमनुभवताऽऽनन्दनिर्भरेण जनकेन भुजयोरुत्थापितोऽहं वक्षसा दृढमाश्लिष्टो हर्षाश्रुभिरार्द्रीकृतः।

तस्मिन्नेव काले सघनारण्यमध्यात् कस्याश्चिद् वनितायाः करुणक्रन्दनध्वनिः कर्णेष्वावयोः पपात। काचिद् वनिता क्रन्दमाना सगद्गदं विलपति स्म -

"वत्से ! मा गाः विषादम्। स तु सिद्धपुरुषस्त्वामसूचयत् - षोडशवर्षानन्तरं त्वं पतिपुत्राभ्यां नूनं संयोगमेष्यसि। न त्वमात्मानमत्र प्रज्ज्वलिते लपलपायमानारक्त-ज्वालाभयावहे हुतवहेऽर्हस्यात्मानमाहुतीकर्तुम्। सुखेन परलोकं गत्वा त्वं तत्रत्यान् सुलभान् सुखभोगान् भोक्ष्यसे। परं तव पतिपुत्रयोस्त्वां विना काऽवस्था भविष्यति, तस्याः कल्पनाऽपि दुष्करा।"

क्षणं विरम्य सा वनिता तथैव तारस्वरेण क्रन्दमाना विललाप -

"अरे ! अस्ति कश्चित् परोपकारनिरतो जनोऽत्र विपिने, य एनां हुताशनं प्रविशन्तीं निवारयेत्? आगच्छतु आगच्छतु। रक्षत्वेनां, रक्षत्वेनाम्।"

तदाक्रन्दमाकर्ण्य परदुःखकातरं मे हृदयं करुणार्द्रं सञ्जातम्। पितरमहं प्रावोचम् -

"पितः ! भवानत्रैव तिष्ठतु, यावदहं गत्वाऽवलोकयामि। केयं वनिता, या जीवनमोहं परित्यज्य वह्नावात्मानमाहुत्य परलोकं जिगमिषति?"

इति कथयित्वा पितरं जलधारातटे समुपवेश्य, तमेव क्रन्दनध्वनिमनुसरन् सघनवनमध्यभागं प्राविशम्। ततो मयाऽवलोकितम् -

"सघनपादपावृतसमस्थले म्लानवदनाऽपि सौन्दर्येण वनप्रदेशं दीपयन्ती षट्त्रिंशद्वर्षदेशीया काचिद् वनिता कयाचिद् स्थविरया साकं तिष्ठति। समक्षमेव समुज्ज्वलत्प्रचण्डोत्तुङ्गपिङ्गलज्वालाजटिलश्चटचटायमानो बह्निराशिरेकत्रीकृतं शुष्ककाष्ठचयं भक्षयतीव। सा तु महिला महता प्रसासेन वैश्वानरं प्रवेष्टुं प्रयतते, परन्तु सा वृद्धा हस्तं गृहीत्वा तां रुणद्धि।"

तरसा धावित्वा मया सा महिला अग्निप्रवेशान्निरुद्धा। तदनन्तरमेवंभूतस्य तस्य साहसस्य कारणं पृष्टा सा वृद्धा प्रोवाच -

"भद्र ! स्वर्णद्वीपस्य वणिजो धनगुप्तस्येयं सुता सुवृत्तानाम्नी वर्तते। मगधाधिपस्याऽमात्यस्य पद्मोद्भवस्य सुतेन रत्नोद्भवेन वाणिज्यार्थं स्वर्णद्वीपं पोतनिकरेण समागतेन गृहस्थधर्मपरिपालनाय पाणिग्रहणसंस्कारविधिनेयं परिणीता। कालक्रमेण गर्भधारिणीयं भर्त्रा सह पोतमारुह्य श्वसुरगृहं गन्तुं भारतवर्षं प्रति प्रस्थिता। परं बङ्गसमुद्रतटादविदूरवर्तिनि स्वल्पावशिष्टमार्गे सलिलनिधौ भयावहैरुत्तालतरङ्गैः प्रभञ्जनजनितैरयं पोतः खण्डशो विहितः। अस्याः धात्री सदा सहवर्तिनी वृद्धाऽप्यहं जलधिजलपतितामिमां कथमपि समुपलब्धे छिन्नपोतमध्यात् पृथग्भूते दीर्घकाष्ठफलके समारोप्य स्वयमपि तत् समारुह्य सागरतीरमागता।

समुद्रतटादविदूरवर्ति वनमध्यं प्रविश्य गर्भभारखिन्नाऽपि सागरतङ्गाघातै-

रतिश्रान्तक्लान्तकायाऽपि पतिव्रतेयं भर्तुरन्वेषणैकाग्रचित्ता मगधगामिना वन्यमार्गेण मयाऽनुसर्यमाणा प्रस्थिता।

वनमार्गे प्रसवपीडाविह्वला सुवृत्तेयं तमालतरुच्छायामधिशयाना पुत्रमेकं सर्वशुभलक्षणसम्पन्नं कान्त्या काननोद्देशं दीपयन्तं प्रासूत। परं प्रसवपीडासहनाक्षमाऽचेतना सञ्जाता। ततो जलान्वेषणाय किमपि दूरं गतायां मयि कश्चिदारण्यको विशालशरीरो मातङ्गोऽतिदीर्घेण शुण्डादण्डेन गृहीत्वा तं नवजातशिशुमुच्चैरुच्छालयामास। बहुसमयं वने तत्रेतस्ततोऽन्विषन्त्या मया नाऽसौ शिशुरधिगतः। तदैवेयं सचेतना सञ्जाता।

प्रथमं तावद् भर्तृवियोगस्तदनन्तरं प्रसवानन्तरमेव सन्ततिवियोगो, न तस्याः हृदयान्तर्गतायाः व्यथाया इयत्ता। हृदयविदारिणीं मनःप्रमाथिनीं दारुणां व्यथामसहमानेयं मृदुलाङ्गी मृदुकम्बुकण्ठे स्वोत्तरीयमाबध्य प्राणपरित्यागे प्रययास। तदैव तत्राऽकस्मात् सम्प्राप्तेनैकेन जटाजटिलेन कृष्णदीर्घघनश्मश्रुवाच्छादितेन मुखमण्डलेन तेजः-समुद्दीपितेन सिद्धतापसेन प्रोक्तम् -

"देवि! मा कुरु दुस्साहसम्। षोडशवर्षानन्तरं ते पतिपुत्राभ्यां सह पुनः सम्मिलनं भविष्यति।"

सिद्धतापसप्रोक्तानि भविष्यत्सूचकानि वचनानि निशम्य विश्वासमापन्ना, तदादेशमङ्गीकृत्य तस्यैवाऽऽश्रमे निवसन्ती पतिपुत्रमिलनसमयं प्रतीक्षाञ्चकार। अथ षोडशहायनेषु व्यतीतेष्वपि, न मे पतिपुत्राभ्यां सम्मिलनं भवतीति व्यथया व्यथितचित्ता तस्मादाश्रमप्रदेशादिदं भयावहं सघनं विपिनमागम्य शुष्केन्धनैश्चितामाचित्य वैश्वानरं सन्दीप्य ज्वालाजालपरिगते तस्मिन्नियमात्मानमाहुतीकर्तुं प्रयतते। भवता च अत्राऽऽगम्य अनाथाया अस्याः प्राणाः रक्षिताः।"

स्थविरायाः वचनानीमानि श्रुत्वा इयमेव मे जननी इत्यवधार्य तच्चरणारविन्दा-श्लिष्टोऽहं नयनसलिलैरेव स्रवद्भिः पादप्रक्षालनं कुर्वन् रोदं रोदं तामुवाच -

"मातः! त्वमेव मे जननी, तव सुतश्चाऽहम्। ते गर्भाज्जातः पृथिव्यामवतीर्णो विधिना त्वत्तो वियोजितः। मामङ्के विधेहि।"

सा चिरविरहव्यथया दन्दह्यमानहृदया पतिपुत्राभ्यां वियुक्ता म्लानवदना कृशाभ्यां भुजवल्लरीभ्यां मां गृहीत्वा वक्षसाऽऽसज्ज्याऽवितर्कितासम्भावितोपनत-सुखभारमसहमाना किञ्चिदपि वक्तुमपारयन्ती सुदृढं मामालिङ्गनपाशे बबन्ध। वात्सल्यभावोद्रेकेण पयोधरौ तस्याः पयःपरिपूर्णौ बभूवतुः। लोचनाभ्यां प्रवहद्भिरश्रुभिः पयोधराभ्याञ्च प्रवहद्भिः पयोधाराभिः सा मामभिषिषेच। प्रशान्ते च चित्तावेगेऽहं

जननीं धात्रीसहितां पितुरन्तिकमानिनाय।

दूरादेव मामायान्तमवलोक्य प्रियां सुवृत्ताञ्च प्रत्यभिज्ञाय तरसा धावन् मे जनकोऽस्मदन्तिकमाजगाम। प्राणेभ्योऽपि गरीयसीं प्रियां भार्यां पुत्रञ्च मां द्वाभ्यां भुजाभ्यामाकृष्य दृढालिङ्गनपाशेऽसौ बबन्ध। कतिपयक्षणं वयं त्रयोऽपि तस्यामेवाऽवस्थायामतिष्ठाम। प्रशमिते च हृदयावेगे जलधारानिकटं गत्वा तत्रोपविश्य परस्परालापैरात्मनो वयं विनोदयामासिम। मया तु मगधाधिपस्य राजहंसस्य सकलो वृत्तान्तो विस्तरेण वर्णितः। मया सूचितम् - सर्वैरपि कुमारैरस्माभी राजसुतेन स्वामिना राजवाहनेन सह विजययात्रायै प्रस्थितमासीत्। परं मार्गमध्ये गहनविपिनेऽसूचयित्वाऽस्मान् कुमारः शिविरसन्निवेशात् क्वचिन्निर्गतः। तमेव वयं सर्वासु दिक्ष्वन्विषन्तः परिभ्रमामः।"

तदनन्तरं पितरावहं न्यवेदयम् -

"भवद्भ्यां द्वाभ्यां स्थविरयाऽनया धात्र्या सेव्यमानाभ्यां कस्मिंश्चिदाश्रमे तावत्कालपर्यन्तं निवसनीयं यावद् वयं कुमाराः राजकुमारं राजवाहनमन्विष्योज्जयिनीं नाऽधिकुर्मः। अथवा यावन्मया कश्चित् सुदृढो निवासो न लभ्यते।"

तदनन्तरं तयोरनुमतिं लब्ध्वा तापसस्यैकस्याऽऽश्रमे तेषां निवासस्य सुप्रबन्धं विधायाऽहं भवतः कुमारस्याऽन्वेषणाय प्रतस्थे।

अथ विन्ध्यगिरिसघनवनप्रान्तरेषु पदवीथिकामार्गैरेव स्वकीया यात्रा मया प्रारब्धा। अस्माभिः सर्वैः कुमारैः कार्तिकमासस्य कृष्णपक्षस्य चतुर्दशी मितिरुज्जयिन्यां महाकालमन्दिरे शिप्रातीरे सम्मिलनाय सुनिश्चितीकृताऽवर्तत। तत्र अष्टमासा-वधिरवशिष्टोऽवर्तत। तदवधिसमयं यावदहं तत्र सङ्गच्छेयमिति कार्यक्रमो मया निर्धारितः।

विन्ध्यदक्षिणवर्तिनि दण्डकारण्ये यत्र तत्र वन्यजातीनां कोलभिल्लकिरातादीनां वन्यवसतयो वर्तन्ते। तत्रोपलब्धाहारविश्रमावकाशो विदितभौगोलिकवृत्तान्तोऽहं धनरहितोऽप्यग्रतः ससार। परं धनरहितेन मया बहूसि दुःखान्यनुभूतानि। धनेनैव सकलानि कार्याणि सिध्यन्ति। धनाभावे विद्या-बुद्धिर्नीतिज्ञता-व्यवहारकौशलमित्यादयः सकलेऽपि गुणा ऊषरक्षेत्रमध्यपतितबीजराशिरिव विफलायन्ते। कथमपि धनसङ्ग्रहः करणीयः।

इति विचारेषु निमग्नो विधेरानुकूल्यं विचारयन् पर्यटन् कस्याश्चित् सरितस्तटमहमाजगाम। वेणुगङ्गेति नाम्ना प्रसिद्धायास्तस्याः नद्याः वामतटेऽवस्थितान् कस्यचित् प्राचीननगरस्य जीर्णशीर्णस्य ध्वंसावशेषानहमपश्यम्।

औत्सुक्यसम्भृतचित्तोऽहं तेषु ध्वंसावशेषेषु गतागतञ्चकार। छिन्नभिन्नभित्तीनां छदिषाञ्च मध्ये यत्र तत्र सम्पूर्णभित्तिछदिषोऽपि प्रकोष्ठाः दृष्टिगोचराः बभूवुः। पर्यटन्नहमेकस्योत्तुङ्गस्य बहुभूमिकस्य प्रासादस्य छदिषो भित्तिसीमासंस्थितोऽधोगामिनीं सोपानपरम्परां सहसा व्यलोकयम्। पाषाणेष्टिकाखण्डैश्च निचितां सोपानपङ्क्तिं विलोक्य कौतूहलाक्रान्तहृदयः समीपोपलब्धेन काष्ठखण्डेन मार्गस्थितानवरोधान-पसारयन्नहं सोपानमार्गेणाऽधोऽवतरम्।

अथ प्रकृष्टोदारप्रकोष्ठमेकं लोहकपाटनिरुद्धद्वारमहमपश्यम्। समयक्रमेण सर्वतो लोहकिट्टचितं स्थूललोहकीलकार्गलितं कपाटं महता बलेन प्रयासेन चोद्घाट्याऽहमेकल एकतोऽपसारयामास। निरर्गलीभूते च द्वारि तस्मिन् प्रकोष्ठे चिरकालनिरुद्धोऽनिलसमूहो दुर्गन्धचितः सहसा बहिर्निर्जगाम। कतिपयक्षणानन्तरं प्रशान्ते तस्मिन् मलिनदुर्गन्धचिते वायुसमूहे प्रविष्टे च नूतने प्राणप्रदे वातमण्डले, प्रकोष्ठकमिदं प्रविश्य मया अधोऽवतरन्ती लोहमयी सोपानपङ्क्तिरवलोकिता। कस्यचिद् गर्भगृहस्य प्रवेशमार्ग एवाऽसौ गहनान्धतमसे प्रविशन्नवर्तत। तस्मिन् प्रगाढान्धकारे नयने मे प्रथमं व्यापाररहिते सञ्जाते। परं विधेरानुकूल्येन चुम्बकप्रस्तरशकलयुगलं मम प्रसेवकेऽवर्तत। तदेव संघट्ट्य समुत्पन्नयाऽनलशिखया शुष्कलघुदण्डं प्रान्तेन प्रज्ज्वाल्याऽलातकं विधाय तस्याऽऽलोके लोहमयसोपानमार्गेणाऽधोऽवतीर्य तद् गर्भगृहं प्राविशम्।

गर्भगृहस्य भयावहं दृश्यमवलोक्याऽतिसाहसपूर्णस्याऽपि मम हृदयं कम्पितम्। वेपथुश्च सर्वेषु गात्रेषु समजनि। रोमहर्षश्च सञ्जातः। तत्र सुविशालस्य चतुःस्तम्भावलम्बितस्य गर्भगृहस्य भित्तित्रयाश्रिताः बहवो लोहनिर्मितसमुद्गका अतिष्ठन्। तत्र च कश्चिदस्थिचर्मावशिष्टो नरकङ्कालः समुद्गकमेकमुद्घाटयन्निव संस्थितः। अस्थिकङ्कालस्योपरि कृष्णचर्म इवाऽऽवृतमासीत्। कश्चिज्जनः किञ्चिदपि वस्तुजातमानेतुं प्रविष्टः समुद्गकोद्घाटनप्रयासपरो लोहसोपानमार्गस्य लोहमयप्रवेशद्वारस्य निमीलनेन तत्रैव निरुद्धः। कक्षस्याऽन्तश्च स्वच्छप्राणप्रदपवनस्याऽभावात् स जनस्तत्रैव स्थितः प्राणेभ्यो वियुक्तः। अथ च कालान्तरेण शरीरस्य सकलः रसः शुष्कताङ्गतः। अस्थिचर्मावशिष्टश्चाऽसौ कङ्कालरूपेण कृष्णवर्णतां प्रपेदे।

महता प्रयासेन मया लोहमयसमुद्गकस्यैकस्य पिधानमपावृतम्। अलातकस्य प्रकाशेऽन्तर्वर्तिनां हीरकमणीनां ज्योतिः सकलं गर्भगृहं शुभ्रातिशुभ्रप्रकाशेन सन्दीपयाञ्चक्रे। तदनन्तरमहं एकैकशः सर्वेषां समुद्गकानां पिधानान्यपावृत्य व्यलोकयम्। कस्मिंश्चित् समुद्गके .मौक्तिकराशयः, कुत्रचित् पुष्परागनीलपद्मरागमरकतादिमणीनां चयाः क्वचिच्च कनकनिष्कसमूहाः अवर्तन्त। एवञ्च तत्राऽनुपमानाऽनुपमेयाऽनन्ता धनसम्पत्तिः

सुनिभृतं सुरक्षिता संरक्षिताऽवर्तत। कस्यचिन्महतोऽपि महतः सम्राजः कोषागारे न विद्यते सम्भवतो तथाभूतो धनचयः। तथाभूतां लक्ष्मीकृपामनुभूय हृदयगतिरपि मे रुन्धन्तीव प्रतीयाय।

कथमप्यात्मानं निरुध्य कतिपयस्वर्णनिष्कचयं पोट्टलिकायां निधाय सर्वेषामपि समुद्गकानां पिधानानि पूर्ववदहं सम्मुद्रितवान्। तच्च कृष्णचर्मनद्धशरीरमस्थिपञ्जरं वामस्कन्धे निधाय तेनैव लोहमयसोपानमार्गेणोपर्याजगाम। अथाऽऽयसद्वारं पूर्ववद् संस्थाप्य तच्च नरकङ्कालं कस्मिंश्चिद् दूरवर्तिनि गर्ते निक्षिप्याऽहं नूतनप्राणप्रदवायुमण्डलं पुनः सम्प्राप्य व्यचिन्तयम् - "कथमेषो द्रव्यराशिः निजाधिकारे कर्तव्यः स्वप्रयोजनानि च साधनीयानि।"

यस्य जीर्णभवनस्य छदिषि मया स्थितं तस्य सन्निकटमेवाऽतितुङ्गमेद्धिरवर्तत। समीपं गत्वा मयाऽवलोकितम् - "तदभ्यन्तरे लोहमयी सोपानपंक्तिराशिखरं गच्छति।" अन्तः प्रविश्य सोपानमार्गेण शिखरमारुह्य सुदूरं यावत् परितो दृश्यमानानि दृश्यान्यपूर्वाणि हृदयावर्जकानि मयाऽवलोकितानि। ध्वंसावशिष्टनगरस्योत्तरदिशि वेत्रवतीधारा, दक्षिणस्याञ्च दिशि सुविस्तृतो राजमार्ग आपश्चिमात् प्राचीं गच्छति स्म।

सावहितेन मनसा नयने व्यापारयता परितो मयाऽवलोकितम् -

"पूर्वदिक्क्षितिजं धूलिभिर्धूसरितं सान्ध्येन मन्दातपेनाऽरुणायितं वर्तते।" ततोऽप्यवहितो भूत्वा बहुसंख्यकानि वाहनान्यपश्यम्। शनैः शनैः समागतेषु सन्निकटं तेषु वाहनेषु मया ज्ञातम् -

"कश्चित् सुमहान् सार्थः प्राच्याः प्रतीचीं गच्छति। प्रायशः एकाधिकसहस्रसंख्यकाः पुरुषाः पञ्चसहस्रशकटाश्च वर्तन्ते। नभसि भास्करे दिनकरे पश्चिमाशाभिमुखे सन्ध्यारुणायमाने च क्षितिजे शीघ्रमेव तमसाच्छन्नं सर्वं जगद् भविष्यतीति यात्रा सम्प्रति सुदुष्करेति सार्थनायकेन शिविरस्थापना शीर्णपुरातननगरसन्निकटमेव समादिष्टा।

किञ्चिद् विचार्य शनैः सोपानमार्गेणाऽधोऽवतीर्याऽहं सार्थवाहं जगाम। गत्वा च तत्र मया विदितम् -

"चन्द्रपालो नाम वणिगुज्जयिनीवास्तव्योऽत्र सार्थवाहो वर्तते। समुद्रतटवर्तिनि मामल्लपुरे पत्तने द्वीपद्वीपान्तरेभ्यः समानीतानि पण्यानि क्रीत्वा जगन्नाथपुर्यां कृष्णसुभद्राबलरामाणां भगवतां दर्शनैरात्मानं पावयित्वाऽयं चन्द्रपालः ससार्थमुज्जयिनीं गच्छति।"

चन्द्रपालस्य सार्थवाहस्य दर्शनं विधाय परस्परं संलप्य च मित्रभावमापाद्य यथेप्सितधनेनाऽहं सुदर्शनसुपुष्टवलीवर्दयुगलं वाहनयोग्यञ्च शकटं चिक्राय। अथ च पुरातनानि सुसंहतानि स्थूलानि प्रच्छदवस्त्राण्यपि मया क्रीतानि। सार्थवाहस्य

परामर्शेन सुदृढशरीरौ सरलस्वभावौ स्वामिभक्तौ विश्वसनीयौ भृत्यावप्यहं न्ययूयुजम्।

तथाऽपि न कोऽपि जनो विश्वसनीयः। विश्वस्तोऽपि जनो न विश्वसनीयः। स्नेहमयव्यवहारेण विश्वासपात्रतामानीतोऽपि न पूर्णरूपेण विश्वसनीयः। विश्वासादुत्पन्ना भीतिर्मूलादेव निकृन्तति। नीतिरियमेव फलदायिनी। अतः पुरातनं प्रच्छदवस्त्रमेकमादाया-ऽसहायो ह्येकाकी तस्मिन् शीर्णनगरे जीर्णभवनं प्रविश्य, लोहद्वारमपसार्य गर्भगृहमवतीर्य स्वर्णनिष्कसमुद्गकपिधानमुद्घाट्य प्रचुरकनकनिष्कराशिं स्कन्धवहनयोग्यं प्रच्छदपटे निधाय ग्रन्थिं बबन्ध। कानिचिद् रत्नान्यपि मया विचितानि। तदनन्तरं पुनस्तथैव जीर्णभवनाद् बहिरागत्य सार्थशिविरं प्रविश्य रात्रौ व्यश्रमम्। तस्य जीर्णभवनस्य शीर्णनगरस्य च विशिष्टसङ्केताभिज्ञानचिह्नानि, मया स्मृतिपटले संयोजितानि।

चन्द्रपालेन सह मे सख्यं समजनि। जीर्णभवनादानीतानि धनानि शकटे समारोप्य भृत्याभ्यां सेव्यमानोऽहं सार्थेन सहोज्जयिनीं समाजगाम। मया मनसि निर्णयः कृतः "योग्यावसरानुरूपं सकलं धनं शनैः शनैस्तस्माज्जीर्णभवनादानेष्यामि।"

चन्द्रपालस्य जनको बन्धुपालो धनवान् समृद्धो लब्धप्रतिष्ठश्च वणिगासीत्। स्वकीयोदारस्वभावेन व्यवहारेण च तेन प्रजाजनेषु राजसभायाञ्च महती प्रतिष्ठाऽर्जिता। स्वल्पावधिं चन्द्रपालेन सह तस्य गृहे स्थित्वा तदुपहृतमातिथ्यञ्चोभुज्याऽहं बन्धुपालेन सह राजसभां गत्वा राजदर्शनञ्चकार। स्मितविभूषितवदनेन नरपतिनोपकृतेन मया तदनुमत्योज्जयिन्यां बन्धुपालगृहसमक्षं सुशोभनं भवनमपि क्रीतम्। तच्च भवनं यथायोग्योपस्करजातेन सुसज्जितं विधाय तस्मादेव काननमध्यगतादाश्रमात् पितरावा-निनाय। जननीजनकयोश्चरणेषु विहितप्रणामोऽहं तयोः सेवायां परमं सन्तोषं लेभे। मातापितृसेवासमं पुण्यतमं सुखं लोके नाऽस्ति।

भवद्दर्शनाकाङ्क्षां मनसि दधानोऽहं प्रायशः सुदूरवर्तिषु स्थानेषु ह्येकलो बभ्राम। कदाचिद् दिवसद्वयी, कदाचिद् दिवसत्रयी वा मे यात्रा भवदन्वेषणाय ववृते। परं न मया भवतश्चिह्नमात्रमपि सङ्केतमात्रमपि वा क्वचिदुपलब्धम्। व्याकुलहृदयस्य दशां मे जनको जानाति स्म। अनेकशोऽसौ मां समवाबोधयत् -

"वत्स ! न कोऽपि लाभो व्यर्थपरिभ्रमणेनाऽनेन। निभृतं स्थित्वा समयः परिपालनीयः। कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां मितौ यूयं सर्वाण्येव मित्राण्यत्रोज्जयिन्यां महाकालमन्दिरे शिप्रातटे सम्मिलिष्यथ एव। तदा तेषु कोऽपि निश्चयेन राजवाहनस्य कुमारस्य समाचारानादायाऽऽगमिष्यति। तावत्कालपर्यन्तं धैर्यं धृत्वा तिष्ठ।"

परं न मे प्रमाथि हृदयं कथमपि प्रयत्नशतैरपि निगृहीतं बभूव। मम परिभ्रमणं

सातत्येनाऽवर्तत।

पितुः रत्नोद्भवस्य चन्द्रपालजनकेन बन्धुपालेन सह सख्यमजनि। प्रायशः द्वावेव परस्परदर्शनेषु सम्मिलनेषु वार्तालापेषु तथाविधेष्वन्येषु चाऽवसरेषु सख्यसुखमनुभवतः स्म। केनचिदपि पुरातनेन हेतुना मालवराजो बन्धुपालाय कुपितो बभूव। बन्धुपालेन तद् रहस्यं मे जनकायाऽऽख्यातम्। स्नेहिलव्यवहारप्रभावितो मे जनकोऽपि बन्धुपालसमक्षं सकलं निजरहस्यं कथयित्वा समुवाच –

"मगधाधिपसुतस्य राजवाहनस्याऽन्वेषणाय सततं प्रयतमानास्तदन्वेषणाभिलाषिणो वयमत्र विशालायां निवसामः।"

बन्धुपालः ज्योतिर्विद् भविष्यद्वक्ता मनीषी बभूव। शकुनफलविचारं कृत्वा भविष्यत्कथने तस्य नैपुण्यं सर्वत्र प्रसिद्धमासीत्। पशुपक्षिरुतार्थावबोधनेऽपि स परमप्रवीणोऽविद्यत। एकदा शकुनफलं विचार्याऽसौ मामकथयत् –

"वत्स ! मा चिन्तां विधेहि। निर्धारितदिवसात् प्रागेव राजसुतो राजवाहनो विशालां समागमिष्यति। त्वया च सहाऽत्र तस्य संयोगो भविष्यति। मनसि समुत्पन्नां चिन्तामुद्विग्नतां विह्वलताञ्च परित्यज्य निश्चिन्तभावेन समयो यापनीयः। समयानुकूलमहं तव सहायो भविष्यामि।"

बन्धुपालस्य स्नेहाश्वासनमयैर्वचोभिर्नितरामाश्वस्तहृदयो निश्चिन्तचित्तश्चाऽहं पितरौ सेवमानो विशालायां सुखेन समयमत्यवाहयम्।

बन्धुपालस्य मित्रं धनपालोऽवर्तत। सोऽप्युज्जयिन्याः समृद्धः सफलो लब्धप्रतिष्ठश्च सार्थवाहोऽवर्तत। तस्य सुता बालचन्द्रिका परमरूपयौवनमदशालिनी सर्वविधगुणगणविभूषिता प्रमदाऽविद्यत। तारुण्यविकासमुपकरणं विधाय मन्मथस्तस्याः सकलशरीरावयवेष्व-वर्णनीयं सकलसहृदयजनहृदयहरणमाकर्षकं लावण्यं समभरत्। अनङ्गशरभूता-यास्तस्याः सौन्दर्यमनुपमेयमेव बभूव। नगर्याः युवतिषु मौलिरत्नरूपा सा विशालाया भालस्य तिलकमेवाऽऽसीत्। सा बालचन्द्रिका प्रायशो बन्धुपालगृहे समागच्छति स्म।

एकस्मिन् दिवसे चन्द्रपालगृहे स्थितोऽहं विनोदवार्तासु सुखमनुभवन्नतिष्ठम्। बालचन्द्रिका तत्र समायाता। तत् तरुणीरत्नमवलोकनेनैव मे हृदयं जहार। तस्याः सौन्दर्येण क्षणमात्रमपि विलम्बं न कृत्वा पञ्चशरप्रहारैर्मम सर्वस्वमपहृतम्। सम्भवतो बालचन्द्रिकाऽपि मम नयनवक्त्रविकारान् समलक्षयत्। मां च सद्य एव तीक्ष्णकटाक्षशरेण संविध्य सा ततो निर्गता।

बन्धुपालस्य तस्य भार्यायाश्च सततं स्नेहभाजनं बालचन्द्रिका प्रायशस्तयोर्गृहं मध्याह्नोत्तरवेलायां समागच्छति स्म। तद्दर्शनाभिलाषी स्वभवनवलभ्यां स्थितोऽहमपि

सततं तां साभिलाषाभ्यां सतृष्णाभ्यां नयनाभ्यां निरैक्षे। सा तरुणी बाला मम मनोदशामनुमिमौ। वलभ्यां स्थितं मामेकाग्रदृशा तामेवाऽवलोकयन्तं निरीक्ष्य साऽपि क्षणं विरम्य मयि तिर्यग्दृष्टिशरप्रहारं निपात्य मन्दस्मितेनैव मे हृदयमुन्मथ्य बन्धुपालगृहं प्रविशति स्म। पञ्चसायकेनाऽनङ्गेन तीक्ष्णशरप्रहारैरहमिव साऽपि बालचन्द्रिका विद्धा। परं न मया कोऽप्यवसरः प्रणयं निवेदयितुमुपलब्धः।

परन्तु भव्येषु विधेः पक्षपाताः भवन्त्येव। एकस्मिन् दिवसे चन्द्रपालगृहसदस्याः सर्वे क्वचिद् बहिर्गता आसन्। परन्तु वृत्तमेतदजानन्ती बालचद्रिका तत्र प्रतिदिनमिव समायाता। जानन्नप्यहं चन्द्रपालगृहमागत्य प्रकोष्ठे पर्यङ्के समुपाविशम्। बालचन्द्रिकाऽपि तत्र समायाता। केनाऽप्यदृष्टसामर्थ्येन सा आकृष्यमाणा तत्प्रकोष्ठमेव प्रविष्टा। अहमत्र एकाकी पर्यङ्के समुपविष्टस्तां प्रतीक्षमाण आसम्।

मामेकाकिनमप्यवलोक्य सा "न ययौ न तस्थाविति" दशां प्रपन्ना निश्चलनिष्पन्दा जडीभूतेव स्थिता। चकितहरिणीशावकनयनायास्तस्याः सहस्रदलकमलसुन्दरं वदनं त्रपाभरेणावनतम्। सकलानि गात्राणि मलयमारुतान्दोलितलवङ्गवल्लर्य इव चकम्पिरे। मौक्तिकचया इव प्रस्वेदबिन्दवो भाले चकाशिरे।

चित्तस्य प्रबलविकारजन्यमावेगमसहमानां भूम्यां पतन्तीं तामहं भुजयोर्द्वयोराबध्योत्थापयामास। शब्दमेकमप्यनुच्चारयतोरावयोर्नयनानि परस्परमेकाग्रं साभिलाषञ्च निरीक्षयामासुः। चिरनिरुद्धकामनाप्राबल्यसहनाक्षमयोरावयोरोष्ठयुगले विधिना संयोजिते।

परं तत्कालमेवाऽऽत्मानं संनियम्य सा बालचन्द्रिका मद्भुजाभ्यां निजं वपुः पृथक्कृत्य दूरीभूय पुनः पुनः परिवृत्य मामेव पश्यन्ती निरीक्षन्ती स्मितविभूषितवदना लज्जावरक्तकपोला मन्दमन्दपदसंचारिणी प्रकोष्ठान्निर्गत्य स्वगृहं गता। प्रणयभावभराक्रान्तहृदयोऽहमपि स्वभवनमागम्य विचारपरम्परासु निमग्नोऽभवं, केनोपायेन तां बालचन्द्रिकां हृदयबल्लभां जीवनधारिणीं सहधर्मिणीं कृत्वा लभेयेति।

एकस्मिन् सुप्रभाते समुदितायामुषसि पूर्वदिशि बन्धुपालोऽस्माकं गृहमागत्य प्रोवाच -

"वत्स, अद्याऽऽवाभ्यां नगरोद्यानं गन्तव्यम्। तत्र गत्वा शकुनविचारं कृत्वा राजवाहनमिलनसमयगणनां करिष्ये।"

बन्धुपालवचनं सम्मान्याऽहं तेन सह नगरोद्यानमगच्छम्। तत्राऽसौ बन्धुपालः शकुनगणनायै वाटिकामेकतो जगाम। परन्त्वहं पुष्पसौन्दर्यसौरभालङ्कृतस्य नगरोद्यानस्य रामणीयकरसमापिबन्निव नयनाभ्यामितस्ततो बभ्राम।

तस्मिन्नुपवने सुशोभनैर्नयनप्रीतिकरैर्विविधवर्णैः पीतरक्तनीलश्वतेकर्बुरैः कमलैः

समलङ्कृतां चतसृषु दिक्षु हरितपाषाणनिर्मिताभिः सोपानपंक्तिभिर्जलतलपर्यन्तं सुनिबद्धां पुष्करिर्णीं परितो मरकतमणिजटितदुग्धपाषाणरचिताः पीठिकाः पर्यटकजनानामुपवेशनाय विश्रामाय च संयोजिता अवर्तन्त। अहमपि वाटिकासौन्दर्यरसनिमग्नहृदयो भ्रमंस्तत्र समागच्छम्।

सहसा पीठिकायामेकस्यामुपविष्टा बालचन्द्रिका एकाकिनी मयाऽवलोकिता। एकस्मिन् करकमले पुण्डरीकेण समलङ्कृता द्वितीयेन च करेण चिबुकमवलम्बमानाऽधोमुखी म्लानवदना सा तत्र समतिष्ठत्। नयनाभ्यां स्रवन्ती सलिलधारा कपोलमार्गेण प्रवहन्ती समुन्नतयोः पयोधरयोर्निपत्य विशीर्णा भूम्यां विलीयते स्म।

कामनानामभिलाषाणामाकाङ्क्षाणां स्नेहस्य सर्वेषां स्वामिनीमनुरागैकसारां हृदयनिर्विशेषां बालचन्द्रिकां तथाऽवस्थामापन्नां विलोक्य सप्रयासमप्यात्मानं निरोद्धुमक्षमोऽहं तामुपगम्य निभृतपदं तदन्तिकं वेदिकायामुपविश्य निजवामकरं तस्याः दक्षिणस्कन्धे न्यवेशयम्। चमत्कृत्य सा मां विशाललोचनाभ्यामवलोक्य विदलितलवङ्गलताकम्पमानं निजवपुः मम क्रोडे न्यपातयत्। कतिपयक्षणं सा निःशब्दा निश्चेष्टा तथैव स्थिता नयनजलधाराभिर्मामभ्यषेचयत्। अहमप्यनिर्वचनीयस्नेहभावभरसम्भृतहृदयस्तां शिरसि करपरामर्शनैः सान्त्वयामास।

सहसा तथैव स्थितया तया शिरः किञ्चिदुन्नमय्य मम नेत्रयोर्दृष्टिर्निबद्धा। संख्यातीतैरहिमकरकरैरिव मे हृदयं प्रकाशितम्। लज्जोद्वेगविह्वलत्वप्रणयकुतूहलविषादचिन्तादिभावानां सम्मिश्रणमद्भुतं तत्र नयनयोरवर्तत। अहमपि निजहृदयान्तर्निहितभावसमुदयं निरोद्धुमक्षमस्तां यौवनमदमदालसां तरुर्णीं निजहृदयसर्वस्वभूतां प्रणयिनीं द्वाभ्यां भुजाभ्यां वक्षसि दृढमालिङ्ग्य रदच्छदाभ्यामेव नयनाश्रूणि प्रमृज्य मन्द्रस्निग्धस्वरेणाऽपृच्छम् –

"प्रिये ! तव विषादस्य को हेतुः? मे कथय प्राणव्ययेनाऽप्यहं तं निवारयिष्यामि।"

सुगुप्तहृदयान्तर्निहितरहस्यस्योन्मीलने सति त्रपातिशयभरविनमितवदना बालचन्द्रिका पुष्पाञ्जलिसमकरतलयुगलेन मुखकमलमावृणोत्। पुरुषप्रथमसंस्पर्शेन विकम्पितसर्वावयवा सा मुक्ताचयसन्निभैः स्वच्छैः स्वेदाम्बुभिर्भालपट्टे कपोलयोश्चिबुके ग्रीवायाञ्च शुशुभे। कथमप्यात्मानं सन्नियम्य सा मदुत्सङ्गाद् उत्थायोत्ताना वेदिकायामेव मदङ्गसङ्गिनी समुपविष्टा। शनैः शनैः मन्द्रस्निग्धमधुरस्वरेण सा कथयितुमारेभे –

"आर्य ! तस्मिन् दिवसे दर्शनमात्रेणैव भवते समर्पितनिजशरीरचित्तान्तरात्माऽहं भवन्तमेव पतिरूपेण चिन्तयामि। मम प्राणानां मनसो हृदयस्य शरीरस्याऽऽत्मनश्च भवानेव स्वामी। परन्तु महती विपदुपस्थिता मयि। तस्याः निराकरणोपायमहमलभमाना

सततं सीदामि।"

क्षणं विरम्य मयाऽऽश्वस्ता सा पुनः बभाषे -

"मालवजनपदस्य राजा मानसारो वार्धक्यमापन्नो दर्पसारे स्वपुत्रे राज्यधुरमारोप्य राजप्रासाद एव पृथक्स्थाने विगतचिन्तो वर्तमानः सततमात्मानं भगवतो महाकालस्य पूजार्चनादिषु व्यापारेषु नियोजयति। अयं दर्पसारोऽपि सततं मगधाधिपाक्रमणभय-सङ्कुलितहृदयः तद्गतव्यथया पीड्यमानो भगवतो नीललोहितादजेयां रिपुप्रमाथिनीं प्रचण्डां शक्तिमुपलब्धुमिच्छन् तपस्यायै वाराणसीं गतः।

दर्पसारस्य द्वौ भ्रातरौ पितृष्वसृजातौ चण्डवर्मदारुवर्माणौ निरुपमशक्तिसम्पन्नौ शस्त्रास्त्रसञ्चालननिपुणौ राजनीतिनिष्णातौ वर्तेते। तयोरेव राज्यप्रशासनप्रबन्धभारं समारोप्य दर्पसारः काशीं शिवलोकसमपुण्यप्रदां पिनाकिनमाराधयितुं गतो वर्तते। तयोरनयोर्भ्रात्रोश्चण्डवर्मा सदाचरणः प्रजावत्सलश्च वर्तते। शासनधुरं सम्यक् प्रकारेण समवलम्बमानोऽसौ प्रजानां रक्षणे बाह्याभ्यन्तरिकविपन्निवारणे च सततं तत्परोऽस्ति। परं द्वितीयो भ्राता दारुवर्मा स्वेच्छाचारी उच्छृङ्खलोऽसदाचरणश्च विद्यते। भ्रातुः शासनमप्युल्लङ्घ्य स परस्त्रीषु सदा कुदृष्टिं वितनोति। तन्नयनगोचरा काऽपि रमणी प्रमदा नवयौवनसौन्दर्यशालिनी न सुरक्षिता वर्तते। परधनापहरणेष्वपि सततमसौ प्रवर्तते।

एकस्मिन् दिवसे सायन्तने समये सखीभिः परिवृताऽहं नगराद् बहिः शिप्रातरङ्गजलकणिकाभिषिञ्चिते सार्वजनिकोद्याने स्थितं कामदेवमर्चयितुं गता। भवानेव मम पतिर्भूयादिति मे मनसोऽभिलाषः। भवन्तमेव वररूपेण याचमानाऽहं कामदेवं समभ्यर्चयम्। कामदेवमन्दिराद् बहिः सोपानपंक्तिमार्गेण समागच्छन्त्यहं दुर्विनीतस्य सुहृद्भिः परिवृतस्य भ्रमणाय समागतस्य दारुवर्मणो दृष्टिपथं ममाऽधन्यतया समायाता। दृष्ट्वैव मे रूपं यौवनञ्च समासक्तचित्तोऽसौ कामवासनासम्पीडितहृदयो मे निग्रहणाय प्रययास। परं कथञ्चिदपि नीतिकौशलेन सखीनाञ्च साहाय्येनाऽहं वाटिकायाः निष्क्रम्य स्वगृहं समागच्छम्।

स्वल्पेनैव समयेनाऽसौ दुर्विनीतो दुराचरणो दारुवर्मा मे गृहे कुट्टनिकामेकां प्राहिणोत्। तया सन्दिष्टम् -

"बालचन्द्रिका मह्यं सत्वरं समर्पणीया। अन्यथाऽसौ मम पितुः सर्वां धनसम्पत्तिं विलुठ्य गृहमग्निसात्कृत्य सर्वेषां गृहजनानां वधं विधाय बालचन्द्रिकां बलादपहरिष्यति।"

अयमेव हेतुर्मम विषादस्य। सहायतायै भवानेव प्रमाणम्।

बालचन्द्रिकायाः प्रणयभावान् विज्ञाय नितरां प्रहर्षनिर्भरस्याऽपि मम चित्तमुद्वेगेन चिन्तया च सममेव समाक्रान्तम्। इयं प्रमदा मालवजनपदरत्नं मय्यनुरक्तेति परमहर्षः

समजायत। परं कथं मयेयं प्राप्या भवेद् दारुवर्मरूपिणी विपत्तिश्च निराकृता स्यादिति चिन्तोद्वेगौ चाऽपि समापतितौ। अथ मनोरथसिद्धिविघ्नभूतो भूधर इव दारुवर्मा निश्चयेनाऽपनेय इति चिन्तया समाक्रान्तचित्तोऽहं मुहूर्तं भालपट्टं दक्षिणकरतले समारोप्य बालचन्द्रिकया मन्मुखसुलग्नदृष्टिपातया समवलोक्यमानो दारुवर्मवधोपाय-मचिन्तयम्। तदनन्तरं बालचन्द्रिकायाः प्रियतमायाः नवविकसितकमलदलसममृदुलारुणं करद्वयं द्वयोरेव करतलयोर्मध्ये निधाय तस्याः मुखचन्द्रमपि निमेषरहिताभ्यां लोचनाभ्यां निरीक्षमाणोऽहं तामुवाच –

"प्रिये ! आवयोः सङ्गमविघ्नकारी जनो निश्चयेन परलोकयात्रां करिष्यति। विषदिग्धस्य सर्पस्येवाऽस्य दारुवर्मणो वधस्योपायो मया चिन्तितः। यदि त्वं साहसं कुर्याः मम च योजनायां सहायिका भवेः, नूनमेवाऽयं कदाचरणस्त्वयि कुदृष्टिनिपातनो दारुवर्मा यमकिङ्करपाशैर्बद्धो यमलोकं गमिष्यति। मम भुजदण्डाभ्यां प्रहतोऽयं मृत्योरेव वरणं करिष्यति।"

ममेमानि वचनानि निशम्य सुविकसितमुखकमला स्मितविभूषितरदच्छदा सा बालचन्द्रिका मामुदतरत् –

"सुभग ! योऽभ्युपायो भवता निर्देक्ष्यते योऽप्यादेशो वा भवतो भविष्यति, प्राणव्ययेनाऽपि तमहं करिष्यामि प्रतिपालयिष्यामि वा।"

तदा मया कथितम् –

"प्रिये ! त्वया लोके भणितिरियं प्रसारणीया, यद् बालचन्द्रिकायामासक्तचित्तो यक्षो वपुषि तस्याः निवसति। यो ऽपि तरुणस्तां कामयमानः स्पृशति, स तेन यक्षेण हतः स्वर्गं गच्छति। एकस्य सिद्धतापसस्य वचनमिदम् –

बालचन्द्रिकायाः पाणिग्रहणे स एव जनः क्षमते, यो निजगृहरतिमन्दिरे निशामेकां तया प्रमदया सह रहसि वर्तमानोऽपि सुरक्षितो जीवनं धारयति, ताञ्च रजनीं प्रणयरतिरसवार्तासु रससुखानुभवेषु व्यतीत्य प्राणान् धारयन्नेव बहिरागच्छति। सा त्रिभुवनललामभूता बालचिन्द्रका तमेव शौर्यसाहसशालिनं पुरुषं भर्तृरूपेण वृत्वा निजं रूपयौवनविभूषितं शरीरं तस्मै समर्पयिष्यति।

इयं भणितिरनेकैर्जनैर्नगरे प्रसारणीया, यथाऽसौ दुर्वृत्तो दारुवर्मा विश्वासमाप्नुयात्। एनां भणितिं श्रुत्वा यद्यसौ भयभीतो भविष्यति, तदा स्वयमेव त्वयि कामनां त्यक्ष्यति। यदि चाऽसौ न बिभियात्, पुनरपि त्वां कामयमानः कुट्टनिकां प्रेषयेत्, तदा तव सम्बन्धिनो दारुवर्माणमित्थं कथयेयुः –

"हे वीर ! महाराजस्य मालवाधिपस्य त्वं भागिनेयः। ईदृशमनाचरणं तव नोचितम्। यदि सत्यमेव भवान् बालचन्द्रिकायाः पाणिमभिलषति, सा स्वयमेवैकया

सख्या सार्द्धं भवतो गृहमागमिष्यति। सकलाञ्च रजनीं तत्र निवत्स्यति। तस्यां निशायां सुरक्षिते जीविते च भवति सपाणिग्रहणसंस्कारं परिणेतुं समर्थो भवान्। तदनन्तरं भवताऽस्माकं सुतया नवयौवनाढ्यया तरुण्या सह नवयौवनरतिविलाससुखान्यनुभवितव्यानि।"

यदि चाऽसौ दुराचरणो दुरात्मा दारुवर्मा प्रस्तावमेनं स्वीकुर्यात् तदा मातरि पितरि च निवेद्य तौ विश्वासमानीय त्वयाऽहं निजगृहे समानेतव्यः। अहमपि नारीरूपमास्थाय तव सखी भूत्वा त्वया सह दारुवर्मणो गृहं गमिष्यामि। निशाया ऐकान्तिके समये यदि स दुर्जनस्तव शरीरस्पर्शनप्रयासं विधास्यति तदैव मुष्टिपादप्रहारैस्तं यमलोकातिथिमहं करिष्यामि। तदनन्तरं त्वमपि तारस्वरेण क्रन्दनं कुर्याः -

"रक्षत जनाः ! रक्षत। बलवता दुर्वृत्तेन यक्षेण दारुवर्मा निहन्यते।"

"पूर्वमेव प्रसारितया भणित्या जना आक्रन्देऽस्मिन् विश्वसिष्यन्ति। तदाऽहं तस्मिन् सम्भ्रमेऽलक्षितः केनाऽपि तथैव तव सखीरूपेण त्वया सह दारुवर्मणो गृहान्निर्गत्य यथेच्छं स्वगृहमागमिष्यामि।"

ममेयं योजना साहसशौर्यनीतिसमन्विता बालचन्द्रिकायै बहुतरामरोचत। साऽपि स्वभावेन भयरहिता साहसिकवृत्तिका बभूव। मम वचनैरेव विगतसाध्वसा प्रमुदितचित्ता "भवतामादेशेन सर्वं करिष्य" इति प्रतिज्ञाय प्रोवाच -

"वीर ! तस्य दुर्जनस्य दारुवर्मणो वधाय भवानेव क्षमते। हते तस्मिन्नावयोर्मनोऽभिलाषाः सफलाः भविष्यन्ति। यद् भवतु तद् भवतु। अहं सर्वथा भवदधीना।"

इति कथयित्वा स्वतामरसारुणसुकोमलाभ्यामोष्ठाभ्यां मे कपोलयोरनुरागचिह्नानि टङ्कयित्वा नीलकमलदलनेत्रप्रान्तेन कुसुमशरेण मां प्रहृत्य मन्दमन्दस्मितशालिनी सा मम प्रेयसी पुनः पुनः विवृत्तवदना मामवलोकयन्ती शनैः शनैः पदानि सञ्चारयन्ती तस्मान्नगरोद्यानान्निर्गता।

दारुवर्मवृत्तान्तेन चिन्तितो बालचन्द्रिकानुरागानुभवेन च प्रफुल्लचित्तोऽहं बन्धुपालं परिमार्गमाणस्तदन्तिकं समाजगाम। तेनाऽपि शकुनफलगणनां कृत्वाऽहं सूचितः - "त्रिंशद्दिवसानन्तरमस्मिन्नेवोपवनेऽस्मिन्नेव समये कुमारं राजवाहनं भवान् द्रक्ष्यति।"

वचनमिदमाकर्ण्य प्रफुल्लमानसो विकसितसर्वगात्रोऽहं बन्धुपालेन सह नगरं प्रविश्य तस्य गृहं गत्वा तदातिथ्यमुपभुज्य स्वनिलयमाजगाम।

मम वचनान्यनुमान्य बालचन्द्रिका करणीयं कार्यं प्रारभत। मातरं पितरञ्च सन्तोष्य स्वकीयं प्रणयवृत्तान्तं निवेद्य यक्षसम्बन्धिनी भणितिस्तया सर्वत्र विशालायां

प्रसारिता । मालवजनपदराजधान्यां विक्षोभतरङ्गा इव प्रादुर्बभूवुः । नगरनिवासिनोऽप्यौत्सुक्यपरिपूरितहृदयाः प्रतीक्षाञ्चक्रिरे काचिदप्यकल्पनीया घटना घटिष्यति ।

परं यक्षवृत्तान्तोऽपि न भीतिं जनयामास दारुवर्मणो हृदये । मम योजनापाशबद्धेन तेन ध्रुवं यमलोकं गन्तव्यम् । स त्वेकां कुट्टनिकां बालचन्द्रिकागृहे प्रेषयामास । तदनन्तरं बालचन्द्रिकायाः पितुर्धनपालस्य सन्देशं विज्ञायाऽसौ पुनः सन्दिष्टवान् -

"बालचन्द्रिका सख्या समं मम भवनरतिमन्दिरं निशामुखे निभृतं प्रविशतु ।"

बालचन्द्रिकया प्रेषितं समाचारं निशम्य प्रथममेव प्रतीक्षमाणोऽहं सत्वरं तत्राऽऽगत्य महिलारूपधारणाय तदनुरूपं वेशविन्यासञ्चकार । शिरसि सुकोमलतनुदीर्घसुचिक्कणकृत्रिमकृष्णकेशराशीन् निधाय वेणीबन्धनञ्चकार । नापितकर्मणा वदनं श्मश्रुलोमरहितं प्रसाधनैश्च सुचिक्कणं कृतम् । नयनयोः कृष्णाञ्जनं कर्णयोस्ताटङ्के नासिकायां हीरकजटितं लवङ्गकमोष्ठयोर्लाक्षारसो मणिबन्धयोः कङ्कणयुगलं कफोण्योः कटकयुगं ग्रीवायामेकावलिं कटिप्रदेशे मणिमेखलां पादयोर्मणिनूपुरयुगलं करपादशाखासु विविधाकृत्यङ्गुलीयकानीति नवतारुण्यविभूषिततरुणीयोग्यानि विभूषणानि मया धारितानि । वक्षसि समुन्नतकुचाग्रयुगकृत्रिमपयोधरौ धृत्वा कौशेयचोलिकोपरि धृता । तदनन्तरं वदनं ग्रीवामन्यानि च विवसनान्यङ्गानि प्रसाधनप्रलेपनचूर्णैः प्रसाध्य वेणीं परितः शुभ्रसुगन्धितनवविकसितकुन्दपुष्पमालामावेष्ट्य नारीजनोचितानि मनोहराणि कौशेयवसनानि बालचन्द्रिकासखीयोग्यानि सुसज्जीकृतानि ।

तदा मे नवयौवनानुरूपं प्रमदाजनोचितमृदुभावाभिनयं रूपसौन्दर्यकान्तिञ्चाऽवलोक्य विहस्य तिर्यङ्नेत्रेण मां प्रहृत्य बालचन्द्रिका समुवाच -

"आर्य ! अस्मिन् रूपे भवन्तमवलोक्य कस्य सचेतनस्य युवकस्य चित्तं मदोन्मत्तं कामशरविद्धं वा न भविष्यति ? दारुवर्मा प्रथमं तावद् भवन्तमेव करेण ग्रहीष्यति ।"

मयाऽपि विहस्य प्रोक्तम् -

"तदाऽऽत्मनो दौर्जन्यस्य फलमपि भोक्ष्यते ।"

तदनन्तरं वनितावेशधारिण्या मया सख्या सार्द्धं सा मे प्रिया बालचन्द्रिका परिजनपरिवृता दारुवर्मभवनं प्रत्यभिससार । दारुवर्माऽप्यस्मदागमनसमाचारान् निशम्य स्वागताय बहुभिर्भृत्यैर्दासदासीजनेन च सह स्वभवनतोरणसमीपमतिष्ठत् । सर्वान् परिजनान् द्वारोपान्ते निरुध्य मदनुगतां बालचन्द्रिकां निजप्रासादरतिमन्दिरं प्रति निनाय ।

भोजनपानादिकपूर्वकाण्येव विश्रम्भालापानि रोचन्त इति लोकपरम्परामनुरुध्य स मूर्खो दारुवर्मा प्रथमं तावदावां भोजनकक्षं समानयत् । तस्य कक्षस्य समृद्ध्यैश्वर्यशोभादीनां

वर्णनं मानवगीर्भिर्न शक्यम्। तदवलोकनेनैव चमत्कृतिमापन्नोऽहं विस्मयाभिभूतः समजनि। बालचन्द्रिकायाश्चित्तं प्रीणयितुं तत्र भक्ष्यलेह्यपेयचोष्याणां भोजनद्रव्याणां षट्त्रिंशद्विधानां व्यञ्जनानां प्रबन्धोऽवर्तत। विविधानि फलानि पीयूषद्रवार्द्राणि सुस्वादूनि मधुराणि सौरभान्वितानि तत्राऽवर्तन्त। सङ्कोचशीला बालचन्द्रिका स्वाङ्गेष्वेव सङ्कुचन्ती स्वल्पमेवाहारद्रव्यजातमसिष्वदत्। परमाहारद्रव्यसुगन्धैः सञ्जाततीव्रबुभुक्षस्य ममोदर एव तेषां समाधिरभवत्। बालचन्द्रिकां प्रसादयन्नसौ बालिशबुद्धिर्दारुवर्मा तस्याः रूपसौन्दर्यौन्मादवशीभूतो मामपि प्रसादयितुं प्रायतत।

यक्षवार्ता विशालायां प्रसारिता सर्वेषां नगरनिवासिनां कर्णगोचरीभूता। यक्षेणाऽधिष्ठिता बालचन्द्रिका धनपालसुता नगरतरुणीरत्नं दारुवर्मणा निजभवनरतिमन्दिरे निमन्त्रितेति समाचारो वनवह्निरिव नगरीमुज्जयिनीं व्याप्नुवन् सर्वैर्नगरनिवासि-सिभिर्विदितः। सहस्रशो हि नागरिकाः कुतूहलाक्रान्तचित्ताः दारुवर्मणो दशा का भविष्यतीति ज्ञातुमुत्सुकास्तस्य गृहसमक्षं राजमार्गे समवेताः बभूवुः।

भोजनादिभिर्निर्वृतो विवेकशून्यो भुजबलगर्वितो वासनाविभ्रष्टबुद्धिरसौ दारुवर्मा द्वाभ्यामावाभ्यां सह भवनरतिमन्दिरं संप्राप्तः। प्रासादस्याऽन्तरङ्गभागे निर्मितमिदं मन्दिरं रमणीयतमं समृद्धतमं दीप्तिमत्तमं विश्वभवनरत्नमिव प्रतीयाय। रतिमन्दिरमध्यभागे कनकनिर्मिते हीरकमणिजटिते सुविस्तृतायामे पर्यङ्के सुकोमलशुभ्रस्वच्छकौशेयास्तरणाच्छादितं शयनं मृदुतूलपूरितं शिरोधानं राजहंस-मृदुलपक्षसम्पूरिता तूलिकेत्यादीन्युपकरणानि तत्राऽवर्तन्त।

मदान्धकारवशात् कामवासनान्धबुद्धिविभ्रंशाच्च दारुवर्मा मम पुरुषभावं वा नारीभावं वा न पर्यचिनोत्। स तु बालचन्द्रिकागमनप्रहृष्टसकलेन्द्रियमानसस्तया सह हासपरिहासवार्तासु रागान्धः समभवत्। तेन बालचन्द्रिकायै विविधमणिजटितानि स्वर्णाभरणानि महार्घाणि कौशेयवसनानि सुदुर्लभानि प्रसाधनोपकरणानि चोपहृतानि। अहमपि तथाविधैरुपहारैरुपकृतः। बालचन्द्रिकायै मह्यञ्च प्रदत्तैरुपहारभारैरहं भारवाही बभूव।

निशायाः प्रथमः प्रहरो व्यतीतः। बालचन्द्रिकया सह हासपरिहास-वार्ताभिस्तदुपहारग्रहणस्वीकृतिभिश्च कामान्धस्य तस्य दारुवर्मणो मदोत्साहोऽतितरां ववृधे। ममोपस्थितिमप्युपेक्षमाणोऽसौ दुराचरणस्तस्याः मम प्रियायाः बालचन्द्रिकायाः सुकोमलैरपि गात्रैः क्रीडितुमभिलषमाणः स्पर्शनादिकचेष्टनानि कर्तुं प्रययास। प्रथमं तु मया तानि कुचेष्टनानि समुपेक्षितानि। परन्तु यदैवाऽसौ मम प्रियायाः चक्रवाकसमौ सुपुष्टौ समुन्नतचूचुकौ पीयूषसम्भृतौ पयोधरौ प्रति करौ प्रासारयत्, न तावदहं तस्य तादृशीं क्रीडां सोढुं क्षमोऽभवम्। रोषारुणनयनः कोपाग्निदग्धहृदयान्तःकरणोऽहं

तमाचक्राम। चपेटिकामुष्टिकाजानुपादाघातैरसावप्रत्याशितरूपेण नितरां तथा ताडितो यथा सद्य एवाऽचेतनावस्थां गतः।

अप्रत्याशितमिदमाक्रमणं सोढुमक्षमः किञ्चिदपि प्रतिकर्तुमसमर्थः जर्जरीभूतकायोऽसौ दारुवर्मा पर्यङ्के न्यपतत्। तदनन्तरं तं दुराचरणं पर्यङ्कादाकृष्य दक्षिणं हस्तं परिमोट्य भूमौ निपात्योत्तानशयानं कृत्वा तस्योदरं जानुना तथाऽपीडयम् यथा तस्योदरवर्तीन्यान्त्राणि पिण्डीभूय बहिरागतानि। अथ तस्य मुखे कण्ठे वक्षस्युदरे च मुष्टिकाभिरेव तथा प्रबलप्रहाराः विहिताः यथा तस्य प्राणाः शरीरात् पृथग्भूय कुत्रचिन्नन्तरिक्षलोके विलयं प्राप्ताः। दारुवर्मणः प्राणेषु यमकिङ्करैः पाशजालेषु बद्ध्वा यमलोकं नीयमानेषु सत्सु भयविह्वलाङ्गी कम्पितसर्वगात्रा बालचन्द्रिका शब्दमेकमप्यनुच्चार्य तरसा धावित्वा सुदृढं मामाशिश्लेष। तस्मिन् समये कमपि कोमलभावमनाश्रित्याऽहं कथमपि तां पृथक्कृत्य समाश्वास्य विशीर्णानि वसनप्रसाधनादीनि नारीरूपपरिवर्तनोपकरणभूतानि पूर्ववत् समासाधितवान्। अथ च पूर्ववत् समलङ्कृतकायोऽभवम्। एवञ्च बालचन्द्रिकायाः सखीभावमापादयम्। तदनन्तरं रतिभवनाद् बहिरागत्याऽहं भवनवलभ्यां स्थितस्तारस्वरेण कम्पनावरुद्धकण्ठेन नारीस्वरमधिकृत्य क्रन्दितुमारेभे -

"हन्त हन्त रक्षकाः ! सेवकाः ! नागरिकाः ! शीघ्रमागच्छन्तु भवन्तः। रक्षन्तु रक्षन्तु। बालचन्द्रिकामधितिष्ठन् भयानकाकारोऽयं यक्षोऽमानुषिकबलसम्पन्नो मुष्टिपादाघातैरेव दारुवर्माणं निहन्ति। परित्रायतामेनम्। परित्रायतामेनम्।"

ममैतदाक्रन्दनमाकर्ण्य दारुवर्मणः सर्वे रक्षकाः प्रहरिणः सेवकाः बहवो नागरिकाश्च महान्तं कोलाहलं कुर्वन्तस्तद् रतिमन्दिरं प्रविविशुः। तत्र सर्वे तं दुरात्मानं दुराचरणमसद्वृत्तं दारुवर्माणं प्राणविरहितजर्जरितकायं भूमिपतितं ददृशुः। ते परस्परमूचुः-

"हन्त, अतिकष्टकरमिदं दृश्यम्। यक्षवृत्तान्तं जानन्नप्यसौ मदोन्मत्तः कामवासनान्धोऽस्मत्स्वामी तां दुर्नीतिप्रतिमां कुलटां वणिक्सुतां बालचन्द्रिकां कामयमानो निजभवने रतिमन्दिरे निमन्त्रयामास। अथ चाऽत्र तां रतिं ययाचे। निजकर्मणामेव फलं तेन भुक्तम्।"

इत्थं तस्मिन् भवने महति कोलाहलोपद्रवे सम्प्रवृत्तेऽवसरं प्राप्याऽहं कथमपि निभृतं बालचन्द्रिकया सह दारुवर्मणो भवनाद् बहिर्निश्चक्राम। कस्याऽपि जनस्याऽऽवां दुष्टिगोचरौ न भवेवेति प्रभूतसावधानभावेनाऽऽत्मानं बालचन्द्रिकाञ्च रक्षन् तयैव सार्द्धं निशावसाने सकुशलमपरिक्षतञ्च धनपालस्याऽऽवासं प्राप्नुवम्।

बालचन्द्रिका सकलं वृत्तान्तं मातरि पितरि च न्यवेदयत्। एवं स्वप्रणयभावोऽपि

मयि तयाऽभिव्यञ्जितः। मयैव सार्द्धं सा विवाहबन्धनं स्वीकरिष्यतीति तस्याः सुदृढो निश्चयः। मम कुलं शीलं पराक्रमं धनं स्वभावमिति वरेषु समुचितान् सर्वान् गुणान् वीक्ष्य उपकारांश्च संस्मृत्य स्वल्पेन समयेन धनपालस्तां मम हृदयसर्वस्वां बालचन्द्रिकां पाणिग्रहणसंस्कारेण शास्त्रोक्तविधिना मह्यं समर्पयामास।

सौन्दर्यसारसरसामभिनवयौवनाढ्यां सद्वंशजातां विनयादिनारीजनोचितसर्वगुण-सम्पन्नां मद्योग्यां पादेषु प्रणमन्तीं रूपेण गृहं दीपयन्तीं लक्ष्मीस्वरूपपिणीं स्नुषां संवीक्ष्य मे पितरौ परमानन्दनिमग्नौ बभूवतुः। अथ च नववधूं बहुभिर्महार्घैरुपहारैराशीर्वचनै-श्चाऽतिशयेनाऽभिभावयामासतुः।

तस्मिन्नेव दिवसे बन्धुपालः शकुनफलं विचार्य अद्यत्वदिवसमेव भवन्मिलनदिवसं गणयामास। अतो भवद्दर्शनाभिलाषोऽहमस्मिन् समये ह्युपवनमेतत् समागच्छम्। अत्राऽऽगत्य च मया भवद्दर्शनसुखसौभाग्यमधिगतम्।

पुष्पोद्भववृत्तान्तमाकर्ण्य राजवाहनोऽतिशयेन प्रमोदनिर्भरमानसो बभूव। परस्परमालपत्स्वेव तेषु मित्रेषु दिनकरः प्रतीच्यामस्तंगमनोन्मुखः सञ्जातः। राजवाहनः सोमदत्तमुवाच -

"मित्र ! त्वमितो गत्वा प्रथमं तावद् भगवन्तं महाकालं समभ्यर्चय। तदनन्तरं परिजनं स्वभवनं प्रापय्य एकलः पुष्पोद्भवगृहमायाहि। अहं सम्प्रति पुष्पोद्भवस्य गेहे निवत्स्यामि।"

राजवाहनस्याऽऽदेशमाकर्ण्य सोमदत्तोऽपि सपरिजनस्तस्मादुद्यानाद् बहिरागत्य शिप्रातीरवर्तिनि महाकालमन्दिरे भवानीसहितं भवं सम्पूज्य स्वगृहमगच्छत्।

पुष्पोद्भवोऽपि स्वागतसमादरेण राजवाहनं निजगृहमानिनाय। तत्राऽसौ मातरं पितरञ्च राजवाहनञ्चाऽन्योन्यं परिचाययामास। राजवाहनमवलोक्य तावतिप्रसन्नौ बभूवतुः। बन्धुपालेनाऽपि राजवाहनस्य परिचयोऽधिगतः। तत्र समवेतैः सर्वैर्जनैर्विचार्य स्थिरीकृतम् -

"राजवाहनः सुगुप्तरूपेणाऽत्रोज्जयिन्यां निवत्स्यति। अतः सर्वत्र तैः राजधान्यां भणितिरियं प्रसारिता -

"विविधासु विद्यासु कलासु च परमकौशलमवाप्तो द्विजोऽतिशयितसकलपण्डितसमूह इतस्ततो भ्रमन्नुज्जयिनीं समागतः। मासद्वयं मासत्रयं वाऽसौ मालवजनपदं कृतार्थयन् परोपकारसंलग्नो विशालानिवासिनो जनाननुपकरिष्यति।"

तदनन्तरं सर्व एव ते सम्बन्धिनो भविष्यति काले निर्वहणीयायाः योजनायाः निर्माणेऽवहितचित्ताः विचारविमर्शञ्चक्रुः।

# षष्ठी–पीठिका

## राजवाहनः

## षष्ठी-पीठिका

## राजवाहन:

उज्जयिन्यां निवसतो कुमारस्य राजवाहनस्य बहवो दिवसा: व्यतीता:। कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां सर्वेषां मन्त्रिपुत्राणां कुमाराणामुज्जयिन्यां सम्मेलनस्य कार्यक्रमोऽवर्तत। परमन्त्वद्यावधि राजकुमारस्य द्वयो: कुमारयो: सोमदत्तपुष्पोद्भवयोश्चाऽत्रागमनं बभूव। काचिदनतिक्रमणीयाऽवितर्क्या परिस्थितिरेव तेषामत्राऽऽगमने बाधिकाऽवर्तत इति तैर्विचारितम्।

शनै: शनै: क्रमशोऽनेके मासा: व्यतीता:। त्रिभिरपि कुमारै: परस्परं विचारविनिमयं कृत्वा स्वल्पेतरा: योजना: विचारिता:। परमन्येषां कुमाराणामभावे कथं ता: कार्यरूपे परिणमेयुरिति तर्कवितर्के समयस्तेषां गच्छति स्म।

वसन्तर्तोश्चैत्रमासे समायातेऽवन्तिजनपदे प्रकृतिरामणीयकं सर्वासु दिक्षु प्रससार। सकला प्रकृतिरभिरामरूपा समजायत। दक्षिणदेशात् प्रवहता मलयमारुतेन विरहिणां हृदयानि दग्धीकर्तुमारब्धानि। चन्दनकुसुमसौरभेण सकलं पर्यावरणं सुपूरितं बभूव। रसालतरवो विशिष्टसौरभयुताभिर्मञ्जरीभिरावृता:। मञ्जरीणां सततं भक्षणेन मधुरकलकण्ठा: कोकिला: कुहुकनिनादैर्दिगन्तान् प्रतिध्वानयन्त: सहृदयानां कर्णेषु पीयूषमिवाऽऽघोलयन्।

उज्जयिनीमन्त: परितश्च विस्तीर्णासु वाटिकासु आम्रसिन्धुवाररक्ताशोक-पलाशकाञ्चनारशोभाञ्जनतिलकाद्यनोकहेषु समाच्छादितानां कलिकाङ्कुराणां समुदया: सर्वत्राऽवालोक्यन्त। रसिकजना: प्रियाभि: सहोपवनेषु विहरन्त: पुष्करिणीषु विकसितानि विविधवर्णसरोजान्यवलोकयन्तो नयनसुखान्यनुबभूवु:। स्थाने स्थाने वसन्तोत्सवाना-मायोजनानि दरीदृश्यन्ते स्म।

मालवजनपदाधिनाथस्य मानसारस्य नन्दिनी अवन्तिसुन्दरी स्वजनपदनारी-सौन्दर्यलावण्यादिगुणानां प्रमाणमविद्यत। पुष्पोद्भवस्य भार्या बालचन्द्रिका तस्या: प्रियसखी सहचरी बभूव। वसन्तोदाररमणीये समयेऽस्मिन् मानसारनन्दिनी उपवन-विहारमायोजयामास। बालचन्द्रिकयाऽन्याभिश्च सखीभि: परिवृता सा नगरबाह्योद्यानं प्रविश्य पुष्पिततरुलताक्षुपप्रकृतिरामणीयकावलोकनसुखं नयनहृदयमन:प्रीतिकरं पश्यन्ती बभ्राम। तत्रोद्याने विविधजलजवनस्पतिसुशोभितस्य जलचराण्डज-ध्वनिनिनादितस्य जलाशयस्य तटभागे स्थितस्य नवोदितसुरभितमञ्जरीभिराच्छादितस्य

चूततरोश्छायायां सा संशिश्रिये। सखीनां समक्षं तया स्वकीयोऽभिलाषः प्रकटितः -

"रसालतरोरस्य कस्मिंश्चित् सुदृढे विटपे दोलाहेतोः रज्जवो बन्धनीयाः। अस्माभिः सर्वाभिः दोलोत्सवानन्देन नन्दनीयम्।"

त्वरितं सखीभिः सर्वः प्रबन्धो विहितः। सखीभिः सह साऽवन्तिसुन्दरी मानसारनन्दिनी दोलापटलिकामारुह्य प्रेङ्खयन्ती सुमधुरस्वरेणाऽऽरोहावरोहमनुसरन्ती काललयानुरूपाणि मधुमासस्याऽऽगमनाभिव्यञ्जकानि गीतानि गातुं प्रारेभे।

वसन्तस्याऽस्मिन् सकलसहृदयजनहृदयानन्दकरे चित्तविमोहने काले राजवाहनोऽप्युपवनविहारायोत्कण्ठितो बभूव। पुष्पोद्भवेन सहाऽसौ विशालोपकण्ठप्रदेशेषु परिभ्रमन् सुविस्तृतस्य नगरोद्यानस्य तं प्रदेशं समाजगाम, यत्र सा अवन्तिसुन्दरी दोलाधिरूढा सहचरीभिः परिवृता गीतानि गायति स्म। पिकानां मधुरकुहूरुतैः कर्णकुहराणि तर्पयन्तौ तौ द्वौ सखायौ पुष्करिणीतटसमभुवि समतनद्धां दुग्धपाषाणरचितां पीठिकामाशिश्रियाते।

सा पुष्करिणी नवोदितबालभास्करस्य रश्मीनां संस्पर्शमवाप्य विकासभावं भंजमानैः श्वेतरक्तपीतनीलस्वर्णिमविविधवर्णपङ्कजैः सुशोभिता राजहंससारसकादम्बकारण्डवचक्रवाकक्रौञ्चबकजलकाकादिजलचरपतत्रिमधुरक्रेङ्कारनिनादिताऽवर्तत। तत्र पुंपक्षिण इतस्ततो धावन्त उत्पतन्तः प्रियानुसरणं वा कुर्वन्तो रतिक्रीडाविलासेषु प्रहर्षोन्मादमनुभवन्तो जलविहारमकुर्वन्।

दृश्यान्येतानि वीक्ष्य राजवाहनो मनसि हृदये च कामप्यनिर्वचनीयां पीडामनुबभूव। सहसा वनिताभिर्गीयमानानां गीतिकानां मधुरध्वनयस्तस्य कर्णगोचरताङ्गताः। पीयूषधारामिव प्रच्यावयन्तीनां तासां गीतिकानां स्वरानाकर्ण्य भावांश्च विज्ञाय नितरामुत्कण्ठितो विवश इव जन्मजन्मान्तरप्रबुद्धसंस्कारैराकृष्यमाण इवाऽसौ राजनन्दनो राजवाहनः पीठिकाया उत्थाय तस्यामेव दिशि प्राचलद् यतो गीतस्वराः समुदिताः प्रवहन्ति स्म। पुष्पोद्भवोऽपि तमनुससार। कानिचित् पदानि गत्वा राजवाहनः सखीभिः सह दोलाक्रीडानिमग्नामवन्तिसुन्दरीं मालवराजसुतामवलोकयामास।

अवन्तिसुन्दरीमवलोक्य मगधराजनन्दनस्य हृदयगतिः केनाऽप्यदृष्टसामर्थ्येनाऽवरुद्धेव सञ्जाता। तस्य हृदयेऽद्भुतभावानां सञ्चारः समजनि। तेन ज्ञातम् -

"इयमेव सा तस्य प्रिया यां जन्मजन्मान्तरेष्वपि स परिमार्गमाणो बभ्राम। इयमेव तस्य हृदयसर्वस्वभूता प्राणेश्वरी। अस्यामेव तस्य हृदयनिर्वाणमात्मनश्च शान्तिः। एनां विना तस्य जीवनं प्राणधारणं सारशून्यम्।"

पुष्पोद्भवस्य दक्षिणकरं वामभुजेनाऽवलम्ब्य निष्पन्दो निश्चलश्च स्थितो हृतहृदयान्तःकरणो राजवाहनोऽवन्तिसुन्दरीं निर्निमेषनयनाभ्यामीक्षाञ्चक्रे।

रूपलावण्यविजितत्रिलोकमहिलाजनसंहतिस्त्रिभुवनसुन्दरी साऽवन्तिकुमारिका मन्मथसहचारिणीं रतिमपि सौन्दर्येण पराजयन्ती समदृश्यत। नूनं विधात्रा सर्वविधसौन्दर्यसारसमुच्चयेन सा रूपसीमारेखा विनिर्मिता। तद् यथा -

"तामरसपुण्डरीकाभ्यामुपलब्धेन रक्तश्वेतवर्णसम्मिश्रणेन तस्याश्चरणयोः, मृणालान् संयोज्य पिचण्डिकयोः, नवोद्गतसरसकदलीस्तम्भैर्द्वयोरूर्वोः, घनीभूतैः कुन्दजातिकुसुमचयैर्जघनयोः,सुरभितकलिकासम्मिश्रितसरिच्चञ्चललहरीभिर्नाभ्याः, समुद्रतटवर्तिभिर्लघुलहरीभिस्त्रिवल्याः, मधुकराणां नीलभावेन लोम्नां, सुरभितमलयजालिप्तहेमकलशाभ्यामनङ्गाश्रयभूतयोः पयोधरयोः, लतामण्डपानां सुकोमलविटपैर्भुजयोः, समुद्रजशङ्खसौन्दर्येण कण्ठस्य, आम्राशोकनवकिसलयैरोष्ठयोः, कुन्दकलिकाभिर्दन्तानां, प्रत्यग्रनवविकसितविविधपुष्पदलसौन्दर्येण मधुरपवित्रमन्दस्मितस्य, चन्दनसौरभपरिपूतपवनप्रवाहैर्निःश्वासानां, पुण्डरीकेन्दीवरसौन्दर्येण द्वयोर्लोचनयोरनङ्गकार्मुकेण भ्रुवोः, शिखिपिच्छचयेन कृष्णकुन्तलचयस्य रचना खलु विधात्रा कृता। स्वरूपमेतद् विधाय विधाता कर्पूरपरागं पुष्परसेन सहाऽऽलोड्य तत्र कुङ्कुमद्रवं संयोज्य सकलान्यङ्गानि सुगौरसुस्निग्धकान्तिमयानि विधाय सुरभितानि चकार।

असंख्याताः क्षणाः व्यतीताः। रूपेण कान्त्या च नगरोपवनं दीपयन्तीं मूर्तिमतीं लक्ष्मीमिव तां राजतनयां विस्मृतनिमेषचक्षुर्भ्यामीक्षमाणोऽसौ राजवाहनः श्वासग्रहणस्याऽपि विसस्मार। परं तास्तु वनिताः विस्मृतान्यसकलजगद्व्यवहाराः दोलाक्रीडायामेव संलग्नहृदया अवर्तन्त। सहसा बालचन्द्रिकायाः दृष्टिः पुष्पोद्भवे राजवाहने च पतिता। दोलायां तथैव स्थिता सा पुष्पोद्भवं सङ्केतयामास -

"समीपमागम्यताम् इति।"

पुष्पोद्भवो राजवाहनं हस्तेनाऽऽकर्षन्नेव दोलासमीपमागच्छत्। बालचन्द्रिकया दत्तसङ्केता मानसारसुता झटित्येव दोलायाः ससम्भ्रममवरुरोह। सर्वाः सख्यो राजसुतायाः मुखं राजवाहनञ्च पुष्पोद्भवसहितमालुलोकिरे।

राजवाहनमवलोक्य प्रथमदृष्ट्याऽवन्तिसुन्दरी अवबुबोध -

"स्थूलशरीरेन्द्रियाणि धारयित्वा पृथिव्यां साक्षादनङ्ग एव समवतीर्णः।"

प्रथमं तु दृष्टिमुन्नमय्य सा यथेष्टं तं लोचनाभ्यामपिबत्। तदनन्तरं त्रपाभरविनमितदृष्टिर्दक्षिणचरणाङ्गुष्ठनखेन भूमिं विलिखन्ती तस्थौ। द्वाभ्याञ्च कराभ्यां कौशेयोत्तरीयस्य प्रान्तभागं सा व्यामोटयामास। सहसा तस्य चित्तमनिर्वचनीयैरनाख्येयैर्भावैराक्रान्तम्। मदनावेगेन तस्याः वपुर्मलयपवनान्दोलिता शेफालिकावल्लरीव चकम्पे। अष्टमीशशिनिभे समुन्नतसुचिक्कणभालपट्टे शुभ्रमौक्तिक-

सन्निभाः प्रस्वेदबिन्दुपंक्तयश्चकाशिरे। विवशभावमापन्ना सा बालचन्द्रिकायाः करं गृहीत्वा तामाश्रित्य निस्तब्धा स्थिता। अवन्तिसुन्दर्याः राजवाहनस्य च मनोविकारानभिप्रायांश्च नेत्रवक्त्रविकारैर्विज्ञाय बालचन्द्रिका राजसुतामुवाच -

"सखि ! सर्वासु विद्यासु कलासु च परमप्रावीण्यमुपगतोऽयं युवा मनस्वी मनीषी विप्रसुतो वर्तते। देवोपासनां कृत्वाऽनेन युद्धविद्यायामपि परमं कौशलमर्जितम्। अयं सर्वविधस्वागतसत्कृतियोग्यतां दधाति। आगम्यताम्। वयमत्र सरसीतटरुहाशोकच्छायायां समभूमावुपविश्य मणिमन्त्रौषधिविद्यातत्त्वज्ञं विप्रसुतं मधुरवार्तालापैः सत्कुर्मः।"

वचांसीमानि समुच्चार्य राजसुतायाः करं गृहीत्वा बालचन्द्रिका तां पुष्करिण्यास्तटमानिनाय। सख्योऽन्यश्च परिजनवर्गो नयनसङ्केतेन तया तत्रैव निरुद्धः। राजवाहनोऽपि विवशः पाशैरिवाऽऽकृष्यमाणः पुष्पोद्भवमाश्रयंस्तत्रैव समायातः। सर्वे जनाः मरकतमणिजटितासु दुग्धपाषाणविरचितासु पीठिकासु समुपविष्टाः। ताम्बूलपिटिकातः कर्पूरसुवासितां ताम्बूलवीटिकामादाय बालचन्द्रिका राजसुतामुवाच-

"सखि ! भवती निजमृदुलकरेण समादरणीयाय प्राघुणिकाय ताम्बूलवीटिकामेनामुपहृत्य तं सत्करोतु।"

अवन्तिसुन्दर्यास्त्रपाभरविनतमाननमारक्ततरं बभूव। तथाऽपि सा कथमपि मनोवेगं संयम्य वामेतरकरकरशाखाभिस्ताम्बूलवीटिकामादाय किञ्चिदग्रे विनम्य स्वकरं राजवाहनसमक्षमुपहारपुष्पाञ्जलिमिव प्रासारयत्। ताम्बूलग्रहणाय प्रसारितकरस्य राजवाहनस्य कराङ्गुलयोऽकस्मादवन्तिसुन्दर्याः कराङ्गुलिस्पर्शमवापुः। तस्य सकलः कायः समुत्पन्नविद्युत्स्पर्श इव चकम्पे। मनश्च प्रसादेन परिपूरितम्। तथाऽपि मालवजनपदसुन्दर्याः मुखं निमेषरहितलोचनाभ्यामवलोकयन्नसौ ताम्बूलवीटिकां कराग्रेण गृहीत्वा देवताप्रसादमिव मुखे न्यदधात्।

तस्मिन्नेव क्षणे पूर्वजन्मस्मृतयस्तस्य स्मृतिपथे समाविर्बभूवुः। सोऽन्वभवत् -

"इयमेव बाला मम जन्मजन्मान्तरसङ्गिनी। विगतजन्मस्वपीयं मे भार्या प्रिया बभूव।"

शनैः शनैः राजवाहनस्य हृदि मस्तके च स्मृतिरेखाः सुस्पष्टाः बभूवुः। कतिपयक्षणपर्यन्तं तूष्णीं स्थित्वाऽसाववन्तिसुन्दरीमवोचत् -

"भद्रे ! पुरातनीयं घटना। कदाचिद्धेमकूटपर्वतपरिसरप्रदेशेषु चित्रभानुनाम्ना प्रसिद्धो विद्याधराणां राजाऽवर्तत। तस्य सुतो राजकुमारः शाम्बो नाम पाणिग्रहणसंस्कारेण परमगुणसमन्वितां यज्ञवतीं विद्याधरवंशीयां परिणीयाऽऽत्मीयाञ्चकार। परस्परमतिशयस्नेहानुरागपाशबद्धौ तौ क्षणमात्रमपि विरहं सोढुं न समर्थावभवताम्।

एकस्मिन् समये सायन्तने व्योमविहाराय तावुभावपि व्योमयानमारुह्य प्रासादाद् बहिरागतौ। व्योममार्गेणोत्पततोस्तयोर्विमानं दक्षिणसमुद्रतटवर्ति कन्याकुमारी-मन्दिरमुपजगाम। अथ देवीं समभ्यर्च्य निवर्तनीयमिति निर्णीय विद्याधरवंशविभूषणोऽसौ राजसुतः शाम्बः स्वपत्न्या यज्ञवत्या साकं धरायामवतीर्य देवीं पूजयितुं मन्दिरं जगाम। मन्दिरं निकषा स्वच्छनीलनीरपूरिता पुष्करिण्येका दृष्टिगोचरा सञ्जाता।

पुष्करिण्यास्तटभूमिषु सलिलेषु च राजहंसाः बहवो विहरन्ति स्म। तटसमीपे तत्राऽम्भोमध्ये सघनतामरसपत्रषण्डे राजहंस एको रतिश्रमजनितक्लान्तियुतः प्रियया सह ससुखं स्वपिति स्म। राजहंसं तथा सुप्तमालोक्य यज्ञवती मनसि कुतूहलाक्रान्ता बभूव। अभिलाषसम्भृतदृशा भर्तारमवलोकयन्तीं तां प्रसादयितुं शाम्बो विद्याधरराजसुतः कटिप्रदेशात् सुतनुरज्जुमादाय पुष्करिणीसलिलं प्रविश्य सुप्तस्य राजहंसस्य पादौ बबन्ध। तञ्च द्वाभ्यां कराभ्यामुत्थाप्य जलाद् बहिरागत्य यज्ञवतीमदर्शयदकथयच्च -

प्रिये ! मुनिरिव मौनमास्थितोऽयं राजहंसो मया निगृहीतः। साम्प्रतमावाभ्यां विमानं प्रति गन्तव्यम्। हेमकूटं गत्वा तत्र सरसि पालनीयोऽयम्। तस्मिन्नेव समये ससम्भ्रममुन्निद्रोऽसौ राजहंसो विस्मयचकितावावां कुर्वन् मनुष्यवाचेदं जगाद -

राजकुमार ! तामरसपत्रषण्डमध्ये प्रियया सह सुखेन सुप्तोऽहं निष्कारणमेव त्वया पादयोः रज्जुना बद्धः प्रियायाश्च वियोजितः। अतिक्रूरो नृशंसो विचारमूढो राजपदमदान्वितश्च त्वं नूनमस्याऽपकृत्यस्य फलं भोक्ष्यसे। त्वमपि प्रकारेणाऽनेनैव बन्धनं प्राप्य दुःखभागी भविष्यसि। एवमेव रतिश्रमसुखसुप्तस्त्वं पादयोर्बन्धनं प्राप्य प्रियायाः वियोक्ष्यसे।

राजहंसस्येमानि वचांसि समाकर्ण्य यज्ञवतीशाम्बौ भयेन भाविविरहकल्पनया च प्रकम्पितौ । प्रियया विरहो भविष्यतीत्यनिष्टाशङ्कया शाम्बस्य प्राणाः शरीरादुत्क्रान्तुं प्रवृत्ताः। स्वदुष्कृत्यदुःखितः पश्चात्तापसन्तप्तः शाम्बस्तरसा राजहंसचरणौ बन्धनविमुक्तौ कृत्वा करावायोज्य विनयावनतशिरसा प्रार्थयामास -

"भगवन् ! यः कोऽपि भवान् भवतु। अजानता मया कृतोऽयमपराधः। महाभागो भवान् उदारचेताः। तदावयोरयं प्रथमापराधो भवता क्षन्तव्यः।"

शाम्बप्रिया यज्ञवती चाऽपि राजहंसस्य पादयोर्निपत्य क्षमां ययाचे। दम्पत्योः भूयोभूयः सततं विलापैः क्षमायाचनाभिश्च करुणाविगलितहृदयो मरालो मृदुलहृदयः प्रोवाच -

"राजकुमार ! न मम शापो वृथा भवितुमर्हति। तथाऽपि शापस्य तीव्रतां गुरुताञ्चाऽहं क्षिणोमि। कृत्यस्याऽस्य फलं त्वमागामिनि जन्मनि भोक्ष्यसे। अस्मिन्

जन्मनि प्रियया सह रममाणस्त्वं भौतिकसुखविलासानुपभुङ्क्ष्व। जन्मान्तरे च शापस्याऽस्य प्रभावस्याऽवधिर्मासद्वयमात्रं भविता। मासद्वयं चरणौ ते शृङ्खलाबद्धौ भवितारौ। एष एव चाऽवधिः प्रियावियोगस्य।"

कथयित्वेमानि वचनानि राजहंसोऽसौ प्रियया सहोत्तरस्यां दिश्युत्पपात।"

कथामेतां श्रावयित्वा राजवाहनोऽवन्तिसुन्दरीं पप्रच्छ -

"राजकुमारि ! अपि स्मरसि भवती वृत्तान्तमेतत्?"

राजवाहनेन प्रोक्तां कथां निशम्य अवन्तिसुन्दर्याः हृदयं सातिशयं विह्वलत्वमवाप। विविधाभिर्भावनाभिस्तत्रोदितम्। सा मनस्यनुबभूव -

"पूर्वजन्मनि सैव विद्याधरी यज्ञवती बभूव। अथ च स एव समक्षं स्थितो युवा तस्य प्राणेश्वरः शाम्बो विद्याधरराजकुमारोऽवर्तत। तस्याः मनसि समुदितोऽनुरागभावो बलवत्तरः स्थिरतरश्च समजायत। केनाऽप्युपायेनाऽस्य सहचरी भूयासम्, पूर्वजन्मकथावदहमस्मिन्नपि जन्मनि सर्वविधगुणसम्पन्नेनाऽनेन यूना साकं प्रणयविहारेष्वानन्दमनुभूयासमिति कामनानां समुद्गमस्तस्याः सबाह्यमन्तःकरणं व्याप्तमकरोत्।" तया प्रोक्तम् -

"भद्र ! पुरा कदाचिद् विद्याधरराजकुमारः प्रियां प्रसादयितुं राजहंसचरणौ बबन्ध। लोकव्यवहारेषु निपुणा अपि जनाः कदाचिदज्ञानादीदृशानि स्खलितानि व्यामोहितचित्ताः कुर्वन्त्येव।"

कथयित्वैतानि वचांसि सा मालवराजकन्या वदनमीषदुन्नमय्य प्रणयानुरागाभिव्यञ्जिकां दृशं राजवाहने व्यापारयामास। तौ च द्वौ विधिना प्रणयभावनाभिरपरिमिताभिः प्रपूरितौ।

परस्परमालापसुखमनुभवत्स्वेषु तेषु सेविकयैकया समागत्य सूचितम् -

"राजसुतामवलोकयितुं राजमहिषी परिजनैः साकमित एवाऽभिगच्छति।"

राजमहिषी मालवराजकन्याजननी रहस्यमिदं क्वचिन्न जानीयादित्याशङ्क्य बालचन्द्रिका पुष्पोद्भवं राजवाहनञ्च सङ्केतयामास -

"भवद्भ्यां स्थानादस्मादपसृत्य कश्चित् तरुस्कन्धान्तरालो लतामण्डपान्तरालो वा समाश्रयणीयः।

राजवाहनोऽवसरोचितमवगम्य पुष्पोद्भवस्य करं गृहीत्वा तस्मात् स्थानादपसृत्य समीपस्थिते लतामण्डपान्तराले स्थितिं विधाय सतृष्णनयनाभ्यामवन्तिसुन्दरीमालुलोके।

अवन्तिसुन्दर्याः जननी मालवाधिपस्य मानसारस्य पट्टमहिषी मल्लिका पुष्करिणीतटमुपगम्य स्वसुतामवलोकयामास। तदनन्तरं कतिपयक्षणं बहुविधलोकव्य-

वहारानुकूलैर्वार्तालापैर्मनोरञ्जनैस्तत्र हृदयं प्रसादयन्ती स्थिता। तदनन्तरं दुहितुः करं गृहीत्वाऽन्तःपुराय प्रतस्थे। अनिच्छन्त्यपि नवानुरागाकाङ्क्षिणी तस्मै राजवाहनाय स्पृहयन्ती जनन्या सार्द्धं गच्छन्ती सा राजसुता मनसा तत्रैव स्थिता। अथ पुष्करिण्यां जलविहारं कुर्वन्तं राजहंसमभिलक्ष्य सा प्राह -

"हे राजहंस ! त्वामवलोकमवलोकं चिरमहमानन्दमन्वभवम्। परमधुना तु मया गन्तव्यमेव। पुनः समागत्य त्वामवलोक्य नयनयोस्तृषमपनीय मनो विनोदयिष्यामि।"

इति वचनान्युदीर्य पुनः वदनं परावृत्य माधवीमण्डपं निरीक्षन्ती सा मालवराजदुहिता मातरमनुसरन्ती राजप्रासादं जगाम।

उपवनतरुराजिमध्यान्तर्निहितायामवन्तिसुन्दर्यां राजवाहनः सुचिरमेकाग्रमनाः विस्मृतनयननिमीलनव्यापारस्तामेव दिशमवलोकयामास। सुदीर्घमुष्णञ्च निःश्वस्याऽसौ साभिप्रायदृशा पुष्पोद्भवं निरीक्षाञ्चके। राजपुत्रस्य हृदयनिहितान् भावानवगच्छन्नपि कैरुपायैरनयोर्नवप्रणयपथवर्तिनोः संयोगो भवेदिति विचारपरम्परासु निमग्नोऽसौ पुष्पोद्भवः कुमारहस्तमवलम्ब्य निःशब्दं गृहाय प्रतस्थे।

मालवराजकन्या अवन्तिसुन्दरी तस्मादुपवनोद्देशाद् भौतिकशरीरेण गता न तु पुनर्मनसा। मनस्तु तस्यास्तत्रैव नगरोपवनपुष्करिणीतटमाधवीलतामण्डपेन संसक्तमासीत्। पुनः पुनस्तस्य तरुणस्य मनोरमं रमणीयं कान्तिमच्चित्ताकर्षकमाननं तस्याश्चक्षुष्यावृणोत्। हृदये तस्यैव प्रतिमा प्रतिष्ठिता। मनसि तस्यैव निवासोऽवर्तत। अङ्गमङ्गं स एव प्रच्छादयामास। राजप्रासादस्य कन्यान्तःपुरं प्रविष्टा स्वल्पेतराभिः सखीभिः दासीभिश्च परिवृताऽपि ह्येकाकिनीमेवाऽऽत्मानममन्यत। शून्यमिव सर्वं जगत् प्रतिबभौ। विरहवेदना तथा तामपीडयद् यथा भोजनं वा पानं वा शयनं वा भ्रमणं वा सखीभिः सह परिहासालापाः वा किमपि तस्यै नाऽरोचन्त। बहुलपक्षचन्द्रकलेव सा प्रतिदिवसं क्षीयमाणा सर्वासां सखीनां दृष्टिं परिहरन्ती कुत्रचिदेकान्तवासिनी तमेव विप्रकुमारं व्यचिन्तयत्।

कतिपयान्यहानीत्थं व्यतीतानि। अवन्तिसुन्दर्याः बालसखी बालचन्द्रिका विश्वासमापन्ना प्रियविप्रयुवकमूर्तिं हृदये दधानां मन्मथशरप्रहारपीडितां मालवराजनन्दिनीं राजवाहनस्याऽन्वयनामधेयादिभिः परिचितानकार्षीत्। रहस्यमेतद् विदित्वा तस्याः हृदयमतिशयेन विह्वलीभूतम्। शत्रुसुतायाऽपि तस्मै प्रियाय साहचर्याभिलाषस्तस्याः द्विगुणीभूतः। प्रियसखीमेतादृशीमवस्थामापन्नामवलोक्य बालचन्द्रिका भृशं व्याकुला बभूव। विरहानलसन्तप्ता सोष्णदीर्घनिःश्वासान् समुद्गिरन्ती राजसुता कदाचित् प्रियमिलनप्रयासविफला प्राणान् न परित्यजेदिन्याशङ्कयाऽभिभूता किंकर्तव्यविमूढा सा

बालचन्द्रिकाऽवसरमुपलभ्य राजसुतामुवाच-

"प्रियसखि ! त्वामीदृशीमवस्थामापन्नां वीक्ष्य सर्वाः सख्यः वयस्याः कण्ठगतप्राणाः भवामः । न च वयं भवत्याः व्यथां द्रष्टुं पारयामः । स्वमनोऽभिलाषमाचष्टाम् । न च भविष्यतीदं रहस्यं षट्कर्णपदम् । प्राणव्ययैरपि वयं भवत्याः साहाय्यं करिष्यामः । रहस्यञ्च रक्षिष्यामः ।"

बालचन्द्रिकायाः वचनानीमानि स्नेहसान्त्वनाभावसम्भृतानि निशम्याऽवन्तिसुन्दर्याश्चक्षुषी वाष्पार्द्रे सञ्जाते । मुखात् किमप्यनुच्चार्य सख्या उत्सङ्गे वदनमाधाय नयनजलैस्तां क्लेदयन्ती सा निःशब्दं रुरोद । पुनः पुनः बालचन्द्रिकया समाश्वस्ता सा प्रोवाच -

"प्रिय सखि ! यतोऽहं तं कुमारमपश्यं ततः केनाऽप्यदृष्टेनोन्मथितस्य मनसश्चाञ्चल्यस्याऽवरोधने न समर्थाऽस्मि । किमपि न रोचते मह्यम् । यदि च न साहचर्यं लभेय तस्य कुमारस्य, ध्रुवं मे मरणमिति त्वं जानीहि ।"

बालचन्द्रिकया कुमारस्य राजवाहनस्याऽपि मनोदशा समीक्षिता । स तु तस्याः गृहे न्यवसत् । साऽवन्तिसुन्दरीमुवाच -

"प्रिय सखि ! धैर्यं धारयतु भवती । यादृशी भवत्या अवस्था तादृशी भवत्याः हृदयगतस्य कुमारस्याऽपि वर्तते । रूपगुणवशीकृतहृदयान्तःकरणोऽसौ सततं भवत्याः स्मरति । अविलम्बमेवाऽहं तथाविधमुपायं संयोजयिष्यामि, यथा कुमारेण सह भवत्याः संयोगो भवेत् ।"

इति कथयित्वा मानसारनन्दिन्याः सन्देशमादाय त्वरितगतिर्निवासाय सा बालचन्द्रिका प्रतस्थे ।

व्यतिक्रामति मध्याह्नकाले मध्याकाशस्थितेन दिनकरसारथिना सप्तसप्तिस्यन्दनवाहाः प्रतीचीं दिशं प्रति सञ्चोदिताः । अलसभावपरिपूरिते वसन्तर्तोस्तस्मिन् काले राजवाहनो निजकक्षे शयानो अवन्तिसुन्दरीमेव हृदयसन्निविष्टां चिन्तयामास । कथमसौ तस्याः साहचर्यं लभेत । तां विना प्राणधारणस्य को लाभः? तस्मिन्नेव समये बालचन्द्रिका निभृतं प्रविश्य मन्दस्निग्धस्वरेण समवोचत् -

"कुमार !"

चमत्कृत्योत्थायाऽऽशापरिपूरितप्रश्नदृशा राजवाहनो बालचन्द्रिकामालुलोके । मन्दस्मितसुशोभितदन्तच्छदा बालचन्द्रिका राजवाहनमपृच्छत् -

"कुमार ! अपि कुशली भवान्? अत्रैकान्ते शयानेन भवता किं विचार्यति?"

बालचन्द्रिकाया अभिप्रायमवगम्य कुमारस्तां समीपस्थितायां पीठिकायामुपवेशयामास ।

पीठिकायामुपविश्य बालचन्द्रिका स्वकञ्चुकिकान्तः सुगुप्तरूपेण निहितं पत्रमेकं निष्कास्य राजकुमारमभिलक्ष्य करं प्रसारयामास। राजवाहनेन पत्रमादायोद्घाट्य पठितम् -

"अयि कठोर ! तव रमणीयं हृदयाकर्षकरं रूपं विलोक्य त्वदधीनतां गतं मे मनः सततं त्वामेव कामयते। अपि वर्तते हृदये लेशमात्रमपि स्थानं मे?"

अवन्तिसुन्दर्यास्तत् पत्रं पठित्वा राजवाहनस्य नयनेऽश्रुजलभराक्रान्ते बभूवतुः। अश्रुजललवान् भुवि निपात्य द्वाभ्यां कराभ्यां मुखमाच्छाद्य पुनर्बालचन्द्रिकावदननिहितैकाग्र-दृष्टिर्विद्धहृदयो राजसुतः सगद्गदमुवाच -

"भद्रे ! जानास्येव मम मनोदशां त्वं नूनम्। न लेशमात्रमपि शान्तिर्मे मनसि। हृदयशरीरेन्द्रियाणि चाऽशान्तभावं भजन्ति। त्वं तु तस्याः प्राणसमा सखी। त्वमेव मिलनोपाये समर्था मम सहायिका पुटपाकदह्यमानस्य च हृदयस्य चिकित्सिका।"

"ध्रुवमेव करिष्यामि यदि प्रभविष्यामि", इति कथयित्वा बालचन्द्रिका स्वभवनान्निर्गत्य पुनः राजप्रासादस्य कन्यान्तःपुरं जगाम। इत्थमवन्तिसुन्दर्याः राजवाहनस्य च मध्ये सन्देशानामादानप्रदानस्य नयनानयनं कुर्वन्ती सा तयोः प्रणयभावान् सततं समवर्धयत् समपोषयच्च।

केचन दिवसाः व्यतीताः। न कोऽप्युपायोऽवसरो वा तया लब्धो येन राजकुमारोऽवन्तिसुन्दर्याः दर्शनमपि कुर्यात्। एकस्मिन् प्रभाते नवोषःसमुज्ज्वले पुष्पोद्भवेन सह राजवाहनस्तदेवोपवनं समाससार, यत्राऽसौ प्रथमं दर्शनमवन्तिसुन्दर्याः लेभे। उद्याने भ्रमन्नसौ तदेव पुष्करिणीतटं सम्प्राप्य पुष्पोद्भवमुवाच -

"मित्र ! पश्यतु भवान्। इयमेव सा मरकतमणिजटिता दुग्धपाषणरचिता पीठिका, या मे प्रियया राजसुतया तस्मिन् दिवसेऽधिष्ठिता। इदं तदेव माधवीलतामण्डपं, यस्याऽन्तरालमाश्रित्याऽऽवां निभृतमतिष्ठाव। पुनः पुनः वदनं व्यावृत्य मां साभिलाषमवलोकयन्ती निजहृदयगतामाकाङ्क्षां प्रकटयन्ती मम प्रियाऽनिच्छन्त्यपि जनन्याऽऽकृष्यमाणेव नगरोद्यानाद् बहिर्नीता। तां स्मारं स्मारं मम चित्तं कथमपि शान्तिं न लभते।"

सहसा राजवाहनस्य दृष्टिः पुष्करिणीसलिलमध्ये कमलपुष्पचयेषु सन्तरति कस्मिंश्चिन्मराले पतिता। तमभिलक्ष्य करावायोज्य तेन प्रोक्तम् -

"मराल ! प्रणयव्यापारेषु निपुणता ते सर्वत्र जगति प्रथिता। विरहातुराणां सहायकस्त्वमेव वर्तसे। नलदमयन्त्योः प्रणयसन्देशानां नयनानयनं विधाय त्वं तयोर्मिलनहेतुरभवः। ममाऽपि दारुणवियोगव्यथा त्वया प्रियायै निवेदनीया।"

तस्मिन् समये मधुरसं प्रच्यावयन्तीभिर्मञ्जरीभिराच्छन्नैः सहकारतरुभिरुपवनं तन्नन्दनकाननमिव प्रतीयाय। मधुररसास्वादनेन सञ्जातमदानां पिकानां कुहूरुतैः दिशामन्तरालानि निनादितानि। उपवनवीथिकासु चम्पकजातिमाधवीयूथिकाबन्धूकादिपुष्पगुच्छेषु प्रविशन्तो मधुकराः पुष्परसपानेनोन्मत्ततां गताः गुञ्जनं कुर्वन्ति स्म। राजवाहनपुष्पोद्भवौ तथैव पीठिकायामेकस्यामुपाविशताम्।

सहसा तौ विचित्रकूतूहलोत्पादकवेशधारिणं युवानमेकमपश्यताम्। विविधवर्णानि महेन्द्रचापभ्रान्तिजनकानि वसनानि तेन परिहितानि। कर्णपालिकयोः रत्नजटितकनककुण्डलधारी स भुजयोः कटकयुगलं दधार। शिरश्चौर्णवसनेन शिरस्केन प्राच्छादयत्। चरणयोरणिमच्चर्ममयोपानहाववर्तेताम्। आकृत्या प्रभावशालिनं तं युवानं भृत्य एकः शिरसि गुरुभारिकया पेटिकया शोभमानोऽनुगच्छति स्म। तौ द्वौ सरसीतटमुपगम्य शिरोभारं धरायां धृत्वा भूमावुपविश्य राजवाहनमेवाऽनिमिषलोचनैरीक्षाञ्चक्रतुः। समुत्पन्नकुतूहलः पुष्पोद्भवो युवकसमीपं गत्वाऽपृच्छत् -

"भगवन् ! को भवान् कुतः समायातः कश्च जीविकोपायः? वेशेण भवान् मनोवशीकरणसमर्थो निपुण ऐन्द्रजालिक इव प्रतीयते। कासु कासु विद्यासु भवता नैपुण्यमधिगतम्? भवन्तमवलोक्याऽतिकुतूहलेन समाक्रान्तं मम हृदयम्। यदि न भवेत् काऽपि हानिरुचितञ्च भवान् मन्यते, स्वपरिचयप्रदानेनाऽनुगृह्णातु भवान् माम्।"

तेन युवकेनोत्तरितम् -

"भद्र ! पद्मनाभाभिधानोऽहमैन्द्रजालिकः। दक्षिणभारतविभूषणा काञ्ची नगरी मे जन्मभूमिः। विविधेषु जनपदेषु परिभ्रमन्नहं भारतवर्षमुकुटमिव शोभमानां विशालां स्वमायामयेन्द्रजालकौतुकानि प्रदर्शयितुं समायातः। इमानि कौतुकानि विस्मयपयोनिधौ निमज्जनकराणि याथार्थ्यमिव भ्रान्तिं प्रतिपादयन्ति। असम्भवमपि वस्तुजातं सम्भवमिव प्रदर्शयितुं क्षमते मे प्रतिभा।"

पुष्पोद्भवो मनसि विचारयामास -

"ध्रुवमयमैन्द्रजालिकः स्वकार्यसाधने सहायको भविष्यति।"

ततः पद्मनाभमैन्द्रजालिकं सादरं सविनयं प्रणम्याऽसौ राजवाहनसमीपमानिनाय। तदनन्तरं बहुकालं यावत्ते परस्परस्नेहसम्भाषणैरन्योन्यं मित्रत्वबन्धने निबद्धाः। परं प्राणेश्वरीं प्रियामवन्तिसुन्दरीमेव हृदये दधानो राजकुमारो निश्चलनिष्पन्दो निभृतं स्थितोऽन्यमनस्क इव न किञ्चिदपि बभाषे। तस्य तादृशीमवस्थामवलोक्य पद्मनाभः पुष्पोद्भवं पप्रच्छ -

"मित्र ! कथमावयोरयं सुहृद् रमणीये प्राकृतिकसौन्दर्यमयेऽप्युपवने स्थितो

दशामेतादृशीमौदास्यमयीं प्रपन्नस्तिष्ठति? रूपेण सौन्दर्येण तेजसा समुज्ज्वलमपि वदनमण्डलमस्य हरिद्राभं म्लानं वर्तते।"

पुष्पोद्भवः प्रोवाच -

"मित्र ! परस्परवार्तालापैरेव वयं मित्रत्वमुपागताः। साधुपुरुषेषु स्नेहसम्भाषणैरेव सौहृदमुपजायते। भवत्सदृशान्मित्रान्न कोऽपि गोपनीयो विषयः। अयं मगधजनपदाधिपस्य राजहंसस्य वनेषु प्रवसितस्य सुतो राजवाहनो मम स्वामी मित्रञ्च। विधिनियोगादेकस्मिन् दिवसे राजकुमारोऽयमुपवनविहाराय मया सह समायातस्त्रिभुवनयुवतिप्रमदासौन्दर्य-तिरस्कारिणीं मालवजनपदमुकुटमणिरूपां मालवेन्द्रसुतामवन्तिसुन्दरीमुपवनविहाराय समायातां दैवगत्या ददर्श। सञ्जाते परस्परदृष्टिविनिमयेऽस्य हृदयरत्नं तया प्रमदया रूपयौवनपाशैर्बद्ध्वा वशीकृतम्। कथं तया सह सङ्गमो भवेदिति चिन्तया सततं क्षीयमाणकायोऽयं तामेव प्रियां हृदयनिगडितां ध्यायति। बहुभिः प्रकारैश्चिन्त्यमानो न कोऽप्युपाय आवाभ्यामुपलभ्यते।"

पुष्पोद्भवस्य कथनं निशम्यैन्द्रजालिकः प्रमुक्तकण्ठं जहास। तेन प्रोक्तम -

"किमसाध्यं नाम सत्त्वप्रतिभावतां जनानाम्। क्रियायाः सिद्धिः सत्त्वे भवति नोपकरणे। विद्यया प्रतिभया पौरुषेण च सर्वाणि कार्याणि सिध्यन्ति। इन्द्रजाललीलाभिरेवाऽहं मालवाधिपतिं तत्सभासभ्यांश्च व्यामोह्य सर्वेषां नगरवासिनां समक्षं भवन्मित्राय पाणिग्रहणसंस्कारेणाऽवन्तिसुन्दरीं समर्पयिष्यामि। स्वयमेव मालवनाथो मानसारः स्वदुहितरं राजसुतायोपहरिष्यति। तदनन्तरमयं राजसुतया मालवजनपदमुकुटरत्नरूपया सार्द्धं कन्यान्तःपुरं प्रविश्य प्रणयविलासरतिसुखान्यनुभविष्यति।

परन्त्वस्मिन् कार्ये राजदुहितुरपि सहयोगोऽनिवार्यः। यदि भवन्मित्रे मालवाधिपसुतायाः हृदयनिर्विशेषः प्रणयो दृढश्च विश्वासस्तदा कस्याश्चित् सेविकायाः सख्याः वा माध्यमेन पूर्वमेव सर्वं वृत्तान्तं संयोजनीयम्। योजनानुसारेणाऽस्माभिर्व्यवहरणीयम्।"

तदनन्तरमसावैन्द्रजालिकः पुष्पोद्भवस्य वामेतरं कर्णं मुखमुपनीय किञ्चित् कथयामास।

पुष्पोद्भवः पद्मनाभस्य वचनानि समर्थयामास। अवन्तिसुन्दरी राजकन्या राजवाहने दृढमनुरक्ता। बालचन्द्रिका च तस्या विश्वस्ता सखी हृदयनिर्विशेषा। तस्याः माध्यमेन सकला योजना साध्या भविष्यतीति तेन विचारितम्। आगामिनि दिवसे प्रातरेव पद्मनाभमामन्त्र्य पुष्पोद्भवराजवाहनौ गृहाय प्रस्थितौ। तयोर्गृहमागतयोर्मध्याह्नकालीनो दिनपतिः मध्याकाशे सन्तपति स्म। तस्मिन् समये बालचन्द्रिका गृहेऽवर्तत।

भोजनादिभ्यो निवृत्तेन पुष्पोद्भवेन सकला योजना बालचन्द्रिकासमक्षं सविशदं

समुपस्थापिता। सा तत्क्षणमवन्तिसुन्दर्या सह परामर्शाय कन्यान्तःपुराय प्रस्थिता। निशागमनपूर्वमेव प्रदोषसमये बालचन्द्रिकया प्रासादादागत्य सूचना प्रदत्ता -

"मालवाधिपसुता विदितसकलयोजना राजसुते दृढबद्धानुरागा सर्वथाऽनुकूलमेवाऽऽचरिष्यति।"

औत्सुक्येन कुतूहलेन च समाक्रान्तस्य विरहेण च व्यथितस्य राजवाहनस्य सा निशा स्वपतो जाग्रतश्च व्यतीता।

अपरेद्युः प्रातरेवेन्द्रजालविद्यायां परमकौशलमवाप्तः पद्मनाभः पुष्पोद्भवगृहं समाजगाम। स कथयामास -

"इन्द्रजालकौतुकानां राजसंसदि प्रदर्शनं विधातुमनुमतिमधिगन्तुमहं राजभवनं गच्छामि। कौतुकानीमान्यवलोकयितुं राजपरिवारस्य महिलासमुदायोऽप्यवश्यमागमिष्यति। स च यवनिकाव्यवहितः स्थास्यति। बालचन्द्रिकया करणीयमिदं कार्यम् -

वैवाहिकवस्त्राभरणसुसज्जितामवन्तिसुन्दरीमिन्द्रजालदर्शनकौतुकव्याजेन तत्राऽऽनयतु।

राजवाहनोऽपि वैवाहिकवस्त्राभरणसहितः पुष्पोद्भवेन सह दर्शकाणां मध्ये तिष्ठतु। सङ्केतं प्राप्य सर्वे विवाहवेदिकामधितिष्ठन्तु।"

बालचन्द्रिकायां कन्यान्तःपुरं गतायां पद्मनाभोऽपि राजभवनं प्रति प्रतस्थे। राजभवनद्वारमुपगम्य तेन द्वारपालाय निवेदितम् -

"महाराजसमक्षमसाविन्द्रजालकौतुकानां प्रदर्शनं कर्तुमभिलषति। परिजनेन सार्द्धं महाराजो मम विद्यायाः कलायाः कौशलस्य च चमत्कारमवलोक्य मनो रञ्जयतु।"

द्वारपालेनाऽन्तः प्रविश्य बहिरागत्य च राज्ञोऽनुमतिः सूचिता -

"मध्याह्नोत्तरसमये भवता राजसभायां कौतुकानीन्द्रजालसम्बन्धीनि प्रदर्शनीयानि। राजपरिवारजनाः प्रजाजनाश्चाऽप्यत्र निमन्त्रिताः भविष्यन्ति।"

स्वल्पेनैव समयेन कलाकुशलेन पद्मनाभेन सर्वे समारम्भाः संयोजिताः। मध्याह्नोत्तरसमये राजसभायामुज्जयिन्याः सर्वेषां प्रजाजनानां राजपरिवारस्य च समक्षं पद्मनाभनिर्देशितानामिन्द्रजालकौतुकानां प्रदर्शनं प्रारब्धम्। ऐन्द्रजालिकस्य परिजनाः विविधवाद्यानां वादने प्रवृत्ताः नृत्यकुशलाश्च नट्यो गीतलयानुसारं वृत्ताकारं परिधिषु भ्रमन्त्यो ननर्तुः। पद्मनाभोऽपि मयूरपिच्छं भ्रामयन् विविधैरभिनयैर्दर्शकान् विमोहयामास। स्वल्पेनैव कालेन चित्रलिखिता इव सर्वे दर्शकाः पद्मनाभानुसारमेव दृश्यान्यनुबभूवुः।

ऐन्द्रजालिकेन पद्मनाभेन बहुविधानि दृश्यानि प्रस्तुतानि। तत्र भास्वरमणिसमुज्ज्वलाभोगयुताः नागाः ननर्तुः। द्वयोर्भागयोर्विभक्ताभिर्जिह्वाभिस्तैः सर्वतो गरलमि-

वोद्गीर्णम्। सहसा तत्र गरुडपक्षिणां समुदायः समुदितः। नृत्यतो नागान्निगीर्य ते किन्दिशीकाः बभूवुः। ततश्च नरसिंहावतारधारिणा भगवता विष्णुना हिरण्यकशिपोर्वधस्य दृश्यं प्रस्तुतं बभूव। वह्निना सन्तप्तो रक्तवर्णलोहमयोऽतिशयेन सर्वान् सन्तापयन्निव स्तम्भः प्रकटीबभूव। तत्र भक्तप्रह्लादस्य बन्धनदृश्यं समुत्पन्नम्। विष्णोः परमभक्तोऽसौ भगवतो नामस्मरणं कुर्वन् लोहस्तम्भं स्वयमेवाऽऽलिलिङ्ग।

सहसा सहस्रशो बज्राणां निनादाः दर्शकाणां श्रोत्राणि स्फोटयन्तस्तडिताञ्च चमत्कृतयो नयनानि निमीलयन्त्यः प्रादुर्बभूवुः। स आयसस्तम्भो मध्यभागाद् द्विधाभूय पतितः। तदन्तरालाच्च नरसिंहरूपधारिणा भगवताऽनन्तेनाऽऽविर्भूतम्। अग्रे समागत्याऽसौ प्रह्लादमङ्के निधाय एकतः समावेश्य सिंहासनाधिरूढं हिरण्यकशिपुमभिदुद्राव। हिरण्यकशिपुर्गृहद्वारदेहल्यां सिंहासनं स्थापयित्वाऽतिष्ठत्।

सन्ध्याकालोऽवर्तत। न तु दिवस आसीन्न च रजनी। भगवाननन्तो नरसिंहा-वतारधारी न च मानवो न च देवो न च पशुः हिरण्यकशिपुं द्वाभ्यां भुजाभ्यां भारशून्यं तनुवल्लरीमिवोत्थाप्य जान्वोः धृत्वा तीक्ष्णनखैरुदरे विदारयामास। विस्मयविमुग्धचेतसो दर्शकाः सर्वाणीमानि दृश्यानि विस्मृतनयननिमेषव्यापारा एकाग्रमनोभिरवलोकयामासुः।

तदनन्तरं राजानं दर्शकांश्च समवबोधयता पद्मनाभेन प्रोक्तम् -

"इन्द्रजाललीलासु समापनप्रायासु मङ्गलाशंसनरूपेण भवन्तो विवाहसंस्काररूपं दृश्यमप्यवलोकयन्तु। अद्याऽधुनैव भवतां समक्षं मालवराजकन्यारूपा बालिका मायामयी वैवाहिकवसनविभूषणप्रसाधनधारिणी नवयौवनरूपलावण्यवती समुपस्थिता भविष्यति। अथ तद्रूपवयोयोग्यश्चैको मायामयो युवकोऽपि तथैव वैवाहिकवसनभूषणसज्जाविभूषितः समुपस्थितो भविष्यति। महाराजं मालवाधिपमहं प्रार्थये यदसावस्मिन् विवाहलीलाकौतुके स्वयमेव कन्यादानपुण्येन स्वात्मानं पावयतु। सकल एषोऽभिनय इन्द्रजालमायामयः सुसम्पन्नो भविष्यति।

अथ मालवाधिपस्याऽनुमतिमुपलभ्य पद्मनाभ ऐन्द्रजालिकः परितो वर्तुलाकारं परिभ्रमन् मयूरपिच्छं भ्रामयामास। पुनः नवरीतिभिर्विवाहमङ्गलयोग्यानां वाद्यानां वादनं प्रारब्धम्। अभिनयकुशलाः नर्तक्योऽपि तथैव ननर्तुः। पद्मनाभस्याऽनु-चरैस्त्वरितगत्या विवाहमण्डपस्य रचना विहिता। अस्मिन्नेव समये नववधूवेशसुसज्जिता परमरूपगुणशालिनी सौन्दर्यसम्पदा विवाहमण्डपं प्रकाशयन्ती राजसुताऽवन्तिसुन्दरी बालचन्द्रिकया सार्द्धं तत्र समुपस्थिता बभूव। राजकन्या विवाहमण्डपे वधूयोग्ये शुभासने समुपविष्टा। तदनन्तरं वरवेशं धारयन् शरीरसौष्ठवेन तेजसा च सर्वानेव

तत्रोपस्थितान् जनान् विस्मयविमुग्धनयनान् कुर्वाणस्तत्रोपस्थितो राजवाहनोऽपि वरयोग्य आसने समुपविष्टः।

अथ पद्मनाभस्य विद्याकौशलेन विमोहितो मानसारो मालवाधिपतिः स्वयमेव स्वदुहितुर्हस्तं राजवाहनाय प्रददौ। वैवाहिकवैदिकमन्त्रोच्चारणैः सह प्रास्ताभिराहुतिभिरुद्दीप्तशिखं वैश्वानरं साक्षीकृत्य पद्माभेन मायामाश्रितेनाऽवन्तिसुन्दरीराजवाहनौ विवाहसंस्कारेण पतिपत्नीरूपेण संयोजितौ। विवाहसंस्कारकार्येषु सम्पन्नेषु मयूरपिच्छं भ्रामयता करतलवादनं च कुर्वता पद्मनाभेनोद्घोषितम् -

"इन्द्रजालमायया समागताः सर्वे जनाः रङ्गस्थलाद् गच्छन्तु।"

सत्वरं वाद्यवादकाः नर्तनकुशलाश्च नट्यस्तस्मात् सभास्थलात् तिरोहिताः बभूवुः। सुप्रहृष्टचित्ता सा राजसुताऽवन्तिसुन्दरी प्रियस्य राजवाहनस्य करं गृहीत्वा कन्यान्तःपुरं जगाम। मनोरञ्जकमिदमिन्द्रजालकौतुकमवलोक्य परमप्रसन्नो महाराजो मानसारोऽपि पद्मनाभाय प्रचुरं पारितोषिकं दत्त्वा तं धनादिदानेन च सम्मान्य विससर्ज।

विधिपौरुषसामर्थ्येन परिपूरितमनोरथाववन्तिसुन्दरीराजवाहनौ परमप्रसन्नतामधिगतौ। नवभर्तारमासाद्य परमामोदमापन्ना भर्त्रा सह कन्यान्तःपुरे निजगुप्तप्रकोष्ठं प्रविश्य साऽवन्तिसुन्दरी बालचन्द्रिकामन्यामेकाञ्च सेविकां तत्र स्थातुं समादिश्य सर्वासामन्यासां सेविकानां प्रवेशं ववृजे। सर्वं रतिविलासप्रबन्धं बालचन्द्रिका सेविकासहाया संयुयोज। सम्प्रत्येकान्तं समुपलभ्य राजवाहनः प्रियया सह शयनमास्थितोऽनेकाभी रुचिकरीभिः प्रीत्युत्पादिकाभिः कथाभिरवन्तिसुन्दरीं प्रीणयामास। प्राचीनकालादेव प्रसिद्धानां काव्यकथानां श्रावणेन सह स्वकल्पिताभिर्नवकथाभिरपि प्रियां प्रीणयन्नसौ चतुर्दशभुवनानां वृत्तानि वर्णयामास।

राजवाहनोदीरितानां कथानां भुवनवृत्तान्तानाञ्च वर्णनान्याकर्ण्याऽवन्तिसुन्दर्याः स्नेहानुरागाभिलाषाकर्षणानि राजवाहनायाऽतितरां ववृधिरे। वृत्तान्तेष्वेतेषु प्रवृत्तेषु सकलं दिवसं यात्रापरिश्रान्ताः सूतेनाऽरुणेन संवाह्यमानाः दिनकररथसप्तसप्तयोऽस्ताचलशिखरमारुह्य प्रकाशमुपसंहरन्तोऽन्धकारञ्चाऽऽमन्त्रयन्तः पातालगह्वरं प्रवेष्टुमुन्मनस्कमनसः सञ्जाताः। निशागमनपूर्वकालीनमवतमसं सर्वतो दिक्षु प्रासरत्। बालचन्द्रिकाऽपि गृहगमनायाऽवन्तिसुन्दरीमनुमतिं ययाचे।

तदनन्तरं सेविकया सह गतायां बालचन्द्रिकायां संवृत्ते चैकान्ते सा त्रिभुवनललामभूताऽवन्तिसुन्दरी स्नेहानुरागसम्भृतां पीयूषधारासंसक्तां दृष्टिं राजवाहने निपात्य त्रपाभरेण वदनं विनामयामास। अथ च स्नेहानुरागविवशेन राजवाहनेन

प्रसारितयोर्भुजयोर्मध्ये सा त्रिभुवनसुन्दरी निजं वपुः समावेशयामास। प्रगाढालिङ्गननिबद्धौ तौ तथैव शयने शयानौ चिरकालं रतिक्रीडाश्रमक्लान्तकायौ निद्रादेव्या क्रोडीकृतौ।

शनैः शनैर्व्यतीतेऽर्धरात्रे निशायाश्चतुर्थे यामे स्वप्नमिममनुभवतो राजवाहनस्य निद्रा बभञ्ज। स्वप्ने तेनाऽवलोकितम् -

"अवन्तिसुन्दर्या सह राजवाहनो मनोरमकमलपुष्पावृतस्य सरसस्तटे विहरति। तदा विद्रुमरक्तचरणो हिमशुभ्रपक्षो मरालः समागत्य झटिति तस्य पादयोः संलग्नः।"

स्वप्नमवलोक्य निद्राभङ्गेन सञ्जातवेपथुना राजवाहनेनाऽवलोकितम् -

तस्य चरणौ राजतशृङ्खलया सुदृढं निबद्धौ वर्तेते। तां ज्योतिर्मयीं राजतशृङ्खलामुन्मोचयितुं विहिताः सर्वे प्रयासाः विफलाः बभूवुः। सा शृङ्खला मनागपि न विचचाल। अस्मिन्नेव क्षणेऽवन्तिसुन्दर्यपि जजागार। राजवाहनं शृङ्खलाबद्धचरणयुगलमवलोक्य भयविह्वला सा विचाररहितेव तारस्वरेण चक्रन्दे। राजवाहनेन निवार्यमाणाऽपि सा तस्मिन् सम्भ्रमे किञ्चिदपि विचारणेऽक्षमाऽवर्तत।

अवन्तिसुन्दर्याः स महानाक्रन्दः सर्वत्राऽन्तःपुरे प्रसृतः। किमिदं भवति किमिदं भवतीति कोलाहलं कुर्वन्त्योऽन्तःपुरसेविकाः राजकुमार्याः प्रकोष्ठं प्रविविशुः। कन्यान्तःपुररक्षका अपि कोलाहलमेतदशृण्वन्। रक्षकाणां नायकः सर्वत्र राजप्रासादे कन्यान्तःपुरेऽप्यप्रतिषिद्धप्रवेशाधिकारसम्पन्नोऽवर्तत। कस्मिन्नपि समये कस्यामप्य-प्रत्याशितघटनायामन्तःप्रवेशाधिकामसौ भजते स्म। द्वाभ्यां रक्षकाभ्यां सहाऽसौ राजसुतायाः प्रकोष्ठं प्रविश्य निरैक्षत -

"एकोऽतिरूपवान् तेजसा दीप्यमानः प्रभामण्डलशोभितो युवा पादयोः राजतशृङ्खलया निबद्धस्तत्र तिष्ठति। राजकुमार्याः सुगुप्तरक्षितं प्रकोष्ठं कथमसौ प्राविशदिति" निस्तब्धचित्तस्तत्र स्थगित इव विप्रलब्ध इव तस्थौ। तत्क्षणमसौ घटनयाऽनया चण्डवर्माणं प्रधानशासकत्वेन नियुक्तं समसूचयत्।

राजप्रासादस्य सम्यक् सुरक्षिते प्रहरिभिः सङ्गोपिते कन्यान्तःपुरे राजसुतायाः स्वकीये प्रकोष्ठे बाह्यपुरुषप्रवेशस्य समाचारमाकर्ण्य रोषावेशादारक्तनयनो हृदि प्रज्ज्वलन्निव चण्डवर्मा नितरामतप्यत। राजसुतायां मानसारदुहितरि तस्य स्वयमेव निजभार्यारूपेणाऽभिलाषोऽवर्तत। परं सततं प्रार्थ्यमानोऽपि प्रणयं याचमानोऽपि स सर्वदा सावमानं तया निर्भर्त्सितः। अत एव तस्य कोपस्य न काऽपि इयत्ता। द्वाभ्यामायुधधारिभ्यां सैनिकाभ्यां सहाऽसौ त्वरितमवन्तिसुन्दर्याः प्रकोष्ठं प्रविश्य तत्र राजवाहनमवलोक्य साधिक्षेपं जगर्ज -

"अहो ! अयमेवाऽसौ दुराचरणो विप्रो यस्य विदेशीयस्य पुष्पोद्भवस्य वणिजो गृहे

निवास:। पुष्पोद्भवस्य भार्या बालचन्द्रिकाऽपि परमपुंश्चली कुट्टनिका, यया मे भ्राता दारुवर्मा परलोकाय प्रतिष्ठापित:। अयं तु वञ्चको धूर्तो दाम्भिक: कपटी दुराचरणो ब्राह्मणोऽतिकठोरेण दण्डेन दण्डनीय:। ध्रुवमयं गर्तेऽर्धशरीरेण निवेश्य बुभुक्षितै: कुक्कुरैर्भक्षणीय:। क्रोधावेशविवशस्य चण्डवर्मणो भ्रुकुटी उपर्युद्गते, ललाटे क्रोधरेखा उत्तरङ्गिता:, नयनयुगलं प्रगाढरक्तभावं प्रपेदे। सकलञ्च वपुरतितरां चकम्पे। अवन्तिसुन्दरीं सकोपं भर्त्सयन् विच्छिन्नाक्षरवचोभिरसौ प्रोवाच -

"अयि कुलकलङ्किनि ! सुरूपं शौर्यशालिनं भां सुपुरुषं परित्यज्य त्वं दुराचारिणमेनं विप्रं कथं वृणुषे? सर्वान् रक्षकान् वञ्चयित्वा त्वमेनं पुरुषं स्वकक्षे प्रवेश्य कन्यान्त:पुरस्य पावित्र्यं कथं विनाशयसि? निश्चयेन त्वं भागीरथीनिर्मलपीयूषजलं परित्यज्य मलिनकर्दमजलपरिपूरितगर्ते निमग्ना। पश्य, तव समक्षमेव तव भर्तारमेनं बुभुक्षितकुक्कुराणामाहारं कल्पयामि। शूले वा समारोप्य विगतप्राणं करोमि।"

एतत् कथयित्वा रोषकम्पितकायेन चण्डवर्मणा असहायाया अवन्तिसुन्दर्या: सुवेणीविभूषितकुन्तलराशिर्विशालशक्तिसम्पन्नभुजदण्डेन सङ्गृह्य साधिक्षेपं समाकृष्ट:। तदनन्तरमसौ राजवाहनस्याऽपि दक्षिणकरं गृहीत्वा तथैव कृतवान्। एतदवलोक्य रोषेण निराशया च विह्वलीभूता सा मानसारनन्दिनी ग्रीवायां रज्जुमाबध्य प्राणपरित्यागाय समुद्यता बभूव।

राजवाहन: प्रकृत्या गम्भीर: स्वभावेन च नीतिज्ञोऽवर्तत। समयगतिज्ञेन तेन विचारितम् -

"नाऽयं समय: कोपस्य शक्तिप्रदर्शनस्य वा। अनौचित्यमत्र निश्चयेन भविष्यति।" शान्तगम्भीरस्निग्धस्वरेणाऽसाववन्तिसुन्दरीं प्रोवाच -

"प्रिये ! मरालस्य शापवृत्तस्य स्मरतु भवती। बन्धनमिदं मासद्वयावधिकम्। तदनन्तरमहं स्वयमेव स्वतन्त्रो भविष्यामि। मयि तथाभूता शक्ति: समर्थता वा विद्यते यद्देकलोऽहं सर्वान् शत्रून् विजित्य पराजयेयम्। आत्महननविचारा: मनसि नाऽनेया:। मासद्वयं कथञ्चिदपि धैर्यमवलम्ब्य व्यत्येयम्।"

परं नृशंसो हताशश्च चण्डवर्मा तत्कालं राजवाहनवधमभिललाष। परन्तु यदैव तेन तस्य शिरच्छेत्तुं चन्द्रहास: समुत्तोलितस्तदैव कोलाहलमाकर्ण्य महाराजो मानसारो महिष्या समं तत्र समागच्छत्। प्रथमं तावत्तौ राजवाहनं जामातृरूपेणाऽवलोक्य विस्मयेन क्षोभेण च निस्तब्धनिश्चलौ बभूवतु:। परन्तु विधिना लिखितं मार्जितुं क: क्षमते? यद् भूतं तद् भूतम्। राजवाहन: सम्प्रति तयोर्दुहितु: शास्त्रोक्तविवाहसंस्कारविधिना भर्ताऽवर्तत। तस्य वधो दुहितरं विधवां विधास्यति। आजीवनं सा वैधव्यदु:खमनुभविष्यति।

सम्भवतः सा आत्महननमपि कुर्यात्। तस्मिन् कार्ये सततं प्रयत्नशीला वा वर्तेत। परं तयोः सततं सविनयमाग्रहमनुरोधमप्यमान्यं कृत्वा क्रूरश्चण्डवर्मा यदा राजवाहनवधाय खड्गमुदतोलयत्, महाराजो राजमहिषी चोभावपि राजवाहनस्य संरक्षणाय तत्समक्षं स्थितौ कथयामासतुः -

"प्रथममावयोर्वधः करणीयस्तदनन्तरं जामातुरिति।"

विवशश्चण्डवर्मा चन्द्रहासमधश्चकार।

इत्थं राजवाहनस्य वधं निरुध्याऽपि वराको मानसारो राजशक्तिहीनस्तं स्वतन्त्रं विधातुं न क्षमो बभूव। राज्याधिकारस्तु तेन पूर्वमेव पुत्राय दर्पसाराय समर्पितः। स च शासनधुरं चण्डवर्मणः सुदृढस्कन्धयोर्निधाय शिवमभ्यर्चयितुं वाराणसीं गतः। सम्प्रति सकलशासनभारवाहकश्चण्डवर्मा भ्रातृवधेन नितरां दुर्मनायमानोऽपि प्रजाविप्लवभयान्मान-सारस्याऽनुरोधेन राजवाहनं न जघान, परं स्वतन्त्रमपि न कृत्वा कारागारबन्धनमेव तस्याऽऽदिदेश।

राजवाहनं प्रति कीदृशो व्यवहारः समुचित इति निर्णयस्तेन दर्पसारे निवेशितः। घटनां सविस्तरं वर्णयित्वा पत्रलेखबद्धां कृत्वा त्वरितगतिः सन्देशहरस्तेन वाराणस्यां दर्पसारसकाशे प्रेषितः। पुष्पोद्भवस्य सकलां चलाचलसम्पत्तिं राजकोषे निक्षेप्तुमसा-वादिदेश। अथ च सनिगडं सपरिवारं स बन्दीकृतः। राजवाहनं सुदृढस्थूलायसशृङ्खलाबद्धं कृत्वा लोहशलाकानिर्मिते पञ्जरे न्यक्षिपत्। अवन्तिसुन्दरीञ्चाऽपि कन्यान्तःपुरस्यैकप्रकोष्ठे बालचन्द्रिकासहितां बन्दीकृतवान्। तत्र च द्वयोः सशस्त्रप्रहरिण्योर्नियुक्तिः कृता। अन्तःपुरस्य सेविकाः सेवकाश्च समादिष्टाः, न कोऽपि जनोऽवन्तिसुन्दरीमवलोकयितुं तन्निकटञ्च गन्तुमनुमतः।

तस्मिन् समयेऽङ्गजनपदं सिंहवर्माभिधानो नरपतिः प्रशशास। नीतिज्ञस्य पराक्रमशीलस्य प्रजाजनचित्तानुवर्तिनस्तस्य राजधानी चम्पानगरी सम्पत्तिशालिनी भुवि विश्रुताऽवर्तत। चम्पेश्वरस्य सिंहवर्मणो दुहिताऽम्बालिका सम्प्राप्तयौवना रूपशीलादिगुणगणेन प्रथितकीर्तिः समग्रराजन्यवर्गाभिलषणीया बभूव। चण्डवर्माऽपि तां परिणेतुमभिलषमाणः सन्देशहरं चम्पेश्वरसकाशं प्रैषयत्। परं सिंहवर्मणा चण्डवर्मणोऽनुरोधो न स्वीकृतः। निराकरणेनाऽनेनाऽतितरां प्रकुपितेन चण्डवर्मणोद्घोषितम् -

"सपद्येवाऽसौ चम्पामाक्रम्य सिंहवर्माणं पराजित्याऽम्बालिकां बलादपहृत्य तामुज्जयिनीमानेष्यति।"

एवं निश्चित्याऽसौ चण्डवर्मा विचितैर्वीरैः स्वामिभक्तैर्विश्वसनीयैः सैनिकैः सह त्वरितगत्या चम्पामाक्रान्तुं प्रतस्थे। उज्जयिन्यां कदाचिद् राजवाहनपुष्पोद्भवपक्षपातिन

उपप्लवं जनयेयुरित्याशङ्कमानोऽसौ राजवाहनबन्धनरूपमायसं पञ्जरञ्चक्रैः संयोज्याऽश्वैः संवाह्यमानं कृत्वा चम्पां निनाय। अङ्गजनपदसीमानस्तु बाधारहितान् अनायासमेवोल्लङ्घ्य चण्डवर्मा पञ्चदशदिवसेषु चम्पां प्रपन्नः। तां नगरीं परितोऽवरुरोधाऽसौ।

चम्पेश्वरेण चण्डवर्मसैन्यस्योज्जयिन्याः प्रस्थानस्य समाचाराः पूर्वमेव गुप्तचरैर्विदिताः। नृपतिरसौ मित्रनरपतिसहायतायै सन्देशहरान् प्राहिणोत्। परन्त्वनागतेष्वेव चम्पेश्वरमित्रनरपतिषु स प्रचण्डश्चण्डवर्मा प्रचण्डसेनया सह त्वरितं समागत्य चम्पां पर्यवारयदाक्रमणाय चोद्युयोज। परं वीरेण निर्भयेन प्रचण्डसाहसेन सिंहवर्मणा नगरप्राकारद्वाराणि निरर्गलीकृतानि।

तदनन्तरं हस्तिनमारूढस्य चम्पेश्वरस्य नायकत्वे स्वल्पीयसी अङ्गजनपदसेना चण्डवर्माणं प्रचण्डवेगेनाऽऽचक्राम। सम्प्रवृत्ते च महति भयान्विते सम्पराये तत्र प्रयुज्यमानानामामायुधानां प्रहारैः कर्तितैर्भटानां शिरोभिरन्यैश्च विविधैरङ्गैर्युद्धभूमिः समाकुला प्रवहद्भिश्च रुधिरधाराभिः कर्दममयी बभूव। बहवः सैनिकाः रुधिरकर्दममय्यां रणभुवि प्रस्खलन्तो निपतन्तो निहताः स्वर्गं जग्मुः। सिंहवर्मणस्तद् राजभक्तं सैन्यं पराक्रमं प्रदर्शयदपि क्रमशः क्षीणतां प्रपन्नं समग्ररूपेण चण्डवर्मणा विनाशितम्। परन्तु बलीयान् साहसी रणचतुरोऽसहायोऽप्यसौ नरपतिः सिंहवर्मा चण्डवर्मणः प्रचण्डसैन्यस्याऽऽक्रमणान् रुरोध।

निरन्तरमायुधसञ्चालनश्रमवशात् सिंहवर्माऽतिशयेन श्रान्तः क्लान्तश्च बभूव। अवसरं लब्ध्वा परमपराक्रमशाली शस्त्रास्त्रसंचालनदक्षश्चण्डवर्मा निजवाहनं चण्डघोषाभिधानं दन्तिनं सिंहवर्मणो गजसमीपमानीयोत्फालं विधाय तत्पृष्ठमारुह्य चम्पेश्वरं पृष्ठभागेन गृहीत्वा बन्दिनञ्चकार। परमम्बालिकाभिलाषी स चण्डवर्मा भाविनः श्वसुरस्य प्राणान् रक्षन् न तस्य वधमादिदेश। लोहशृङ्खलाभिर्हस्तपादबद्धं तं स्मितेनैव सत्कृत्य स्वशिविरकारागारे निपात्य समुचितचिकित्साप्रबन्धानादिदेश। तदनन्तरं तेनाऽऽदिष्टम् -

"अद्य रात्रावेव शास्त्रोक्तविधिनाऽम्बालिकामसौ परिणेष्यति। सिंहवर्मा चाऽयं चम्पेश्वरो निजकन्यायाः पाणिं तस्मै समर्पयिष्यति। सकलोऽपि प्रबन्धः विधेयः।"

तस्मिन्नेव काले वाराणसीं प्रहितेन सन्देशहरेण चम्पां प्रविश्य चण्डवर्मणश्चरणयोः प्रणम्य दर्पसारस्याऽऽदेशपत्रं प्रस्तुतम्। तत्र लिखितमासीत् -

"कन्यान्तःपुरदूषयितारं दुराचारिणं जनं प्रति करुणभावस्य न किमपि वर्तत औचित्यं न च प्रयोजनम्। स तु कठोरतमेन दण्डेन दण्डनीयः प्राणेभ्यश्च वियोजनीयः।

वृद्धत्वमापन्नो मानसारो मम पिता परित्यक्तशासनभारो विलुप्तमानापमानविचारो वर्तते। तस्य सुताऽवन्तिसुन्दरी दुश्चरित्रा पापमाचरन्ती सापराधा वर्तते। अतस्तस्य वृद्धस्य त्वया सर्वथोपेक्षा करणीया। त्वमविलम्बमेव तं कन्यादूषणापराधिनं विचित्रवधेन दण्डयित्वा तस्य वपुः खण्डशः कृत्वा समाचारान् प्रेषय।"

दर्पसारस्याऽऽदेशं सर्वजनसमक्षं प्रवाच्य चण्डवर्मा समादिदेश -

"रजन्यामेवाऽहं चम्पेश्वरस्य सुतामम्बालिकां परिणेष्यामि। चण्डघोषदन्तिनमारूढोऽहं राजप्रासादं यथासमयं प्रवेक्ष्यामि। कन्यान्तःपुरदूषकः कामोन्मत्तः सोऽपि विप्रो लोहशलाकापञ्जरस्थ एव तत्राऽऽनेयः। स्वकुकृत्यानां फलमसौ भोक्ष्यते। तत्समक्षं सकलं विवाहसंस्कारक्रियाजातं सम्पत्स्यते। तदनन्तरं नभसि समुदिते बालभास्करे तमपराधिनं शृङ्खलासु सुनिगडितं चण्डघोषगजसमक्षं सम्पातितं पादतलपरिपेषितं कृत्वा सभार्यो गजारूढोऽहं मनो विनोदयिष्यामि।"

तदनुरूपं सर्वः प्रबन्धो विहितः। शृङ्खलासु बद्धेन राजवाहनेनाऽधिष्ठितः पञ्जरश्चम्पाराजद्वारप्रासादपर्यन्तमानीतः। चण्डवर्मा चाऽपि चण्डघोषगजमारूढो राजप्रासादमागतः। तत्र द्वारि चण्डघोषादवतीर्य गजमालाननिबद्धं कारयित्वाऽसौ विवाहसंस्काराय विविधालङ्कृतिसुप्रसाधितं राजप्रासादमवलोक्य स्मितविभूषितवदनः क्षणं तस्थौ। तदनन्तरं घृणोपेक्षारोषपरिपूरितदृष्टिं राजभवनद्वारि निपात्य समुपस्थितेषु राजभवनसेवकेषूपेक्षाभावं प्रदर्शयन्नसावन्तः राजभवनं प्रविवेश।

निशीथकालो व्यतीतः। चण्डवर्मणि प्रविष्टे राजप्रासादे सहसा राजवाहनचरणपिनद्धा राजतशृङ्खला स्वयमेव व्यपावृणोत्। तत्कालमेव सा शृङ्खला लौकिकदिव्यसौन्दर्यसम्पन्ना त्रिभुवनं ज्योत्स्नासमेन काञ्चनालोकेनाऽऽपूरयन्ती अप्सरोरूपेण परिणता। राजवाहनं प्रदक्षिणीकृत्य प्रणम्याऽञ्जलिं बद्ध्वा सा विस्मितचकितदृष्ट्याऽवलोकयन्तं कुमारं विनयसम्भृतवचोभिरुवाच -

"कुमार ! सुरतमञ्जरीनाम्नीं दिव्याङ्गनां मामवेहि। शशिरश्मिभ्यः समुत्पन्नाऽहं महेन्द्रसभायां सौन्दर्येण नृत्यगीताभिनयादिभिः सर्वेषां देवानां प्रीतिभाजनं बभूव। एकदा व्योममार्गेण गच्छन्त्या मया अधस्तान्मानससरोऽवलोकितम्। तत्र मरालानामगणिता संख्या विविधविलासक्रीडासु निमग्नाऽवर्तत। केचन मरालाः हिमशीतले सलिले तरन्ति स्म। केजन भूम्यां जालपादैर्विचरन्ति स्म। केचन हिमाच्छादितेषु शिलाखण्डेषु तिष्ठन्ति स्म। केचन च व्योम्न्युत्पतन्ति स्म।

व्योम्नि विहरन्नेको मरालो मन्मुखं स्वर्णकमलं मन्यमानो मदनुवर्ती बभूव। दक्षिणकरेण तन्निवारणप्रयासपरायाः मम हस्ताद् बज्रमणिजटितराजतमाला स्वल्पगाधे

मानससलिले निमज्जतो महर्षेर्मार्कण्डेयस्य शिरसि पतिता। बज्ररत्नानां चाकचक्येन शिरसि प्रसाधितं तस्य जटाजूटं समुज्ज्वलतरं बभूव। परं हारयष्टिप्रहारसम्पीडितोऽसौ महर्षिः कोपकषायितलोचनो दृष्टिमुन्नमय्य पश्चात्तापपीडितामपि मां शापेन पीडिताञ्चकार। तेन प्रोक्तम् -

"हे स्वच्छन्दविहारिणि दुश्शीले ! रूपयौवनमदगर्वितया त्वयाऽभद्रो व्यापारो मय्याचरितः। अतस्तत्वं राजतहारयष्टिर्भूत्वा विगतचेतना भव।"

महर्षिणा मार्कण्डेयेन समुच्चारितः घनघोरगर्जनमिव सः प्रचण्डशापध्वनिर्हिमगिरि-खण्डप्रखण्डेषु प्रतिहतः शतगुणीभूतः पवनमार्गेण गच्छन्त्याः मम कर्णयोर्निपतितः। ससम्भ्रममहमन्तरिक्षादधोऽवतीर्य महर्षेश्चरणयोर्निपतिता। अजानता कृतं ममाऽपराधं क्षमस्वेति सुदीनवचसाऽहं तं मुनिं पुनः पुनः प्रार्थयामास। करुणाविगलितहृदयोऽसौ महर्षिर्मामित्थं कथयामास -

"देवाङ्गने ! न शापो मे व्यर्थीभवितुमर्हति। स्वापराधास्याऽजानन्त्या कृतस्याऽपि त्वया फलं भोक्तव्यमेव। परन्तु सावधिको भविष्यत्ययं मे शापः। मासद्वयं त्वं राजतशृङ्खलारूपेण परिणता पुनः स्वकीयं देवाङ्गनारूपं प्राप्स्यसि। भूलोके राजपुत्ररूपेणाऽवतीर्णो राजवाहनः पूर्वजन्मनि विद्याधरराजसुतो बभूव। राजतशृङ्खलारूपिणी त्वं मासद्वयं तस्य चरणौ नियन्तासि। परं तवेन्द्रियाणि पूर्ववत् सचेतनानि भविष्यन्ति। तदनन्तरं शापान्मुक्ता त्वं पूर्ववद् देवाङ्गनारूपमाधाय यथेष्टं विहरिष्यसि।"

कथयित्वेमानि वचांसि महर्षिर्मार्कण्डेयस्तस्मान्मानससरसो बहिरागत्य गिरिखण्डप्रान्तरेष्वन्तर्हितः। अहञ्चापि राजतशृङ्खला भूत्वा तत्रैव सरसस्तटवर्तिनि प्रस्तरफलके पतिता।

हिमगिरिप्रसरेषु मन्दराचलशृङ्खलायां विद्याधरराज्याधिपतिर्मानसवेगो वर्तते। कदाचिदसौ हेमकूटविद्याधरराजेन चित्रभानुना सह शत्रुत्वमवाप। चित्रभानोः सुतः शाल्वो राजवाहननाम्ना भूलोके मगधराजकुलेऽवततार। अतो मानसवेगसुतो वीरशेखरो राजवाहनस्य स्वाभाविको रिपुः।

मालवाधिपो मानसारः कस्मिंश्चित् समये नीललोहितं भगवन्तं त्रिपुरविजयिनमर्चयितुं कैलासगिरिमाजगाम। एकदा मानसारसुतो दर्पसारोऽपि पितरं द्रष्टुं तत्र समागच्छत्। कैलासगिर्यधित्यकासु विहरतस्तस्य वीरशेखरस्य सङ्गमो दर्पसारेण सह बभूव। परस्परालापेषु विद्याधरसुतं सहायकं मत्वा दर्पसारः स्वभगिनीमवन्तिसुन्दरीं वीरशेखराय

दातुं प्रतिजज्ञौ। वीरशेखरोऽपि विशालां गत्वाऽवन्तिसुन्दर्याः रूपदर्शनेनाऽऽत्मानं कृतार्थं मेने। तस्या रूपलावण्यसौन्दर्यगुणसम्पद्व्यामोहितोऽसौ तामवन्तिसुन्दरीं भार्यारूपेणाऽधिगन्तुमभिललाष।

एकस्मिन् दिवसेऽसौ वीरशेखरो हिमगिरिप्रसरेषु परिभ्रमन् मानससरसस्तीरमुपजगाम। तत्र तेन प्रस्तरफलके राजतशृङ्खलारूपेण पतिताऽहमवलोकिता। दिनमणेरुज्ज्वलप्रकाशे प्रक्षिप्तरश्मिनिचयां मामवलोक्य चकितचकितोऽसौ विस्मितो बभूव। मां विचित्य तस्य मनसि मालवराजसुतायाः दर्शनस्याऽभिलाषः समुत्पन्नः। दिवसावसानसमयोऽपि जातः।

परिपूर्णमण्डलनिशाकरकरैः सकलं भूमण्डलं कनकद्रवेणेवाऽऽलिप्तमालोकितं समदृश्यत। स्वर्णमयी चन्द्रचन्द्रिका सर्वत्र प्रससार। अन्तरिक्षमार्गेण हृदयसर्वस्वामवन्तिसुन्दरीमवलोकयितुं प्रसरन् वीरशेखरो विशालायाः राजप्रासादेषु कन्यान्तःपुरस्योपरितनप्रदेशे समागच्छत्। गवाक्षमार्गेणाऽसावालुलोके -

"अवन्तिसुन्दरी तस्य प्रिया भवता राजवाहनेन सह कृतरतिप्रणयविलासा स्वपिति। रतिश्रमक्लान्तौ प्रगाढालिङ्गनबद्धौ प्रत्यङ्गाङ्गसंसक्तौ द्वौ प्रणयिनौ मृदुतूलिकाशयनमधिशयानौ वर्तेते।"

निजहृदयाधिष्ठातृदेवतामिव तामवन्तिसुन्दरीं द्विषदङ्कसंश्लिष्टां विलोक्य रोषाविष्टहृदयो वीरशेखरः किञ्चिदप्यपकर्तुमक्षमो गवाक्षमार्गेण प्रकोष्ठं प्रविश्य प्रगाढालिङ्गनवशङ्गतस्य भवतश्चरणौ राजतशृङ्खलारूपया मया बबन्ध।

परं ममाऽयं शापो मासद्वयावधिकं बभूव। शापसमये परिपूर्णताङ्गते पूर्वं देवाङ्गनारूपमास्थायाऽहं भवतः समक्षं स्थिता। मासद्वयं पारतन्त्र्यापमानुदःखानां भवतोऽहमेव हेतुः। अजानत्या मया कृतं पापं क्षमतु भवान् कृपानिधानः। भवतो योऽप्यादेशो भविता, तमहं ध्रुवं पालयिष्यामि।"

इति कथयित्वा सा सुरतमञ्जरी देवाङ्गना पुनः पुनः राजवाहनस्य चरणयोः पपात।

राजवाहनेनोक्तम् -

"भद्रे ! उज्जयिन्यां गत्वा समाचारस्याऽस्य निवेदनेन बालचन्द्रिकासहितां प्रियां मेऽवन्तिसुन्दरीं समाश्वस्तां कुरुष्व। कारागृहे च सपरिवारो निबद्धः पुष्पोद्भवोऽपि शुभसमाचारेणोपकरणीयः। इत्येव मम प्रार्थना।"

"आदेशपालनं भवितेति" त्युच्चार्य पुनः प्रणम्य सा व्योमविहारिणी देवाङ्गना

सुरतमञ्जरी व्योममार्गेणोत्पपात।

स्वातन्त्र्यं प्राप्तवति चरणयुगले राजवाहनस्योत्साहोऽतितरां प्रववृधे। असुरराजसुताप्रदत्ताङ्गुलीयकप्रभावेण क्षुत्पिपासाशीततापादिद्वन्द्वसहनसामर्थ्यशाली राजपुत्रोऽवन्तिसुन्दरीपतिः सत्वरमेवोत्थाय भुजबलसामर्थ्येन लोहमयपञ्जरस्य शलाकामेकामुत्पाट्य तदुपकरणेनैव पञ्जरस्य द्वारं भङ्क्त्वा बहिरागत्य भ्रमच्छलाकाप्रहारैः प्रहरिणो रक्षकांश्च व्यापादयन् चण्डघोषकरिणमुपजगाम। अकल्पनीयया घटनयाऽनया विक्षिप्तचित्ते हस्तिपके पश्यत्येव राजवाहनः करिपुच्छाश्रयेण चण्डघोषपृष्ठमारुरोह। तदनन्तरमेकेनैव लोहशलाकाप्रहारेण निषादिनमधः पातयित्वाऽङ्कुशं गृहीत्वा तदाघातैश्चण्डघोषं वशवर्तिनञ्चकार। राजवाहनेन प्रचोदितोऽसौ प्रचण्डाकारश्चण्ड-घोषोऽप्यालानं भङ्क्त्वा तद्वशंवदताङ्गतः।

तस्मिन्नेव समये राजप्रासादपरिसरेषु घनघोरगर्जनेनेव कोलाहलेन समुद्भूतम्-
"चण्डवर्मा हतः चण्डवर्मा हतः।"

प्रासादाभ्यन्तरालाद् धावन्तः केचन रिपुभटाः बहिरागच्छन्। परन्तु राजवाहनेन वशीकृतः शिक्षितश्च चण्डघोषस्तानवरुरोध। भटेनैकेन पार्श्वतो गत्वा बहिर्गमनस्य प्रयासो विहितः, परन्त्वसौ तत्रैव चण्डघोषपादाहतः पिष्टितां प्राप्तः। ते सर्वे रिपुभटाः राजवाहनमपश्यन्। राजवाहनेन पृष्टेषु तेष्वेकोऽवदत् -

"चण्डवर्मणो विवाहप्रसङ्गे राजप्रासादप्राङ्गणे विवाहमण्डपे सुभूषिते सति द्वाभ्यां सैनिकाभ्यां कन्यान्तःपुराद् बहिर्बलादानीयमाना चम्पेश्वरसुता अङ्गजनपदसम्मानपात्री राजकन्याऽम्बालिका नयनजलक्लिन्नवस्त्राभरणा वध्वासने प्रतिष्ठापिता। तत्सन्निकटं चण्डवर्माऽपि वरासने स्वात्मानं प्रतिष्ठाप्य परिणयनायाऽऽतुरो बभूव। पुरोहितैः प्रदीप्ते वैश्वानरे वेदमन्त्राणां पाठोऽपि प्रावर्तत। स्वस्तिवाचनमन्त्राणां पाठे सति यदा चण्डवर्मा लोहसमकर्कशकठोरकरेण राजसुतायाः नवविटपकोमलकरं ग्रहीतुं प्रायतत, तदा केनाऽपि वीरपुरुषेणाऽसौ प्रसारितभुजदण्डेनाऽऽकृष्यमाणो हठात् वरासनादधःपातितः।

ततस्तेन पुरुषेणाऽसिकोषात् कटिप्रदेशसंलग्नाद् दीर्घं तीक्ष्णधारमसिं निष्कास्यैकेन प्रहारेण चण्डवर्मणः शिरः कबन्धाद् विच्छिन्नम्। चम्पेश्वरस्य सिंहवर्मणः सैनिकाः सम्भवतः तत्र पूर्वमेव प्रच्छन्नरूपेण समवस्थापिताः। तस्मिन्नेव क्षणे सिंहवर्मणो विजयं घोषयद्भिस्तैः सर्वैः सर्वत्र रिपुहननवधव्यापारः प्रारब्धः। चण्डवर्मणि हते तस्य शतशो भटाः हताः शेषाश्च पलायनञ्चक्रुः। वयं निर्दोषाः स्म। भवाननुमन्यन्तामस्मान् बहिर्गमनाय। क्षमस्व नः। प्राणानां भिक्षां भवन्तं याचामहे।" एवं दीनवचनानि स

सैनिकोऽवदत्।

राजवाहनः क्षमायाचनापरान् रिपुभटान् बहिर्गन्तुमनुमन्य गजारूढ एव राजप्रासादप्राङ्गणं जगाम। तत्र निश्चयेन समराङ्गणदृश्यमवर्तत। सर्वत्र शवानां राशयोऽवाकीर्यन्त। हतानां कर्तितानाञ्च पुरुषाणामङ्गानि शिरांसि, हस्ताः, पादाः, कबन्धाश्च यत्र तत्र रुधिरमांसमेदःकर्दमेषु विप्रकीर्णा आसन्। शोणितपङ्केन तत्र गमनमपि दुष्करं कृतमासीत्। दृश्यमिदमवलोक्य मेघगर्जनगिरा राजवाहनेन समुद्घोषितम्-

"कोऽयं महान् वीरः पुरुषो येन भूलोकनिवासिनामसाध्यं दुष्करं कार्यं सम्पादितम्? आगच्छतु स मम समीपम्।"

राजवाहनस्येमां घोषणां निशम्य श्याममश्वमारूढः कटिप्रदेशेऽवलम्बमानासिकोषो धनुर्धारी पृष्ठांशे निहितनिशितशरतूणीरो लोहमयं सन्नाहं शिरस्त्राणञ्च धारयंस्तीक्ष्णधाराभिः शरवर्षाभिः शत्रुसैनिकान् व्यापादयन् वीरपुरुषः राजवाहनाधिरूढ-चण्डघोषगजसमक्षं समाससाद। राजवाहनं वीक्ष्य परिचीयाऽश्वादुत्प्लुत्य हस्तिनः पृष्ठभागादेव पुच्छाश्रयेणाऽऽरुह्य कुमारं प्रणतेन शिरसा प्रणनाम। दर्शनादेवोत्फुल्लवदनेन राजवाहनेन तत्क्षणं, "अरे ! अपहारवर्मा त्वमि" त्यभिधायाऽसौ गाढालिङ्गनपाशे निबद्धः।

तस्मिन्नेव काले "विजयतां चम्पेश्वरो विजयतामङ्गजनपदाधिपतिर्विजयतां महाराजः सिंहवर्मा" इति विजयघोषणैर्दिगन्तरालानि गुञ्जितानि कुर्वन्तः शतशो योद्धारः सन्नद्धसन्नाहाः विविधहेतिततिसुशोभितास्तत्र प्राङ्गणे समवेताः बभूवुः। ते च चण्डवर्मभटान् सर्वान् एकैकशोऽन्विष्याऽन्विष्य यमकिङ्करपाशबद्धप्राणान् विदधुः। धनुर्बाणचक्रगदापरिघमुसललोहशलाकाप्रासकुन्तभल्लपट्टिशपाशधारिणो विजयमदमदोन्मत्ताः सिंहवर्मसैनिका इतस्ततो भ्रमन्तो विजयघोषणाभिर्गगनमपि विभेदयामासुः।

राजवाहनस्योद्घोषणमाकर्ण्य समागतः श्यामहयमारूढो योद्धाऽपहारवर्माऽवर्तत। हर्षप्रफुल्लमुखकमलौ राजवाहनापहारवर्माणौ परस्परदर्शनेन प्रीतिमापन्नौ। तदानीं विशालकायं भद्रगजमारूढो गौरवर्णो वीरयुवकस्तत्र कश्चित् सम्प्राप्तः। सोऽपि लोहवर्मसमाच्छन्नकायः शिरस्त्राणं शिरसि दधानो निशितशरवर्षया शत्रुवधयज्ञदीक्षितो रिपूणां संहारकार्ये दत्तचित्तो बभूव।

तावत्कालं प्रायशः सर्वेषामेव रिपूणां क्षयो बभूव। यमकिङ्करैरेतेषां प्राणाः

पाशबद्धाः यमालयं नीताः । यदि केचन जीविता अपि स्युः, प्राणरक्षायै ते पलायनञ्चक्रुः । चण्डघोषगजमुपगम्य राजवाहनेन सहाऽपहारवर्माणमवलोक्याऽसौ वीरो युवा संयोजितकरयुगलः कुमाराय प्रणामाञ्जलिं निवेद्याऽपहारवर्मणि दृष्टिं निपात्य प्रोवाच-

"मित्र ! भवन्निर्दिष्टमार्गमनुसृत्य राजनयप्रयोगांश्च विधाय मया चम्पाधिपस्य सहायकमित्रराजवर्गोऽत्र समानीतः। तेषां सैन्यानि प्राप्तकाले समुपस्थितानि। चण्डवर्मणः सर्वे सैनिकाः निहताः वा शरणमायाताः वा बन्दीकृताः वा पलायिताः वा। तस्य सैन्यशिविरमस्मदीयैः योद्धृभिः सम्पूर्णरूपेण विनाशितं लुण्ठितञ्च। भवानादिशतु किमत्र करणीयमधुना?"

तस्मिन् योद्धरि कृपाकृतज्ञताभावभरितदृष्टिं निपात्य अपहारवर्मा राजवाहनमुवाच-

"कुमार ! दैवस्य अनुकम्पया प्रसादेन चाऽस्माभिः शत्रवो विनाशिताः साफल्यञ्चाऽधिगतम्। निहते चण्डवर्मणि मालवजनपदविजयोऽपि न दुष्करः। सुकर एव वर्तते। आज्ञापयतु भवानस्मानाज्ञाकरान्। धनमित्रोऽयं मे सुहृदभिन्नत्वेन मन्तव्यः। अनेन अनेकान् जनपदान् गत्वा महता परिश्रमेण बुद्धिबलेन च मित्रनरपतीनां सङ्ग्रहो विहितः। साम्प्रतमस्माभिरङ्गराजो बन्धनान्मोचयितव्यः। कोषः संरक्षणीयः। सेना च सुव्यवस्थिता करणीया। एकस्मिन् स्थाने स्थित्वा परस्परं मित्रराजन्यवर्गेण सह परामर्शं विधाय भविष्यति काले करणीयानां कार्याणां निर्धारणं कर्तव्यम्।"

"यद् भवते रोचते, तदेव करणीयमिति राजवाहनस्याऽनुमतिमुपलभ्य ते सर्वे मित्रराजानः कुमाराश्चाऽन्यानि मित्रणि भागीरथ्याः सकलकल्माषापहारिण्यास्तटं धनमित्रेण निर्दिष्टेन मार्गेण सम्प्रापुः। तत्र मन्दाकिनीशीतलसलिलस्पर्शपावनेन चित्तहृदयप्रीतिकरेण प्रवहता समीरणेन तेषां स्वागतं विहितम्। प्रथमं तावद् गजादपहारवर्माऽवरुरोह। तत्रैव गङ्गातटे सैकतमध्ये विशालवटवृक्षस्य छायायामपहार-वर्मणो निदेशेन सेवकैः स्वच्छीकृते समीकृते च प्रदेशे परामर्शसभाया आयोजनं बभूव।

राजवाहनश्चण्डघोषाद् द्विरदादधोऽवततार। विस्मितहृदयेन तेन तत्र भागीरथीतटे समुपस्थितानि सर्वाणि मित्राणि समवलोकितानि। राजवाहनेनाऽवलोकितम् -

"अपहारवर्मा, उपहारवर्मा, अर्थपालो, मन्त्रगुप्तो, मित्रगुप्तो, विश्रुतः, प्रमतिश्चेति सप्तकुमाराः कुमारस्य बालसहचरास्तत्र समवेताः बभूवुः।" पुष्पोद्भवसोमदत्त-योरनुपस्थितिः सर्वेषां मित्राणां हृदयान्यपीडयत्।

कतिपयक्षणानन्तरं मिथिलेश्वरेण प्रहारवर्मणा काशिराजेन कामपालेन शत्रोर्बन्ध-

नाच्च विमुक्तेन चम्पेश्वरेण सिंहवर्मणा सह धनमित्रस्तत्र समुपस्थितो बभूव।

परस्परं सञ्जाते परिचये स्नेहसम्भाषणे च प्रवृत्ते राजवाहनस्त्रीनपि वयोवृद्धान् नरपतीन् सम्मान्यानभिननन्द । तेऽपि हर्षकम्पितगात्रैः राजवाहनमुपगूह्य स्नेहाशीर्वादैस्तमभिषिसिञ्चुः । अथ मन्त्रपरामर्शैस्तैः निर्णीतम् -

"त्वरितमेव मालवजनपदमाक्रम्योज्जयिनी हस्तवशवर्तिनी कर्तव्या । तदनन्तरं मगधजनपदोऽपि शत्रुभ्यो विमुक्तः करणीयः । सम्प्रति महाराजो राजहंसो राजसिंहासने प्रतिष्ठापनीयः ।

अथ चम्पेश्वरेण सर्वे राजानः कुमाराः सुहृदश्च राजभवने निमन्त्रिताः । सर्वानपि सम्मान्यानतिथीन् ससम्मानं सत्कृत्य निवासाय समुचितः प्रबन्धो विहितः ।

शिष्टाचारपरम्परासु समापादितासु सर्वे कुमाराः प्रकोष्ठ एकस्मिन् समवेताः सन्तः परस्परं स्नेहालापगोष्ठीषु हर्षमनुभवन्तः स्वकार्याण्यनुभवांश्चाऽवर्णयन् । राजवाहनेन ससोमदत्तपुष्पोद्भवचरितं निजवृत्तान्तं संक्षेपेण वर्णितम् । तदनन्तरं शेषाणि मित्राणि राजवाहनेनाऽनुरोधितानि निजनिजवृत्तान्तान् वर्णयामासुः । प्रथमं तावदपहारवर्मा स्वकीयाननुभवानेवं कथयामास ।

# सप्तमी–पीठिका

## अपहारवर्मा

# सप्तमी-पीठिका

## अपहारवर्मा

कुमार ! तस्मिन् समये सायन्तने चिरं भवन्तमन्विषन्तो वयं परमलभमाना: हृदयविदारिर्णीं व्यथामनुभवन्तो वयस्या: निरुपाया: बभूविम। तदनन्तरं परस्परं विचार्य निर्णयोऽस्माभि: कृतो यत् कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां तिथौ उज्जयिन्यां शिप्रातटे महाकालमन्दिरे सम्मिलितव्यम्। तदनुसृत्य भवत: संस्थितिं परिमार्गमाणैरस्माभि: सर्वासु दिक्षु प्रस्थितम्।

मया पूर्वा दिगवलम्बिता। परिभ्रमन्नहमङ्गजनपदमगच्छम्। तस्य जनपदस्य राजधानी चम्पानगरी विद्याया: शौर्यस्य व्यापारस्योद्योगानाञ्च परमं निधानं वर्तते। भागीरथीतटे समवस्थितां भागीरथीसलिलस्पर्शपावनीकृतां नगरीमवलोक्य परमानन्दं भजमानोऽहं कृतकृत्यमिवाऽऽत्मानं मेने।

भवत: स्थितिज्ञानं मम परमोद्देश्योऽवर्तत। चम्पानगरीं प्रविष्टस्तत्रत्यैर्जनै रह-मवबोधित: -

"अत्र राजधान्या: बाह्यप्रदेशेषु भागीरथीतीरे मरीचिनाम्नो मुने: पावनमाश्रमपदं वर्तते। असौ महान् मुनिर्भूतभविष्यद्वर्तमानानां त्रयाणामपि कालानां चतुर्दशभुवनवृत्तान्ता-नाञ्च ज्ञाता ज्ञानराशिर्वर्तते। स एव मां भर्तु: स्थितिं परिचाययिष्यति।"

इति श्रुत्वा परिकल्प्य चाऽहं तत्राऽऽश्रमं प्राविशम्। अतिविस्तारविस्तीर्णमपि तत् तपोवनं शून्यमिव प्रतिभाति स्म। न कोऽपि जनस्तत्र समदृश्यत। चिरं भ्रमन् ज्ञानचक्षुषा च समवलोकयन्नहं सहसा भागीरथीजलधारानिकटे पुरातनं जीर्णं चूतपादपमवालोकयम्। समीपमुपगम्य मया दृष्टम् -

कश्चित् तपस्वी तत्र दृश्यते। चिन्तयोद्वेगेन च तस्य मुखं कान्तिहीनं ग्लानं म्लानञ्च वर्तते। समीपमागम्य आतिथ्येन सञ्जातसाहस: सत्कृतोऽहं तं तपस्विनं पप्रच्छ-

"भगवन् ! श्रुतं मयाऽत्र तपोवने मरीचिर्नाम मुनिस्त्रिकालज्ञो भुवि विश्रुतो विद्यते। सर्वविद्यासु पारङ्गतोऽसौ तप:सामर्थ्येन सर्वमपि भुवनवृत्तं ज्ञातुं क्षम:। अस्ति मम मित्रं कुमारो राजवाहन:। स च केनाऽपि हेतुना मत्त: पृथग्भूय कुत्रचिदविदितदेशं गत:। तस्याऽन्वेषणाय यत्र तत्र परिभ्रमन्नहं तस्य गतिमजानन् विज्ञातुमिच्छामि।"

उष्णं दीर्घञ्च नि:श्वस्य औदासीन्येनाऽसावुदतरत् -

"आयुष्मन् ! एतद्गुणविशिष्ट आसीत् कश्चित् तपोधन:। स चाऽत्र निवसति

स्म। परमद्य नाऽसावत्र विद्यते।"

साग्रहं पुनः पुनः निवेदितो मयाऽसौ तपोनिधिर्मरीचिवृत्तान्तमेवं जगाद -

अस्ति चम्पायां काममञ्जरीति नाम्नी वाराङ्गना। सौन्दर्येण लावण्येन नारीसुलभमृदुलतादिगुणसमूहेन च देवाङ्गनासु दिव्यसौन्दर्यविभूषितासु लज्जातिरस्कृति-भावाञ्जनयन्ती सा एकेनैव तिर्यग्वीक्षणेन महातपस्विनां संयमगर्वितानां पुरुषाणामपि मनसामुद्वेजने क्षमा वर्तते।

एकस्मिन् दिवसे भुवनभास्करे भास्करेऽस्ताचलोन्मुखे सति वारुणीव वारुणीदिशि लोहितायति सा काममञ्जरी त्वरितगत्या धावन्ती मरीचितपोवनं समागत्य महर्षेश्चरणयोर्निपतिता। नयनाभ्यां निस्सरन्तोऽश्रुबिन्दवः कपोलाभ्यां प्रवहन्तः कनककलशनिभौ पयोधरावार्द्रीकुर्वन्तो भुवि विकीर्यमाणाः बभूवुः। मसृणैर्दीर्घैश्च कुन्तलैरधो विप्रकीर्णैर्महर्षेश्चरणावाच्छादितौ। विस्मयविमूढमानसो महर्षिर्यदैव पश्चात् पदं न्यदधात् तयाऽश्रुक्लिन्नं वदनमुन्नामितम्। महर्षिरपश्यत् -

"श्यामलेषु मेघेषु परिपूर्णमण्डलो नक्षत्रपतिः प्रकाशते। काममञ्जर्या आरक्ते विलोचने विषादनैराश्यभावैराच्छन्ने अवर्तेताम्।"

दृश्यमिदं विलोक्य चकितचकिते मुनौ किञ्चिदभिधातुं समुद्यते काममञ्जर्याः जननी वृद्धयैकया दास्या सह तरसा धावन्ती समुपतस्थौ। मुनिमुपगम्य चरणयोश्च शिरो निधाय सा तारस्वरेण चुक्रोश। मधुरवचनैस्तां समाश्वास्य मुनिः क्रन्दनहेतुं पप्रच्छ। साऽभ्यदधात् -

"भगवन्! मम सुतेयं काममञ्जरी गणिकाजनोचितैर्गुणैर्विद्याभिश्च मया सप्रयासं चिरं शिक्षिता। चतुःषष्टिकलासु शिक्षितेयं काममञ्जरी लौकिकेषु व्यावहारिकेषु ज्ञानेषु परमप्रवीणा। समृद्धिशालिभ्यो रूपयौवनलोभिभ्यो ग्राहकेभ्यो धनाकुञ्चनमियं सम्यग्जानाति। रूपयौवनसम्पत्समृद्धेऽस्मिन् वारवेशे संस्थिते मधुरव्यवहारशालिन्यस्माकं गेहे विकसितकमलसमूहे भ्रमराणामिव रसिकहृदयजनानां सम्मेलनं सदैवाऽवलोक्यते।

परन्त्वद्येयं वारवेशजनविरुद्धव्यवहाराचरणे प्रवृत्ता। एषु दिवसेष्वियमेकस्मिन् धनहीने जनेऽनुरक्ता तमेव चिन्तयति। अपरतश्च पिटिकायामपरः प्रस्फोटः समजनि। इयं तस्मै प्रभूतं धनमप्यर्पयति। मया सततं वर्जिता तर्जिता भर्त्सिता चेयं वेश्याजनोचितधर्मपरिपालनायोपदिष्टा। परमनया सकरुणरुदनक्रन्दनैर्गृहमापूरितम्। ततोऽभ्यधिकमुपदिष्टा गृहं परित्यज्य तरसा धावन्ती भवदाश्रमं प्रविष्टा। भवांस्तपस्वी महर्षिः सांसारिकविषयेष्वनासक्तः। भवानेवैनां काममञ्जरीं समवबोधयतु गृहं प्रति च निवर्तनाय समादिशतु।"

इति कथयित्वा सा काममञ्जरीजननी पुनस्तस्य महर्षेश्चरणयोर्न्यपतत्।

मुनिर्मरीचिः काममञ्जरीं बहुशः समवाबोधयत्। तादृशी कोमलाङ्गी नार्हति तपोवननिवासाय। बहुकष्टकरमेतत्। तया जनन्या सह निजगृहं गन्तव्यम्। कुलपरम्परागतधर्मः परिपालनीयः। परन्तु विषादवैराग्यभावपूर्णहृदया सा रूपयौवनशालिनी परहृदयमोषिका काममञ्जरी मुनेरुपदेशानमान्यान् कुर्वाणा कथयामास -

"सा प्राणांस्त्यक्ष्यति परं वेश्यावृत्तिं साम्प्रतं नाङ्गीकरिष्यति। साऽत्रैव तपोवने व्रतमाचरन्ती निवत्स्यति। वारवेशगृहं पापपङ्कमलिनं न गमिष्यति। सा तु सत्यमार्गस्य कल्याणपथस्य साधिकाऽत्रैव तपोवने यमनियमान् पालयन्ती पारलौकिकसुखाभिलाषिणी वर्तति।"

काममञ्जर्याः दृढनिश्चयं वैराग्यभावञ्चाऽवलोक्य मुनिस्तस्याः मातरमुवाचं -

"भद्रे ! साम्प्रतं भवत्या स्वगृहं गन्तव्यम्। प्रतीक्षस्व कतिपयदिवसं यावदियं ते सुता मृदुलाङ्गी तरुणी तपोवनसुलभकष्टानां पालने न क्षमा भवति। बाल्यादेव सुखभोगसमासक्ता तपोवनजीवनकठिनपद्धतिपालनमसहमाना स्वयमेव निजगृहं प्रत्यागमिष्यति।"

मुनेरुचितानि वचनानि सम्मान्य काममंजर्याः गणिकायाः प्रसवयित्री सेविकया सह स्वभवनं जगाम। तदाऽऽरभ्य सा मृदुलगात्री काममञ्जरी विलासगृहसुखभोगान् परित्यज्य तपसि स्थिता सर्वाणि कार्याण्याश्रमस्य साधयन्ती मरीचेः सकाशादध्यात्मचर्चासु निमग्ना परमात्मानं सोत्साहसमुपास्ते स्म। तस्यास्तपसा सेवया देवार्चनेन तपोवनकार्यसाधनेन च परमप्रभावितो मुनिस्तस्यां सस्नेहं प्रसन्नो बभूव। जनरहिते तपोवनस्यैकान्तेऽसौ प्रतिदिनं तां वाराङ्गनामध्यात्मविद्यायाः पाठानपाठयत्। एवञ्च ब्रह्मविद्याविषयिकासु, चर्चासु तस्याः काममञ्जर्या रुचिः सततं ववृधे।

अथैकस्मिन् दिवसे सर्वतो जनरहिते तपोवने कुटीरस्थितस्य महर्षेश्चरणयोः प्रणम्य सा काममञ्जरी तस्य सन्निकटमुपाविशत्। मुनेर्मुखं सुनिपुणं क्षणं निरीक्ष्य कमलनालसुकोमलाभ्यामरुणाभकरतलाभ्यां सा तस्य तपश्चरणखर्खरायितकठोरचरणौ संवाहयामास। तदनन्तरं समुन्नतमुन्मुखीभूय सा प्रोवाच -

"भगवन् ! भवता धर्ममोक्षयोरुपदेशाः बहुधोपदिष्टाः। तेषाञ्च विस्तरेण व्याख्याऽपि विहिता। रहस्यानि चोद्घाटितानि। परमस्माकं शास्त्रेषु धर्मार्थकाममोक्षा इति चत्वारः पुरुषार्था उपदिश्यन्ते। तत्र प्रथमपुरुषार्थो धर्मश्चरमश्च मोक्षः। धर्ममोक्षयोः रहस्यं विस्तरेण भवदुपदिष्टं मया विदितम्। परं मध्यवर्तिनावर्थकामौ किं मानवजीवने निरर्थकावेव प्राचीनैर्महर्षिभिरुपदिष्टौ? भवाननयोर्द्वयोरपि पुरुषार्थयोरर्थकामयोर्व्याख्यानं करोतु। विद्यानां सर्वासां भवान् ज्ञाता पारङ्गतः।"

महर्षिणा प्रोक्तम् -

"भद्रे! धर्मशास्त्रेषु धर्मार्थकाममोक्षाणामिति चतुर्ण्णां पुरुषार्थानां मनीषिभिर्व्याख्यानं कृतम्। परन्तु तत्र धर्ममोक्षयोः प्राधान्यम्। मुनिजनाः अर्थं कामञ्च परित्यज्य धर्ममोक्षयोः साधनायै वनानि गत्वा तपश्चरन्ति। पारलौकिकसुखं धर्ममोक्षसाधनेनैव लभ्यते। सांसारिकभोगासक्तानामर्थकामपराणां जनानां विषयाभिलाषिणां सत्यं सुखं विनश्यति शान्तिश्च पराभूयते। अतस्त्वमप्यर्थकामविषयिकां वार्तां परित्यज्य धर्ममोक्षसाधनमार्गमवलम्बस्व।"

परन्तु काममञ्जरी मुनिवचान्यमान्यानि कृत्वा मरीचिं तिर्यग्वीक्षणेन विलोक्य स्मितविभूषिताभ्यामोष्ठाभ्यामुवाच -

"भगवन्! सत्यं तथ्यञ्चाऽभिधीयते भवता। परमर्थं कामञ्च विना धर्ममोक्षावपि साधयितुं न शक्येते। इत्येवाऽहं मन्ये। अतः प्रार्थयेऽहं भवन्तम् - उपदिशतु भवान् अर्थकामावपि। विद्वत्सु बुद्धिमत्सु च भवान् मम गुरुरहञ्च भवतः प्रिया शिष्या। अथ चाऽन्तेवासिनी। भवानेव मे शरणम्। शरणागतस्य रक्षा सर्वैः करणीया।"

मरीचिरसौ मुनिः पुनः धर्ममोक्षव्रतपालनमेव श्रेयस्करं मन्यमानः काममञ्जर्यै तथैवोपदिदेश। परं सा पुनः अर्थकामयोरुपदेशेभ्योऽनुरुरोध। स्त्रियस्तु स्वभावतो दुराग्रहशालिन्यो भवन्ति, पुनः गणिकाजनस्य तु किं कथनम्। लज्जामभिनयन्ती सा पुनः करावायोज्य बद्धाञ्जलिर्मन्दस्निग्धस्वरेणोवाच -

"भगवन्! धृष्टतां दुराग्रहञ्च मम क्षमताम्। अर्थं विना न कस्याऽपि कार्यस्य सिद्धिर्भवत्यस्मिंल्लोके। धर्मसाधनायै ये यज्ञतपोदानादयः कर्मकाण्डाः विधीयन्ते तेऽपि धनविरहितस्य जनस्य न सिध्यन्ति। तपोवने निवसन्तो मुनिजनाः धनविरहिताः जीवनधारणमपि कर्तुं न क्षमाः। कार्याणामुद्योगानाञ्च सर्वेषामारम्भोऽर्थेनैव भवति। अर्थमूला आरम्भाः सर्वे। अतो धर्मपालनायाऽर्थोपार्जनं येन केनाऽपि प्रकारेण क्रियमाणं समुचितमेव। न च तन्निन्दनीयम्।

लोके कामपुरुषार्थस्याऽप्यनिवार्यत्वं सिद्धमेव। प्रजापतेर्ब्रह्मणो मनसि कामोऽजायत। एकोऽहं बहु स्यां प्रजायेयेति। तदैव सृष्टिरियं समुत्पन्ना। वेदेषु पुराणेष्वन्येषु च धर्मशास्त्रेषु कामस्याऽभावे सृष्टिशून्यत्वमेव प्रसिद्धम्। लोकानां स्रष्टा प्रजापतिर्ब्रह्मा निजां सुतामेव कामयमानः प्रणयं ययाचे। मन्मथदहनशीलेन कामारिणा शिवेन संख्यातीतानां मुनिकन्यकानां हृदयेषु मन्मथभावना समुत्पादिता। इन्द्रवायुबृहस्पति-सूर्यचन्द्रादयो देवा अपि कामस्याऽऽधीनताङ्गताः। पराशरव्यासात्रिविश्वामित्रादयो महर्षयोऽपि कामाभिभूताः बभूवुः। कामपुरुषार्थं संसाध्याऽपि ते भुवनेऽस्मिन् वन्दनीयाः सन्त आदरास्पदतां जग्मुः। अतः कामस्याऽनिवार्यत्वं मानवजीवनेऽस्ति निश्चयेन। नाऽस्य निन्दा करणीया।

सकलं ब्रह्माण्डं परमप्रभुः ससर्ज। धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः वेदादिशास्त्रसम्मताः प्रभुणा समुत्पादिताः। इत्थं परमात्मना समुत्पादितौ प्रेरितौ चाऽर्थकामौ धर्ममोक्षविरुद्धौ न वर्तेते। तत्त्वदर्शिनोऽपि ऋषयः कामाभिभूताः गृहस्थधर्मं परिपालयन्तो विषयभोगासक्ताः पुत्रवन्तो बभूवुः। अतः कुत्र तत्र पापस्य सम्भावना। न च ते ऋषयो धर्मविरुद्धाः लोके कथ्यन्ते ज्ञायन्ते च। तपःपूतेष्वन्तःकरणेषु यथा रजस्तमोगुणौ नोत्पद्येते तथा संयमशीलैस्तपोधनैरुपभुक्तो विषयाणां भोगः सात्विक एव न च धर्मविरुद्धः।"

इत्थमर्थकामयोरनिवार्यत्वं धर्मानुकूलत्वं महत्त्वञ्च प्रतिपाद्य सा काममञ्जरी स्मितविभूषितरदनच्छदा मुखमुत्तोल्य मनोहरेण रमणीयेन विमोहकेन च कटाक्षेण मरीचिं प्रजहार। बिम्बफलारक्तयोरोष्ठयोर्मध्ये विराजमाना शुभ्रदन्तपङ्क्तिः प्रवालमणि-मध्यजटितमुक्तावलिरिव चकाशे।

काममंजर्याः गणिकाया एभिर्वचनैर्भुवनमोहकैः कामोत्तेजकैर्हावभावैश्च तस्य वराकस्य मरीचेर्महर्षेः संयमबन्धनं वर्षर्तौ सम्प्लवेन सेतुबन्धनमिव प्रवाहितम्। अनङ्गोऽपि कामोऽङ्गिनां पराभवे समर्थः। कामः कं न जयति? वराकोऽसौ महर्षिः साभिलाषेण कामातुरेण चक्षुषा तां व्यभिचारिणीं निरीक्षाञ्चक्रे। काममञ्जरी चाऽपि सततं सेवया तस्य वराकस्य तपस्विनो हृदयं हृत्वा प्रसभं वासनाजन्यविषयोप-भोगाभिलाषमुद्दीपयामास। अथ तां प्रज्ज्वलन्तीं रूपशिखां निश्चलानिमेषनयना-भ्यामीक्षमाणोऽसौ मुनिः प्रस्खलद्गद्गदवाचा जगाद –

"सुन्दरि ! सत्यं तथ्यञ्चाऽभिदधाति भवती। अर्थकामरहितौ धर्ममोक्षौ निष्फलावेव। अर्थं विना जनानां लोके कान्यपि कार्याणि न सिध्यन्ति। कामं विना न सृष्टिरपि संसरति। विषयोपभोगस्तु धर्मतत्त्वदर्शिणां मनस्विनामपि सम्मतम्। अत एव पुरातनैः ऋषिभिर्धर्मार्थकाममोक्षा इति चत्वारः पुरुषार्था उपदिष्टाः। धर्ममनुरुध्यार्थोपार्जनं कर्तव्यम्। ततः कामः प्रजायते। कामपूर्त्यनन्तरं सन्तृप्त-सकलकायेन्द्रियमनोऽभिलाषो जनो मोक्षस्याऽधिकारी भवति। अत एव चतुर्णां पुरुषार्थानां साधनाय ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासानाञ्चतुर्णामाश्रमाणां विधानमृषिभिः सम्पादितम्।

प्रथमं तावद् ब्रह्मचर्याश्रमे धर्मानुसारिणी धनोपार्जनयोग्यता सम्पादनीया। तदनन्तरं कामपि सुरूपां नवयौवनशालिनीं सदाचारिणीं व्यवहारकुशलां कन्यां पाणिग्रहणसंस्कारविधिना गृहमानीय गृहस्थाश्रमे धनोपार्जनेन सह विलासमयसुखभोगाः भोक्तव्याः। कृषिः पशुपालनं वाणिज्यमुद्योगाश्चादयो धनोपार्जनसाधनहेतवो वर्तन्ते। रमणीया प्रकृतिरेव विषयोपभोगकामनां पूरयति। सकलकामनानामेव फलमेतत्।

सुखान्यधिगन्तुं यौवनमापन्नो जन: कान् कान् प्रयासान् न करोति। कानि कानि दु:खान्यसौ न सहते? स सततं प्रयतते। असमयेऽपि कार्येषु प्रसज्यते। धनं सौन्दर्यञ्च स्वायत्तीकर्तुं मनुष्या: प्राणघातकेषु युद्धेषु प्राणान् हरन्ति, यज्ञादिपुण्यकार्याणि कुर्वन्ति, तपश्चरन्ति दानं वा वितरन्ति। परन्तु........परन्तु........अहं तु.........अहं तु...... इति।"

महर्षेर्मरीचेस्तत: किमपि वक्तुं वागवरुद्धा, श्वासगतिस्तीव्रतां प्रपेदे, भालपट्टं मुक्ताफलसमनिर्मलस्वेदबिन्दुभिश्चर्चितम्, सकलञ्च वपु: वेपथुना गृहीतम्। मुनेस्तादृशीं कामावस्थां विलोक्य सा धूर्ता काममञ्जरी काममयी कपटपरिपूर्णस्मितमोष्ठयोरानीय नयनयोर्नयने निक्षिप्य प्रोवाच -

"महर्षे! भवान् किमपि दु:खं वा कष्टं वा ग्लानिं वा मनसि न दधातु नाऽनुभवतु। अद्यावधि धर्ममनुरुध्य मोक्षमार्ग एव भवताऽवलम्बित:। मध्यस्थौ द्वौ मार्गो ह्यर्थकामौ परित्यक्तौ। अत एव भवान् हृदये स्वात्मनि वा ग्लानिमशान्तिं वाऽनुभवति। अपरिपूर्णमात्मानं मन्यते। लक्ष्यञ्चाऽपि सुदूरं लक्ष्यते। भवांस्तु परमज्ञानसम्पन्न: सिद्धो महात्मा। अहमज्ञानस्य निधि: पातकानां राशि: पापपङ्कगर्ते निमग्ना गणिका सर्वजनभोग्या व्यभिचारिणी नारी। परमर्थकामसाधने भवतो ध्रुवं सहायिका भविष्यामि। भवतोऽहमन्तेवासिनी प्रियशिष्या धर्मसाधिका वर्ते। शिष्यभावेन भवान्मामङ्गीकरोतु। धर्ममोक्षतत्त्वज्ञानाकाङ्क्षिणी प्रार्थयेऽहं भवन्तमर्थकामसाधने मम साहाय्यं शुल्करूपेण स्वीकरोतु भवान्।"

इति कथयित्वा सा काममञ्जरी पुन: शिरोऽवनमय्य कमलदलारुणकोमलवदनं कपोलाधरसहितं मुनेश्चरणयोर्निदधौ।

नवयौवनाढ्यां रूपलावण्यसम्पत्समृद्धां मधुरभाषिणीं कामं याचमानां कामिनीं सोढुं क: क्षमते? काममञ्जर्यास्तानि मधुरभावजनकानि परमन्त:गरलगर्भितानि वचांसि श्रुत्वा चरणयो: कोमलारुणकपोलाधरस्पर्शेण च मुनेस्तप:पूतमपि सकलं वपुर्भूकम्पेन धरातलमिवाऽतितरां चकम्पे। मनसि समुद्वर्तमानेन वातावर्तेनेव कामावेगेन समुन्मथ्यमानोऽसौ सहसोत्थायाऽचलो निष्कम्प: स्थित:।

परं सा काममञ्जरी विपदां बृहत्पेटिका तमेवाऽवसरं प्रयोजकं लब्ध्वा मरीचे: शरीरं मृदुलाकाशवल्लरी सुदृढोत्तुङ्गपादपमिव समाशिश्लेष। स्वकीयान्यङ्गानि तया तपोधनस्याऽङ्गेषु सुदृढं सुघटितं सुघनिष्ठं समावेशितानि। सव्येतरभुजविटपेन मुने: शिराजालततं कठोरकण्ठमाभूष्य वामभुजेन सा कटिं समाचकर्ष। तदनन्तरं द्वाभ्यां कोमलाभ्यामप्यन्त:शक्तिसम्पन्नाभ्यां बाहुभ्यां वक्षसि दृढं सम्पीड्य सुकोमलावपि सुकठिनौ पयोधरचूचुकौ तस्य वक्षसि कीलयित्वा मुखमुन्नमितम्। ततोऽपि न विरम्य

सा साहसिका मुनेः स्पन्दमानयोरोष्ठयोः स्ववेपमानावोष्ठौ सन्निधाय तस्याधरं मुक्ताफलसमनिर्मलशुभ्रैर्निशितैः रदैः शनैर्ददंश।

स वराकोऽसहायो मुनिः किमपि प्रतिकर्तुमसमर्थस्तस्याः वाराङ्गनायाः कामपाशे निबद्धो वासनागर्ते निमग्नः। तस्याऽऽजीवनमर्जिता तपस्या वा कीर्तिर्वा साधना वा तस्याः दुराचारिण्याः काममञ्जर्याः स्पर्शसमुद्दीपितकामानले दीपशिखायां पतङ्गपङ्क्तिरिव सुदीर्घा भस्मीभूता।

तदारभ्य महातपस्वी जितेन्द्रियो मरीचिः काममञ्जरीमेव पश्यति स्म, तामेव शृणोति स्म, तामेव च कामयते स्म। सैव तस्य हृदयस्य सारसर्वस्वं बभूव। तां विना न किञ्चिदन्यत्तस्मै रुरुचे न च किञ्चिच्चिचेत। एवञ्च विलासमयभोगमयजीवनं जीवतस्तस्य सप्तदिवसानामवधिर्व्यतीतः। बाल्यादेव तपःसाधनायां रतस्य तस्य तपस्विनोऽयमनुभवोऽचिन्तनीयोऽनुपमश्चाऽऽसीत्।

अष्टमे दिवसे सुप्रभाते सूर्योदयात् प्रागेव मन्दालोके मन्दाकिन्यां स्नात्वाऽन्येभ्यश्च कृत्येभ्यो निर्वृता श्वेतवसनपरिधाना पवित्राचरणा साध्वीव सा वाराङ्गना काममञ्जरी मरीचिमुपगम्य चरणयोः प्रणम्य करावायोज्य बद्धाञ्जलिर्वदनमवनमय्य विनम्रमधुरवचोभिर्वक्तुमारेभे -

"महर्षे ! कामपथमवलम्बतो भवतः सप्त दिनानि व्यतीतानि। आनन्दमयो रससम्भृतो नवीनोऽनुभवो भवताऽनुभूतः। कामशास्त्रस्य व्यावहारिकज्ञानमपि शिक्षितम्। तथाऽपि बहु अन्यच्छिक्षणीयम्। अर्थशास्त्रस्याऽप्यध्ययनं करणीयम्। अद्य कामोत्सवदिवसः। सायंसमये कामदेवस्य मन्मथस्य मन्दिरे पूजनोत्सवो महता समारोहेण सम्पत्स्यते। तत्र नगरस्य सर्वोऽपि महिलाजनः कामदेवपूजनाय समवेतो भविष्यति। रसिकजनानां सहृदयानामपि तत्राऽऽगमनमनिवार्यरूपेण भविष्यति। भवताऽपि तत्र गत्वा मया सह कामदेवपूजनं विधेयम्।"

काममञ्जर्याः वचनानि तस्मै तपोधनाय वेदमन्त्रेभ्योऽपि प्रामाणिकान्यासन्। न जाने कथं कुतोऽपि पुरुषाकारप्रमाणोत्तुङ्गाभ्यां श्यामकर्णाभ्यां शुभ्रवर्णाभ्यां द्वाभ्यां हयाभ्यां वाह्यमानो विविधैरलङ्कारैरलङ्कृतः साजसज्जासमन्वितः स्यन्दनस्तत्र आविर्बभूव। अनावृतछदिषं तं स्यन्दनमधिरुह्य गणिकया सहोपविष्टो नगरे सर्वैः प्रजाजनैः सकुतूहलं समवलोक्यमानोऽसौ तपस्वी मरीचिः काममञ्जर्याः गृहमाजगाम।

गणिकागृहस्य द्वारदेशे काममञ्जर्याः प्रसवयित्री मुनिसहितां स्वसुतामभिनन्दितुं समुपस्थिताऽवर्तत। गृहाभ्यन्तरमानीतोऽसौ मुनिर्मरीचिर्गणिकामातुरादेशेन सविशेषं सत्कृतः।

प्रथमं तावत् क्षौरकर्मणि मुनेः दीर्घपिङ्गलजटानां श्मश्रूणाञ्च राशयो नापितेन

कर्तिता: । तदनन्तरं विलासिजनोचिता: कृष्णकुञ्चितकेशा: प्रसाधिता: । अथ सेविकाभिस्तस्य वपुरनुलेपनै: संलेपितं तैलमर्दनैश्च सुचिक्कणीकृतम्। ततो मलयजकेतकीसुरभित-सलिलैरभिषिक्त: स्नातश्चाऽसौ मुनिर्विविधै: प्रसाधनै: पुष्पालङ्कारैश्च विभूषित:। महार्घसुकोमलक्षौमवसनानि परिधाय स मरीचिर्महर्षिर्भोगविलासेषु निमग्न: समृद्धिशाली तरुण इव प्रतिभाति स्म। एतेषु कार्येष्वेव मध्याह्नसमय: समायात:।

भोजनादिभिर्निर्वृता सा कामरूपिणी काममञ्जरी भोजनसोमरसविश्रमादिभि: सञ्जातमहोत्साहमिव तं मुनिं मरीचिं तथैव सुशोभितेऽनावृतछदिषि स्यन्दने समारोप्य सर्वजनसमक्षं राजपथेन कामदेवमन्दिरं नगरबाह्योपवनसंस्थितं निनाय। तत्र चम्पानगर्या: सर्वासां गणिकानां समाज: समुपस्थितोऽवर्तत। सौन्दर्यस्य सागर इव समुल्ललास। तासां वारवनितानां मध्ये विहस्य विहस्य सा काममञ्जरी मरीचिं परिचाययन्ती तेनैव सार्द्धं मन्मथपूजनं समापादयत्। तदनन्तरं सा तेन मुनिना सह राजसभां जगाम।

राजसभायां कामोत्सवस्य महता समारोहेण समायोजनव्यवस्थाऽवर्तत। राजसिंहासनमङ्गाधिपतिना चम्पेश्वरेण सिंहवर्मणाऽधिष्ठितमतितरामशोभत। मन्त्रिण: सभ्यजनाश्च नागरिका: स्वकीयेष्वासनेषु विराजन्ते स्म। बहुमूल्यसुरुचिपूर्णवसन-प्रसाधनाभरणै: सुभूषिता: वारवनितास्तत्र नृत्यन्ति स्म।

दक्षिणपार्श्वस्थं मरीचिमानयन्ती सा कपटखनी गणिका काममञ्जरी शनै: शनै: राजसभामध्ये मार्गे प्रसारिते श्लक्ष्णस्थूलमृदुवस्त्रावरणप्रच्छदे पदानि निदधती राजसिंहासनमुपगम्य सविनयं शिरोऽवनमय्य राजानं सस्मितं सविलासं प्रणनाम। नरपतिरपि समीपस्थितां महार्घां सुभूषितां पीठिकामुपवेशने नाऽलङ्‌र्तुं तां सङ्केतयामास। मरीचिना सह सा तत्रोपाविशत्।

तस्मिन्नेव काले नृत्यन्तीनां वाराङ्गनानां काचिदेका लावण्यराशिरिव सौन्दर्येण सर्वेषां हृदयानि प्रकम्पयन्ती राजसमक्षं समागत्य प्रणम्य सगद्गदमुवाच -

"राजन्! काममञ्जरीविजयं स्वपराजयञ्चाऽहमङ्गीकरोमि। विजिताऽहमनया। सम्प्रत्यहमस्या: सेविकाभावं दास्यमपि स्वीकरोमि।"

कथयत्यामेवं तस्यां राजसभायां समुपस्थिता: सर्वे जना: साट्टहासं जहसु:। सर्वत: प्रहर्षसूचका: करतलध्वनय: समश्रूयन्त। प्रसन्नेन नरपतिना काममञ्जर्यै महार्घाणि रत्नजटितान्याभरणानि कौशेयवसनानि चोपहृतानि। तदैव सा पूर्वोक्ता नृत्याङ्गना समीपमागत्य काममञ्जर्याश्चरणौ संस्पृश्य मनोरममृदुलबिम्बाधरे स्मितमभिनीय मरीचिं विस्मृतनिमेषनयनाभ्यामीक्षाञ्चक्रे।

सायन्तने समयेऽस्ताचलोन्मुखीभूते च भगवतिं सवितरि निशारम्भे कामदेवोत्सव-

समापनस्य राजकीया घोषणा बभूव। महाराजः सिंहवर्मा राजसिंहासनादुत्थाय राजभवनं गतः। मन्त्रिणोऽन्ये चाऽऽमन्त्रिताः जना अपि सभाभवनान्निर्गत्य स्वकीयेभ्यो भवनेभ्यः प्रस्थिताः। सर्वाः गणिकाः काममञ्जरीं तञ्च विलासिजनोचितवेशधारिणं मरीचिं परिवार्य तां वर्धापनैरभिनन्दनैश्च वर्धयामासुः। तान्यभिनन्दनान्यङ्गीकुर्वन्ती हसन्ती स्मयमाना सा दुराचारिणी कपटकोषा रूपाजीवा गणिका काममञ्जरी मुनेः सुकठोरशिराजालग्रथितदक्षिणकरं कमलदलमृदुलवामकरतलेनाऽवलम्ब्य स्यन्दनमारुह्य निजगृहमागम्य भवनस्य बाह्योद्याने संस्थिता तं मुनिमुवाच -

"भगवन् ! मम कार्यस्य सिद्धिः सञ्जाता। भवदनुग्रहाय कृतज्ञतामनुभवामि। सहस्रशो धन्यवादाः। साम्प्रतं भवता निजाश्रमाय प्रस्थातव्यम् स्वकार्यञ्च निर्वहणीयम्।"

स तु मरीचिर्महर्षिर्बज्रपाततुल्यानि वेश्यावचनानि श्रुत्वा बज्राहत इव निश्चलो निस्तब्धश्च तस्थौ। कतिपयक्षणपर्यन्तमसौ मुखादेकस्याऽपि शब्दस्य समुच्चारणे न समर्थो बभूव। परं कथमपि संस्तभ्याऽऽत्मानं सगद्गदकण्ठं प्रोवाच -

"प्रिये ! किमिदं कथयसि त्वम् ? क्व गतस्तव तादृशः सततं प्रवर्धमानोऽनुरागः? अर्थं कामञ्च व्यावहारिकरूपेण शिक्षयितुं त्वं मामिहाऽऽनिनाय। त्वं ममाऽन्तेवासिनी प्रियशिष्या बभूव। सम्प्रत्यौदासीन्यमिदमवहेलना च कस्मात्कारणात् ?"

सा दुष्टा काममञ्जरी मायामयी कपटपरायणा छलपूर्णस्मितसुशोभितमधरं किञ्चित् तिर्यक्कृत्य प्रोवाच -

"भगवन् ! सत्यं तथ्यं च रहस्यमुद्घाट्यते मया। अस्त्यत्र वेशवाटे कन्दपरिखा-भिधाना लावण्यवती सौन्दर्यसमुज्ज्वला प्रमदा वाराङ्गनाऽनङ्गलेखेव शोभते। राजसभायां मया पराजिता सा दासीभावं स्वीचकार। एकस्मिन् समये नृत्यगोष्ठीषु नृत्यत्यतोरावयोर्विवादः समजायत। मया प्रोक्तम् -

"गणिकाजनः कस्याऽपि पुरुषस्य हृदयस्य वशीकरणे समर्थः।"

कन्दपरिखा तु मम वचनानि तिरस्कृत्य प्रोवाच -

"त्वया तु तथा गर्वितं यथा मरीचिमुनिरेव वशीकृतो भवेत्।"

तदनन्तरं राजसमक्षमेव पणबन्धो बभूव। मरीचिमुनिवशीकरणे मे जयस्तस्याश्च पराजयः। विपरीते तु मम पराजयस्तस्याश्व विजयः। पराजिता गणिका विजयिन्याः गणिकायाः दासीभावमङ्गीकरिष्यति। राजा राजसभासदश्च मन्त्रिणश्चाऽत्र प्रमाणम्। अद्य भवत्प्रसादान्मया पणबन्धं विजित्य सा कन्दपरिखा दासीकृता।"

काममञ्जरीविरक्तिरहस्यवृत्तान्तमवगम्य दुर्मतिशालिनस्तस्य मरीचेः सकलो बन्धकीजनितविलासभूतावशेषस्तत्क्षणं व्यलुपत्। मर्मणि व्याहतोऽनुशयसन्ताप-संदग्धचित्तोऽसौ मुनिः पुनः स्वतपोवनमायातः। खण्डिततपोव्रतोऽसौ कठोरतमे तपसि

स्थितस्ततापाऽऽत्मानम्।

अपहारवर्मा निजवृत्तान्तं श्रावयन् विस्मयाविष्टचेतसामेकाग्रमनसां कथारसपाननिमग्नानां कुमाराणामन्येषाञ्च स्नेहशीलानां जनानां समक्षं क्षणं विरम्य पुनः निजवृत्तं वर्णयितुमारेभे -

इति निजहृदयसन्तापदशां वर्णयित्वा स मुनिरौदासीन्यवैराग्यभावसम्पूरितलोचनाभ्यां मयि दृष्टिं निपात्य मुखमवनमय्य तूष्णीम्बभूव।

मया प्रोक्तम् -

"हे तपस्विन् ! तावत् किम् ........?"

मां मध्य एवाऽवरुध्याऽसौ तपोधन उदतरत् -

"महाभाग ! मामेव भवांस्तं दुर्बुद्धिमिन्द्रियवशीभूतं कामासक्तं परहृदयानभिज्ञं मरीचिं जानातु। तया दुराचारिण्या बन्धक्या समुचितं शिक्षितोऽहम्। कामाभिभूतो जनः कां दुर्गतिं न लभते? मम तपःसाधना विनष्टा। अहं पुनः सुकठोरं तपस्तप्त्वा इन्द्रियाणि विजित्याऽऽत्मशक्तिसम्पन्नो भवतः प्रश्नानामुत्तराणि कथयितुं समर्थो भविष्यामि। स्वल्पेनैव समयेन सा शक्तिर्मया पुनः प्राप्स्यते। तावत् त्वयाऽस्मिन्नङ्गजनपदे चम्पायां निवासो विधेयः।"

महर्षेर्मरीचेर्हृदयद्रावणं वृत्तान्तं निशम्य विविधैर्भावैः समाक्रान्तं मम मनो विदलितं बभूव। काचिन्नारी कथमेतादृशी कुटिलस्वभावा नृशंसहृदया वञ्चनापरायणा सम्भवति। यदि सा वाराङ्गना गणिका वर्तते, ततः किम्? सा तु प्रथमं नारी सुकोमलं हृदयं सुकोमलवपुषि धारयति। नारी सर्वत्र पूजनीया भवति। तथाऽपि को जानीते नारीजनहृदयम् ? सरलमपि कुटिलं कोमलमपि कठोरं सदयमपि नृशंसं भवति तत्। अहं काममञ्जरीं समुचितं शिक्षयितुं निश्चिकाय। ततश्च चम्पायां प्रवेशस्य निवासस्य च प्रबन्धचिन्तासन्ततिभिराक्रान्तं मम चित्तम्।

एवं चिन्तयत्येव मयि त्रिभुवनचराचरस्वामी जगत्प्राणो महसां भाजनं विश्वमूर्तिः पापविनाशको निःश्रेयसवितरको भगवान् सविताऽस्ताचलशिखरमारुरुक्षुः पश्चिमदिक्क्षितिजं वैराग्यभावसम्भृतजनकाषायवसनमिवाऽऽरक्तमात्मानञ्चकार। महर्षेर्मरीचेर्मनसो म्लानभावेन सह सरसीषु सरसिजानि सञ्चुकुचुः। मुनिना सह सन्ध्योपासनादीनि सायन्तनानि नित्यकर्माणि मया सम्पादितानि। तदनन्तरं सम्प्रवृत्ते निशारम्भेऽवतमसा च व्याप्रियमाणेषु दिगन्तरेषु मया नगरप्रवेशाय प्रस्थितम्।

नगरद्वारबाह्यप्रदेशेषु जैनक्षपणकानां विहारो दृष्टिगोचरो बभूव। तदन्तिकमेव संलग्नतमालतरुवेदिकायामेकस्यां कश्चिन्निरावरणो वसनरहितो जनो हस्तौ पादौ च सङ्कोच्योपाविशत्। समीपं गत्वा मया दृष्टम् -

"कश्चित् क्षपणको जैनमतावलम्बी द्वाभ्यां कराभ्यां मस्तकं गृहीत्वा नयनजलधाराभिर्मुखं वक्षो धरातलञ्चाऽऽर्द्रयन् विवसनो रोदिति।"

स्नेहसान्त्वनासिक्तवचोभिस्तमहमपृच्छम् -

"भद्र! कस्त्वम्? कथं निशायाः प्रथमे यामे जैनविहारनिकटस्थतमालतरुच्छायायां निषण्णो रोदिषि? जैनमतोचिते कठोरे तपसि वर्तमाने नाऽपि त्वयाऽश्रूणि कस्मान्मुच्यन्ते? यदि त्वं मां सहायकं मन्यसे, मे कथनयोग्यञ्च तव रुदनकारणं, सङ्कोचं परित्यज्च कथय। यथाशक्त्या तव सहायो भविष्यामि।"

स तु क्षपणको हस्ततलाभ्यामश्रूणि प्रमार्जयन्नुवाच -

"हे वीरपुरुष! भवानेव तादृशो जनो, य एवं स्नेहसान्त्वनाभरैर्वचोभिर्मम कुशलं पृच्छति। ध्रुवमेवाऽहं निजहृदयव्यथां भवत्समक्षं निवेदयिष्यामि। भवान् मम सहायको भवतु न वा भवतु।"

अथ तेन प्रोक्तम् -

"अस्याञ्चम्पायां निधिपालितो नाम श्रेष्ठी अपरिमितधनसम्पत्तिशाली बभूव। तस्याऽहं सुतो वसुपालितो नाम। कुरूपत्वाद् विरूपकाभिधाने नाऽप्यहं प्रसिद्धो बभूव। कुरूपोऽपि शृङ्गारप्रसाधनरुचिरहं लौकिकविषयेष्वासक्तचेता अवर्ते। पैत्रिकी धनसम्पत्तिस्तत्र मम सहायिकाऽभवत्। अस्यां चम्पानगर्यां सुन्दरको नाम युवा सौन्दर्यगुणसम्पन्नो नाऽतिधनसम्पत्तिसमृद्धः परं कलासु कुशलो विद्यते।

एकदा रसिकजनगोष्ठीषु तेन सह मे विवादः समजायत। तत्र सुन्दरेण प्रोक्तम्-

"जगत्यस्मिन् यौवनोचितसुखभोगेभ्यो नवयौवनेन सह सौन्दर्यमेव प्रधानो हेतुः।"

परं मया प्रोक्तम् -

"अर्थो हि प्रधानस्तस्यैवाऽधिकं महत्त्वम्।"

तदाऽऽवयोर्विवादे कथं निर्णयो भवेत्?

अथ चम्पायां काममञ्जरीति नाम्ना प्रसिद्धा परमनवयौवनलावण्यशालिनी गुणैः रसिकजनहृदयसर्वस्वभूता गणिका निवसति। आवयोर्द्वयोः पणो बभूव -

"काममञ्जर्या ईप्सितो जनो विजयी भविता।"

तदनन्तरमावाभ्यां सा काममञ्जरी निमन्त्रिता। सौन्दर्येण दिगन्तरालान्यापूरयन्ती सा वारवनिता समागत्य मम दक्षिणे जघने समुपविष्टा। स्वकीया भुजवल्लरी वरमालारूपेण तया मे कण्ठे पिनद्धा।

काममञ्जर्याः सौन्दर्येणोन्मादकस्पर्शेण हृदयहारिभिर्विभावैश्चोन्मत्ततताङ्गतं मम चित्तं विजयगर्वेणोल्लासितम्। वाराङ्गनासङ्गेनाऽहं तथोन्मत्ततां गतो यथा मया सा

काममञ्जरी निजगृहेण सह हृन्मनोवपुषां स्वामिनी कृता। प्रायशोऽहं तस्या एव गृहे वसन् प्रतिदिनं स्वर्णादिधनं तस्यै प्रायच्छम्।

एवं प्रतिदिनं विविधविलासैः प्रीणयन्ती मां कतिपयेषु दिवसेषु सा मम सकलं धनमपजहार। सन्मित्रैः प्रबोध्यमानोऽप्यनुरुध्यमानोऽपि वार्यमाणोऽपि निश्चयेनाऽऽत्म-नियन्त्रणेऽक्षमोऽहमासम्। मे चक्षुषी वारवनितानुरागेण तथाऽऽच्छादिते यथा काममञ्जरीं विना न किमपि मह्यमरोचत।

शनैः शनैः रूपपाशेन हावभावैश्च मां विमोह्य मम सकला धनसम्पत्तिस्तयाऽपहृता। मम चराचरसम्पत्तिः साकल्येन तदधिकृता बभूव। निःस्वे जाते मयि न किमपि वस्तुजातं तदुपहारायाऽवशिष्टम्। तदा तिरस्कृत्याऽनुचरैरहमर्धचन्द्रेण गृहान्निसारितः। वेश्यया तिरस्कृतो हृतसर्वस्वः कौपीनमात्रावशेषो लज्जाभिभूतोऽहं लोकनिन्दाभयान्मुखमपि दर्शयितुमक्षमोऽनन्योपायत्वादस्मिन् क्षपणकविहारे निवासाय समायातः। अत्र मया कौपीनमपि परित्यज्य दिगम्बरत्वमङ्गीकृत्य क्षपणकभावः स्वीकृतः।

परं वैदिकसंस्कारसंस्कृतोऽहं जैनमतावलम्बिनां पाखण्डेभ्यो न स्पृहयामि। जैनमतावलम्बिन एते सततं वेदान् देवांश्च निन्दन्ति धर्मशास्त्रविरुद्धञ्चाऽऽचरन्ति। एतांश्च दर्शं दर्शं श्रावं श्रावं सदैव मम चित्तं दूयते दह्यते च। अद्याऽस्मिन्नन्धकारावृते निशारम्भे सर्वेषां विहारवासिनां दृष्टिं परिहृत्याऽत्राऽऽगत्य विधिदुर्विपाकजन्यफलेषु रोदिमि।"

वसुपालितं विरूपकं वाऽहं बहुधा समाश्वासितवान्। सान्त्वयन्नहं तमवोचम् - "कतिपयदिनं त्वं धैर्यं धृत्वाऽत्रैव जैनविहारे निवस। अहं कथमपि तादृशमुपायं विधास्यामि येन सा काममञ्जरी वाराङ्गना लोभमञ्जरी स्वयेवाऽऽगत्य तुभ्यं सकलं धनं प्रत्यर्पयिष्यति। बहून् तादृशानुपायानहं जानामि।"

तदनन्तरं दीर्घसमयमहं विरूपकेण सह परामृश्य नगरवृत्तान्तमजानाम्। विरूपकश्चम्पाया अनेकान् समाचारान् कथयामास रहस्यांश्चोद्घाटयामास। तेन नगरस्य धनिनां लोभाभिभूतानां श्रेष्ठिनां द्यूतगृहाणाञ्च परिचयः प्रदत्तः। प्रथमं तावद् धनं वर्तते। धनेनैव सर्वाणि कार्याणि सिध्यन्ति। अर्थोपार्जनाय सर्वे जनाः स्पृहयन्ति प्रयतन्ते च।

धनस्याऽपरिहार्यतया धनाभिलाषोऽहं प्रथमं द्यूतगृहं गन्तुं मनो बबन्ध। द्यूतकलानां पारङ्गतोऽहं सुसूक्ष्मान्यपि द्यूताङ्गानि शिशिक्षे। अथ द्यूतकलायाः मम व्यावहारिकी परीक्षा भविता। अहमजानाम् -

"द्यूतकलायाः पञ्चविंशत्यङ्गानि भवन्ति। अक्षाः कुत्र ध्रियन्ते, कथं प्रक्षिप्यन्ते, कथं वा निजपक्षपोषणं विधीयते ? कितवेन सर्वं ज्ञातव्यम्। द्यूतसभा द्यूतगृहेषु भवति।

द्यूतसभाया एकोऽध्यक्षः सभाध्यक्षो विधीयते। द्यूतगृहेषु विविधप्रकृतयोऽक्षवेदिनः समवेताः भवन्ति। तेषु स्वशौर्यस्य साहसस्य वाक्चातुर्यस्य द्यूतकलानैपुण्यस्य च प्रभावो वा आतङ्को वा स्थापनीयः। तत्र स एव कितवः साफल्यमधिगच्छति, यः पणविजयी भवेत्। स विजयप्राप्तधनं पाचयेद्, दुर्बलान् कितवान् भाययेत्, सफलकितवैः सह सविनयं ब्रूयाद्, भोजने पाने चोदारो भवेत्, पणबन्धे विपरीते सति पराजये च मनोवेदनां न प्रकटयेद्, विजये चाऽतिहर्षमपि नाऽभिव्यञ्जयेत्।"

चम्पायामेकस्य सुप्रसिद्धस्य द्यूतालयस्य सभाध्यक्षो विमर्दको नाम कितवो वर्तति। तस्य कीर्तिं समाकर्ण्याऽहं तत्र समागच्छम्। तत्राऽनेके कितवाः समवेता अवर्तन्त। अनेकेषु वर्गेषु विभक्तास्तेऽक्षैर्दिदिवुः। विमर्दकस्याऽनुमतिं लब्ध्वाऽहमेकस्य वर्गस्य निकटं गत्वा तत्राऽतिष्ठम्। तत्र द्वौ कितवावक्षान् प्रास्य दिदिवतुः। एकेन कितवेन प्रमादादविचक्षणेनेव प्रासाः प्रास्ताः। एतदवलोक्याऽहं सावज्ञं जहास। द्वितीयस्तु कितवो रोषादारक्तनयनस्तर्जयन्निव मां वीक्ष्य प्रोवाच -

"अहो ! त्वमात्मानं दुरोदरविचक्षणं मन्यसे, येन शिक्षयस्यस्मानुपहासव्याजेन। आगच्छ मया सह दीव्य। यथा ते विचक्षणत्वं जानामि। अस्ति किञ्चिद्धनं तव ग्रन्थिकायाम् ?"

तस्य कितवस्याऽऽह्वानं सोढुमसमर्थोऽहं तत्रैव कितवपीठिकायां निषद्य ग्रन्थिकाबन्धमुन्मुच्य दीनाराणां दश हस्ते कृत्वा दुरोदरसमरायाऽऽत्मानं सज्जीकृतवान्। दीनाराणां दश तत्र नाऽतिन्यूनमवर्तत। सर्वे कितवा आवयोर्द्यूतयुद्धमवलोकयितुं परितः समवेता अभवन्। तत्र केचन मां साधुवादैः प्राशंसन्, अन्ये च मम प्रतिद्वन्द्विनम्। परन्तु मम प्रतिद्वन्द्वी मम समक्षं नवशिक्षित एव प्रतीयाय। तस्मिन् द्यूतयुद्धे तस्य स्थितिरेव काऽवर्तत। मया तस्य ग्रन्थिकायां स्थितं सकलं धनं विजितम्। दुरोदरक्रीडासमापनसमये दीनाराणां विंशतिसहस्रं मम ग्रन्थिकायामवर्तत।

अथ तत्रोपस्थितैरक्षवेदिभिर्मे जयजयकारैस्तद् द्यूतगृहं प्रतिध्वानितम्। एतद् दृश्यमवलोक्य विमर्दकोऽपि स्वस्थानादुत्थाय तत्राऽऽगत्य मम पृष्ठं करतलेन परामृश्य निजप्रकोष्ठं निनाय। तत्र मया विजितधनस्याऽर्द्धं निजप्रयोजनेभ्यो रक्षितम्। अवशिष्टस्यार्द्धं विमर्दकाय द्यूतसभाध्यक्षाय दत्त्वा ततोऽप्यवशिष्टं धनं तत्रोपस्थितेषु कितवेषु वितीर्णम्। अनेन प्रकारेण तस्मिन् द्यूतालये मम प्रतिष्ठा स्थिरीभूता। विमर्दकोऽपि मम विश्वासपात्रं मित्रं बभूव।

तदनन्तरं मया विचारितम् -

"द्यूते विजितं धनं सर्वेषां समक्षं प्रत्यक्षरूपेण प्रकटीभवति। धनस्य सङ्ग्रहस्तथा कर्तव्यो यथा स सुगुप्तो भवेत्। न कोऽपि तं जानीयात्।"

एतद्विषयेऽहं विमर्दकं विममर्श। तेनोक्तम् -

"चम्पायामेतादृशाः बहवो धनिनः श्रेष्ठिनः सार्थवाहाश्च सन्ति, येऽसंख्यकोटि-कोटिकनकनिष्कस्वामिनोऽपि महाकृपणाः सन्ति। यद्धनं न तु याचकेभ्यो दीयते, नाऽपि भुज्यते, विनाश एव तस्य तृतीया गतिः। अतस्तेषां धनस्याऽपहरणे न कोऽपि दोषः।"

विमर्दकस्य वचनानि निशम्य मया तथैवाऽऽचरितुं निश्चयो विहितः। चौर्यकलानिष्पादनसाधनानामेकत्रीकरणेऽहं प्रयासमकरवम्। शीघ्रमेव मया सकला चौर्योपकरणसामग्री सङ्ग्रहीता। तद् यथा -

"अन्धन्तमांसीव श्यामवर्णानि वसनानि, कृष्णवर्णं कौपीनं, श्लक्ष्णसुतीव्रप्रखर-धारखड्गोऽन्यानि चोपयोगीनि शस्त्रास्त्राणि, कर्तरिका, सन्दंशिका, रज्जवः, सूत्राणि, विशिष्टप्रकाराः सुगुप्तकोषाः प्रसेवकाः, सन्धिच्छेदयन्त्रं, कर्कटरज्जुः, भ्रमरपेटिका, खद्योतपेटिका, काष्ठकर्तनक्रकचं, चूर्णयोग इति चाऽन्यान्युपकरणानि तत्राऽविद्यन्त।"

चम्पायां वित्तेश्वराभिधानोऽतिकृपणो रत्नवणिगवर्तत। संख्यातीतानां धनानां प्रभुरप्यसौ कपर्दिकादाने कृपणतां दधाति स्म। मया तस्य धनस्याऽपहरणं विनिश्चितम्। एकस्मिन् दिवसे तस्य भवनस्य सर्वतो निरीक्षणं कृतम्। तस्य भवनस्य दक्षिणवर्तिन्यां भित्तौ लोहशलाकासुरक्षितमेकं वातायनमविद्यत। तेन मार्गेण मया तत्र प्रवेशो निर्धारितः।

निशीथे सघनश्यामलमेघसदृशे प्रगाढान्धतमसि सर्वतो व्याप्तेऽहमकाकी चौर्योपकरणसम्पन्नो वित्तेश्वरभवनवातायनस्याऽधस्तादाजगाम। नैपुण्येनाऽतिशयेन कर्कटकरज्जुमहं सन्तुलितबलेनोपरि प्रचिक्षेप। तस्य कर्कटाकारः कण्टको लोहशलाकायां संसक्तः। तस्य दृढत्वं परीक्ष्य रज्जुसाहाय्येनोपरि गत्वा लोहकर्तनक्रकचेन लोहशलाकाः कर्तयित्वा मया कक्षस्यान्तः प्रविष्टम्। विधिस्तदानीमनुकूलोऽवर्तत।

ततः खद्योतपेटिकामुद्घाट्य खद्योतानां मन्दालोके मया लघ्वाकारा स्थूलदृढकाष्ठनिर्मिता पेटिकाऽवलोकिता। करे ग्रहणेन साऽतिभारवती प्रतीयाय। उन्मोचिते पिधाने रत्नजटितकाञ्चनभूषणानां चाकचक्येन मम नयने प्रतिहते। झटिति पेटिकापिधानं पिधाय सा पेटिका मया प्रसेवके निहिता। तदनन्तरं निजसाफल्येन मनसि प्रसन्नोऽहं निभृतं निःशब्दं कर्कटकरज्जुसाहाय्येनाऽधोऽवतीर्य एकेनैव प्रणोदनेन कर्कटकरज्जुमाकृष्य राजमार्गेण प्राचलम्।

सकलमुपकरणजातं सङ्गृह्य प्रगाढान्धकारे सूचिवेध्येऽतिसावधनतया राजमार्गस्य पार्श्वभागादहं प्रचलन्नासम्। सहसा मयाऽवलोकितम् -

"काचित् प्रमदा शरीराङ्गेषु सुवर्णाभरणविभूषिता श्यामवसनपरिधाना

विरलतनुश्यामकौशेयमुखावगुण्ठना एकस्याः वीथिकायास्त्वरितमागत्य राजमार्गप्रान्तप्रदेशे धावन्तीव प्राचलत्।"

कुतूहलभराक्रान्तहृदयोऽहं झटिति तदन्तिकं गत्वा तामपृच्छम् -

"सुन्दरि ! का त्वं कुत्र च गच्छसि ? अस्मिन् निशीथे सूचिवेध्यघनान्धन्कारा-च्छादितनगरे तव गृहाद् बहिरागमनं तीव्रगत्या च क्वचिद् गमनं सन्देहास्पदमेव। सत्यं तथ्यञ्च वद, काऽसि कुत्र च गच्छसि त्वम् ?"

सहसा मदवरोधेन सा प्रमदा भयव्याकुला वेपमानाङ्गयष्टिः मुखादेकस्याऽपि शब्दस्य समुच्चारणेऽसमर्था स्तब्धा निरुद्धगतिर्बभूव। अस्मिन्नेव सम्भ्रमे तस्याः मुखावगुण्ठनं स्खलितम्। तस्यां कृष्णनिशायां सुगौरप्रभासमुज्ज्वलं नवयौवनप्रदीप्तं तन्मुखं मेघेषु विद्युदिव सन्दिदीपे। मया बहुशोऽप्याश्वस्ता कथमपि प्रस्खलद्वचोभिर्मामुवाच-

"भद्र ! नाऽहं जानामि को भवान् वर्तते कीदृशञ्च मयि व्यवहरिष्यति ? यदि भवान् कश्चिच्चौरो वर्तते, गृह्णातु मम सकलान्याभरणानि मार्गञ्च परित्यजतु। यदि च साधुरसि, सहायतां मम करोतु।"

सा तरुणी कस्यचित् सद्वंशजातस्य धनसमृद्धस्य श्रेष्ठिनः सुता प्रतिभाति स्म। तस्याः सौन्दर्येण ओजसा शालीनतया वाङ्माधुर्येण च प्रभावितेन मया पुनः समाश्वस्ता सा प्रोवाच -

"भद्र ! चम्पायामस्यां कुबेरदत्तो नाम कोटिकोटिकाञ्चनमुद्राणां स्वामी श्रेष्ठी सम्प्राप्तराजकीयानुग्रहो वर्तते। तस्याऽहं सुता देवसेना। अस्यां नगर्यामर्थपतिर्नाम तथैव समृद्धिशाली मम पितुः घनिष्ठं मित्रं द्वितीयोऽपि श्रेष्ठी अवर्तत। तस्यैकलः पुत्रो धनमित्रो वर्तते। जातायां मयि द्वाभ्यां मित्राभ्यां परस्परं प्रतिज्ञातम् -

धनमित्रेण सह देवसेनायाः परिणयो भविता।

इत्थमहं धनमित्रस्य वाग्दत्ता वधूर्बभूव। आशैशवादहं तस्य प्रणयिनी लोकैरवलोकिता।

किशोरावस्थायां प्रपन्नायां मयि स्वर्गलोकञ्च गतेऽर्थपतौ तस्य सुतो धनमित्रः पितुरुत्तराधिकारं भेजे। परमत्युदारप्रकृतिरसौ पितृपरम्पराप्राप्तं धनं सहस्रहस्तैर्वितरति स्म। कोऽपि याचकस्तस्य गृहाद् रिक्तहस्तो न गच्छति। परिणामतस्तस्य सकलो धनसञ्चयः कृष्णपक्षे चन्द्ररश्मिचय इव शनैः शनैर्व्यलुपत्। धनमित्रोऽप्यसौ धनविहीनो बभूव।

धनमित्रस्य दारिद्र्यं प्रेक्ष्य जनको मम तस्माद् गृहाद् विवाहसम्बन्धं विचिच्छेद। तदनन्तरं तेन विवाहसम्बन्धो मेऽन्यस्मिन् वणिक्परिवारे निश्चितः। कोटिपतिर्नामाऽसौ वणिगपि सार्थवाहो वर्तते कोटिकोटिधनसम्पन्नश्च। तस्य पोतसमूह आयातनिर्यातव्यापारेषु संलग्नो द्वीपद्वीपान्तरेषु गच्छन् महासमुद्रेषु विचरति। परमाशैशवाद् धनमित्रस्य

वाग्दत्ता वधूरहं तमेवात्मनो भर्तारं मन्ये। यदि कश्चिदस्मिन् जगति भर्ता मम भविष्यति, स एव धनमित्रो भविष्यति। तदन्तिकमेव गन्तुं ममाऽभिलाषः।

कोटिपतिना सह जनको मे पाणिग्रहणसंस्कारं श्वः प्रातः निष्पादयितुमीहते। मयाऽपि स्वनिर्णयो विहितः। धनमित्र एव मम भर्ता, पतिः, जीवनसहचरो बाल्यादेव वृतः। नाऽहमधुना परपुरुषसाहचर्यं सोढुं क्षमे। एकां सेविकां पूर्वमेव सन्देशेन सह प्रेष्य प्रियतममिलनस्थानं मया सङ्केतितम्। परपुरुषसङ्गमोऽधर्म इति निशीथे पितृगृहं परित्यज्य भर्तारमुपगच्छन्ती मार्ग एव भवता निरुद्धा। मया सर्वं निजवृत्तं रहस्यञ्च भवते निवेदितम्। अनुमन्यतां भवान् मां गमनाय। यदीच्छसि मम स्वर्णाभरणानि, भवान् गृह्णातु।"

श्रेष्ठिसुतायाः देवसेनायाः स्पष्टवादितां साहसं प्रणयिन्यनुरागं धार्मिकभावञ्च वीक्ष्याऽतितरां प्रभावितेन मया कथितम् -

"भद्रे ! त्वं मम धर्मेण सहोदरा भगिनी। मया त्वं प्राणव्ययेनाऽपि रक्षणीया। धनमित्रं त्वं मया सहोपगच्छ।"

प्रहृष्टचित्तया तया देवसेनया सह तन्निर्दिष्टमार्गेणाऽहं तीव्रगत्या धनमित्रस्य भवनं प्रति प्रस्थितः। परं कतिपयान्येव पदानि गत्वा स्थगित इव स्तब्ध इवाऽहं स्थितः। आवाभ्यामवलोकितम् -

"राजमार्गे कटिबद्धासिकोशेषु खड्गान् धारयन्तो वामेतरकरगृहीतोल्मुकाः केचन नगररक्षकाः समागच्छन्ति।"

तानवलोक्य देवसेना व्याकुलीभूता। भयपरिकम्पिताङ्गीं तामाश्वास्य मया प्रोक्तम् -

"स्वसः ! मा बिभेहि। असिमात्रसहायोऽहं एकलोऽपि सर्वेषां नगररक्षकाणां साम्मुख्यं विधातुं क्षमः। परं नाऽयं समयः पराक्रमस्य। नीतिमाश्रित्य स्वप्रयोजनं साधनीयम्। सर्पदष्टाभिनयं कुर्वन्नहमत्र धरातले शये। मम शिरः क्रोडे कृत्वा त्वया रोदनीयम्। रक्षकेषु निकटमागतेषु सत्सु पृष्टा त्वं कथय -

जीविकायै परिभ्रमन्तावावामङ्गजनपदं समागतौ। अद्य निशारम्भे चम्पां प्रविष्टौ। परं मम भर्ता सर्पेण दष्टः। यदि भवत्सु कोऽपि सर्वविषविद्यापण्डितो भवेत्, तदिहाऽऽगत्य मम भर्तुः प्राणान् रक्षतु।"

प्रथमं तावत् सा तरुणी मम प्रस्तावं नाङ्गीचकार। परं गतिमन्यामपश्यन्ती मयाऽवबोध्यमाना समुद्यता बभूव। दूरात् तान् रक्षकानवलोक्य सर्पदष्टस्येवाऽभिनयं कुर्वन्नहं भूम्यां निष्पन्दो निश्चलश्च मृत इव अशेत। श्वासश्च ऊर्ध्वतो निरुद्धः। सा बालाऽपि भूमावुपविश्य मम शिरः क्रोडे कृत्वा तारस्वरेण क्रन्दितुमारेभे। वेपमानसकलगात्रा

सा रोदं रोदं मामश्रुभिः क्लेदयन्ती स्थिता।

केषुचित् क्षणेषु नगररक्षकाणां समूहस्तत्राऽऽजगाम। सकलं वृत्तान्तं श्रुत्वा तेष्वेको मन्त्रज्ञमात्मानं मन्यमानः समीपमागत्य मां सम्यक् निरीक्ष्य सर्वविषनिवारकान् मन्त्रान् कर्णयोर्मे जजाप। परं कैतवमापन्नोऽहं तत्र निश्चेष्टं निश्शब्दञ्चाशयिषि। बहु प्रयासानन्तरं निष्फलोऽसावुवाच-

"बाले ! पुरुषोऽयं शीतलो जातः। पश्य, दृष्टिरस्योर्ध्वं प्रपन्ना, श्वासोऽवरुद्धो नाडी च प्रशान्ता। अधुना रोदनेन को लाभः? दैवमुल्लंघयितुं कः क्षमः? धैर्यमवलम्ब्य करणीयं विचारय। प्रभातेऽन्त्येष्टिकर्म एतस्य करणीयम्।"

कथयित्वेदं करुणार्द्रहृदयोऽसौ नगररक्षको निजसहचरैः सार्द्धं ततोऽगच्छत्। दर्शनान्तरितेषु चैतेषु नगररक्षकेषु सत्वरमुत्थायाऽहं त्वरितगत्या तया तरुण्या सह धनमित्रगृहं सम्प्राप्तः। तत्र तमहमवोचम् -

"मित्र ! त्वदर्थं तरुणीमिमां चोरयित्वाऽऽनयम्। अहमस्मि कोऽपि चौरः। परमियं तरुणी मम धर्मेण सहोदरा भगिनी। त्वयेयं ससुखं रक्षणीया। इमान्याभूषणान्यपि त्वया सप्रयासं रक्षणीयानि।"

इति वचनान्युच्चार्य गन्तुं प्रवृत्ते मयि विदितसकलवृत्तान्तो धनमित्रो मम हस्तं जग्राह। हर्षलज्जोद्वेगकृतज्ञतादिभावैराक्रान्तहृदयः स मामुवाच -

"मित्र ! त्वत्सदृशो वीरः परोपकारी स्नेहशीलो नीतिज्ञश्च मया कोऽपि क्वचिदपि कदाचिदपि नाऽवलोकितः। महार्हैः रत्नजटितैः कनकालङ्कारैः सुभूषितामपि सौन्दर्यनवयौवनसमृद्धिशालिनीमपि तरुणीं निशीथस्यैकान्ते लब्ध्वा त्वं मनोविकारैर्नाऽऽक्रान्तो बभूविथ। कथनमात्रेणैवैनां मम प्रियां निजभगिनीं मन्यमानस्त्वं मम सकाशमानीतवान्। त्वदन्यो न कोऽपि जनस्तथाविधं महदौदार्यगुणसम्पन्नं कार्यं कर्तुं क्षमः। अद्य मयाऽवलोकितौदार्यगुणसीमा। तवैतस्य महाप्रशंसनीयस्य कार्यस्य प्रशंसने शब्दानामभाव एव। साम्प्रतं माममुपकारगुणक्रीतं दासं त्वमवेहि।"

इति कथयित्वाऽसौ धनमित्रो मम पादयोः पतित्वा मां प्रणनाम। मृदुभावेन तमुत्थाप्य वक्षस्यालिङ्ग्य मया पृष्टम् -

"मित्र ! अधिगतप्रियभार्यस्त्वमिदानी किं करिष्यसि?"

धनमित्र उदतरत् -

"मम प्रियायाः जनकः कुबेरदत्तः कोटिकोटिस्वर्णमुद्राधिपतिः सामर्थ्यशाली सम्प्राप्तराजकृपः श्रेष्ठी सार्थवाहो वर्तते। तस्याऽनुमतिं विनाऽनया सह विवाहस्य चम्पायाञ्च निवासस्य स्पृहा मया न करणीया। असम्भावनीयमेवेदमवगन्तव्यम्। ध्रुवमेवाऽसौ मम जीवनं सुकठिनं विपन्नञ्च विधास्यति। स तु राजानं निवेद्य

सुतापहरणापराधं मयि समारोप्य मे वधदण्डं कारयिष्यति। अथवा स्वसेवकैरेव मे वधं कारयिष्यति। अत इदमेव मे श्रेयस्करं यदनया सह देशान्तरं गच्छेयम्। अथवा त्वमेव ब्रूहि - किं मयाऽत्र करणीयम्? त्वत्परामर्शं विना तदमान्यं कृत्वा न किमपि करिष्यामि। त्वदनुकूलमहं सर्वमाचरिष्यामि।"

मया कथितम् -

"मित्र! सत्यं तथ्यञ्च त्वयाऽभिधीयते। मनस्विजनस्य को देशः को वा विदेशः? यं देशं श्रयते तमेव बुद्धिपराक्रामबलेनाऽऽत्मीयं कुरुते। तथाऽपि तव प्रियेयं सुकुमारा पेलवगात्रा असम्प्राप्तप्रौढयौवना बाला प्रवासं गता दुःखान्येव भोक्ष्यते। अतोऽस्यास्त्वया सह विदेशेषु गमनं न मे रोचते। अस्याश्चम्पायामेवाऽवस्थितिः श्रेयस्करी। अहं तव सहायः। प्रथमं तावदियं स्वपितुर्गृहं गच्छतु। आवामेनां रात्रौ तत्र प्रापयिष्यावः। तदनन्तरमावाभ्यां स्वकीयः कार्यक्रमो निर्धारणीयः।"

धनमित्रेण च सह सा देवसेना स्वपितुः गृहं गता। तत्रैव तस्याः साहाय्येनाऽऽवाभ्यां विवाहसम्भारजातानि वस्त्राभरणान्यन्यानि च बहुमूल्यानि वस्तूनि तथा चोरितानि, यथाऽसौ कुबेरदत्तो विवाहसंस्कारकार्याणि सम्पादयितुमागामिनि दिवसे न पारयेत्। तदनन्तरं सकलं चोरितं धनमन्यच्च सम्पत्तिवृन्दं सुगुप्तरूपेण सुरक्षितीकृतम्।

तदनन्तरमहञ्च धनमित्रश्च चम्पानगर्याः राजमार्गेषु वीथिषु च भयरहितौ निर्द्वन्द्वं पर्यटितुमारेभाते। धनमित्रोऽपि बुद्धिमान् प्रतिभाशाली वीरः साहसिको भयप्रदेषु स्थानेषु कार्येषु सोत्कण्ठोऽवर्तत। पृथुनि राजमार्गे भ्रमद्भ्यामावाभ्यां हस्तिपकेनाऽङ्कुशेन प्रणुद्यमानो वारणोऽवलोकितः। हस्तिपकं विहाय कोऽप्यन्यो जनो वारणपृष्ठे नाऽविद्यत।

कौतुकेन धनमित्रं सङ्केत्य वारणस्य पृष्ठभागे गत्वा तस्य पुच्छं द्वाभ्यां कराभ्यां गृहीत्वा सुदृढमहं तरसा तत्पृष्ठमधिरुरोह। मदनु धनमित्रोऽपि तथैवाऽऽगतः। हस्तिपकं कञ्चिदवसरमदत्त्वैवाऽहं बलादाकृष्य गजपृष्ठादधो न्यपातयम्। तदनन्तरं सृणिं करे गृहीत्वा गजं प्रणोदयितुमारेभे। धनमित्रेण निर्दिष्टेन मार्गेण मया स गजः कोटिपतिगृहं प्रति प्रणोदितः।

कोटिपतिगृहे विवाहसंस्कारोचितमाङ्गलिककार्याणि समायोजितानि महता समारोहेणाऽऽडम्बरेण च प्रवर्तमानान्यासन्। कोटिपतिभवननिकटस्थमार्गाः वैभवेनालङ्कृताः। उज्ज्वलभासुरद्युतिमतां दीपततीनामालोकेन सकलं पर्यावरणमालोकितं बभूव। द्वारेषु वन्दनमालिकानां मालाः शोभन्ते स्म। प्रधानद्वारि रम्भास्तम्भसुशोभितानां सलिलसम्भृतकलशानां पङ्क्तयोऽदीप्यन्त। प्रीतिभोजेषु निमन्त्रिता अतिथयो मिष्टान्नान्यास्वादयन्ति स्म। सधवाः महिलाः किशोरिकाः कन्याश्च नर्तनवादनगीत-

परम्परासु सङ्गीतत्रिके परमानन्दभरनिमग्नाः समभूवन्।

सर्वमेतत् समारोहमालोक्य धनमित्रो रोषारक्तनयनो बभूव। तस्य मनोभावान् परिलक्ष्य मयाऽसौ वारणः कोटिपतिगृहं प्रति प्रणोदितः। मदोन्मत्तेन सृण्याघातसङ्क्रुद्धेन महागजेन क्षणेन सकलं तदाडम्बरं वैभवञ्च विध्वस्तं प्रधानतोरणञ्च भग्नम्। तत्रत्यं हाहाकारं शृण्वता स्मितेनैवाऽवहेलयता मयाऽसौ वारणः कस्मिन्नपि पुरातने जीर्णोद्याने समानीतः। एकस्योत्तुङ्गपादपस्य नभोभिदो विटपं समाश्रित्याऽऽवां गजपृष्ठादवरुह्य प्रच्छन्नभावेन धनमित्रस्य गृहमागतौ। निशाया अर्द्धं व्यतीतम्। शयनमारुह्याऽऽवां गहननिद्रायां सुप्तौ।

अपरेद्युरुषसा स्वकीयमरुणवर्णनैपथ्यशिरोवस्त्रं प्राचीदिक्क्षितिजे प्रसारितम्। पद्मरागमणिरिव रक्तवर्णं बालभास्करमण्डलं प्रेयसीमुषसमनुसरत् तत्र क्षितिजे समदृश्यत। उदयगिरिशिखराच्छनैः शनैरुपरि उदयत्तन्मण्डलं वीक्ष्याऽहं धनमित्रश्च तरसा शयनं परित्यज्य प्रभातकालीननित्यकर्मनिवृत्तौ यथोचितवस्त्रधारिणौ नगरभ्रमणाय निष्क्रान्तौ। निशाकालीनैरुपद्रवैरान्दोलिताः जनाः कुबेरदत्तस्य कोटिपतेश्च भवनेषु समवेताः कोलाहलं कुर्वन्ति स्म। प्रतिवेशिनश्च समवेत्य कथयन्ति स्म -

"न जाने कीदृशा उपद्रवा अस्यां चम्पानगर्यां प्रारब्धाः। नरपालस्य प्रजापालकस्य कर्तव्यमिदं यन्नगरसुरक्षायाः प्रबन्धं कारयेत्।"

एतानि वाक्यानि शृण्वन्तावावां परमप्रसन्नौ बभूविथ।

तदैव मया विदितम् -

"कुबेरदत्तस्य गृहं कोटिपतिराजगाम। रजन्यां तस्करकर्मणा विनष्टधनाय कुबेरदत्ताय प्रचुरं धनं दत्त्वा पाणिग्रहणसमारोहपरिकल्पनानां सज्जीकरणाय निवेदनं कृत्वा मासान्तरावधिं निश्चित्य तिथिं शोधयित्वाऽसौ स्वगृहं जगाम।"

सर्वमिदं ज्ञात्वा मया नीतियुता योजना परिकल्पिता। मया चर्मरत्नपेटिकैका निर्मिता। तत्र विशेषं शिल्पकौशलमवर्तत। विशेषविधिना चेयमुद्घाटनीया। तां चर्मरत्नपेटिकां धनमित्राय दत्त्वा मया कथितम् -

"मित्र ! त्वमिमां चर्मरत्नपेटिकामङ्गराजायोपहृत्य कथय -

राजन् ! अहमत्र चम्पायां श्रेष्ठिनोऽर्थपतेः सुतो धनमित्रो भवत्कृपया सुखेन वसामि। मम पिताऽर्थपतिः कोटिकोटिधनानामधिपतिरवर्तत। देशे विदेशेषु च क्रयविक्रयव्यापारं कुर्वतस्तस्य धनसम्पदां संख्या गणयितुमशक्याऽऽसीत्। दिवङ्गते पितरि मयोत्तराधिकारे सकला समृद्धिरधिगता। उदारस्वभावेन मया याचकानामभिलाषाः सदा प्रपूरिताः। न कोऽपि याचको मम गृहान्निराशो वा रिक्तहस्तो वा निवर्तति। अतः केषुचिद्दिवसेषु धनव्यये सञ्जातेऽहं स्वल्पधनावशेषोऽभवम्।

चम्पायां कुबेरदत्ताभिधानोऽपरः श्रेष्ठी निवसति। असौ मम पितुः परमं मित्रमवर्तत। पितुर्जीवनकाले कुबेरदत्तो निजकन्यायाः देवसेनायाः रूपगुणशालिन्याः परिणयं मया सह विधातुं प्रतिजज्ञौ। परं पितरि दिवङ्गते स्वल्पधनं मां ममैव बान्धवास्तिरस्कर्तुमारभन्त। कुबेरदत्तेनाऽप्यहं निरस्कृतः। मां तिरस्कृत्याऽसौ देवसेनां मम वाग्दत्तामन्यस्मै वणिजे कोटिपतये दातुमभिलषति। तथैव तेन निर्णयः कृतः। स्वल्पधनत्वाद् वाग्दत्तावधूविरहाच्च सम्पीडितेन मया हृदि विदीर्णेन प्राणपरित्यागाय निश्चयो विहितः। दारिद्र्यजन्यदैन्यजीवितं तिरस्कृतिपात्रं न रक्षणीयम्। ततः स्वर्गमार्गयात्रैव श्रेयस्करी। इति निश्चित्याऽहं गहनं वनं प्रविष्टः।

तत्र वने हरितरक्तमणिभिरिव सुशोभितैः नवपुरातनपर्णराशिभिः समलङ्कृतोऽतिविशालो वटवृक्षो वर्तते। तस्यैके सुदृढे विटपे दृढरज्जुमाबध्य पाशबन्धनं निजकण्ठे पिनद्धे सति प्राणपरित्यागाय, कश्चिज्जटाधारी यतिः कौपीनमात्रावशिष्टवसनो भस्मावलिप्तसकलकायो भस्मत्रिपुण्ड्रसुशोभितभालपट्टो रुद्राक्षमालाकलितकण्ठो लोहनिर्मितातिदीर्घदंशकयुतदक्षिणकरस्तत्र समाजगाम। वामस्कन्धे बृहदाकारं प्रसेवकं दधानोऽसौ यतिः मन्निकटं समागच्छत्। समीपमागत्य सन्दंशकेन रज्जुप्रान्तं छित्वा तेनाऽहं वटपादपविटपादवतारितः। नयनजलक्लिन्नमुखं दुःखारुणनयनं मां बहुशः समाश्वास्य साहसस्याऽस्य हेतुं पप्रच्छ। मया प्रोक्तम् -

"निर्धनत्वमत्र हेतुः, तिरस्कृतजीवनधारणात्तु मरणमेव वरम्।"

ततोऽसौ यतिः मां समाश्वासयन् प्रोवाच -

"वत्स नैतादृशी मूर्खता करणीया। प्राणेषु सत्स्वेव सर्वं सिध्यति। जीवन्नरो भद्रशतानि पश्यति। धनोपार्जनाय बहव उपायाः सन्ति। परं गतेषु प्राणेषु किं करिष्यन्त्युपायास्ते। आत्महननान्महत्तरं पातकमन्यन्न विद्यते। पातकमिदमनेन लोकेन सह परलोकमपि विनाशयति। दारिद्र्यस्य दुस्तरसागरादहं त्वां पारयिष्यामि। मा शुचः।"

इति कथयित्वाऽसौ यतिः स्वप्रसेवके करं निधाय कामपि चर्मरत्नपेटिकां निष्कास्य मह्यं दत्त्वा प्रोवाच -

वत्स! नेयं चर्मरत्नपेटिका सामान्या। मन्त्रसिद्धा खल्वियम्। कामरूपनिवासिना मया सुकठोरं तपस्तप्त्वा मन्त्रसिद्धा कृता। दैवतमिवेमां प्रतिष्ठाप्य त्वं प्रतिदिनमुपास्स्व। प्रतिदिनं प्रातःकाले कनकमुद्राभिः परिपूर्णामिमां चर्मरत्नपेटिकां त्वं द्रक्ष्यसि। त्वया स धनराशिः गृहीतव्यः। अपरेद्युः पुनस्त्वमिमां स्वर्णमुद्रापरिपूरितां प्राप्स्यसि। परमियं चर्मरत्नपेटिका वैश्येभ्यो वेश्याभ्यश्चैव फलति। त एवैतस्यां स्वर्णराशिं लभन्ते। अथ च स्वर्णमुद्राप्राप्तये जीवनस्य पावित्र्यं परमावश्यकम्। पुण्यशालिनो जना एवैतस्य

धनस्याऽधिकारिणः। यदि केनचित् कथञ्चिद् वा कस्यचित् कस्याश्चिद् वा धनमन्यायेनाऽपहृतं, चर्मरत्नपेटिकातः धनप्राप्तये तद् धनं सर्वं तस्मै तस्यै वा प्रत्यर्पणीयम्। अथ च पेटिकायाः प्राप्तस्य सुवर्णस्य चतुर्थांशो याचकेभ्यः प्रदानीयः।"

इति कथयित्वाऽहं पुनः धनमित्रं समवाबोधयम्। त्वया पुनः अङ्गेश्वराय निवेदनीयम्

"राजन्! इति वचनान्युच्चार्य चर्मरत्नपेटिकां मह्यं समर्प्याऽसौ यतिस्त्वरितगत्या प्रचलन् गहनेषु वनेषु तरुराजिभिरन्तर्हितः। अहमप्येतां चर्मरत्नपेटिकां गृहीत्वा सुप्रसन्नमनाः गृहमागच्छम्। परन्तु महाराजमनिवेद्य चर्मरत्नपेटिकायाः काचिदपि धनप्राप्तिर्न समुचिता। इति विचार्याऽहं भवत्सेवायामुपस्थितः। अतः परं भवदादेश एव प्रमाणम्।"

इति तव वचनानि निशम्य महाराजश्चम्पाधिपतिः निश्चयेन कथयिष्यति -

"त्वमेवैतां चर्मरत्नपेटिकामुपभुङ्क्ष्व, प्राप्तधनेन च भौतिकसुखानन्दान् लभस्व।"

तदनन्तरं त्वमस्य सुरक्षायै महाराजं प्रार्थयस्व। अङ्गीकृतायाञ्च प्रार्थनायां गृहमायाहि। शीघ्रमेवेयं वार्ता किम्वदन्ती चम्पायां प्रथिष्यते। आवां रजन्यां चौर्योपलब्धधनेन चर्मरत्नपेटिकां स्वर्णराशिपरिपूरितां विधास्यावो धनस्योपभोगेन च सह याचकानामभिलाषान् पूरयिष्यावः। तदनन्तरमयं लोभाक्रान्तहृदयः कुबेरदत्तो निजसुतां तुभ्यं प्रदास्यति। यद्ययं कोटिपतिः कञ्चिदुपद्रवं जनिष्यते तदैतस्य सकलं धनमपहृत्य तं कौपीनमात्रावशेषं कृत्वा दारिद्र्यसागरे निमङ्क्ष्यावः।

ममेयं योजना धनमित्रायाऽतितरामरोचत। तेन तथैव विहितम्। चर्मरत्नपेटिका-व्याजेन सम्मोहितेन कुबेरदत्तेन रूपलावण्यवती नवयौवनसौभाग्यवती सर्वगुणशालिनी सुता देवसेना धनमित्राय समर्पिता। ततः तौ द्वौ मदनुग्रहानुगृहीतौ सुखेनाऽऽनन्देन च चम्पायामेव निवासञ्चक्रतुः।

काममञ्जरी प्रसिद्धा वाराङ्गना रूपगुणातिशयेन चम्पापुर्याश्चूडामणिरिव दैदीप्यत। मरीचिप्रसङ्गेनाऽपि तया परमा प्रसिद्धिरधिगता। तस्याः रागमञ्जरी नाम्नी अनुजा नवयौवनदेहल्यामिव तारुण्ये पदं निदधती लावण्येन नारीसुलभगुणैश्च विजितसकलभुवनजनमहिलासंहतिरग्रजामप्यत्यशयिष्ट। तस्याः सौन्दर्यस्य यशःसौरभेण चम्पानगरी सुरभितेति मयाऽनुभूतम्। औत्सुक्यनिर्भरस्य मम मनसि तद्दर्शनाभिलाषेण पदं निधत्तम्। तस्मिन्नेव समये चम्पायां वसन्तोत्सवस्य राजकीया घोषणा समुद्घोषिता बभूव।

वसन्तोत्सवेऽस्मिन् चम्पापुर्याः बाह्योपवने सङ्गीतगोष्ठीकार्यक्रमोऽवर्तत। तत्र

रागमञ्जरी नवयौवनारम्भसूचकं प्रथमं नृत्यप्रदर्शनं सर्वजनसमक्षं करिष्यतीति भणितिः सर्वत्र प्रथिता बभूव। सर्वे नागरिकाः राजाज्ञया तत्राऽऽमन्त्रिता आसन्। धनमित्रेण सहाऽहमपि रागमञ्जर्याः नृत्यस्य दर्शनाय नगरबाह्योद्याने समुपस्थितो बभूव।

रागमञ्जर्याः सौन्दर्येण रूपेण लावण्येन तारुण्येन नृत्यकलागुणेन च मम मनोऽपहृतम्। साञ्जननयनतिर्यग्वीक्षणैः, मन्मथनिशितशरैरिव मम हृदयं तया विद्धम्। तस्मिन् समये मम हृदयं तस्याः बालायाः नृत्यस्य रङ्गस्थलमेव सञ्जातम्। ध्रुवं सा कामदेवस्याऽपरं कार्मुकमासीद् या रसभावरूपान्नाराचान् प्रक्षिप्य मे वपुः कीलितवती। अथ विरामं गते नृत्ये सहसा तन्नयनाभ्यां मे नयने सङ्गते। विद्युद्धारयेव मे गात्राणि कम्पितानि वेपथुना च सह सकलं वपुः स्वेदबिन्दुभिश्चर्चितम्।

सङ्गीतगोष्ठ्यनन्तरं पुनः अपाङ्गवीक्षितेन मामाहतं कुर्वन्तीं तां रागमञ्जरीं मन्दमन्दपदैः सखीभिः सह गच्छन्तीं वीक्षमाणोऽहमनिच्छन्नपि धनमित्रेण सह गृहमागच्छम्। गृहमागत्य कथमपि नित्यकर्माणि सम्पाद्य धनमित्रस्य सततमाग्रहेण किञ्चिदुपभुज्य शय्यायां शयानश्चिन्तासागरे निमग्नः। एतदवस्थागतं वीक्ष्य धनमित्रो मामुवाच -

"मित्र ! रागमञ्जरीयं वारवनिताकुलप्रसूताऽपि न तथा गणिकोचितस्वभावा। सर्वगुणालङ्कृतयाऽनया प्रतिज्ञातम् - न सा धनशुल्कमूल्येन कस्याऽपि पुरुषस्य शयनसहचरी अङ्कशायिनी वा भवितुमर्हति। पुरुषजनोचितगुणविभूषितेन जनेन विवाहमूल्येन क्रीता तस्य जीवनसहचरी भविष्यति। सा परमसदाचारिणी साध्वी वारवनिताकुलकर्दमे शतदलं विकसितं कमलम्।

काममञ्जर्या अनुजा सर्वथा तद्विपरीतस्वभावा। काममञ्जरी यथा पापिष्ठा धनलोलुपा दुराचारिणी कृपणस्वभावा, तथैवेयं पुण्यशालिनी वदान्या सदाशया उदारस्वभावा स्वगुणैः शोभते। परमसौभाग्येन तस्यां भवत्सदृशस्य गुणवतः पुरुषस्य मनः सङ्गतम्। भवतस्तस्याश्च परस्परं नयनसम्मिलने सञ्जाते गुणग्राहिणी सा नूनं पञ्चशरशरविद्धा भविष्यति।

परं रागमञ्जर्याः जननी वेश्याकुलकलङ्किनी महादुष्टस्वभावा धनलोलुपा रसिकसहृदयजनत्वक्कर्षिणी चण्डस्वभावा वर्तते। स्वर्णमूल्येनैव सा भवन्तमुपकरिष्यति। तदभावे न सा रागमञ्जरी सुलभा। यदि च कथमपि भवद्गुणानुरक्ता हृदयानुवर्तिनी साहचर्यं प्राप्नुयाद् रतिविलाससुखभागिनी वा भवेत्, तदा राजसम्मानिता तस्याः जननी महद्विपच्चयस्य हेतुर्भविष्यति। अतः कथमपि धनादिना तां धनलोलुपां परितोष्य रागमञ्जरीं स्वगुणैरात्मीयां विधेहि।"

ततोऽहं द्वयोः कार्ययोः साधने प्रयत्नशीलोऽभूवम्। प्रथमं तावद् रागमञ्जर्याः

प्रसादनं द्वितीयञ्च कोटिपतितिरस्करणम्। चम्पायां धर्मरक्षिता नाम्नी बौद्धभिक्षुणी कुटिलस्वभावा काममञ्जर्याः प्रधाना दूती कुट्टनिकारूपेण सर्वत्र प्रसिद्धा रसिकजनप्रणय-पत्रादिसन्देशहारिणी अवर्तत। धर्मरक्षितामामन्त्र्य विविधोपहारैस्तां सत्कृत्य प्रसाद्य मया कथितम् -

"भद्रे ! धर्मभगिनी त्वं मम कार्यं सम्पादय।"

सा मम निवेदनमङ्गीचकार। मया पुनः प्रोक्तम् -

"भद्रे ! काममञ्जर्या अनुजा रागमञ्जरी रूपगुणातिशयेन नवयौवनेन च मे हृदयमपजहार। तां विना प्राणधारणस्याऽपि न मे प्रयोजनम्। परं जननी तस्याः निकृष्टाचरणा कृपणस्वभावा धनलोलुपा च वर्तते। जानास्येव त्वं मे मित्रं, धनमित्रम्। प्रतिदिनं स्वर्णराशिप्रदायिनीं चर्मरत्नपेटिकां स रक्षति। तां चर्मरत्नपेटिकां चोरयित्वाऽहं तस्यै काममञ्जर्यै प्रदास्यामि। परं सा गणिका तद्विनिमयेन रागमञ्जर्याः पाणिं मह्यं दास्यति। चर्मरत्नपेटिकातः सम्प्राप्तस्वर्णराशिमवाप्य सा समृद्धजनेष्वग्रगण्या भविष्यति।"

मया प्रदत्तैर्विविधोपहारैः परमसन्तुष्टा सा धर्मरक्षिता कुट्टनिका परमप्रसन्ना रागमञ्जर्याः मातरं स्वसारञ्च चर्मरत्नपेटिकाविनिमयेन तां मह्यं प्रदातुमनुकूलयामास। मया चोरितां चर्मरत्नपेटिकामादाय ताभ्यां रतिस्वरूपा सौन्दर्यसारसर्वस्वा रागमञ्जरी मह्यं प्रदत्ता। गुणेष्वनुरक्ता सा रागमञ्जरी मे गुणक्रीता सेविकेव बभूव। परं धनमित्रेण चर्मरत्नपेटिकायाः चौर्यवार्ता सर्वत्र प्रसारिता।

द्यूतगृहस्य सभाध्यक्षो विमर्दको मे मित्रत्वङ्गतः। रागमञ्जरीप्राप्तिपूर्वमेव स मया निवेदितः -

"मित्र ! त्वं कोटिपतिं प्रति मैत्रीभावं प्रदर्शयन् तस्य विश्वासमाप्नुहि। तस्मिंश्च तथाभूते कोटिपतिमित्रभूतस्त्वं धनमित्रेण सह कपटकलहं प्रवर्तस्व।"

ममाभिप्रायमधिगम्य तेन स्वकार्याणि प्रारब्धानि। कोटिपतिं मधुररससम्भृतप्रशंसा-वचनैः प्रसाद्य मित्रत्वमुपजगाम। अथाऽसौ चम्पायां कोटिपतिं प्रशंसन् धनपतिञ्च निन्दन् बभ्राम। सर्वत्राऽसावित्थं प्रचचार -

"चर्मरत्नपेटिकासम्प्राप्तकनकराशिगर्वितोऽसौ दुर्वृत्तो धनमित्रः कोटिपतेर्वाग्दत्तां वधूमपजहार। अथाऽसौ कोटिपतेर्गृहमपि विदध्वंसे। कोटिपतिमित्रमहं तस्य प्रतिकारं करिष्यामि।"

अथैकस्मिन् दिवसे धनपतिगृहमुपगम्य सर्वजनसमक्षं कलहायमानस्तं भर्त्सयन् विमर्दकस्तारस्वरेण प्रोवाच -

"अरे धनमित्र ! किमर्थमीदृशं गर्वमुद्वहसि? त्वया मन्मित्रस्य कोटिपतेर्वाग्दत्ता

वधूरपहृता। यदि मया त्वं जीर्णभिन्नपात्रधारी भिक्षायै नगरे पर्यटन् भिक्षुको न कृतो, मम नाम विमर्दको न भवति। तस्याश्चर्मरत्नपेटिकाया एव त्वं गर्वमुद्वहसि ? तां पेटिकां सुगुप्तरूपेण चोरयित्वा तथा सुगुप्तां विधास्यामि, यथा न कोऽपि तां लप्स्यते। कोटिपतिर्मे प्राणेभ्योऽपि प्रियो वयस्य:। तस्योपकारायाऽहं यथाशक्ति उचितं वाऽनुचितं वा करणीयं वा अकरणीयं वा सर्वं करिष्यामि। परप्राणापहरणे स्वप्राणपरित्यागेऽपि वा न मम विकल्प:। एकनिशाजागरणमेव मम तव विषदन्तत्रोटने क्षमम्।"

इत्थं प्रलप्य कलहं कृत्वाऽसौ विमर्दको धनमित्रगृहादपगत:।

रागमञ्जर्या सह मम विवाहानन्तरं धनमित्रेण भणितिरियं सर्वत्र प्रचारिता -

"चर्मरत्नपेटिका मे केनाऽपि चोरिता।"

तेनेदमपि प्रचारितम् -

"अयं कोटिपतिमित्रं विमर्दको नाम द्यूतकरो मां भाययामास यदसौ चर्मरत्नपेटिकां चोरयित्वा कोटिपतये प्रदास्यति। निश्चयेन कोटिपतिना कारितमिदमपकृत्यम्। अहमपि तं न त्यक्ष्यामि। वैरनिर्यातनमेव मम लक्ष्यम्।"

नागरिकाश्चेमां धनमित्रभणितिं विशश्वसु:। इतो मया कुमारप्रवृत्तिपरिमार्गणाय विमर्दको विशालायै प्रेषित:, कुमारस्तत्र समायातो न वा। अपरेद्युर्धनमित्रो राजसभां गत्वाऽङ्गाधिपतिसेवायामुपस्थितो भूत्वा निवेदयामास -

"राजन् ! कोटिपतिप्रचोदितेन विमर्दकेन चर्मरत्नपेटिका मम चोरिता। तमत्राऽऽकार्य प्रश्नमात्रेणाऽनुगृह्णातु मां भवान्।"

कोटिपतिं राजसभायामाहूय चम्पाधिपस्तमपृच्छत् -

"कोटिपते ! अस्ति कश्चिद् विमर्दको नाम द्यूतगृहसभाध्यक्षस्तव मित्रम् ?"

कोटिपतिना तन्मित्रत्वं स्वीकृतम्। तत: राजा तमादिदेश -

"गच्छ, गत्वा च विमर्दकेन सहाऽत्राऽऽगच्छ।"

राजसभाया: गत्वा कोटिपति: सर्वत्र विमर्दकमन्विषन्नपि तं क्वचिदपि नाऽवलोकयामास। गृहे विपणिषु द्यूतगृहेषु वेश्यावीथिषु सर्वत्र विचरन्नपि कोटिपतिस्तन्मित्रं नाऽऽससाद। यद्यसौ चम्पायामभविष्यत् तदैव दृष्टिपथमागमिष्यत्। स तु तस्मिन् समये उज्जयिनीपथपथिको बभूव।

असम्प्राप्ते विमर्दके नगररक्षका: कोटिपतिं बद्ध्वा राजसभामानिन्यु:। स तु चर्मरत्नपेटिकाचौर्यापराधेनाऽऽरोपित: पौन:पुन्येन तमपराधं नाङ्गीकुर्वन् राजादेशेन लोहनिगडनिबद्ध: कारागारे बन्दीकृत:।

धनमित्रसम्बन्धिनी चर्मरत्नपेटिका मया काममञ्जर्यै प्रदत्ता। तत्सम्पादितं स्वर्णग्रहणं तदैव समभविष्यद् यदा सा काममञ्जरी अन्यायेनाऽपहृतमुपार्जितञ्च सकलं

धनमत्यक्ष्यत्। सा काममञ्जरी परधनमोषिका वञ्चिका परमधूर्ता मया मुष्णाता वञ्चिता सकलं निजधनं याचकेभ्यो दातुं प्रवृत्ता। विरूपकमपि धननाशजनितवैराग्यं जैनविहारनिवासिनं निमन्त्रितं कृत्वा विविधं सम्मान्य तया सकलं धनं तस्मै समर्पितम्। विरूपकोऽपि पुनः समृद्धो भूत्वा नग्नभावं परित्यज्य स्वधर्मे रतो विलाससुखान्यनुभवन् दिनानि गमयामास।

एकस्मिन् दिवसे धनमित्रो मया प्रेरितो राजसभां गत्वा राजानं निवेदयामास-

"राजन् ! गणिकेयं काममञ्जरी धनलोलुपा लोभमञ्जरीति विख्याता दिवसेष्वेतेषु दानादिकपुण्यकर्मसु प्रभूतं धनं व्ययं कुर्वाणा दृश्यते। सकलं धनं याचकेषु वितीर्य शाटिकामात्रावशिष्टा तिष्ठति। प्रतीयते केनाऽपि विधिना मम चर्मरत्नपेटिका तया हस्तगतकृता वर्तते। जानात्येव भवान् यदियं पेटिका वैश्येभ्यो वेश्याभ्यश्च फलति। तेभ्य एवेयं काञ्चनं ददाति। तत्राऽपि तदैव ददाति यदाऽन्यायोपार्जितमपहृतं वा सकलं धनं परित्यक्तं दत्तं वा भवति। नूनमयं सन्देहस्य विषयः। भवतामयं परमानुग्रहो भविष्यति, यदि भवांस्तां काममञ्जरीं गणिकामत्र राजसभायामाहूय प्रश्नैरेव शङ्कासमाधानं कुर्यात्।"

धनमित्रस्य वचनेषु विश्वासं भजमानेन नरपतिना काममञ्जरी राजसभायामाहूता। तदनन्तरं राजसभागमनपूर्वं सा काममञ्जरी जननीसहिता मम गृहमागत्य परामर्शञ्चकार। किमिदानीं करणीयमिति। मयाऽपि चिन्तामभिव्यञ्जयता कथितम् -

"भद्रे ! चर्मरत्नपेटिकां लब्ध्वा यथा त्वया दानपुण्यादिकर्मसु प्रभूतो धनव्ययः प्रारब्धस्तेन कर्मणा स राजा शङ्कामापन्नः। स विचारयति -

चर्मरत्नपेटिकोपलब्धिरेवाऽस्य प्रभूतधनस्य व्ययस्य हेतुः। यदि भवती राजसमक्षं मम नाम उच्चरिष्यति, निश्चयेनाऽसौ मां वधदण्डेन दण्डयिष्यति। ततो मय्यनुरक्ता विरहव्यथामसहमाना रागमञ्जरी नूनं प्राणांस्त्यक्ष्यति। जामातृभावेन त्वमपि जनन्या सह बद्धा कारागारनिवासिनी भविष्यसि। अथ च चोरितद्रव्यरक्षकोऽपि चौर एवाऽवगन्तव्य, इति धर्मशास्त्राणां वचनम्। अतोऽस्माभिस्तथा करणीयं यथा वयं सर्वे विपद्भ्यो विमुक्ताः भवेम।"

मम वचनानि निशम्य काममञ्जर्याः जननी समवोचत् -

"वत्स ! त्वमेव ब्रूहि, किमत्र करणीयम् ? एवं मुक्तहस्तदानेनैवाऽनया काममञ्जर्या सन्देहपरम्परा समुपस्थापिता। तव नामग्रहणेनाऽपि नाऽस्माकं मोक्षः। सर्वमस्माकं कुटुम्बं नूनं विनङ्क्ष्यति। भवान् जानात्येव कोटिपतिश्चर्मरत्नपेटिका-स्तेयापराधेन राज्ञा कारागृहे बन्दीकृतः। तस्य नामग्रहणमेव समुचितं प्रतिभाति मे।"

मयाऽपि नयनेऽश्रुजलक्लिन्ने कृत्वा निःशब्दरुदनावरुद्धेन कण्ठेन गद्गदवचोभिः

सा काममञ्जरीजननी प्रोक्ता -

"यथा भवत्यै रोचते तथा करणीयमिति।"

तदनन्तरं राजसभायां सकठोरं पृष्टा गणिकामाता सा कुट्टनी राजानं प्रोवाच-

"राजन्! निश्चयेन सा चर्मरत्नपेटिकाऽस्माकं गृहे वर्तते। परं केन सा प्रदत्तेति रहस्योद्घाटनं न ममोचितम्। बहुविधाः लोकाः, वेश्यालयेषु धनवन्तो वा निर्धनाः वा पुण्यशालिनो वा पापकर्माणो वा सदाचारिणो वा दुराचारिणो वा समागच्छन्ति, अस्मच्छुल्कं दत्त्वा ते रतिविलाससुखभोगाननुभवन्ति। तैर्दत्तं धनं पुण्योपार्जितं वा पापोपार्जितं वा न्यायोपार्जितं वाऽन्यायोपार्जितं वा चोरितं वा मुषितं वा श्रमजन्यं वा वञ्चनाजन्यं वेति न वयं जानीमो न च पृच्छामः। जानात्येव भवान् न्यायोपार्जितं श्रमजन्यं वा धनं स्वल्पमेव भवति। तद्धनं वेश्याभ्यो दत्वा न कोऽपि विनाशयति। अतश्चर्मरत्नपेटिकोपलब्धिः कथं जातेति न मया स्मर्यते।"

काममञ्जर्याः जनन्याः वचांसि श्रुत्वाऽतितरां प्रकुपितो रोषारुणिमनयनश्चम्पाधिपतिः समादिदेश -

विच्छिन्नकर्णनासिके ते द्वेऽपि गणिके मातासुते कारागारे निक्षेपणीये।

इति दण्डवचनानि श्रुत्वा भयमभिनयन्ती गणिकामाता चर्मरत्नपेटिकां कोटिपतिदत्तां कथयामास।

गणिकायाः वचनमिदमाकर्ण्य प्रकुपिततरेण राज्ञा स तु पातकी कोटिपतिर्वधदण्डेन दण्डितः। अयं तस्करो भूमिगर्ते कटिपर्यन्तं निक्षिप्तो बुभुक्षितकुक्कुराणां भोजनं भवत्विति। परन्तु तस्मिन् काले मया शिक्षितेन धनमित्रेण बद्धाञ्जलिना प्रार्थितम् -

"राजन्! मौर्यवंशीयैर्नरपतिभिश्चाणक्यमतानुयायिभिर्नियमोऽयं निर्धारितः -

चौराः प्राणदण्डेन न दण्डनीयाः। ते तु विच्छिन्नधनमदगर्वाः देशान्निर्वास्याः।"

चम्पाधिपेन सिंहवर्मणा धनमित्रनिवेदनं स्वीकृत्य तथैव विहितम्। चम्पायाः प्रजाजनाः धनमित्रस्य दयाकरुणौदार्यगाम्भीर्यादिगुणैस्तं बहुतरं प्रशशंसुः। धनमित्रस्य जयजयकारैस्ते पवनपदवीं निनादयामासुः। कोटिपतिसर्वस्वमपहृत्य पार्थिवेन तस्य धनस्य चतुर्थांशो धनमित्राय प्रदत्तः। चतुर्थांशश्च काममञ्जर्यै समुपहृतः। अवशिष्टमर्धञ्च राजकोषे निक्षिप्तम्। अथ च राजादेशेन काममञ्जरी चर्मरत्नपेटिकां धनमित्राय समर्पयामास।

तदनन्तरमसौ पातकी कोटिपतिर्धनमित्रवाग्वध्वभिलाषी गर्दभारूढः स्तेयापराधेन संघोष्यमाणोऽङ्गदेशान्निर्वासितः। एवञ्च चम्पायां मम मित्रस्य धनमित्रस्य न कोऽपि प्रतिद्वन्द्वितां भेजे। असौ देवसेनया कुबेरदत्तसुतया सह सुखेन न्यवसत्। अहमपि परिपूर्णसङ्कल्पः रागमञ्जर्या सह रतिसुलभविलाससुखान्यनुभवन् कामचारेण न्यवसम्।

परं कुत्र मम मनसि शान्तिः ? दैवं वा को जानाति ?

धनधान्यसमृद्धायां चम्पायां बहवो धनवन्तः कोटिकोटिस्वर्णमुद्राणां स्वामिनः परं महाकृपणाः धनलोभिनो वसन्ति स्म। तिस्रो गतयो भवन्ति वित्तस्य - दानं भोगो नाशश्च। यो नोपभुङ्क्ते न वा ददाति तस्य तृतीया गतिर्भवति। भोगदानरहितास्ते समृद्धिमन्तः कोटिपतयोऽपि न धनरक्षणयोग्या अवर्तन्त। वित्तं तेषां भारवहनमेव वर्तते। अतो मया निश्चितम् -

"भारमेषामपहृत्य तद्वहनरक्षणचिन्तादुःखं दूरीकृत्य तान् व्यपगतचिन्तान् कुर्याम्।" मया तथा कृतं यथा ते करेषु खर्परानादाय भिक्षावृत्तिमेवाऽऽश्रयेयुः। चम्पापुर्यां कोलाहलो बभूव -

"कीदृशास्तस्करा अत्र समायाताः ये नगररक्षकैरपि न निगृह्यन्ते ? परं विधेर्विधानं बलवत्तमम्। न कोऽपि तदुल्लंघने समर्थः।"

एकस्मिन् निशारम्भे रागमञ्जर्या सह प्रणयरतिनिमग्नमानसोऽहं प्रचुरं मद्यमास्वादितवान्, तामपि पाययामास। परिणामतः क्षीबत्वं भृशं प्रवृद्धम्। आवयोश्च प्रणयकलहः प्रववृते। "क्षीबो जनः किं सचेतनो भवति ? स जानाति वा कथं व्यवहरणीयम् ?" रागमञ्जर्याः क्वणितैरुत्तेजनकरैर्वचोभिः प्रोत्साहितः समुत्तेजितोऽहं नागदन्तात् तीक्ष्णधारं कृपाणमादायोत्तोल्य गर्जितुमारेभे -

"त्वं मम पराक्रमं वा चातुर्यं वा न क्वाऽपि क्वचिदप्यपश्यः। पश्य, अद्यैव रजन्यां चम्पापुरीमेतां निर्मथ्य सकलं धनमपहृत्य तव चरणयोरर्पयामि।"

इति कथयित्वा चरणयोः पतन्तीं क्षमायाचनां कुर्वन्तीं मामवरोद्धुं प्रयतमानां रागमञ्जरीं कराघातेनैकेनैकतोऽपसार्योन्मत्तगज इव गृहान्निर्गत्याऽहं राजमार्गमाश्रित्य त्वरितगत्या प्रचचाल।

किञ्चिदिव विप्रकृष्टान्तराले गतवति मयि सम्मुखादेव नगररक्षकाणां गुल्ममेकं समाजगाम। करे कृपाणमुत्तोल्य धावन्तं मामवलोक्य तैर्ज्ञातं यत् कोऽपि महासाहसिको दस्युर्धावति। निग्रहणाय प्रयासपरास्ते कृपाणेन मया प्रहताः। परन्तु सुरासेवनेन क्षीबत्वान्मम करः शिथिलोऽवर्तत। प्रयत्नानां शतैरपि सम्यगसिचालनासमर्थोऽहं कतिपयैरेव क्षणैः प्रस्खलन् भूमौ पपात।

भूमौ पतिते मयि सुरामदो मे व्यपगतः। मया चिन्तितम् -

"किमत्र करणीयम् ? कथमात्मा रक्षणीयः ? सुरामदोन्मादस्तु सर्वथा परिहरणीयः। मम बन्धनेन स्नेहशीलबन्धुषु विपदां पर्वताः विस्तृताः भविष्यन्ति। मम बान्धवाः कां दशां प्राप्स्यन्ति ? मम हृदयनिर्विशेषो धनमित्रो वयस्यो निश्चयेन बन्दीभविष्यति। प्रिया रागमञ्जरी चाऽपि कुत्सितां दशां प्रपत्स्यते।"

इत्थं विचारयत्येव मयि प्रहरिणो मां रज्जुपाशैरबध्नन्। तदैव मया निजदासी शृगालिकाऽवलोकिता। सम्भवतो रागमञ्जर्या प्रेर्यमाणा सा तत्र समायाता। तामवलोक्य मयोपायो विचारितः। निकटमागतायां तस्यां मयोक्तम् -

"अयि धूर्ते शृगालिके ! अयि वृद्धे कुट्टनिके ! त्वं दूरमपसर। त्वं तस्या एव परमवञ्चिकायाः रागमञ्जर्याः दूती वर्तसे। इमाः गणिकाः कदा कस्य भवन्ति ? धनमन्यस्याऽपहरन्ति रतिविलासानन्यैश्च कुर्वन्ति। चर्मरत्नपेटिकायाः लोलुपायाः रागमञ्जर्याः सम्बन्धस्त्वया निभृतं धनमित्रेण मित्रमात्मानं मन्यमानेन सह कारितः। शत्रुत्वमेव तेनाऽऽचरितम्। मयाऽपि वैरनिर्यातनं कृतमेव। तस्य मित्रद्रोहिणो धनमित्रस्य चर्मरत्नपेटिका पुनः चोरिता सुगुप्तं रक्षिता। रागमञ्जर्याश्च सकलान्याभरणानि तथा तिरोहितानि, यथा न केनाप्यन्वेष्टुं पार्यन्ते। सम्प्रति रागमञ्जरी धनमित्रश्च द्वावपि खर्परहस्तौ भिक्षावृत्तिमेवाऽऽचरिष्यतः। मया तु स्वर्गं गमनीयमेव। परं मम हृदयस्य शल्यं निर्गतम्। सम्प्रत्यहं सुखेन शान्तचित्तो मरिष्यामि।"

गणिकाकुलवर्तिनी सा शृगालिका परमधूर्ताऽवर्तत। मम कथनस्याऽभिप्रायं ज्ञात्वा नयनेऽश्रुपूर्णे कृत्वा करावायोज्य बद्धाञ्जलिः सा नगररक्षकानुपगम्याऽतिदीनवचोभिः प्रार्थयामास -

"हे भद्रपुरुषाः ! भवन्तो वीरा उदारप्रकृतयश्च मम प्रार्थनां स्वीकुर्वन्तु। अयं तस्करः स्वकृत्यफलं मृत्युदण्डं भोक्ष्यत्येव। तथाऽप्येनं चाटूक्तिभिः प्रसादयितुमिच्छामि। सम्भवतोऽयं मम स्वामिन्याः रागमञ्जर्या आभूषणानां गोपनरहस्यमुद्घाटयेत्। मृतेऽस्मिन् मम स्वामिन्यास्तान्याभूषणानि रहसि गुप्तान्येव भविष्यन्ति।"

धूर्तायाः शृगालिकायाः विनम्रचाटूक्तिभिः प्रभावितानां प्रहरिणां हृदयानि करुणार्द्राणि सञ्जातानि। मां निकषा गन्तुं साऽनुमता। तदनन्तरं मामुपगम्य चरणयोर्निपत्य सगद्गदकण्ठं तया प्रोक्तम् -

"वीर ! दासीजनस्याऽपराधाः भवता क्षन्तव्याः। सेवापरायणया रागमञ्जर्या भवते विविधप्रणयरतिसुखानि प्रदत्तानि। सा स्वयं भवताऽनुग्राह्या। मित्रद्रोहिणं धनमित्रं प्रति तव रोषः समुचितः स्वाभाविकश्च। तेन तव भार्या रागमञ्जरी धनलोभेन प्रलोभिताऽभिसन्धिता। भवतः प्रतिशोधभावना समुचिता। परं दास्याः रागमञ्जर्या अपराधमिमं क्षमस्व। वाराङ्गनानां रूपमेव तासां जीवनवृत्तिः। रूपेणोपार्जितान्याभरणानि तासां प्राणाः। आभरणवञ्चिता रागमञ्जरी ध्रुवं प्राणांस्त्यक्ष्यति। तस्या आभरणानि कुत्र भवता गोपितानि, इति रहस्यमुद्घाटयतु भवान्। स्वर्गयात्रायै प्रस्थितो भवाननेन पुण्येन महत्तरांल्लोकान् अवाप्स्यति।"

दयां प्रदर्शयता मयाऽपि प्रोक्तम् -

"अयि वृद्धे कुट्टनिके ! धूर्ते शृगालिके ! तव कथनं सत्यं वर्तते। तव याचना मया स्वीक्रियते। मृत्युमुखपतितेन जनेनाऽनुरागद्वेषौ न व्यवहर्तव्यौ। को लाभस्तस्य स्वर्गपथप्रस्थितस्य व्यवहारेणाऽनेन? तव स्वामिनी रागमञ्जरी मुदिता निर्वृता भवतु।"

इति कथयता मया तस्याः मुखं कर्णयोरन्तिकमानीय स्वकीया योजना प्रतिबोधिता। मम कथनस्याऽभिप्रायं विदित्वा प्रसन्नभावेन सा मामचकथत् -

"वीर ! चिरञ्जीव। दिव्यविलासनुपभुञ्जीथाः। राजा तवाऽपराधान् मर्षिसीष्ट। इमे प्रहरिणोऽपि त्वयि दयावन्तो भूयासुः। देवानामप्याशिषस्ते वर्तिषीरन्।"

इति कथयित्वा सा वृद्धा शृगालिका ततोऽपसृता। अथ नगररक्षका अपि मां रज्जुपाशैर्बद्ध्वा नगराधिपतिं निन्युः। तस्याऽऽदेशेनाऽहं कारागृहे बन्दीकृतः। चम्पायां भणितिरियं प्रथिता -

"कश्चित् तस्कराधिराजो नगररक्षकैर्गृहीतः। तेनैव चम्पायाः समृद्धश्रेष्ठिनां धनानि चोरितानि। तेनैव च धनमित्रस्य चर्मरत्नपेटिका चोरयित्वा कुत्रचिद् गोपिता।

कारागृहं राजप्रासादस्य पार्श्वस्थं संलग्नं वर्तते। केवलं सोत्सेधवती भित्तिरेका द्वयोर्भवनयोर्मध्यवर्तिनी वर्तते। भित्तेरेकस्मिन् पार्श्वे कारागृहं द्वितीये च पार्श्वे राजभवनम्। राजभवनस्यैकस्मिन् पार्श्वे प्रमदवनं तेनैव च संलग्नं कन्यान्तःपुरं वर्तते।

कारागृहस्य प्रधानाध्यक्षेण कान्ताभिधानेन तरुणपुरुषेण मासपूर्वमेव पितुरनन्तरमेतस्य पदस्य कार्यभारो गृहीतः। आत्मानं सौन्दर्ययौवनसम्पन्नं बलशालिनं चित्ताकर्षणकरं मन्यमानोऽसौ परमं गर्वमुवाह। कारागृहे बन्दीकृतस्य मम सप्त दिनानि व्यतीतानि। एकस्मिन् प्रभाते सूर्योदये सञ्जाते मण्डयित्वाऽऽत्मानं विविधालङ्करण-सुशोभितोऽसौ मामुपगम्य भर्त्सयन्नेवमुवाच -

"अरे तस्कर ! त्वया चम्पानगर्याः श्रेष्ठिनां धनान्यपहृतानि। यदि जीवितुमिच्छसि, धनं तत् प्रत्यर्पय। त्वया धनमित्रस्य चर्मरत्नपेटिकाऽप्यपहृता। तामपि प्रतिदेहि। यदि त्वं चोरितं धनं चर्मरत्नपेटिकाञ्चाऽपहृतां न प्रत्यर्पयिष्यसि , विविधासह्ययातनाभिः सम्पीडितो विचित्रवधदण्डं प्राप्स्यसि। अथवा कुक्कुरैर्भक्ष्यसे। अथवा हस्तिपादेन विमर्द्यसे। अथवा खण्डशः कृतानि तव शरीराङ्गानि वायसाः भक्षयिष्यन्ति।"

अहं सर्वमेतत् तदभिप्रायमजानाम्। चर्मरत्नपेटिकारहस्योद्भेदनावधिकं मम जीवनमवर्तत। अन्यथा बन्दीकृते मयि वधदण्डो मे निश्चितो बभूव। कान्तस्य कारागृहाध्यक्षस्य वचनानि श्रुत्वाऽपि निर्भयेन मया स्मितमोष्ठयोरानीय कथितम् -

"अरे कारागृहाध्यक्ष ! किं मे भयं प्रदर्शयसि? अहं तु कदाऽपि कस्मादपि कारणान्मरणादपि न बिभेमि। सर्व एव मत्तो बिभ्यति। मृत्युं करतलमारोप्य

साहसकार्याणि करोमि। परन्तु मृत्युमुखपतितेन किंकरणीयमधुना मया शत्रुभावेन। अपि प्रत्यर्पयियं सर्वेषामपि श्रेष्ठिनां मुषितं धनं, परन्तु धनमित्रस्य चर्मरत्नपेटिकां खण्डशः कृतोऽप्यहं न प्रत्यर्पयिष्यामि। धनमित्रेण क्रूरं छलितम्। मित्रत्वमापन्नेनाऽपि तेन काञ्चनेन प्रलोभिता मम प्रियाऽपहृता। तस्मात् कारणादयुताभिरपि यातनाभिः पीड्यमानः खण्डशो विदीर्यमाणोऽपि सर्वं सहिष्ये, परं मित्रद्रोहिणो धनमित्रस्य चर्मरत्नपेटिकायाः गोपनरहस्यं नोद्घाटयिष्यामि।"

महाराजेन चम्पाधीश्वरेणाऽऽदिष्टमासीत् -

"केनाऽप्युपायेन कथमपि सन्तर्जनेन वा सान्त्वनेन वा प्रलोभनेन वा चर्मरत्नपेटिकोपलब्धिरवश्यमेव सुनिश्चितीकरणीया।"

तर्जनोपाये विफले सति कान्तेन सान्त्वनोपायप्रयोगः प्रारब्धः। विविधैरुपायैर्मामाराधयितुं तेन प्रयासाः विहिताः। मम चिकित्सायै सुप्रबन्धो विहितः। भोजनादिभिश्चाऽसौ मां प्रीणयामास। एवम्भूते च प्रबन्धे कतिपयदिवसैरेवाऽहं सम्प्राप्तसम्पूर्णस्वास्थ्यः शक्तिमात्मन्यनुभवन् पूर्ववत् प्रकृतिस्थः सञ्जातः।

अथ व्यतीतेषु कतिपयेषु दिवसेषु मया कारागृहे सिंहघोषो नाम कश्चिद् वीरयुवकोऽवलोकितः। मिथ्यापराधानारोप्य शत्रुभिरसौ षड्यन्त्रं विरच्य कारागृहे बन्दीकारितः। कारागाराधिपतिः कान्तस्तमतितरां विदिद्वेष। यातनाशतेन तं पीडयन् निरन्तरं चुक्रुशे। तस्य तां दयनीयामवस्थामवलोक्य करुणार्द्रचित्तेन मया स मित्रभावेन सत्कृतः। तस्मिन् विश्वासमापाद्य स्वरहस्यस्य चोद्घाटनं कृत्वा मया कथितम् -

"कस्मिन्नपि दिवसे त्वामहमुपकरिष्यमि।"

सिंहघोषोऽपि मयि विश्वसन् प्राणव्ययेनाऽपि मम सहायतायै प्रतिजज्ञौ।

एकस्मिन् दिवसेऽस्तङ्गमितप्राये दिनमणौ वारुणीवर्णरञ्जितायां प्रतीचीदिशि समुज्ज्वलवेशा सुप्रसाधिता सुप्रसन्ना शृगालिका मे दर्शनाय समायाता। सम्भवतः कारागृहाध्यक्षमुत्कोचेन वशीकृत्य तया मन्मिलनानुमतिः सम्प्राप्ता। कारागाररक्षकान् सुदूरं रक्षन्ती मामाश्लिष्य कपोलौ चुम्बनैर्दूषयित्वा सा मामुवाच -

"आर्य ! भवतो नीतिप्रयोगः साफल्यमवाप। भवतोऽनुरोधेन मया प्रथमं रागमञ्जर्यै, तदनन्तरं धनमित्राय भवत्प्रयोगो निवेदितः। तदनन्तरं यदभूत् तच्छ्रूयताम्। मम वचनाद् धनमित्रोऽङ्गराजमुपगम्य निवेदयामास -

"राजन् ! भवदनुग्रहेण चर्मरत्नपेटिका पूर्वं तावन्मया काममञ्जर्याः सम्प्राप्ता। परं पुनः सा केनाऽपि तस्करेणाऽपहृता। अस्मिन्नगरे धूर्त एकः प्रवञ्चननिपुणश्चौरो द्यूतकरो वर्तते। सकलकलासु निपुणः सांसारिकव्यवहारेष्वपि परमं प्रावीण्यमसाववाप। स्वकीयेन व्यवहारचातुर्येण काममञ्जर्या अनुजां रागमञ्जरीं वशीकृत्याऽसौ तया सह

सततं दिव्यरतिप्रणयविलासानन्दानुपभुङ्क्ते। विधिनियोगेन तेन द्यूतकरेण सख्यमाप्तोऽहं तस्य गृहं जगाम। तत्र रागमञ्जर्या सह मे परिचयो बभूव। तं द्यूतकरं भ्रातरमिवाऽवगच्छतो मे सा रागमञ्जरी भ्रातृजाया बभूव। परस्परं हासपरिहासेषु हर्षमनुभवन्तस्त्रयोऽपि समयमतिवाहयन्ति स्म। अहं प्रायश्चर्मरत्नपेटिकातोऽधिगतानि स्वर्णाभरणानि भ्रातृस्नेहवशाद् भ्रातृजायायै समुपाहरम्। परं तेन द्यूतकरेण परिकल्पितं यदहं तस्य प्रियामेव तदङ्गसङ्गलुब्धो वञ्चयामि। ईर्ष्याकलुषायितचेता असौ रागमञ्जर्याः स्वर्णाभरणपेटिकां मम च चर्मरत्नपेटिकामपजहार। परमेकस्यां रजन्यां प्रगाढान्धकाराच्छन्नायां स्तेयार्थमितस्ततो राजमार्गेषु पर्यटन्नसौ नगररक्षकैर्निगृहीतः कारागारे च निक्षिप्तः।

राजन्! मृत्युमुखपतितेन रागमञ्जर्याः सेविकायाः शृगालिकायाश्चाटूक्तिभिर्द्रवीभूतहृदयेन तेन पादयोः पतन्त्यै सेविकायै स्वप्रियाया आभरणगोपनस्थानं तूद्घाटितं, परं न मे चर्मरत्नपेटिकाया रहस्यमसौ भिनत्ति। रागमञ्जर्याः प्रणयरतिविलासान् संस्मृत्य तेन तथा कृतम्। स तु चौरो हठी दुराग्रही विगतयातनामरणभयो न केनाऽपि दण्डेन भीषयितुं शक्यते। यदि भवान् वधदण्डेन तं दण्डयिष्यति, स मृतो मरिष्यति परं न मम चर्मरत्नपेटिकायाः स्थितिलक्षणं कथयिष्यति। स तु चाटूक्तिभिः स्नेहवचनैश्च विनेयः। एतासु परिस्थितिषु किं करणीयमिति भवानेव प्रमाणम्।"

धनमित्रस्य विनयवचांसि निशम्याऽङ्गराज आदिदेश -

"नैतस्य चौरस्य वधः करणीयः, किन्तु सादरं सत्कृत्य चाटूक्तिभिर्वशीकरणीयो, येनाऽसौ चर्मरत्नपेटिकायाः गोपनस्थानमुद्घाटयेत्।"

द्वितीयामपि वार्तां शृणु -

"मया रागमञ्जर्याः समक्षं भवतः सकलो नीतिप्रयोगो विशदीकृत्य प्रकटितः। भवतः कारागारबन्धनेन तस्याः हृदयमतिशयेन दूयते। चम्पाधिपस्यैकला सन्ततिरम्बालिका जनकस्य ननु द्वितीयं हृदयम्। तया सह मया रागमञ्जर्याः सख्यं समुत्पादितम्। राजसुतायाः सेविका सुमङ्गला मे सखी घनिष्ठभावेन परिचिता। सुमङ्गलां गृहे निमन्त्र्य सत्कृत्य बहुभिर्महार्घैरुपहारैरहं वशीचकार। तां माध्यमं विधाय राजसुता सादरं सविनयं निमन्त्रिता। परस्परावलोकने सञ्जातेऽम्बालिकारागमञ्जर्यौ घनिष्ठमैत्रीभावमवलम्ब्य हृदयनिर्विशेषे सम्भूते। सम्प्रति पारस्परिकस्नेहप्रदर्शनेन इतरेतरभवनगमनेन रुचिकरोपहारप्रदानेन मनोऽनुकूलैर्वार्तालापैश्च तयोः स्नेहानुरागो नित्यं वर्धते।

एकस्मिन् दिवसे राजभवने कन्यान्तःपुरं रागमञ्जर्या सहाऽहमपि प्रविष्टा। तत्र भवनवलभ्यां स्थितया मया सुस्पष्टरूपेण परितो दृश्यमाने कारागृहप्राङ्गणे

पीठिकयामुपविष्टः कारागाराध्यक्षः कान्तोऽवलोकितः। मम मनसि सत्वरमेका युक्तिः प्रस्फुरिता।

राजकन्यायाः दक्षिणकर्णकुण्डलं पवनप्रवाहेण दोलायमानमवर्तत। स्रस्तमिति कथयित्वा मया यथास्थितिकरणव्याजेन तत्कुण्डलं भूम्यां पातितम्। तत्र केचन कपोता अन्नकणान् चिन्वन्ति स्म। कर्णकुण्डलं वामेतरकरेण विचित्य पारावतान् भीषयितुमिव मया तथाऽऽक्षिप्तं यथा तत् कान्तोपरि पपात। चमत्कृत्य तस्य कान्तस्य दृष्टिरुन्नमय्याऽस्मासु पतिता। तस्मिन्नेव क्षणे मम वार्ताभिः प्रहृष्टा हसन्ती सा राजसुताऽम्बालिका स्मितसुशोभितवदना कान्तं प्रत्यैक्षत। कान्तेन ज्ञातं यद् राजसुता तमेवाऽवलोक्य मन्दं मन्दं हसति। राजसुतां कामयमानः सोऽपि मन्दं जहास। अथ मयाऽपि सङ्केतैस्तस्य कामना प्रवर्धिता। रागमञ्जर्या सह पुनः गृहमहमागता।

तदनन्तरमेकां चाङ्गेरिकामादाय तत्र कौशेयवसनयुगलं ताम्बूलवीटिकाञ्च निधाय राजसुतायाः मुद्रिकया तां सम्मुद्रय निशारम्भे मन्दालोकेऽहं कान्तमुपजगाम। चाङ्गेरिकां कान्ताय समर्प्याऽहमकथयम् -

"वीर ! राजसुताऽम्बालिका प्रतिदिनं कन्यान्तःपुरवलभ्यां स्थिता कारागृह-प्राङ्गणस्थितं भवन्तं सस्पृहं प्रेक्षते। भवतो यौवनसौन्दर्यादिगुणैः समाकृष्टा सा भवते चाङ्गेरिकानिहितमुपहारमर्पयति।"

प्रमुदितमनाः कान्तस्तानुपहारानादाय स्वयमपि मदीयमाध्यमेन राजसुतायै ह्युपहारान् प्रददौ। अहमपि तान्यादाय प्रच्छन्नं गृहमाजगाम।

एवञ्च प्रतिदिनमुपायनानामादानप्रदानप्रत्ययान्ममाऽभिनयाच्च कान्तस्य कामना निरन्तरं वृद्धिमुपाजगाम। कान्तस्य समक्षं प्रतिदिनं राजसुताविरहवेदनां वर्णयन्ती निजमुखोच्छिष्टताम्बूलमहं राजसुतामुखोच्छिष्टमिति कृत्वा तस्मै कान्ताय समर्पयामास। ताम्बूलमास्वादयन्नसौ महामूर्खः कान्तोऽतितरां प्रमुदितो राजसुताकामनावशीभूतोऽह्नोरात्रं तामुपलब्धुं स्वप्नानवलोकयामास।

राजसुतायै कान्तस्याऽभिलाषं बलवत्प्रोज्ज्वलितं कृत्वा एकस्मिन् सायंकाले राजसुतामुखोच्छिष्टमिति निजमुखोच्छिष्टां ताम्बूलवीटिकां मदुत्तरीयकौशेयवस्त्र-प्रान्तखण्डञ्चाऽऽदाय कान्तगृहं गत्वा तमुवाच -

आर्य ! चक्रवर्तिरेखाङ्कितं भवतो हस्तपादं सार्वभौमत्वं सूचयति। भवान् वीरः साहसी नीतिज्ञोऽनुपमसौन्दर्यसम्पन्नश्च वर्तते। ज्योतिर्विदां दैवज्ञानां भविष्यद्वादो, यद् भवानेनं देशं प्रशासिष्यति। तदनन्तरं बङ्गगौडकामरूपपर्यन्तं भवान् साम्राज्यं विस्तरिष्यति। अथ चाऽऽङ्गराजस्यैकलाऽद्वितीया सन्ततिर्वर्तते अम्बालिका। सा च भवन्तं कामयते। सानुरागा सा भवन्तमेव भर्तृरूपेण प्रेक्षते। विवाहानन्तरं भवानस्य

जनपदस्योत्तराधिकारी शासको वर्तिष्यते। राजसुतामम्बालिकां हृदयनिर्विशेषां द्वितीयमिव जीवितमवगच्छन् नरपतिरयं भवत्प्रणयवृत्तान्तं ज्ञात्वा भवन्तं जामातृरूपेण स्वीकरिष्यति। अतो भवान् राजसुतामम्बालिकां प्राप्तुं प्रयत्नशीलो भवतु। तदनन्तरं क्षणं विरम्य मया कथितम् -

हे वीर ! राजसुतायाः प्रबलेयं कामना, यद् भवान् केनाऽपि विधिना कन्यान्तःपुरं प्रविश्य तस्याश्चेतसि समुद्दीपितं विरहवह्निं शमयतु। परं सुगुप्तमेतत् कार्यं करणीयम्। तत्र गमनमपि नाऽतिदुष्करम्। कन्यान्तःपुरप्रमदवनबाह्यभित्तिसंलग्नमिदं कारागृहं वर्तते। केनचिदपि स्वकर्मणि कुशलेन तस्करेण सुरङ्गां कारयित्वा भवता तत्र गमनमार्गः प्रशस्तीकरणीयः। कन्यान्तःपुरसेविकाः राजसुतायै स्निह्यन्त्यतिशयेन। ताः सुगुप्तरूपेण भवन्तं राजसुतासमीपं नेष्यन्ति। अथ च सुगुप्तमिदं भेदं नोद्घाटयिष्यन्ति। इत्थं भवान् राजसुतासङ्गतिमापन्नः प्रतिदिनं तस्याः प्रणयभावनां सुदृढीकरोतु। विदिते च भवत्प्रणयवृत्तान्ते सुतामेव सर्वस्वं मन्यमानश्चम्पेश्वरः सम्बन्धमेनमङ्गीकृत्य पाणिग्रहणसंस्कारेण तां सर्वगुणसम्पन्नां राजकन्यामम्बालिकां सर्वगुणसम्पन्नाय भवते समर्पयिष्यति।

सुरङ्गाखननमपि नाऽतिदुष्करम्। कोऽपि कुशलस्तस्करो भवता स्वप्रयोजनं सम्पादयितुमवेक्षणीयः। चौरास्तस्कराश्चेदृशेषु कर्मसु निपुणाः भवन्ति। भवतो कारागृह एकोऽतिकुशलो धूर्तश्चौरो द्यूतकरो वर्तते। सुरङ्गानिर्माणशिल्पकर्मणि न कोऽपि तमतिरिच्यते। तं कथमपि प्रलोभ्य सुरङ्गानिर्माणे प्रयुनक्तु भवान्। प्रलोभयतु भवांस्तम् -

"कार्यसिद्ध्यनन्तरं सुगुप्तरूपेण सः कारागृहाद् विमुक्तो भविष्यति।"

परं न तथा भवता करणीयम्। तं न विमुञ्चतु। सुरङ्गानिर्माणे सञ्जाते तस्य चौरस्य मध्यस्थितस्य वधः करणीयः। भवता प्रचारणीयम् -

सुरङ्गां कृत्वा पलायमानोऽयं चौरो रक्षकैर्वार्यमाणो निषिद्धः संघर्षे हतः स्वर्गञ्जगाम।

"एवंविधेनोपायेन हते तस्मिंस्तस्करे भवतो रहस्यस्योद्भेदो न भविष्यति, राजसुतोपलब्धिमार्गश्च प्रशस्तो भविष्यति। एवञ्चाऽस्मिन् कार्ये सफलीभूते कार्यसाफल्येन सह रहस्यमपि भवतः सुरक्षितं भविष्यति।"

इत्थं स्वकीयां योजनां वर्णयन्ती सा धूर्ता शृगालिका पुनः मां प्रोवाच -

"हे वीर ! एवंविधैर्विषगर्भितैः प्रवञ्चनापरैर्मधुरवचोभिः सः कारागाराध्यक्षः कान्तो मय्यतिशयेन विश्वसिति। सम्प्रत्यसौ - "भवानेव सुरङ्गाखनने रहस्यरक्षणे च समर्थ" इति भवन्तं प्रार्थयिष्यते। सपद्येवाऽसौ कान्तोऽत्राऽऽगमिष्यति स्वगृहगमनाय

च भवन्तमामन्त्रयिष्यति।"

इति मां सूचयित्वा सा धूर्ता शृगालिका ततो निर्गता। अवसरमुपलभ्याऽहं सिंहघोषमुपगम्य सकलं वृत्तान्तं श्रावयित्वा प्रोवाच -

मित्र ! मयाऽसौ वञ्चकः कान्तः सुरङ्गायां हन्तव्यः। तदैवाऽहं कारागृहान्निर्गमिष्यामि। मयि निर्गते बन्धनागारात् त्वया सर्वैरन्यैर्बन्दिभिर्मिलित्वा कोलाहलः करणीयः -

"कारागाराध्यक्षः कान्तः कन्यान्तःपुरप्रवेशाय सुरङ्गां कारयित्वा तत्र गच्छन् मार्ग एव केनाऽपि हतः।"

सिंहघोषेण सर्वमेतद् गुप्तमन्त्रमिवाऽवबुध्य तदनुसारं कार्यकरणं प्रतिज्ञातम्। गते च सिंहघोषे सा शृगालिका कान्तेन सह झटिति मम समक्षमाजगाम।

इत्थं स्वचरितं श्रावयन् कुमारसमक्षं क्षणं विरम्याऽपहारवर्मा पुनः बभाषे -

"कुमार ! तथाऽवस्थिते सति शृगालिकया सह समुपस्थितं कान्तमवलोक्य भयाभिनयं कुर्वन्नहं समुत्तस्थौ। कान्तस्तु निजदक्षिणकरं मम वामस्कन्धे निधाय मधुररससम्भृतवचनैर्मामाश्वासयामास -

"यदि त्वं स्वप्रकोष्ठात् राजप्रासादान्तर्गतकन्यान्तःपुरपर्यन्तं सुरङ्गां कृत्वा मार्गनिर्माणं करिष्यसि, ध्रुवं सुगुप्तरूपेण कारागृहान्मुक्तो भविष्यसि।"

कान्तवचनमुररीकृत्य मया सुरङ्गानिर्माणं निर्णीय तस्यामेव रजन्यां तथाकर्तुं निश्चयो विहितः।

कान्तस्य प्रार्थनां स्वीकृतवत्येव मयि स कारागारस्याऽधिपतिर्मम लोहशृङ्खलामयान् निगडानपनेतुमादिदेश। तथाभूते च सति विविधसंस्कारयुतं रसनातृप्तिकरं भोजनं कारयित्वा स्वच्छबहुमूल्यानि वस्त्राणि च दत्त्वाऽसौ मन्निर्दिष्टानि सुरङ्गानिर्माणोपयोगीनि उपकरणानि समानिनाय। अथ सञ्जाते सूर्यास्तङ्गमनसमये प्रगाढान्धकाराच्छन्नासु सर्वासु दिक्षु मया सुरङ्गाखननकार्यं प्रारब्धम्। अर्धरात्रसमयपर्यन्तं कार्यमेतन्मया समाप्तम्।

सुरङ्गां कृत्वा यावदेवाऽहं बहिरागच्छमसिसहायेन कान्तेन मम शिरश्छेत्तुं प्रहारो विहितः। परं क्वाऽसौ वराकस्तस्मिन् कर्मणि क्षमते? पूर्वमेवाऽहं पादन्यासं परिवृत्य पादाघातेनैव तं कान्तं भूमौ निपात्य तस्य हस्तादसिमाच्छिद्य तेनैवाऽसिना तं कृतघ्नं शिरसा विच्छिन्नं चकार। सर्वतः प्रसरन्त्या कान्तकण्ठविनिर्गतया रुधिरधारया तद् गुहामुखं रुधिररागरञ्जितं सञ्जातम्। तदनन्तरमहं कान्तपृष्ठानुगामिनीं शृगालिका-मुवाच -

"अयि कुट्टनिके ! सम्प्रति कन्यान्तःपुरमार्गं निर्दिशन्ती मया सह तत्र गच्छ, यत्र

सा राजनन्दिनी अम्बालिका वर्तते। मया कृतोऽयं सुमहान् प्रयासो व्यर्थो न भवेत्।"

ममैतेन साहसिककार्येणाऽतितरां स्तम्भिता विस्मयान्विता भीता परं हृदि प्रसन्ना सा शृगालिका सुरङ्गामार्गेण कन्यान्तःपुरप्रमदवनं यावन्मामनुससार। तदनन्तरं तन्निर्दिष्टमार्गेणाऽहं प्रमदवनात् कन्यान्तःपुरं प्राविशम्।

अस्मिन्निशीथावसानसमये तत्र सर्वे जनाः प्रगाढनिद्रावशङ्गता अचेतना इव स्वपन्ति स्म। परं दूरतः कुतश्चिद् रक्षकाणां जागरूकतासूचकाः ध्वनयः प्रसरन्तो मम कर्णगोचरीभूताः। सूचिवेध्ये प्रगाढान्धतमसि यत्र तत्र मणिजटितदीपकानामालोके मार्गोऽवालोक्यत। ममानुरोधं सम्मान्य सा शृगालिका मामम्बालिकाकक्षे प्रवेशयामास।

राजसुता मणिजटितकाञ्चनपर्यङ्के सुकोमलतूलिकास्तरणे सुष्वाप। तदा स्तेयं विस्मृत्य तदस्पृष्टमनुपमं दिव्यं नारीसौन्दर्यं निरीक्ष्य मम मनस्तत्क्षणं परकीयो भूत्वा तदधीनताङ्गतम्। प्रतनुषु वस्त्रेषु तस्याः वपुषोऽङ्गानां सुतप्तहेमाभं लावण्यं मन्ददीपप्रकाशेऽतितरां सङ्क्रान्तं बभूव। शारदीयेषु जीमूतेषु स्फुरन्ती विद्युदिव सा तरुणी मम हृदयमन्तःकरणसहितानि बाह्यकरणानि तत्क्षणं बबन्ध। तस्याः सौन्दर्येण प्रहतोऽहं किङ्कर्तव्यविमूढ इव तथावस्थित एव निष्पन्दो निश्चलस्तस्थौ। शृगालिकायाः समवबोधनेन किञ्चिल्लब्धसंज्ञोऽहं व्यचिन्तयम् -

"अस्यास्तरुण्या अङ्गसङ्गं विना न किमपि जीवनस्य प्रयोजनमस्ति।"

प्रथमं तावदहं तां रूपयौवनसुशोभितां तरुणीं स्वपन्तीमेव क्रोडे कृत्वाऽपहर्तुमभिललाष। परं मम करस्पर्शमवाप्य चमत्कृतायास्तस्या आक्रन्दसम्भावना मां तस्मात् कार्यान्न्यवारयत्। तथा सति कन्यान्तःपुररक्षकाः सर्वतो धावन्तः समागत्य मां निगृह्य पुनः मृत्युदण्डभोगाय कारागृहे निक्षिपेयुः। तथापि तां मृगशावाक्षीं प्रति प्रणयनिवेदनमन्यप्रकारेण मया निश्चितम्।

तत्र तस्मिन् कक्षे नागदन्ते काष्ठपट्टिकैकाऽवलम्बे। समीपमेव मसीपात्रेण सह तूलिकाऽपि मयाऽवलोकिता। तस्यामेव काष्ठपट्टिकायां तूलिकया राजनन्दिन्याः स्वप्नावस्थायाश्चित्रमालिख्य चरणयोश्च प्रणतवदनस्य बद्धाञ्जलेरात्मनोऽपि चित्रमालिखितं मया। तस्याऽधो लिखिता मयेयं गाथा -

**"बद्धाञ्जलिश्चरणयोर्निपत्य ते दासो ननु वदाम्यहम्।**
**जीवनावलम्बनं मे तव मधुस्मिततिरःदर्शनम्।।"**

तदनन्तरं मयाऽतिनैपुण्येन गहननिद्रावशंवदायाः राजनन्दिन्या अङ्गुलितोऽङ्गुरीयकमादाय तत्र निजाङ्गुरीयकं पिनद्धम्। काष्ठपट्टिकां राजसुतायाश्चरणयोरन्तिकं संरक्ष्य पौनःपुन्येन निवर्तितग्रीवस्तामेवाऽवलोकयन् कथञ्चिदेव महता कष्टेन कारागृहप्रकोष्ठसुरङ्गामार्गेण प्रत्याजगाम।

ब्राह्ममुहूर्तसमयः समायातः। परं बन्धनागारं प्रगाढतमसा परिवृतमासीत्। तदनन्तरं कान्तनिर्दिष्टेन सङ्केतसाहाय्येन शृगालिकया सह बन्धनागाराद् बहिरागत्य गृहाय प्राचलम्। मम साहसेन पराक्रमेण शौर्येण प्रतिभया नयेन बुद्ध्या च विस्मिता हर्षिता शृगालिका मां रागमञ्जरीगृहमानिनाय। बालसूर्योदयसमयं यावद् रागमञ्जरीं वारम्वारमाश्वास्य विरहजनितां वेदनामपसार्य प्रणयविलासैरात्मानं ननन्द।

एतेष्वेव सम्भ्रमेषु प्रातःकालिकी बालभास्करस्याऽऽभाऽरुणवर्णमयी सर्वत्र प्रसृता। तस्मिन्नेव काले शृगालिकया मे समाचारानाकर्ण्य धनमित्रोऽपि तत्राऽऽजगाम। तेन सह मन्त्रयित्वा मयाऽऽगामिनी योजना निर्धारिता। तदैव विमर्दकोऽपि मालवजनपदात् समाचारानादाय समायातः। तेन सूचितम् -

"उज्जयिन्यां चण्डवर्मणा कुमारो राजवाहनो निगडनिबद्धो लोहशलाकापञ्जरे बन्दीकृतः। अथ च पुष्पोद्भवो हृतसर्वस्वः सपरिजनः कारागारे वर्तते।"

समाचारानेतान् निशम्य सर्वाणि तत्रत्यानि मित्राणि समवेतानि कृत्वा भाविकार्यक्रमनिर्धारणाय मया विचारितम्।

अथाऽपरेद्युर्मां धनमित्रोऽङ्गराजसमीपं निनाय। अङ्गराजस्याऽन्तरङ्गतां गतोऽसौ तस्य विश्वासभाजनं बभूव। अङ्गराजसमक्षं धनमित्रो मामतिशयेन प्रशशंस, मम च गुणानकीर्तयत्। सः कान्तं विश्वासघातिनमचकथत्। सुरङ्गां भित्त्वाऽसौ राजभवने कन्यान्तःपुरप्रवेशाय चेष्टन्नासीत्। स्वपातकैरेवाऽसौ सुरङ्गाद्वारे निहतः। खलः स्वदुष्कृत्यैरेव निहन्यते, परं साधुः सुकृत्यैर्दुःखेभ्यो विमुच्यते।

चम्पाधिपेन कारागृहे प्रेषितानां राज्याधिकारिणां सिंहघोषस्य कारागारनिबद्धानामन्येषाञ्च बन्दिनां साक्ष्यैर्विश्वासः कृतो यत् कारागाराध्यक्षः कान्तो विश्वासघातकोऽवर्तत। अस्मिंस्तत्त्वसङ्ग्रहे सिंहघोषोऽपि निरपराधः प्रमाणितो बभूव। मम गुणगणेन माहात्म्येन च सन्तुष्टो महीपतिर्मम मन्त्रणां सम्मान्य सिंहघोषं कारागाराध्यक्षपदे न्ययौक्षीत्। अथ चाऽसौ मय्यतितरां प्रसन्नो मां सहायकसैन्याध्यक्षपदेऽभिषेचयामास।

इत्थं सर्वाणि कार्याणि साधयित्वा नगराद् बहिर्गत्वा मरीचेर्मुनेराश्रमं गत्वा तस्य चरणयोः प्रणम्य मया काममञ्जरीसम्बद्धानां घटनानां वर्णनं कृतम्। सुकठोरतपःप्रभावेण तेन मुनिना क्षीणतां गताः सर्वा सिद्धयः पुनरप्यधिगताः। अथ च तेन भविष्यदुद्घाटितम्-

"अल्पेन समयेन कुमारस्य दर्शनं चम्पायामेव भविष्यति। अस्माभिरुज्जयिनी न गन्तव्या।"

निजोदन्तं वर्णयन् अपहारवर्मा पुनः कथयामास -

भवद्दर्शनप्रतीक्षाव्याकुलोऽहं रागमञ्जर्या सह विगतचिन्तातिभारः प्रणयविलासा-

नन्दाननुबभूव। परं तत्र राजप्रासादस्य कन्यान्तःपुरेऽपर एव विभ्रमः समुत्पन्नः। शयनोत्थिता राजनन्दिनी अम्बालिका काष्ठपट्टिकायामालिखितं चित्रं तदधश्च प्रणयभावभरितं निवेदनमवलोक्य समुत्कण्ठाभरेण समाक्रान्ता। तया स्वहस्ताङ्गुलिप्रणयिनी मुद्रिकाऽपि केनाऽपि विनिमयेन गृहीता विलोकिता। अथ च शृगालिका तस्या औत्सुक्यभावमतिशयेन वर्धयामास। मम सङ्गमाकाङ्क्षिणी सा राजकन्या शृगालिकामाध्यमेन निजवैक्लव्यं निवेदयामास। अहमपि सिंहघोषसाहाय्येन तेनैव मार्गेण सुरङ्गया प्रतिनिशं कन्यान्तःपुरं प्रविश्य राजसुतां प्रीणयामास। साऽपि मय्यनुरक्ता मां प्राणेभ्योऽपि गरीयांसममन्यत। तत्प्रेमपाशे बद्धोऽहं राजसुतासङ्गम-सुखान्यनुभवन् न कमपि जनं निजसदृशं भाग्यवन्तमजीगणम्।

एष्वेव दिवसेषु चण्डवर्मणः सन्देशहरश्चम्पामागम्य स्वस्वामिने राजनन्दिन्या अम्बालिकायाः पाणिं पूर्वं प्रत्याख्यातोऽपि ययाचे। मम मन्त्रणामङ्गीकृत्य चम्पाधिपतिश्चण्डवर्मणः सन्देशहरं कठोरवचनैरवधूय राजसभायाः बहिर्निरकासिषीष्ट।

भृशं तिरस्कृतः चण्डवर्मणः सन्देशहरश्चम्पायाः निर्गत्योज्जयिन्यै प्रतस्थे। तदनन्तरमस्माभिराशङ्कितम् -

"प्रत्याख्यानापमानमसहमानश्चण्डवर्मा रुषा चम्पां ध्रुवमाक्रमिष्यते।"

ततो मम परामर्शेण नरपतिना सिंहवर्मणा संश्रयं राजनयमङ्गमङ्गीकृत्य सहायतार्थं मित्रराजानो निमन्त्रिताः। तस्य सन्देशमादाय सन्देशहरास्त्वरितगामिनश्चम्पायाः प्रतस्थिरे। परं चण्डवर्मा तु न तथा दीर्घसूत्री अवर्तत। यावत् सहायकराजान आगच्छन्ति, स त्वरितगत्या यानमाश्रित्योज्जयिन्याः प्रस्थाय महत्या सेनया चम्पामवारुणत्। परमङ्गाधिपस्तदाक्रमणं न सेहे। कदाचिदयमाक्रान्ता चम्पामवरुध्य भोजनादिसाम-ग्रीणामायातं विच्छेदयेदिति शौर्यसमुज्ज्वलप्रतापो वीरहृदयः सहायकाननपेक्ष्य स्वल्पीयस्या शौर्यसमुज्ज्वलया देशस्वामिभक्तिसम्भृतहृदययाऽनीकिन्या सह नगरतोरणमुल्लंघ्य नगराद् बहिरागतय प्रबलपराक्रमेण चण्डवर्माणमभिदुद्राव।

तस्मिन् महति सम्पराये शत्रून् प्रहरता व्यापादयता ससैन्येन सिंहवर्मणा महच्छौर्यं प्रदर्शितम्। परं चण्डवर्मणोऽतिविशालसैन्यसमक्षं तस्य विजयस्य सम्भावना कुतः? तस्य स्वल्पीयसी सेना चण्डवर्मणो महति सैन्यसमूहे महानद्यां क्षुद्रनदीव समाहिता। क्रमशश्च सैन्यसमुदये सङ्गरे हतेऽङ्गराजेन शौर्यमात्रसहायेन महान् पराक्रमः प्रदर्शितः। परं सत्वरमेव तस्य कार्मुकं खण्डशो भग्नं तनुत्राणं छिन्नं सारथिर्हतः स्यन्दनश्च विनष्टः। तदनन्तरमसहायं भूमावेव संस्थितमशस्त्रं चम्पाधिपतिं शत्रुसैनिकाः निगृह्य चण्डवर्मसमक्षं निन्युः। अम्बालिकाकामुकेन चण्डवर्मणा शत्रोर्वधमनादिश्य भाविश्वसुर इति सिंहवर्मा रज्जुपाशैर्बध्वैकस्मिन्

पटशिविरे सशस्त्रप्रहरिभिरभिरक्षितः।

सिंहवर्माणं विजित्य बन्दीकृत्वा उन्मुक्तगोपुरद्वारेण चण्डवर्मा चम्पां प्रविश्य राजभवनमधिकृत्योद्घोषितवान् -

"निशावसानपूर्वमेव राजनन्दिनीमम्बालिकामसौ विवाहसंस्कारविधिना परिणेष्यति स्वकीयाञ्च करिष्यति।"

सैनिकैः परिवेष्टिते कृतसुरक्षाव्यवस्थे राजभवनप्राङ्गणे विवाहवेद्यां समुपविष्टे वरासने चण्डवर्मणि करुणं क्रन्दमाना कुररीव प्रसरद्भिर्नयनजलैः शरीराङ्गानि वासांसि च क्लेदयन्ती रुदनोच्छूनारुणनयना सा राजकन्या वधूवेशे सुसज्जिता वरासनवामपार्श्वस्थवध्वासने बलात् समुपवेशिता। तदनन्तरं विवाहसंस्काराय पुरोधसः साक्षिणं वैश्वानरं प्रज्ज्वलीकृत्य वेदमन्त्रपाठान् सस्वरं प्रारेभिरे। अथ चण्डवर्मा मङ्गलसूत्रेण शोभमानं दक्षिणकरं राजकन्यायाः मङ्गलसूत्रसुशोभितस्य विकसितसरसिजदलसुकोमलारुणाभस्य वामकरस्य ग्रहणाय प्रसारयामास।

इतश्च चण्डवर्मणः पराक्रमे प्रसरति, ससैन्ये नगरञ्च प्रविष्टे, तस्मिन्नेव समये चारैरस्मन्मित्रराजवर्गस्याऽऽगमनसमाचारो मयाऽधिगतः। स्वभवनस्थित एवाऽहं धनमित्रमाहूयाऽवोचम् -

"मित्र! त्वं प्रमुखनागरिकैः सह गत्वा मित्रपार्थिवान् चम्पामानीय तेषां स्वागतादिप्रबन्धान् सम्पादय। चण्डवर्माऽयं दुराचरणः सिंहवर्मसुताकामुकः परमोत्कण्ठितः स्वरक्षाप्रबन्धे सावधानो न दरीदृश्यते। मया चम्पा विजिता, राजभवनमधिकृतं, राजनन्दिनी बलाद् गृहीतेति बलमदगर्वितोऽयं विवाहोत्सवं कारयति। यावत् त्वं प्रत्यागमिष्यति, तावदहं तस्य तस्करस्य शिरो ध्रुवं ग्रीवातो विच्छिन्नं भूमौ पातयिष्यामि। तदनन्तरं वयं तस्य सैन्यशिविरमाक्रम्य शत्रुसैन्यं विनाश्य चम्पाधिपतिं मोचयिष्यामः।"

मम सर्वगुणसम्पन्नां छिद्ररहितां योजनामवबुध्य धनमित्रः सहायकमित्रमहीपतीनां स्वागताय प्रतस्थे।

चण्डवर्मसैनिकसदृशवेशधारिभिः कतिपयैः शौर्यशालिभिः परीक्षितस्वामिभक्तिभिरुपधाविशुद्धैरायुधिकैः सह राजप्रासादं गुप्तद्वारैः प्रविश्य विभिन्नेषु संवेद्यस्थानेषु तान् सुगुप्तं नियुज्याऽहं द्वाभ्यां सैनिकाभ्यां सह विवाहवेदिं निकषा समुपतस्थौ। चण्डवर्मयोद्धसदृशवेशं मां तस्मिन्नुत्सवसङ्कुले विवाहसंरम्भे न कोऽपि प्रत्यभ्यजानात्।

चण्डवर्मा यावदेव मे प्रियायाः पाणिग्रहणाय पाणिं प्रसारयामास, तावदेव मया मत्तवारणशुण्डादण्डसमबलशाली स करः सुदृढबाहुना बलान्निगृह्याऽऽकृष्टः। तत्क्षणमेव च चन्द्रहासेन तस्य शिरः कबन्धात् पृथक्कृत्य तस्याऽऽत्मा यमलोकपथिको विहितः। कण्ठान्निःसृतेन रुधिरराशिना धारायन्त्रविनिर्गतेन रक्तजलराशिनेव सकला विवाहवेदिः

कर्दमीकृता। मम सैनिका अपि तत्रोपस्थिता अभूवन्।

तथाभूतं ममोग्ररूपमवलोक्य चण्डवर्मयोद्धारो भयभीताः सन्तः शस्त्रास्त्राणि परित्यज्य शरणं याचमानाः प्रणतशिरसो मां पर्यवारयन्। येन केनाऽपि तत्र साहसः कृतस्तत्क्षणमेव विखण्डितकायो यमलोकं प्रेषितः। तदनन्तरमहं तथैव वरासने समुपविश्य मङ्गलसूत्रं दक्षिणकरे निबध्य प्रियायास्तं मङ्गलसूत्रविभूषितं पाणिं जग्राह। भयेन कम्पमानकायैः पुरोधोभिः झटिति मन्त्रपाठं कुर्वद्भिर्वैश्वानरं साक्षीकृत्य यज्ञाहुतिभिः सह विवाहसंस्कारविधिः सम्पादितः। एवञ्च राजसुतायाः पूर्वगृहीतमपि शास्त्रोक्तविधिना तदा प्राप्तं पाणिं स्वकीयं कृत्वा चिरतृषितस्य ममाऽभिलाषः परिपूर्णताङ्गतः। राजनन्दिनीं पाणिना गृहीत्वाऽन्तःपुराय प्रस्थानोद्यते मयि मेघगर्जनसदृशी भवद्घोषणा श्रुतिगोचरीभूता। सपद्येव राजनन्दिनीमम्बालिकां प्रेयसीं सेविकाभिः सहाऽन्तःपुरे प्रवेश्याऽहं भवदन्तिकं समायातः।

अपहारवर्मणोक्तमुदन्तमाकर्ण्य राजवाहनोऽतितरां प्रहर्षभरेणाऽऽप्लुतो बभूव। अथ च मित्रस्य साहसं पराक्रमं नीतिचातुर्यञ्च मधुरोत्साहवचनैः प्रशशंस। उत्थाय तेनापहारवर्मा वक्षस्याऽऽलिङ्गितः। तदनन्तरमसौ मित्राणि निरीक्षमाण उपहारवर्माणमुवाच-

"मित्र! उपहारवर्मन्! तवेदानीमवसरः। त्वमपि स्ववृत्तान्तामाचक्ष्व।"

ओष्ठयोः स्मितमानीय प्रणम्योपहारवर्मा निजवृत्तान्तमेवं वर्णयामास -

# अष्टमी-पीठिका

## उपहारवर्मा

## अष्टमी-पीठिका

### उपहारवर्मा

कुमार ! भवन्तमनुपलभ्य स्थितिमन्वेषणपरोऽहं पर्यटन् परमादरणीयास्पदायाः जगज्जनन्याः जानक्याः जन्मभुवं विदेहजनपदं प्रति ह्युत्तरस्यां दिशि प्रतस्थे। विदेहजनपदस्य राजधानी मिथिला। दिनस्याऽवसानं सूचयितुं भगवान् भास्करः पश्चिमगिरिशिखरमारुह्य पारवर्तिषु गर्तेष्वात्मानं निमज्जयितुं सज्जोऽवालोक्यत। तस्मिन्नेव समये नगरद्वारं सम्प्राप्तवति मयि द्वाररक्षकैर्नगरप्रवेशद्वारकपाटा-नामर्गलाभिरवरोधनं विहितम्।

अपरेद्युः सञ्जाते सूर्योदये प्रसृते च सर्वतोऽरुणाभे प्रकाशे नगरी प्रविष्टव्येति कृतविचारोऽहं रजन्यां विश्रामाय समुचितस्थानान्वेषणायोद्योगशीलोऽभवम्। नगरमुख्यद्वारसमीपमेवाऽहं मठमेकमालुलोके। मठद्वारनिकटमेव वृद्धैका संन्यासिनी दृष्टिपथं समाजगाम। समीपमागम्य सविनयं प्रणम्याऽहं स्वकीयामावश्यकतां न्यवेदयम्। मम प्रार्थनामाःकर्ण्य प्रसन्नचित्ता सा मां मठाभ्यन्तरमानिनाय। तया प्रदत्तं जलभोजनादिकमास्वाद्य तत्रैव प्रकोष्ठद्वारवेदिकायामहं सुष्वाप। आदिवसं मार्गपरिश्रान्तस्य मम चेतनां प्रगाढनिद्राऽपजहार।

ब्राह्मे मुहूर्ते सुप्तोत्थितोऽहं सूर्योदयात् पूर्वमेव प्रातःकालीनेभ्यो नित्यकृत्येभ्यो निर्वृतो गन्तुमुद्यतो बभूव। प्रस्थानात् पूर्वं प्रणन्तुमहं वृद्धां संन्यासिनीभुपजगाम। मामवलोक्यैव तस्याः लोचनाभ्यामविरलमश्रुधारा प्रवहितुमारेभे। करुणार्द्रहृदयेन मया पृष्टम् -

"मातः ! किमिव रुद्यते भवत्या?"

पौनःपुन्येन ममाऽनुरोधेन प्रभाविता सा मां प्रत्युदाहरत् -

"वत्स ! विदेहानां पार्थिवः प्रहारवर्मा प्रजावत्सलः सेवकजनेषु च कृपाशीलः सततं सदयं व्यवहरति स्म। तस्य भार्यया प्रियंवदया मगधाधीशभार्यया वसुमत्या च द्वाभ्यामेकस्मिन्नेव विद्यालयेऽध्ययनं कृतमवर्तत। सहपाठिन्यौ ते सहोदरभगिन्याविव परस्परमस्निह्यताम्। अथ कदाचिन्मगधाधिपभार्या वसुमती गर्भं बभार। महाराजेन मगधनाथेन महता समारोहेण सीमन्तोन्नयनसंस्कारस्य समायोजनं विहितम्।

उत्सवेऽस्मिन्निमन्त्रिता विदेहाधिपभार्या प्रियंवदा प्रियसखीमवलोकयितुं प्राणनाथेन प्रहारवर्मणा साकं नवजातार्भकौ क्रोडे कृत्वा पुष्पपुरं मगधजनपदराजधानीं जगाम।

तेष्वेव दिवसेषु मालवाधिपो मानसारः पुष्पपुरमाचक्राम। शूराणामुत्साहजनके कातराणाञ्च भयावहे महति सम्परायेऽस्मिन् प्रहारवर्मा मगधराजस्य सहायो बभूव। परं पराजिते मगधाधिपे प्रहारवर्माणं विदेहराजं बन्दिनं कृत्वाऽपि मानसारः करुणां प्रदर्शयन् बन्धनमुक्तञ्चकार। पराजयलज्जितो विदेहराजः किमपि प्रतिकर्तुमक्षमः परिजनैः सह मिथिलायै प्रतस्थे।

परं मार्गस्थितेनैव प्रहारवर्मणा चारैर्विज्ञातम् -

"तस्यानुजस्य संहारवर्मणः सुतेन विकटवर्मणा मिथिलाऽधिकृता। स्वपितरं संहारवर्माणं सैनापत्येऽभिषिच्याऽसौ राज्यप्रशासनधुरं वहति।"

समाचारैरेतैरतिखिन्नमनाः विदेहाधिपतिः सहायतायै मनसि विचारयामास।

गौडजनपदाधिपतिरनङ्गपालः प्रहारवर्मणो भागिनेयो वर्तते। सहायतायै प्रहारवर्मणा वनमार्गेण गौडान् प्रति प्रस्थितम्। परं मार्गे तस्करैराक्रम्य सकलमेव धनमपहृतम्। तदनन्तरं ते सेवकानपि हन्तुं प्रवृत्ताः। अहं प्रहारवर्मसुतयोः धात्री मङ्गला वर्ते। एकस्तु सुतो ममाऽङ्के बभूव। द्वितीयश्च मम सुतायाः पुष्करिण्याः क्रोडेऽवर्तत। तस्कराणामातङ्केन भयभीता अहं कनीयांसं सुतं क्रोडे वहन्ती गहनं वनमेकाकिनी जगाहे। मम सुता द्वितीयं ज्येष्ठं राजसुतं वहन्ती न ज्ञायते कुत्र पलायिता। तत्र वनमवगाहमानां मां कश्चित् सुतीक्ष्णनखरखरदंष्ट्रो व्याघ्र आचक्राम। तस्मिन्नेव संरम्भे राजसुतो मम हस्तात् परिभ्रश्य कस्यचित् कपिलाशवस्य क्रोडे पतितः। तदनन्तरं स व्याघ्रो मां परित्यज्य तमेव कपिलाशवमाचकर्ष।

तस्मिन्नेव समये केचन भिल्लयुवकास्तत्र समाजग्मुः। ते व्याघ्रं सुतीक्ष्णशरैर्व्यापाद्य तमर्भकमपहृत्य निन्युः। तस्मिन् क्षणे भयविह्वलायाः मम चेतनां मूर्छा जहार। तत्र कश्चिद् गोपो गाश्चारयन् दयाविगलितान्तरात्मा मामुत्थाप्य स्वगृहमानिनाय। सेवया चिकित्सया चाऽसौ मां स्वस्थशरीराञ्चकार। तदनन्तरं स्वामिनः प्रहारवर्मणः सेवायां गन्तुमुत्सुकाऽहं परन्त्वसहाया व्याकुलाऽभवम्।

कतिपयदिवसानन्तरं मम सुता पुष्करिणी युवकेनैकेन सौम्यदर्शनेन सह तत्र समायाता। मामवलोक्य संश्लिष्टसकलगात्रा तारस्वरेण क्रन्दमाना सा मामप्यरोदयत्। अश्रुभरक्लिन्ननयनकपोला सा क्रन्दनस्याऽऽवेगे किञ्चित्प्रशान्ते निजोदन्तं कथयितुमारेभे-

"मातः ! तस्कराणां भयेन गहने वने धावन्त्यहमेकेन शिलाखण्डेनाऽऽहता भूमौ पतिता मूर्छिताऽभवम्। उत्सङ्गे वर्तमानोऽर्भकः राजसुतो न जाने कुत्र गतः। तत्र पर्यटन्नेको भिल्लयुवकोऽचेतनावस्थां मामुत्थाप्य स्वोटजमानिनाय। तत्र तेन सचेतनया मया सह विवाहस्य प्रस्तावः कृतः। प्रत्याख्यानेन संक्रुद्धोऽसौ मम शिरो

विच्छेत्तुं खड्गमुदतोलयत्। तस्तिन्नेव क्षणे युवकोऽयं तत्र समायातः। तं भिल्लयुवानं व्यापाद्याऽसौ मम प्राणान् ररक्ष। कृतज्ञताभावहृतहृदयया मयाऽसौ तरुणो भर्तृरूपेण वृतः।" तेनाऽपि तरुणेन स्वात्मानं परिचाययता प्रोक्तम् -

"असौ मिथिलाधिपस्यैकः परिचरः पुष्पपुरं जगाम। परन्तु मिथिलामागच्छतस्तस्यैकस्मिन् कार्ये विलम्बो जातः। प्रत्यागच्छता तेनेदं रमणीरत्नमासादितम्।" अथाऽसौ मम दुहितृपतिः मिथिलाधिपस्य वृत्तान्तमप्यसूचयत्। तेन प्रोक्तम् -

"तस्काराणामाक्रमणेभ्यः कथमप्यात्मानं परिजनवर्गञ्च संरक्ष्य मिथिलाधिपतिः प्रहारवर्मा गौडजनपदज्जगाम। तत्र भागिनेयादनङ्गपालादुपलब्धेन सैन्येन सह मिथिलां प्रति प्रतस्थे। तत्र पराक्रमशीलेन विकटवर्मणा भयावहे प्राणघस्मरे सङ्गरे पराजितोऽसौ बन्दीकृतः। अथ च कारागारे निक्षिप्तः। तस्य महिषी प्रियंवदाऽपि भर्त्रा सह कारागारे वतति। पुत्राभ्यां वियुक्तो राज्याच्च परिभ्रष्टोऽसौ मिथिलाधिपतिः भार्यया सह कारागृहे दुःखेन दिनानि गमयति।"

"अन्यं कमप्युपायमनवलोक्य पुष्करिणी राजप्रासादस्याऽन्तःपुरे कल्पसुन्दर्याः पट्टपहिष्याः सेवां स्वीचकार। जनन्याः समाचारान् कर्णाकर्णिकया निशम्य भर्त्रा सह पुष्करिणीयं मम सुता मे सकाशमायाता।"

स्वं वृत्तान्तं श्रावयन्ती सा वृद्धा क्षणं विरम्य पुनः प्रोवाच -

"वत्स ! एतादृशान् लोकवृत्तान्तानवलोक्य निशम्य जगतोऽनित्यतामसारताञ्च बुद्ध्वा वैराग्यमापन्ना संन्यासदीक्षिताऽहमस्मिन्नेव मठे निवसामि। त्वामद्याऽत्राऽवलोक्य विगतवृत्तान्तानां स्मरन्त्याः हृदि च व्यथमानायाः मम नयनाभ्यामश्रूणि विनिःसृतानि। यदि च प्रहारवर्मणः सुतौ जीवितावभविष्यतां त्वत्समावेव पराक्रमशालिनौ सुशोभनस्वरूपौ तरुणावभविष्यताम्। तयोर्विद्यमानयोर्महाराजस्य प्रहारवर्मणो महादेव्याः प्रियंवदायाश्च कथमेतादृशी दुरवस्था भवेत्?"

निजोदन्तं राजवाहनं श्रावयन्नुपहारवर्मा क्षणं विरम्य पुनः प्रोवाच -

वृद्धायाः संन्यासिन्याः वचनानि निशम्य मम हृदयं क्षोभेण रोषेण च तत्क्षणं समाक्रान्तं प्रस्फुटितुमारेभे। उपमातृकायाः दशामेतामालोक्य दुःखभरेण मम नयनाभ्यां नयनजलबिन्दवः प्रावहन्। कथमपि वृद्धायाः धात्र्याः नयनजलबिन्दूनुत्तरीयप्रान्तभागेन प्रमृज्य समाश्वास्य चरणयोश्च प्रणम्य मया प्रोक्तम् -

"मातः ! स एवाऽहं पितुरधन्यो मन्दभागधेयः शैशवे मातापितृभ्यां वियुक्तः सुत उपहारवर्माभिधानः। निश्चयेनाऽहं विकटवर्माणं यमलोकपथिकं विधाय पितरौ च कारागारान्मोचयित्वा राजसिंहासनारूढौ करिष्यामि। त्वं जानीहि -

साम्प्रतमयं विदेहजनपदो महाराजस्य प्रहारवर्मणः शासनस्याऽऽधीनो वर्तते।"

ममैतान्युत्साहवर्धनानि सकलदुःखहरणसमर्थानि वचांस्याकर्ण्य सा संन्यासिनी प्रसादविकसितसुवदना बभूव। वात्सल्यभावेन जीर्णाभ्यामपि पयोधराभ्यां पयोधारा सुस्राव। सुविकसितसुगठितशरीरमपि मामुत्सङ्गे समुपवेश्य भालपट्टे समाघ्राय कपोलौ चुम्बनशतैरङ्कयन्ती सा वृद्धा प्रहर्षगद्गदवाचा प्रोवाच -

"वत्स! चिरञ्जीवी भव। समुपागतस्त्वमधुना पितरं मातरञ्च शोकसागरादुद्धर्तुम्। साम्प्रतं विदेहाः प्रहारवर्मणो महाराजस्याऽऽधीनताङ्गताः।"

मया किञ्चिद् विचार्य कथितम् -

"मातः! विदेहजनपदान् सम्प्रति विकटवर्माऽधिशास्ति। सर्वे सेवकास्तदधीनाः सन्तस्तस्याऽऽदेशं परिपालयन्ति। अहमेकाकी वर्ते। अतः कूटनयाऽऽश्रयं विना न प्रयोजनं सेत्स्यति। स्त्रीषु कूटनीतिः विशेषेण फलति। राज्ञामन्तःपुराण्यङ्गनाजन-विषयकाणि भवन्ति। अतोऽस्माभिः प्रथमं तावद् विकटवर्मणोऽन्तःपुरस्य भेदः कर्तव्यः। तद्द्वारेणैव कश्चिदुपायो विचिन्त्यते।"

एवं कथयत्येव मसि काचिदङ्गना षट्त्रिंशद्वर्षदेशीया तरसा मठमागच्छन्ती मया दृष्टा। तामवलोक्य प्रसादाश्रुक्लिन्ननयना, इयमेव मम दुहिता पुष्करिणीति कथयन्ती वृद्धा तामङ्गनामालिङ्गनबद्धाञ्चकार। हर्षगद्गदवचोभिः सा तामुवाच -

"वत्से! पश्यैनं महाराजप्रहारवर्मसुतम्। अयं स एव तरुणो यः शैशवे तवाऽङ्कप्रणयी बभूव। अकरुणाभ्यामावाभ्यां वने परित्यक्तोऽप्ययं सप्राणः सकुशलोऽत्र प्रत्यायातः। विधिर्निश्चयेन बलवान्। विधिनैवाऽयमेतादृशीं दशामानीतः। वीरः पराक्रमी नीतिज्ञश्चाऽयं मातुः पितुश्च परित्राणार्थं दुःखविनाशार्थं विधिना प्रेषितः।"

तदनन्तरं वृद्धा संन्यासिनी मामाह -

"वत्स! इयं पुष्करिणी राजान्तःपुरसेविका पट्टमहिष्याः कल्पसुन्दर्याः विशिष्टसेवायां नियुक्ता चरति। त्वमस्याः साहाय्येन विकटवर्मणोऽन्तःपुरस्य सुगुप्तानपि भेदान् ज्ञास्यसि।"

मामवलोक्य परिचयञ्च प्राप्य पुष्करिणी प्रहर्षोद्विगसम्भृता प्रयत्नशतैरपि विह्वलत्वं निह्नोतुमपारयन्ती मम समीपमागत्य सुपुष्टकायमपि मां भुजाभ्यां वक्षसि बद्ध्वा ललाटं कपोलौ च परिचुम्ब्य, तदनन्तरं प्रयत्नेनाऽऽत्मानं निरुध्य प्रशान्तचित्ताऽऽवेगा समाश्वासितहृदया प्रोवाच -

"कुमार! तवाऽनुजो मातुरङ्कतः प्रभ्रष्टो न जाने सम्प्रति कुत्र कथं वा वर्तते? इति मे महती चिन्ता।"

मया कथितम् -

"स्वसः ! सहोदरोऽसौ ममाऽनुजो कुशलेन वर्तते। विधिना द्वावेव भ्रातरौ मगध-राजचरणयोरुपस्थापितौ। मगधाधिपतिना भ्रात्रोरावयोः पालनपोषणादिभारो गृहीतः। साम्प्रतमावां तस्यैव सेवायां वर्तावहे।"

इति समाचारानवगम्य पुष्करिण्या सह सा वृद्धा संन्यासिनी हर्षभरनिर्भरा बभूव। वार्तालापेष्वेतेषु हृदयसन्तर्पणेषु महान् समयो व्यतीतः। अथ किञ्चिदुन्नमिते बालभास्करे सन्तापे च वृद्धिं गते सर्वे वयं वेदिकायामश्वत्थपादपपत्रच्छायाशीत-लायामुपाविशाम। पुष्करिणी विकटवर्मणोऽन्तःपुरस्य वृत्तान्तमेवमाह -

"कामरूपाधिपस्य कलिन्दवर्मणः सुता कल्पसुन्दरी रूपेण गुणैः कलाभिश्च दिव्याङ्गनागणमप्यतिशेते। विकटवर्मणा विवाहिताऽपीयं तं तृणाय मन्यमाना न किमपि गणयति। तं सततं रूपगुणहीनमवगणयन्ती सर्वजनसमक्षमपि न सादरं व्यवहरति। अनेकासु भार्यासु सतीष्वपि स मूर्खो विकटवर्मा कल्पसुन्दरीमेव प्रणयिनीं मन्यते। विकटबलसम्पन्नोऽसौ विकटवर्मा विकटस्वरूपोऽपि वर्तते। तेन सह सङ्गता सा कल्पसुन्दरी उष्ट्रस्य ग्रीवायां बद्धा शुभतन्त्री वीणेव न शोभते।"

विकटवर्मणोऽन्तःपुरस्योदन्तमेनं निशम्याऽहं पुष्करिणीमकथयम् -

"स्वसः ! अस्मत्कपटप्रयोगेषु कल्पसुन्दरीमेवाऽवरोधवर्तिषु जनेषु महत्तमं साधनमवगमय। गुणैर्हीनोऽयं मे पाणिग्रहीतेति मनस्यन्तःकरणे च सततं दूयमाना सा भर्तारं ध्रुवमुपेक्षते। अथ च जुगुप्सति। ते भावास्तस्यास्त्वया सततमुद्वेजनीयाः। प्रथमं तावत् त्वया कल्पसुन्दर्याः मनोभावाः सुसूक्ष्मं परीक्षणीयाः। तदनन्तरमवसरमवलोक्य तामवबोधयस्व-

"आर्ये ! न बुद्धिबलेन, न रूपेण नाऽन्येन केनाऽपि गुणेन योग्योऽयं तव भर्ता पाणिग्रहीता विकटवर्मा। गुणिनस्तु गुणिभिः सङ्गच्छन्ते। अतो विषमोऽयं संयोगः।"

तदनन्तरमितिहासपुराणेषु प्रसिद्धैराख्यानैर्दृष्टान्तैरनुरूपगुणशालिनां प्रणयियुगलानां दम्पतीनाञ्चोदाहरणैस्त्वं तस्याश्चित्ते क्षोभपश्चात्तापभर्तृविद्वेषादिभावान् समुत्पादय। ते त्वया सततमुद्धरणीयाः सुमूलबद्धाश्च करणीयाः। सा वराका कल्पसुन्दरी विचारयिष्यति-

"गुणैर्हीनो विकृतरूपश्च मम पाणिग्रहीता, येन सहाऽहं निवसामि सङ्गता भवामि स्वपिमि जीवनयात्राञ्च करोमि। अयं मम पतिर्न मे योग्यः। मम जीवनं तु वृथा।"

तदनन्तरं त्वया विकटवर्मणो दोषाः सततमुद्घाटनीयाः, येन तव स्वामिनी भर्तरि विद्वेषमापन्ना जुगुप्सादिभावसम्भृता भवेत्। त्वञ्च सततमनन्यकार्यपरायणा स्वामिनीमुपस्थापय।

एवंविधव्यवहारेषु सत्सु स्वल्पेषु दिवसेषु त्वया मदीया उपहाराः गन्धमाल्यवसनाभूषणादयस्तस्यै समर्पणीयाः। तस्याश्च मनसि मय्यनुरागभावना त्वया समुद्बोधनीया। त्वया कथनीयम् -

"अयमेव पुरुषो भुवि रूपेण कान्त्या बुद्ध्या नवयौवनेन च गुणैः विद्यासु कलासु च सर्वातिशायी तव योग्यः। अयं विकटवर्मा विकटरूपो दुर्बुद्धिर्न ते योग्यः। अथ च, विकटवर्माऽसौ तव सपत्नीभिः सार्द्धं प्रणयविलासविभ्रमेषु बहुतरमासक्तस्तत्र बहुतरं समयं गमयति। अथ च तव समक्षं मिथ्या वदति। छायेव सततं संलग्नया त्वया इत्थं व्यवहरणीयम्। प्रतिदिनञ्चाऽवरोधवृत्तान्तेनाऽहं सूचनीयः।"

मम परामर्शं सम्मान्य पुष्करिण्या तथैवोद्योगः प्रारब्धः। सप्तदिवसानन्तरं मठमागम्य सा मां विजने प्राह -

"कुमार ! सफलाः भवन्तु तव प्रयासाः। भवदादेशमनुपालयन्त्या मया कपटप्रयोगमाश्रित्य माया प्रसारिता। पट्टमहिष्याः कल्पसुन्दर्या अन्तःकरणे दुराचरणं विकटवर्माणं प्रति तथा जुगुप्साविद्वेषादिभावाः सम्भृताः, यथा सा भर्तुः स्पर्शमात्रमपि न सहते। निम्बपादपमाश्रिता माधवीलतेव सा कल्पसुन्दरी सततं विचेष्टमाना शोचनीयामात्मानं मन्यते। अथ च एतदनन्तरं किं मया करणीयमिति विस्तरेण भवान् वदतु।"

एवं पुष्करिण्याः वचांसि समाकर्ण्य पेटिकात आत्मनश्चित्रप्रतिकृतिं निष्कास्य तामनावृत्य मातरं दुहितरञ्चाऽदर्शयम्। मम प्रतिकृतिं चित्रलिखितामवलोक्य विस्मयाऽभिभूते ते विस्मृतनयननिमीलनव्यापारे सञ्जाते। चित्रकरेण मम रूपं तथा चित्रितं यथा काचिदपि तरुणी नवयौवनपदाधिरूढा सुरूपामात्मानं मन्यमाना तदवलोक्य विमुग्धा कामशरविद्धा च भवेत्। चित्रपटं पुष्करिण्यै समर्पयता मया प्रोक्तम्-

"भगिनि ! चित्रपटमेतत् स्वस्वामिन्यै समर्पणीयम्।" एतदवलोक्य हृदि विमुग्धा ध्रुवं सा प्रक्ष्यति -

"अस्ति कश्चिद् युवा तथा रूपवान् ?"

तदा त्वया कथनीयम् -

"अस्ति। भवत्याः किमेतेन ?"

कल्पसुन्दर्या उत्तरेणाऽहमवगन्तव्यः।"

चित्रपटमादाय राजप्रासादं गता पुष्करिणी अन्येद्युर्मामुपेत्योवाच -

"कुमार ! भवतः कूटनीतिः सुफला कल्याणकारिणी चेति सञ्जाता। अनन्यसौन्दर्य-

स्वामिनी देवाङ्गनेव लावण्यवती सा कल्पसुन्दरी तदालेख्यमवलोक्य तत्क्षणं विमुग्धा कामोन्मत्ता च सञ्जाता। भर्तरि विरक्ता जुगुप्साद्वेषादिभावांश्च वहन्ती सा मम करं गृहीत्वा सोत्कण्ठा सुमृदुस्वरेण मामुवाच -

"अस्ति कश्चित् तथा रूपवान् कान्तिमान् जनोऽस्मिन् जगति ? एतादृशास्त्वाकृति-विशेषाः पुरुषाः भुवि दुर्लभदर्शनाः भवन्ति। अङ्गेषु लावण्येनाऽतिशयेनाऽसौ कामावतारं प्रद्युम्नमपि तिरस्करोति। चित्रकरोऽपि तथा स्वकर्मणि कुशलो यथा मनोमुग्धकरमेतच्चित्रमालिखितम् । यदि प्रतिकृतिरेव तथा मनोमुग्धकारिणी, हृदयाकर्षिणी च वर्तते, साक्षात् तस्य पुरुषस्य दर्शनस्य तु कथैव का? सत्यं ब्रूहि, कोऽयं पुरुषः ?"

सगर्वं चेष्टमानया स्मितपूर्वं मया प्रोक्तम् -

"स्वामिनि ! सत्यं तथ्यञ्चाऽभिहितं भवत्या। याथार्थ्येन पुरुषोऽयं रूपेण सौन्दर्येण च भगवन्तं मन्मथावतारं प्रद्युम्नमपि लज्जास्पदतां नयन् रूपवतो जनानतिशेते। अतिविस्तारविस्तृतायां भुवि नैतादृशो रूपवाञ्जनोऽवलोक्यते। परमयं पुरुषोऽस्त्येव। पुनश्च शिल्पकलाज्ञानविज्ञानानामुपदेष्टा राजवंशोद्भवोऽयं जनः। तथाऽपि यदि लभ्यते, भवत्या किं करणीयम् ? स तु भवत्यै परकीय एव।"

परं मम वचनप्रभावेण रूपसौन्दर्यकल्पनया कामोन्मत्ता रूपमदगर्विता सा कल्पसुन्दरी मामेकाग्रदृशाऽवलोकयन्ती प्रोवाच -

"सखि ! त्वया मम मनो वा हृदयं वा परकीयं विहितम्। अथ च मदोन्मत्ततां नीतम्। सकृदपि तं प्राणप्रियं पुरुषं दर्शय। या का चाऽहमस्मि, तस्मै समर्पिताऽस्मि। हृदयं मनः प्राणाः कायः गात्राणीति सर्वस्वं मया तस्मै पुरुषाय समर्पितम्।"

कल्पसुन्दर्यास्तानि प्रलपनानि निशम्य भावान् पुनः द्रढयितुं मया प्रोक्तम् -

"स्वामिनि ! सुरूपः सुशोभनो राजसुत एकः सकले भुवने परिभ्रमन् पर्यटक-रूपेणाऽत्र मिथिलामाजगाम। वसन्तोदाररमणीये समये सखीभिः सह भवती नगरबाह्योद्यानमुपविहाराय गता। विधातुरवन्ध्यशासनतयाऽसौ राजकुमारोऽपि तत्र समायातः। दोलाधिरूढां साक्षान्मन्मथभार्यां रतिमिव भवतीमालोक्य स वराको राजसुतस्तथा पञ्चशरविद्धो बभूव यथाऽसौ न दिवा न निशि सर्वदाऽनवरतं भवतीमेव चिन्तयति। भोजनपानशयनादिभ्योऽपि विरतोऽसौ भवतीमेव कामयते। कथयत्यसौ -

"एकवारमपि यदि भवत्याः दर्शनं भवेत्।" इति चिन्तासन्ताननिमग्नोऽसौ कथमपि प्राणान् धारयति।

भवती परकीया, परपुरुषप्रणयिनी, परपुरुषभार्या, विदेहानां पट्टमहिषीति कामनापूर्ति-

रसम्भवा। तथाप्यसौ भवतीमेव रटति। पौन:पुन्येनाऽवबोध्यमानोऽपि भवत्या: स्मरत्येव। कामदेवस्तु धृष्टेष्वग्रगण्य:। नोचितं पश्यति नाऽनुचितं प्रेक्षते। केवलं पञ्चशरैस्तरुणान् प्रहरति।

तेन राजसुतेन स्वयमात्मन: प्रतिकृतिश्चित्रपटे लिखित्वा भवदन्तिकं प्रेषिता। इयं केवलं भवत्यै तस्योपहार:। यद्यनुमतिर्भवेत्, स पुरुष: केवलमेकवारमेव भवत्या: दर्शनेनाऽऽत्मानं कृतार्थयित्वा जीवनं धारयेत्। यदि भवती समुचितं मन्यते, निशाया-मद्याऽसौ समुपस्थितो भवेत्। बुद्धिमत्तमस्य पराक्रमशालिष्वग्रगण्यस्य नयशालिषु श्रेष्ठस्य तस्य जनस्य दर्शनं सौभाग्यशालिनो लभन्ते। तस्य किमप्यसम्भवं नाम न विद्यते।"

अथ ममेमानि वचांसि श्रुत्वा चिरं विचिन्त्य अन्त:करणे रुदन्तीव कथमपि प्रवहन्त्यश्रूणि निरुध्याऽवरुद्धकण्ठं सा जगाद -

"अयि पुष्करिणिके ! त्वं न केवलं मम सेविका, अपितु मनोऽनुकूला सखी। सम्प्रति न तव गोपनीयं किञ्चिदपि। सकलं निजवृत्तान्तं त्वां श्रावयामि। मम पिता कलिन्दवर्मा कामरूपजनपदाधिपो मिथिलाधिपश्च प्रहारवर्मा सहाध्यायिनावास्ताम्। एकस्मिन्नेव गुरुकुले ताभ्यामधीतम्। तयो: परमसौहार्देन मम जननी मानवती प्रहारवर्मणश्च भार्या महाराज्ञी प्रियंवदाऽपि सख्यभावं भेजे। एकस्मिन्नवसरे कामरूपमायाते महाराजे प्रहारवर्मणि सपत्नीके सखीभ्यां परस्परं प्रतिज्ञातम् -

आवयोर्दुहितृवती निजदुहितरं पुत्रवत्या: पुत्राय प्रदास्यति।

अथ भुवि जातायामेव मम विवाहो महाराजस्य प्रहारवर्मण: पुत्रेण सह सुनिश्चितो बभूव। एवञ्चाऽहं प्रहारवर्मण: सुतस्य वाग्दत्ता वधूरभवम्। परं पुष्पपुरं गतवति विदेहराजे पुत्रयोश्च क्वचिदरण्येषु प्रणष्टयो: वंशसम्बन्धेन विकटवर्मा मां पितरं ययाचे। एतत्सम्बन्धमनिच्छन्तीमपि मां मम जनक: पाणिग्रहणसंस्कारेण वैश्वानरं साक्षीकृत्य विकटवर्मणे प्रददौ।

अथ विकटवर्माऽतिनिकृष्टप्रकृति: पितरमपि द्रुह्यति। पितृतुल्य: पितृव्यो महाराज: प्रहारवर्मा तेन कारागारे सपत्नीको बन्दीकृत:। प्रजासु स क्रूरं व्यवहरति। स्वेच्छाचारी व्यभिचारी च पराक्रममदोन्मत्त: साधिक्षेपं वदति। असत्यञ्च भाषते। अतिविकटरूपस्याऽस्य काव्यनाटकादिसाहित्ये सततमनभिरुचि:। मामप्ययं नाऽन्त:करणेन स्निह्यति। केवलं कदाचिन्मदोन्मत्त: कामवासनाबुभुक्षितो रतिसम्बन्धमाकाङ्क्षते। तस्येदं कृत्यं मह्यं कथमपि न रोचते मे मनश्च क्लिश्नाति।

पतिद्रोह: पातकम्। परलोकाच्च भेतव्यमिति तस्मिन् मम निष्ठा। परमयं मां

दुर्व्यवहरति। रमयन्ती नाम्नी काचिदतिलावण्यवती रमणीया वारवनिता वर्तते। वसन्तोत्सवेऽसौ विकटवर्मा मम पतिस्तस्याः नृत्यमायुयोज। तदनन्तरं मदुपभोगाय निर्मितानि वसनाभरणादीति तेन तस्यै प्रदत्तानि। अथ कामातुराणां न भयं न लज्जेति, तेन सा बन्धकी ममैव शयनमानीय भुक्ता। तस्मिन् समये गवाक्षसन्निकटं संस्थितया मयाऽश्रूण्येव प्रवाहितानि। तदारभ्य मम मनः प्रतिशोधाय निरन्तरं प्रज्ज्वलति। परमवरोधबन्दिनी किमहं कर्तुं शक्नोमि।

सखि ! परलोके यद् भविष्यति, तद् भविष्यति। तत् तु केन दृष्टम्। साम्प्रतं मम निश्चयो वर्तते -

भविष्यति काले न मया तेन दुराचरणेन विकटवर्मणा कश्चित् सम्बन्धो रक्षणीयः। यावत् प्राणाः शरीरे तिष्ठन्ति, सकृत् तु जीवनरसस्याऽऽस्वादनं करणीयमिति। त्वमेव मम सहायिका स्नेहादरपात्री। त्वं कथमपि सकृदपि तेन राजकुमारेण सह मम सङ्गमं ःकारय। यदेव त्वमभिलषसि तदेव प्राप्स्यसि।"

एवं तस्याः कल्पसुन्दर्याः वृत्तान्तं श्रावयित्वा पुष्करिणी क्षणं विरम्य पुनरप्याह-

"कुमार ! भवन्निर्दिष्टो जालस्तु मया प्रसारितः। एतदाकर्ण्य भविष्यत्कार्यक्रमनिर्देशे भवानेव प्रमाणम्।"

एवमालपत्स्वस्मासु सूर्योऽस्तं जगाम। प्रगाढान्धकारेण सर्वतः प्रसृतम्। कृष्णपक्षस्याऽन्तिमतिथिरवर्तत। अमावस्यायाः सूचिवेध्यं गहनं तमो विश्वमावृणोत्। आकाशे ज्योतिष्मन्तस्तारकाः तरलायमानाः भासन्ते स्म। मम योजनासु ते हसन्त इव प्रतीयुः। 'करणीयं कर्म श्वः सम्पादनीयमिति' तां पुष्करिणीं पुनः राजप्रासादस्याऽन्तः-पुरे प्रेष्याऽहं भोजनादिकार्येभ्यः निर्वृतो शयनाय शयनागारमगच्छम्।

रात्रौ मया विचारितम् -

"मम मायामयी कपटपूर्णा योजना निश्चयेन साफल्यमेष्यति। परं परस्त्रीस्पर्शव्यवहारोऽधर्म एव। यद्यप्यहं कल्पसुन्दरीं प्रणयवशवर्तिनीं कृत्वा कार्यं साधयामि, पातकमिदं किंकोटिकं भविष्यति, कानि च फलान्यहमनुभविष्यामि ? परन्तु राजनीतिव्यहाराः निष्करुणाः सन्ति। न च ते धर्माधर्ममपेक्षन्ते। मार्गस्तु कीदृशोऽपि भवेद्, उद्देश्यस्य पावनत्वमावश्यकम्। शुभभावनाभिः कृतं पातकं पुण्यमेव। मया पितरौ बन्धनागारान्मोचनीयौ। दुराचरणो विकटवर्मा कठोरं दण्डनीयः। प्रजासु सुशासनं स्थापनीयम्। कार्याण्येतानि ध्रुवं साधनीयानि। तानि च कल्पसुन्दरीमार्गवलम्ब्यैव साधयितुं शक्यन्ते। परं परस्त्रीगमनादिकमाचरणमाकर्ण्य राजवाहनादयः कुमाराः किं कथयिष्यन्ति ? किं न ते निन्दिष्यन्ति माम् ?" इति विचारपरम्परासु निमग्नेन कथमपि

नद्रामुपागतेन मया स्वप्नोऽवलोकितः -

"जटाजूटे सकलकल्माषापहारिणीं भगवतीं भागीरथीं, भाले शशिकलां, वामाङ्गे भगवतीं भवानीं शिरोहस्तकटिचरणादिष्वङ्गेषु विषधरान् पन्नगान्, कटितटे व्याघ्रचर्माधोवस्त्रं, स्कन्धयोः गजचर्म धारयन् एवं सर्वाङ्गेषु विभूषितो भस्माङ्गरागावलिप्तसकलशरीरो नीलकण्ठो भवो वामाङ्गे भूधरसुतया विराजमानो वृषभमारूढ आविर्भूय मां निकषा समायातः। मया प्रणम्यमानो मुद्रयाऽऽशिषा हस्तमुद्यम्याऽसौ प्रोवाच -

"वत्स ! राजनीतिव्यवहारेषु सदुद्देश्यं साधयितुं कृतं कर्म पातकं भासमानमपि न पातकम् । तं धर्मं मनीषिणो विदुः । मातापितृविमुक्तये कृतानि कर्माणि धर्मसम्मतान्येव । मातापितृसेवैव परो धर्मः । न तस्मात्परो धर्मो विद्यते । पितरस्तु परमतीर्थाः ।"

स्वप्नमवलोकयतो मम निद्रा व्यपगता । रजन्यास्तृतीये यामे दृष्टं स्वप्नं सत्यमेव भवति, इति विचारयतो मेऽवशिष्टा रजनी सुप्रभाता । उषसि समुदितायां प्रभातकालीन-कृत्यनिवृत्ते मयि कल्पसुन्दर्या प्रेषिता पुष्करिणी समाजगाम। प्रश्नसूचकदृष्ट्या प्रेक्षमाणां तामहं प्रोवाच -

"भगिनि ! अविलम्बं मम सङ्गमं स्वस्वामिन्या कल्पसुन्दर्या कारय। तस्याः दर्शनायाऽहमत्युत्सुको वर्ते ।"

मम वचांस्याकार्ण्य तत्क्षणं सा पुष्करिणी राजप्रासादं गता। मध्याह्नसमये सा प्रासादान्निवृत्ता मामाह -

कुमार ! भवतो राजभवनप्रवेशाय सर्वे प्रबन्धाः सुचारुरूपेण समायोजिताः । भगवति भास्करेऽस्ताचलशिखरमारूढे तदनन्तरञ्च प्रसृते सर्वत्राऽन्धंतमे तमसि भवता राजभवनपृष्ठभागं समागन्तव्यम् । चन्द्रोदयविरहे प्रगाढान्धकारव्यापृतासु सर्वासु दिक्षु भवान् सुरक्षितो भविष्यति। तत्र परिखामुल्लङ्घ्य प्राकारमवरुह्य रज्जुसाहाय्येन प्रमदवनवाटिकामवतीर्य भवानन्तःपुरप्रवेशद्वारमुपेष्यति । तत्रैव भवान् मां द्रक्ष्यति ।" तदनन्तरं मार्गं विस्तरेण वर्णयित्वा पुष्करिणी पुनः राजभवनं जगाम ।

आश्विनमासस्य कृष्णपक्षस्याऽन्तिमतिथिरवर्तत। सायंसमये सूर्ये पश्चिमदिशि पश्चिमाचलपरपार्श्वं गतवति सघनान्धकारेण सकलं भुवनं संव्याप्तम् । अन्धकारेऽपि नयनव्यापारसमर्थाय मेऽगम्यमपि स्थानं गम्यमेव बभूव ।

मत्तो गमनानुमतिं प्राप्य पुष्कारिणी पूर्वमेव राजभवनं गत्वाऽन्तःपुरे कल्पसुन्दरी-मुपजगाम। तन्माध्यमेन विदितप्रवेशसङ्केतोऽहं राजप्रासादं गन्तुं सज्जोऽभवम्। कल्पसुन्दर्याः सौन्दर्यं यौवनञ्चोन्मादकं कल्पनास्वेवाऽनुभवतो मम हृदयं पञ्चशरः

शरैर्विद्धं कर्तुं प्रवृत्तः।

नीलवसनपरिधानः, कटिप्रदेशे सुतीक्ष्णामसिधेनुकां निधाय मयाऽङ्गुलिषु व्याघ्रनखाः संयोजिताः। दीर्घमेकं सुदृढं वंशं सुदृढां त्रिधावर्तितां रज्जुं तीक्ष्णाञ्च शस्त्रिकामादाय राजप्रासादस्य पृष्ठभागं समाजगाम। अथ च दीर्घवंशसहायेन रज्जुना च परिखामुल्लङ्घ्य तथैवोत्प्लुत्य प्राकारमारुरोह। तत्र प्रमदवनपर्यन्तं विशदः सोपानमार्गः समवर्तत। अपादशब्दं पदसञ्चरणं कुर्वन्नहं सोपानमार्गेणाऽधोऽवतीर्य वाटिकां प्राविशम्। रजनीगन्धापुष्पाणां सुतीक्ष्णमधुरगन्धैः स्वागतीक्रियमाणोऽहं मनसि हृदये मस्तिष्के च श्रान्तिक्लान्तिविरहितोऽभवम्।

सुविशालं तत्प्रमदवनं विविधतरुलताक्षुपादिवनस्पतियुतं बभूव। तत्र माधवीलतावीथीं प्रविश्य मया रजनीजनितान्धकारेण वियुक्तस्य चक्रवाकयुगलस्य विरहपीडितस्य करुणक्रन्दनध्वनिः कर्णगोचरीकृत। हृदयवेधकं तत्क्रन्दनमाकर्ण्य मम विरहपीडा ववृधे। अथ च औत्सुक्यसम्भृतहृदयस्य स्पन्दनगतिरपि वृद्धिमाप।

अथ समक्षं बकुलतरुवीथिकामतिक्रम्य चम्पकपादपवीथिका मयोल्लङ्घिता। मधुरसौरभसमृद्धास्ते पादपाः प्रगाढतमसि शुभ्रपुष्पैः प्रभातरलितताराच्छादिता इव प्रतिभासन्ते स्म। तदनन्तरं जातिकुन्दबन्धूकजपादिक्षुपलतावीथीनां मध्ये यत्र तत्र तमालाशोकरसालतरवो विटपबाहुभिराकाशमवाप्याऽऽलिङ्गन्त इवोद्गमिता अवर्तन्त। तासां वीथीनां मध्य उभयतः शुभ्रप्रस्तररचिता मध्यतश्च स्थूलसुचिक्कणबजरिकाच्छादिता पदवीथिका सुविस्तृता राजभवनभित्तिपर्यन्तं गता। उत्तरदिग्गामिन्यां तस्यां पदवीथिकायां नीरवं प्रचलन्नहं राजप्रासादभित्तिनिकटवर्तिमाधवीमण्डपं प्राविशम्। तत्रैका दीपकशिखा तरलायमाना मन्दप्रकाशं विकिरति स्म। तत्रैव मरकतशिलापीठिकायामुपविष्टा पुष्करिणी मां प्रतीक्षमाणाऽतिष्ठत्।

समीपमागते मयि पुष्करिण्या दीपकं निर्वापितम्। मम दक्षिणहस्तं स्वदक्षिणेतरकरेणाऽवलम्ब्य सा प्रासादभित्त्याश्रयमार्गेण प्रचलिता। कदाचित् पूर्वस्यां दिशि कदाचिच्चोत्तरस्यां दिशि प्रचलन्ती सा पुष्करिणी एकस्मिन् स्थाने निश्चलीभूय सुदृढोत्तुङ्गभित्तिपार्श्वस्थमेकं सङ्केतस्थानमङ्गुष्ठेन पीडयामास। गतत्क्षणं लघुद्वारमेकं तत्राऽऽविर्बभूव। करेण मामाश्रयमाणा सघनतमसाऽऽवृतं द्वाराभ्यन्तरं प्रविश्य पुनः केनचित् सङ्केतेन द्वारकपाटं पिधाय पुष्करिणी पावकप्रस्तरखण्डसंघट्टेनाऽग्निं समुत्पाद्य दीपकं प्रकाशयामास।

दीपकस्य मन्दालोके सङ्कीर्णसुरङ्गामार्गेण प्रचलन्तावावां विशालद्वारमेकं प्रपेदाते। सम्भवतोऽभ्यन्तरतः द्वारकीलकमवरुद्धमासीत्। पुष्करिणीहस्तस्पर्शमुपलभ्य

द्वारमनावृतकपाटं बभूव। तस्मिन्नेव समये मन्दपवनप्रवाहाघातेन पुष्करिणीकरस्थित-दीपकशिखा निर्वापिता। परमावां काचमञ्जूषानिहितरत्नजटितदीपकस्यालोकेन सुप्रकाशितं कक्षं प्रविष्टावेव।

शोभनालङ्करणप्रसाधनसामग्रीसुसज्जितस्य कक्षस्य मध्यभागे नवरत्नजटितकाञ्च-नाभस्य सुविशदस्य पर्यङ्कस्योपरि कौशेयास्तरणाच्छादितं स्थूलतूलसंस्तरशयनमविद्यत। शयने विप्रकीर्णानि शेफालिकामाधवीचम्पाचम्पकजातिक्षुपलताजातानि नवविकसितानि प्रत्यग्राणि पुष्पाणि कक्षं सौरभेणाऽऽप्याययन्ति स्म। शयनस्योत्तरभागः स्थूलमृदुलोपधानेन सुशोभते स्म। पर्यङ्कं निकषा पीठिकायामेकस्यां भोजनसामग्रीयुता स्थाली सूक्ष्मवसनाच्छादिताऽदृश्यत। समीपमेव शीतलनिर्मलसलिलम्भृतमेकं जलपात्रमप्यवर्तत। तत्रैकस्यां शराविकायां स्वर्णपत्रावेष्टिततताम्बूलवीटिकाऽपि शुशुभे। शुभ्रसुधावलिप्तासु भित्तिषु छदिषु च शोभनक्रमेण प्रणयियुगलानां प्रणयविलासाङ्कितानि चित्राणि केनचित् कुशलचित्रकरेणाऽऽलिखितानि। विलासलीलायोग्यमिदं स्थानं रतिमन्दिरमिव राजकीयविभवानुरूपमवर्तत।

शयने मामुपवेश्य पुष्करिणी कथयामास -

"कुमार! किञ्चित् प्रतीक्षतां भवान्। यावदहं स्वामिन्या साकं प्रत्यावर्ते।"

इति कथयित्वा सोत्तरवर्तिद्वारेण बहिर्जगाम। स्वल्पेन समयेन मन्दमन्दपदचारणध्वनिर्मे कर्णगोचरीबभूव। मम हृदयं धडद्धडदिति कम्पितुमारब्धम्। उपवेशनेऽक्षमोऽहं शयनादुत्थाय निकटवर्तिस्तम्भान्तराले गोपयामासाऽऽत्मानम्।

पुष्करिण्या निर्दिश्यमानमार्गा कल्पसुन्दरी तत्प्रकोष्ठं प्राविशत्। तदनुपमं दिव्यं ज्योतिर्धरायामवतीर्णमवलोक्य सकलानि ममेन्द्रियाणि जडीभूतानि। सहसा यथा तस्मिन् प्रकोष्ठे दिव्यानुपमोन्मादकेन सौरभेण प्रादुर्भूतम्। नयनोन्मेषस्याऽपि विस्मृत्य जडीभूतकायोऽहं तल्लावण्यं सुविस्तृतलोचनाभ्यामेव पातुमियेष।

समुज्ज्वलद्दीपशिखालोके कल्पसुन्दरी दीप्तिमत्सौन्दर्येण शुशुभे। ननु विधात्रा सुपिष्टमौक्तिकविद्रुमश्लक्ष्णचूर्णसम्मिश्रणेन तद् वपुर्विरचितम्। सुविस्तृतं कनकचम्पकद्युति भालपट्टं, सरोवरनिर्मलसलिलनीलाभे कर्णान्तविस्तृते विलोचने, सुतीक्ष्णे कज्जलनिभे नेत्रप्रान्ते, सुदीर्घा शुकतुण्डतीक्ष्णाग्रा नासिका, यौवनमदारुणौ कपोलौ, बिम्बफललोहितौ दशनच्छदौ, कार्मुकाकारौ भ्रुवौ, सुदीर्घनीलश्लक्ष्णा मेघाडम्बरसदृशी कुन्तलपङ्क्तिः, कम्बुनिभः कण्ठस्ततश्च मन्मथस्वागतस्थापितमङ्गलद्वारकनककलशाविव समुन्नतौ पयोधरौ, लोहितकुसुमगुच्छावृतकिङ्किराततरुविटपानुकारिणौ मृदुलौ दीर्घौ भुजौ, मुष्टिग्राह्या कटिस्तत्र विभूषिता त्रिवली, चित्तनिमज्जनक्षमा गभीरा नाभिः,सूक्ष्मकौशेय-

वसनावृतमपि सुघटितप्रमाणाभिव्यञ्जकं श्रोणियुगलं, सुदीप्ताङ्गारनिभे पिचण्डिके, कोकदलपटलनिर्मितमिव चरणयुगलमिति मन्मथपञ्चशरक्षेपणकार्मुककाञ्चनयष्टि-कामिव तामवलोक्य मम मनोऽन्तःकरणं सबाह्यकरणं कामाग्निना सन्तप्तम्। सकलानीन्द्रियाणि सम्प्लुष्टानीव बभूवुः। स्तब्धसकलगात्रोऽहं स्तम्भान्तराले सन्निहितस्याऽप्यात्मनो विसस्मार।

अथ कक्षं प्रविश्य मामनवलोकयन्ती सा कल्पसुन्दरी भृशं विह्वलचित्ता प्रथमं द्वाभ्यां करतलाभ्यां वदनमावृत्य सकरुणं भृशं रुरोद। तदनन्तरं पुष्करिण्याः करमवलम्ब्य साऽवरुद्धकण्ठा बभाषे -

"सखि ! ध्रुवमहं वञ्चिता। आगत्याऽपि स मम प्रियो नाऽऽत्मानं दर्शयति। कथं तस्य प्रत्याशा? तस्य विरहे प्राणधारणमप्यनावश्यकम्। प्रतिक्षणं विरहाग्निदहनापेक्षातः प्राणानां परित्यागो वरम्।"

इति कथयित्वा सा लावण्यसारसरसा प्रमदा मम हृदयसर्वस्वभूता तीक्ष्णदृष्टिभिर्मम हृदयमाविध्य हरितकौशेयोत्तरीयं स्कन्धात् करे निधाय प्रान्तेनैकेन ग्रीवां बद्ध्वा पर्यङ्कमारुह्य द्वितीयप्रान्तं छदिःसंलग्नलोहकुण्डिकायामाबद्धुं प्रायतत। दृश्यमेतदवलोक्य मम प्राणाः शरीराद् बहिर्गन्तुमिव प्रवृत्ताः। त्वरितगत्या स्तम्भान्तरालान्निर्गत्य पर्यङ्कमारुह्य कल्पसुन्दरीं विधातुः सर्वश्रेष्ठकृतिं द्वाभ्यां भुजाभ्यां सुदृढं वक्षस्यासज्ज्य कण्ठं बन्धनादुन्मोच्य तां शयने शाययामास।

कामजनितसम्भ्रमेण उत्तरीयेण कण्ठबन्धनेन चाऽर्धचेतनावस्थां गतां प्रियां कण्ठे मृदुकरस्पर्शैः परामृश्य गात्राणि च शीतलजलबिन्दुभिरभिषिच्य सचेतनाञ्चकार। तस्मिन्नेव क्षणे तया सुन्दर्या नयनोन्मीलनं विहितम्। प्रभातकालीनबालरश्मिसंस्पर्श-विकसितेन्दीवरदलनिभा शोभा सर्वत्र प्रसृता। कतिपयक्षणं मां निर्निमिषं निरीक्ष्य तया भुजलतावल्लरीयुगमाला मम कण्ठे पिनद्धा। कायश्च मम वपुषि समाश्लिष्टः। विकसितकुसुमावृतमाधवीलता रसालतरुमिव सा निजाङ्गेनाऽङ्गेन मेऽङ्गमङ्गं तथा प्रगाढं बबन्ध यथा न कदाऽपि पृथग्भविष्यति। अहमपि पौनःपुन्येन तस्याः प्रियायाः हृदयसर्वस्वभूतायाः शरीरयष्टिं प्रगाढमाबध्य कपोलयोरोष्ठयोर्नेत्रप्रान्तयोः पयोधरयोश्च सहस्रशश्चुम्बनान्यङ्कितानि चकार। प्रशान्ते च प्रथमावेगे प्रियाया अङ्गानि मृदुभावेनाऽङ्गुलिभिः परामृशता मया प्रोक्तम् -

"सुन्दरि ! कदाचिन्मया कामदेवं प्रति महानपराधः कृतो येनाऽसौ मामित्थं सुतीक्ष्णं सन्तापयति। परं विधिरनुकूलो मयि सम्प्रति। स तु जन्मजन्मान्तरप्रवृद्धां मिलनपिपासामावयोः प्रशमयितुमुद्युङ्क्ते। प्राणभूतां त्वामहं न कदाऽपि त्यजेयम्।"

इति कथयित्वा मया सा भुजयोः वक्षसि च तथा प्रगाढं बद्धा यथा वासनाभिभूता गद्गदध्वनिमिवोच्चार्य स्वात्मानं मयि शिथिलयामास। तस्मिन्नेव क्षणे समयज्ञा सा पुष्करिणी प्रकोष्ठाद् बहिर्गत्वा द्वारकपाटमवरुरोध। आवयोर्नवप्रणयिनोर्मध्ये बन्धनानि सकलानि विधिना शिथिलीकृतानि।

परस्परं स्नेहानुरागोन्मादवासनाविह्वलयोरावयोर्भुजबद्धयोर्विलासरतिक्रीडारतयोर्न जाने कीदृशः समयो व्यतीयाय। तदनन्तरमेव शिथिलगात्रोऽहं कल्पसुन्दर्याः भुजयोरालिङ्गनबद्ध एव प्रगाढं सुष्वाप। साऽपि तथैव स्वप्नावस्थां गता। सहसा रजन्यास्तृतीयप्रहरस्य समाप्तिसूचकं घण्टाध्वनिमाकर्ण्य मम निद्रा व्यपगता। सा तरुणी प्रमदा कल्पसुन्दरी सम्प्रत्यपि मदालिङ्गननिबद्धा निमीलितनयना ओष्ठयोः परमतृप्तिसूचकस्मितेन शोभमाना कस्मिन्नप्यनिर्वचनीयलोके विचरन्ती मयाऽनुभूता।

तथाऽवस्थितामेव तां सुप्तां भुजाभ्यां पृथक्कृत्य पर्यङ्कादवरुह्य कपाटमनावृत्य मया बहिरवलोकितम्-

"समाप्तप्राया रजनी।"

तदनन्तरं कल्पसुन्दरीमवबोध्य सुदीर्घमुष्णञ्च निःश्वस्य गमनायाऽनुमतिं ययाचे। सामाजिकव्यवहाराचारपाशैर्निबद्धा चकितहरिणीवाऽऽशाविश्वाससम्भृतनयनाभ्यां मां सततं निर्निमिषमीक्षमाणा सा शब्दस्यैकस्याऽपि समुच्चारणे समर्था न बभूव।

तदनन्तरं छोटिकां ददति मयि पुष्करिणी कक्षस्याऽन्तः समायाता। आगामिन्यां रजन्यां पुनः सम्मिलनं भविष्यतीत्याश्वास्य बहिर्गमनायाऽहं समुद्यतः समभवम्। एकाग्रेण निमेषरहितेनाऽवलोकनेन मामेव निरीक्षमाणां कल्पसुन्दरीं पौनःपुन्येन परिवृत्य समवलोकयन्नहं कक्षाद् बहिराजगाम। तस्मिन् कालेऽपि गहनान्धतमसा सकलं जगद् व्यापृतमासीत्। राजप्रासादे परिपूर्णा निस्तब्धता बभूव।

पुष्करिण्या सङ्केतितेन मार्गेण बहिरागत्य प्राकारं परिखाञ्चोल्लङ्घ्य स्वनिवासस्थानमहं समाययौ। मम पदचिह्नानि पुष्करण्या प्रोञ्छितानि।

एवमहं सप्तक्षणदासु कल्पसुन्दर्याः कक्षं समागत्य प्रणयविलासरतिक्रीडाभिरक्रीडम्। सा प्रमदा विदेहजनपदपट्टमहिषी तथा मे वशङ्गता, यथा मामाराध्यदेवतामिवाऽपूजयत्। सप्तम्यां क्षणदायां निवर्तनायोद्यते मयि सा नयनाभ्यामश्रूणि प्रवाहयन्ती सगद्गदं प्रोवाच-

"प्राणनाथ ! यदि गच्छसि त्वं तद् गच्छ। नाऽहं त्वामवरुणध्मि। परमावां कियत्कालमेवं सङ्गमिष्यावः। तथाऽप्युपायः कोऽपीदृशः करणीयो येनाऽऽवां वियोगबाधारहितौ एकत्वमधिगच्छेव। कदाऽप्यावयोर्वियोगो मा भवतु।"

मयोत्तरितम् -

"मुग्धे ! कामयमानां कामिनीं यो न कामयते, तस्मादधमो जनो लोके न विद्यते। त्वं मम जन्मजन्मान्तरप्रणयिनी। त्वं मम हृदयसर्वस्वम्। त्वयि मम प्राणाः प्रतिष्ठिताः। यदि त्वं ममोपदेशानुसारं व्यवहरिष्यसि, तदाऽऽवयोर्मिलनं नित्यं स्थायि च भविष्यति।"

औत्सुक्यभरनयना समुन्नतमुखी निर्निमेषं मां पश्यन्ती सा तथा कर्तुं प्रत्यजानात्। तदाऽहमवोचम् -

"प्रिये ! त्वं रहसि स्नेहातिशयमभिनयन्ती चित्रमेतन्मे विकटवर्माणं प्रदर्शय। पुरुषसौन्दर्यमेतन्निरीक्ष्य तस्याऽभिभवनं सुनिश्चितम्। तदा त्वया प्रष्टव्यम् -

आर्यपुत्र ! पुरुषसौन्दर्यस्य किमियमाकृतिरियत्तां भजते? स मूर्खो नूनं तव कथनं सत्यं वदिष्यति। कथयिष्यति, नूनमियमाकृतिः पुरुषसौन्दर्यस्य परमादर्शः। तदा त्वया पुनः प्रष्टव्यम् -

अपीष्यते त्वया यौवनमयमिदं सौन्दर्यम् ?

ध्रुवमिदमङ्गीकृत्याऽसौ सौन्दर्याभिलाषो भविष्यति। तदा त्वयेत्थं कथनीयम् -

कामरूपे कामाख्यादेवीमन्दिरे काचिद् भैरवी संन्यासिनी वर्तते। देशदेशान्तरेषु यात्रापरायणा सा अनेकमन्त्राणां सिद्धिमवाप। सा मां निजसुतामेव जानाति। कदाचिद् देवदुर्लभसौन्दर्याभिव्यञ्जकमिदमालेख्यं मह्यं समर्प्य सा प्रोवाच -

पुत्रि ! मन्त्रसिद्धिसामर्थ्येन सविधि पूजनं कृत्वा स्वभर्तृस्वरूपं चित्रतुल्यं विधातुं शक्यते। विधिश्चाऽयम् -

उपोषितया त्वया सूर्यास्तमनसमये निशारम्भे बृहद्यज्ञस्याऽभिरूपस्याऽऽयोजनं करणीयम्। तत्र चाऽथर्ववेदस्य विंशतितमस्य काण्डस्य मन्त्राणां पाठेन सह घृतस्य सुगन्धितहवनसामग्रीचयस्य चाऽऽहुतिभिर्वैश्वानरस्तर्पणीयः। हवनसामग्रीद्रव्येषु चन्दना-गुरुकर्पूरमुस्तामूलजटामांसीसुगन्धबालामृगमदकुङ्कुमादिपदार्थाः परमावश्यकाः। न्यूनतमाः शतानां चतग्र आहुतयो निक्षेपणीयाः। तदनन्तरं समुपस्थितेभ्यो याचकेभ्यो वस्त्रयुगलानि प्रतिदशकाञ्चनमुद्रासहितानि देयानि। तदनन्तरं यज्ञकुण्डं निजप्रकोष्ठे स्थापनीयम्।

तस्मिन् समये कर्मकाण्डे त्वयेयं प्रतिकृतिरालेख्यगता स्ववक्षसा संश्लेषणीया। एवं कृते सतीयमाकृतिस्तव शरीरे सङ्क्रान्ता भविष्यति। तदनन्तरं त्वया निजभर्ता तत्राऽऽमन्त्रितव्यः। चरणयोस्तस्य निपत्य त्वया कथनीयम् -

प्राणनाथ ! स्वसुगुप्तरहस्यानि प्रकटयन् भवान् निमीलिताक्षो मां सुदृढमालिङ्गस्व, येन रूपमेतत् त्वयि सङ्क्रामेत।

हे सुन्दरि ! एवं सुगुप्तां योजनां परिकल्प्य त्वया स राजा, विकटवर्मा पुन: एवं कथनीय: -

यदि भवता सौन्दर्यमिदमिष्यते, नाऽतितर्कवितर्कस्याऽवसर:। तथाऽपि स्ववंशजै: सम्बन्धिभि: प्रमुखनागरिकैर्मन्त्रिभिश्च सार्द्धं मन्त्रणां कृत्वा तदनुमितौ वर्तमानो भवान् कार्यमिदं सम्पादयतु।

विश्वासोत्पादनार्थं त्वं तं राजानमिदमपि कथय -

आर्यपुत्र ! धूर्तकुलशिरोमणिर्भवाननेकाभि: प्रणयिनीभि: प्रमदाभि: सार्द्धं नित्यमेव प्रणयरतिलीला: रचयति। भवति विकटरूपे त्वियमवस्था। देवदुर्लभसौन्दर्याभिसम्पन्ने भवति न जाने कीदृश्यवस्था भवतो भविष्यति? मन्माध्यमेनाऽपि रूपमिदं लब्ध्वा भवान् सपत्नीभि:सह नित्यं रममाणो हृदयं मम धक्ष्यत्येव। न जाने प्रमदानां काचन संख्या त्वय्यासक्ता। सा प्राणानपि न गणयिष्यति। अत: सत्यं प्रतिजानीहि, मदन्या काचिदपि प्रमदा न भवत: प्रणयपात्री भविष्यति। ससत्यं सौगन्धं प्रतिज्ञाते भवति मन्त्रसिद्धा रूपसङ्गति: सम्भवा।

"इति त्वया समवबोधितोऽसौ विकटवर्मा राजा रूपाभिलाषी तव कथनं सम्मान्य स्वीकरिष्यति। तस्मिन् कालेऽसौ यत् किञ्चिदिव त्वां वदति, तेनाऽहं सूचनीय:। तदा कर्तव्यनिर्णयं समुचितमहं स्वयं करिष्यामि।"

प्रणयमदोन्मत्ता मयि विश्वासं भजमाना सा कामिनी कल्पसुन्दरी तथैव ममोपदेशान् वेदवचनानीवाऽङ्गीचकार। अहमपि पूर्वदिवसमिव पट्टमहिष्यास्तस्या अन्तरङ्गकक्षाद् बहिरागत्य पूर्वोक्तमार्गेण स्वावसथमाजगाम। स्वल्पेन समयेन मया ज्ञातम् -

"महामहिष्या स्वकार्यं सम्पादितम्। तां प्रतिकृतिं विलोक्य कल्पसुन्दर्याश्च तानि प्रणयगर्भितानि वचांस्याकर्ण्य विकटवर्मा तत्सौन्दर्यप्रतिपत्तयेऽभिलषमाण: समुत्ताम्यद्धृदयो बभूव। स्ववंशजनै: प्रमुखपौरवर्गै: मन्त्रिभिश्च परामर्शं विधाय तेन तेषामपि सहमतिरधिगता।" प्रजाजनेषु चेयं किम्वदन्ती प्रथिता बभूव -

"कामरूपनन्दिनी कल्पसुन्दरी महाराज्ञी दिव्यसौन्दर्यसुशोभिता भर्तारं मिथिलाधिपतिं विकटवर्माणं देवदुर्लभसौन्दर्यसम्पन्नं विधास्यतीति। राज्ञोऽन्त:पुरे रूपलावण्यदायी अभिरूपामिधानो यागो यजिष्यते। सर्वेषामनुष्ठानानां सम्पादनं स्वयं महाराज्ञ्या: पट्टमहिष्या: निर्देशने निरीक्षणे च भविष्यति। अतो नाऽत्र कस्याऽपि प्रवञ्चनव्यापार-स्याऽवकाश:। अन्त:पुरे सम्पत्स्यमानेऽस्मिन् यागे पार्थिवस्य वंशजा: प्रमुखपौरजना: मन्त्रिपरिषत्सदस्याश्च सहमता: वर्तन्ते। मणिमन्त्रौषधीनां प्रभावोऽचिन्त्य:। केनेदं ज्ञातुं शक्यते।"

प्रणयरतिविलासरतयोर्भविष्यत्कार्यक्रमनिर्धारणकल्पनासु सुखनिमग्नयोरावयोर्बहवो दिवसाः व्यतीताः। क्रमशश्च मार्गशीर्षमासस्य कृष्णपक्षस्याऽन्तिमतिथिः समागच्छत्। एतावद् दिवसपर्यन्तं सा कल्पसुन्दरी स्वोद्देश्यसिद्धयर्थं मया सुदृढचित्ता विहिता। तया च स्वमाया सर्वत्र प्रसारिता। सैव रजनी कार्यप्रयोजिका निश्चिताऽवर्तत।

दिनमणिः पश्चिमाचलशिखरमारुरोह। राजभवनस्याऽन्तःपुरप्राङ्गणे सुविशाले रूपपरिवर्तनाभिरूपयागार्थं सर्वे प्रबन्धाः परिपूर्णतां गताः। सुमहतो यज्ञकुण्डस्य लोहमयस्य रचना लोहकारैः कृता। यज्ञकुण्डस्य तत्र स्थापनां कृत्वा चन्दनागुरु-तगरजटामांस्यादिसुगन्धितहवनसामग्रीणां समिधाञ्च चयस्तत्रैकत्रितः। घृतदुग्ध-दध्यादिराशयः सुमहत्सु पात्रेषु समावर्जिताः। पुरोधोभिरथर्ववेदस्य विंशतितमकाण्डस्य मन्त्रपाठोच्चारणैः स्वाहेति ध्वनिना साकं यज्ञकुण्डे प्रदीप्ते वैश्वानरे शतानां चतस्र आहुतयः समर्पिताः। पुरोधसां मध्ये केनाऽप्यपरिचीयमानो याज्ञिकवेषोऽहमपि समुपस्थितो वेदमन्त्राणामुच्चारणे रत आसम्।

शनैः शनैः प्रगाढान्धंतमसा सकलं जगदाच्छन्नम्। पर्यावरणे प्रसरता सुमहता यज्ञधूमेन तमस्तत् प्रगाढतमं विहितम्। चतुःशतासु आहुतिषु वैश्वानरे हुतासु यज्ञसामग्रीज्वलनजन्यसौरभपरिव्याप्तासु दिक्षु यज्ञधूमेन घनीभूतेऽन्धकारे सुपरिचितैरप्यपरिचीयमानजने वातावरणे सञ्जाते कल्पसुन्दरी दासीजनसाहाय्येन लोहमययज्ञकुण्डमादाय निजप्रकोष्ठं प्रविष्टा। प्रच्छन्नरूपेणाऽहमपि तस्मिन् सम्भ्रमे केनाऽप्यलक्षितः पूर्वमेव तत्कक्षं प्रविश्यैकस्मिन् कोणे निलीयाऽतिष्ठम्। समागतायां प्रियायां कल्पसुन्दर्यां मया वस्त्रपरिवर्तनं विधाय नारीजनोचितवस्त्राभरणानि धृतानि। तत्र समायाता कल्पसुन्दरी वह्निशिखालोकोज्ज्वलरूपवदना मम वासोयुगलं दधार। ततश्च सा वेपमानाङ्गयष्टिः प्रसारितभुजयोर्मम मध्ये कल्पलतावल्लरीव समाश्लिष्टा दृढालिङ्गननिबद्धा बभूव। तदनन्तरं ममाऽधरं शिखरिदशनैर्मन्दं पीडयित्वा कम्पमानगद्गदवचोभिः सा बभाषे -

"कितव ! मया ते प्रयोजनं साधितम्। साम्प्रतं त्वमेव जानीहि किमत्र करणीयम्। असौ वा नरपशुर्यज्ञस्याऽस्य बलिभूतो जानातु। स तु यमपुरप्राघुणिकोऽवगन्तव्यः।

प्रगाढालिङ्गननिबद्धां मदोन्मत्तां कल्पसुन्दरीं मन दक्षिणकर्णे दशनच्छदौ समासज्य मन्दमन्दमालपन्तीं कथमपि बलात् पृथक्कृत्य तस्यैव प्रकोष्ठस्यैकस्मिन् कोणे सन्निहितस्य कार्पासवस्त्रसमूहस्य मध्य अहमात्मानं सङ्गोपयामास। कल्पसुन्दर्यपि तत्र समायाता।

अथ कतिपयक्षणपर्यन्तं समालिङ्गनसुखमनुभूय वस्त्रसमूहमध्याद् बहिरागत्य

कल्पसुन्दरीवेशसुसज्जितोऽहं सङ्केतसूचकघण्टाध्वनिमकरवम्। तं घण्टाध्वनिं शवयात्राघण्टाध्वनिमिवाऽऽकर्ण्य दुराचरणोऽसौ मूर्खो विकटवर्मा सौन्दर्य-प्राप्त्याशालोभलालसस्तत्र समायातः। स्त्रीवेशधारिणं मां विलोक्य सशङ्कित इव विरम्य मामैक्षत। विकटवर्माणं तथा रुद्धगतिमवलोक्याऽग्रेसरीभूय स्त्रीजनोचितविभ्रमविलासान् प्रकटयंस्तस्य दक्षिणकरं गृहीत्वा सुमृदुस्वरेणाऽहमवोचम् -

"आर्यपुत्र ! वैश्वानरं साक्षीकृत्य प्रतिजानीहि -

दिव्यसौन्दर्यसुशोभमानो भवान् मदतिरिक्तां कामप्यन्यां प्रणयिनीं मनसि न करिष्यति। तथाभूते सत्येव भवति रूपमिदं सङ्क्रामयिष्यामि।"

ममैतद् वचनमाकर्ण्य इयं कल्पसुन्दरी वर्तत इति विश्वासमापन्नो विकटवर्मा नाऽत्र कस्याऽपि कपटस्याऽवकाश इति निश्चिकाय। तदा विकटवर्मा "सुजघने क्षमस्व, नाऽहं काञ्चन प्रमदां त्वदन्यां स्वप्नेऽपि चिन्तयिष्यामि", वचनमिदमुच्चार्य मामालिङ्गितुमग्रेसरो बभूव। परं तस्मिन् प्रसङ्गे पदद्वयं पृष्ठतोऽपसृत्याऽहमवोचम् -

"आर्यपुत्र ! नैवं नैवं व्यवहरणीयम्। प्रथमं तावद् भवता स्वकीयाः योजनाः प्रकटीकरणीयाः। तदनन्तरमेवाऽहमालिङ्गनीया। अन्यथा सर्व एव यज्ञसमारोहो विफलीभविष्यति।" रूपलोभी स विकटवर्मा स्वकुमन्त्रणानां रहस्यमेवं वर्णितवान् -

१. मम पितुरग्रजः प्रहारवर्मा विदेहजनपदानामधिप आसीत्। तमहं कारागारे निवेश्य राज्याधिकारं हस्तगतञ्चकार। परं प्रजाजना अद्यापि तस्मिन् स्निह्यन्ति। तस्य स्मरन्ति। कस्मिन् कालेऽसौ मम पितृव्यो विपत्तिहेतुर्भविष्यतीति को जानीते। अतस्तस्य जीवितं नोचितम्। राजनीतिविरुद्धञ्चैतत् वर्तते। परन्तु प्रत्यक्षरूपेण तस्य वधः प्रजासु विप्लवमुत्पादयिष्यति। अतो मया मन्त्रिभिः सह सम्मन्त्र्य निश्चितम् - गुप्तरूपेण मन्दविषप्रयोगेण तमहं सभार्यं यमलोकातिथिं कृत्वा उदररोगेणाऽसौ स्वर्गलोकङ्गत इति प्रचारयिष्यामि।

२. गौडजनपदाधिपोऽनङ्गपालः प्रहारवर्मणो भागिनेयः सततं मां विद्वेष्टि। तस्य वधाय गौडजनपदञ्च पादाक्रान्तं कर्तुं मया स्वानुजो विशालवर्मा प्रेषणीयः।

३. अत्र मिथिलायां खनतिनामा यवनवणिग्वर्तते। असौ बृहदाकारस्य प्रशंसनीयस्य सौभाग्यप्रदस्य बज्ररत्नस्य स्वामी वर्तते। नगररत्नवणिजां परामर्शेन तत्तु रत्नं मयाऽतिस्वल्पमूल्येन क्रेयम्।

४. ग्रामणीरनन्तसीरोऽतिदुष्टप्रकृतिः प्रहारवर्मणः पक्षधरः प्रजासु प्रभावशाली वर्तते। सुगुप्तरूपेण प्रहारवर्माणं कारागारान्मोचयितुमसौ प्रयतते। प्रहारवर्माणं बन्धनात्स्वतन्त्रं विधाय प्रजासु विद्रोहाग्निं प्रज्ज्वाल्य जनपदकोपञ्च विरच्य मम

वधोपायं चिन्तयति। अतो मया परमविश्वासास्पदतां गतः शतायुरनन्तसीरवधाय सुगुप्तरूपेण नियुक्तः।

विकटवर्मणो रहस्यान्येतान्यवगम्य हृदयेन बुद्ध्या च सह मम चित्तं स्तब्धीभूतमिव। कथमिव नृशंसो दुराचरणः कुटिलप्रकृतिरसाववर्तत। तथापि रहस्यान्येतान्युद्घाट्य प्रसारिताभ्यां भुजाभ्यां मामालिङ्गनबद्धं कर्तुमसावग्रेसरीभूतः। अहमपि तं द्वयोर्भुजयोः स्थूललोहशलाकयोरिव सुदृढयोः दृढं बबन्ध। पुरुषस्य कठोरस्पर्शमवाप्य चमत्कृत्य पृथगपसरन्तं तं निःशब्दं वामकरेण निगृह्य वामेतरकरेण कटिनिबद्धयाऽसिच्छुरिकयोदरेण छिन्नभिन्नञ्चकार। तदनन्तरमङ्गुलिषु परिहितेन व्याघ्रनखायुधेन मया तस्याऽऽकण्ठकटिपर्यन्तं त्वगपि विदीर्णा।

सकलमिदं कार्यं तथाऽविलम्बं निःशब्दञ्च सञ्जातं यथाऽसौ दुर्वृत्तो विकटवर्मा सीत्कारमप्यनुच्चार्य मृतो भुवि न्यपतत्। तस्याऽङ्गुष्ठमात्रो जीवो यमकिङ्करैः कायान्निकास्य पाशबद्धो यमालयं नीतः। वस्त्रचयान्तर्निहिता कल्पसुन्दरी घटनामेतामवलोयन्ती स्त्रीस्वभाववशाद् भयपरिकम्पिताङ्गी बहिरागत्य वाताहत-कल्पवल्लरीव कल्पतरुं मां भुजवल्लरीभ्यामावेष्टयन्ती निर्निमेषनयना भुवि पतितं मृतशरीरं प्रैक्षत।

तामहमवोचम् -

"सुन्दरि ! महान् कालातिपातः सञ्जातः। बहिःस्थिताः लोकाः शङ्किष्यन्ते। आयाहि। प्रथमं तावदयं शवः संस्करणीयः।"

इति कथयित्वा मया कृपाणेन सुतीक्ष्णेन खण्डशः कृतः स शवः हवनकुण्डवह्नौ क्षिप्तः। स च पापीयान् विकटवर्मा तत्रैव भस्मत्वं प्राप्तः। तदनन्तरं कल्पसुन्दरी-साहाय्येन सकलं प्रकोष्ठं जलार्द्रैः वस्त्रखण्डैः स्वच्छीकृत्य मलिनान् रुधिरसंलिप्तान् वस्त्रखण्डान् वह्नावेवाहुतीकृत्य प्रकोष्ठं पूर्ववत् संसाध्य विकटवर्मसदृशैर्वस्त्राभरणै-र्निजशरीरमाभूष्य वामपार्श्वगतया कल्पसुन्दर्या सहाऽहं बहिरायातः।

तावत्कालपर्यन्तमर्धरात्रो व्यतीतः। यज्ञधूमोऽपि विलीनो बभूव। प्राङ्गणे दीपालोकसमुज्ज्वले समवेताः विकटवर्मसन्निकटवर्तिविश्वसनीयाः जनाः कल्पसुन्दर्या सह मामवलोक्य विश्वासमापन्नाः यदयमेव, मन्त्रबललब्धदिव्यसौन्दर्योऽस्मत्स्वामी वर्तते।

तदनन्तरं मया मन्त्रिणोऽन्ये चाऽन्तरङ्गभूताः जना आदिष्टाः -

"मध्याह्नोत्तरवेलायां भवद्भिः सर्वैः राजसंसदि समागन्तव्यमिति।"

गतेषु सर्वेषु जनेषु सञ्जाते च निर्मक्षिके विस्मृतनिमेषेण चक्षुषा मामेव निरीक्षमाणां

कल्पसुन्दरीं दक्षिणकरेण गृहीत्वा शयनगृहमानीतवान्। पुष्करिण्या तत्र सौभाग्यनिशायाः सकलोऽपि प्रबन्धः पूर्वमेवाऽऽयोजितः। भयविह्वलां परिकम्पिताङ्गीं विस्मयाभिभूतचित्तां कल्पसुन्दरीं मधुरवचनैराश्वास्याऽहं तस्याः लावण्यामृतसम्भृतान्यङ्गानि करतलाङ्गुलिभिः परामृष्टवान्। तदनन्तरं तस्याः यौवनपीयूषरसमास्वादयतो मेऽवशिष्टा रजनी व्यतीता।

प्रभाते प्रसृते सर्वत्र भास्करालोके पुष्करिणीमाहूयाऽहमवोचम् –

"भगिनि ! सुगुप्तरूपेण त्वं कारागृहे गत्वा मे पितरौ सकलेन वृत्तान्तेनाऽनेन सूचितौ कुरु। निवृत्तप्रातःकालीनकृत्यजातोऽहमप्यविलम्बं तौ बन्धनविमुक्तौ कर्तुं सभाजयितुञ्च समागच्छामि।"

पुष्करिणी राजनामाङ्कितं प्रवेशपत्रमादाय कारागृहाय प्रस्थिता।

प्रभातवेलाऽतिरमणीया प्रतीयाय। शौचादिनित्यकर्मनिर्वृतोऽहमन्तःपुरसेवकैः रक्षकैश्च परिवृतः स्वयमेव पितरौ कारागाराद् विमुक्तौ कर्तुं तत्र सम्प्राप्नुवम्। गतवत्येव तत्र मयि कारागाराध्यक्षेण द्वारकपाटमुद्घाटितम्। स्वयमेवान्तःप्रविश्य मया लोहनिगडनिबद्धौ पितरौ बन्धनविमुक्तौ विहितौ। तदनन्तरं तच्चरणाश्लिष्टोऽहं सकरुणं भृशमरोदम्। नयनाभ्यां प्रवहद्भिरश्रुसलिलैरेव मया तयोश्चरणाः प्रक्षालिताः। तावपि पूर्वमेव पुष्करिण्या विदितवृत्तान्तौ नयनजलधाराभिर्मां क्लेदयन्तौ सममेव भुजेषूत्थाप्याऽऽलिङ्गने सुदृढमबध्नीताम्। उद्वेगे च किञ्चित्प्रशान्ते ताभ्यां सहैवाऽहं राजभवनं समागच्छम्। तदनन्तरं यथायोग्या सकला व्यवस्था विहिता।

मध्याह्नोत्तरकाले राजसभायाः विशिष्टमायोजनं कृतमासीत्। सर्वे मन्त्रिणः पौराः सभासदः जानपदाश्च तस्मिन्नवसरे निमन्त्रितास्तत्रोपस्थिता अवर्तन्त। मातापितृभ्यां सह समुपस्थिते मयि राजसंसदि सर्वैः जनैः समुत्थाय वयं सम्मानिताः। तत्र मयोद्घोषितम् –

"मन्त्रिणः ! राजसभासदः ! पौराः ! जानपदाश्च ! मन्त्राणां प्रभावेण मया दिव्यरूपमिदमासादितम्। पावनेनाऽनेन रूपेण मेऽन्तःकरणगतं मालिन्यमपि विनाशितम्। पितृतुल्यं महाराजं प्रहारवर्माणं कारागारे बद्ध्वा मया महत्पातकमनुष्ठितम्। प्रायश्चित्तमस्य पातकस्येदमेव यत् पितृचरणाः मम पुनः राजसिंहासनमधिकुर्वन्तु। साम्प्रतं पितृव्यो मे महाराजः प्रहारवर्मा विदेहजनपदस्य शासनकर्ता प्रजाः पालयिष्यति।"

इति वचनान्युच्चार्य पितुः प्रहारवर्मणो राजसिंहासनारोहणघोषणां कृत्वा सिंहासनादवरुह्य पुनः जनकस्य पादयोः प्रणम्य वेदमन्त्रध्वनिभिः सार्द्धं पितरं सिंहासनारूढञ्चकार। तदनन्तरं पुनर्मया समुद्घोषितम् –

"गौडजनपदाधिपालोऽनङ्गपालो महाराजप्रहारवर्मणो भागिनेय इति ममाऽपि भ्राता

एव। तत्र सैन्याभियानं न समुचितम्। पातकमेव तत्। अस्माकं सर्वेषां पारस्परिकस्नेहसम्बन्ध एव कल्याणकारी। अतो मया तत्र मैत्रीसन्देशः प्रेष्यते।"

"कस्यचिदपि वस्तुनः स्वल्पमूल्येन क्रयो न राजधर्मः। स्तेयमेव तत्कर्म महत्पातकं नरककारणम्। अतः खनतिनाम्नो यवनवणिजोऽहं हीरकरत्नं सौभाग्यप्रदं समुचितमूल्येन क्रेष्यामि।"

"ग्रामणीरनन्तसीरो विश्वासपात्रं महाराजप्रहारवर्मणः पक्षग्राही। प्रहारवर्मणि राजसिंहासनारूढेऽसौ परितोषणीयो न तु दण्डनीयः। अतस्तस्य विनाशो नोचितः। राजसभायामसौ विशिष्टरूपेण सम्मानितो भविष्यति।"

विकटवर्मणो विश्वस्तमन्त्रिवर्गो बान्धवगणश्च सुगुप्तमन्त्रणाभिरेताभिः भृशं परिचितोऽवर्तत। ममोद्घोषणमाकर्ण्य सर्वैः तैः विश्वसितं यदहं विकटवर्मा एव रूपान्तरं गतः। मन्त्रसामर्थ्यमुद्घोषयन्तस्ते मां महामहिषीं कल्पसुन्दरीञ्च प्रशशंसुः। चरणेषु पौनःपुन्येन प्रणम्यमानौ पूर्वमेव समवगतसकलवृत्तान्तौ परमहर्षभरपराकाष्ठामुपागतौ मम पितरौ मामभ्यनन्दताम्। तदनन्तरं महाराजेन प्रहारवर्मणाऽहं युवराजपदे प्रतिष्ठितः सर्वप्रशासनाधिकारसम्पन्नः समुद्घोषितः।

कुमार ! साफल्यमिदमधिगम्य सुखेनोपविष्टेन मयोज्जयिनी गन्तव्येति सुनिश्चितम्। पूर्वसङ्केतितायां तिथौ कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां शिप्रातटवर्तिनि महाकालमन्दिरे प्राङ्गणे मित्राणि सर्वाणि समवेतानि भविष्यन्तीति तत्र मया यथासमयं समुपस्थातव्यम्। एवं विचिन्तयत्येव मयि अवन्तिजनपदप्रशासकपदप्रतिष्ठितस्य चण्डवर्मणोऽङ्गजनपदाभियानसमाचारस्तत्रत्यैः दूतैरानीतः। अथ चम्पाधिपस्य सिंहवर्मणः सहायतायै निमन्त्रणं लब्ध्वा मया पूर्वं चम्पागमनमेव निश्चितम्। अङ्गजनपदाधिपः सिंहवर्मा मम पितुर्मित्रमिति चण्डवर्मा मम रिपुरिति कृत्वा प्रथमं तावदहं चण्डवर्मवधं निश्चितवान्। महता सैन्येन सहाऽहमङ्गजनपदं प्रत्यसरम्। अत्राऽऽगत्य चण्डवर्मविनाशं प्रेक्ष्य भवद्दर्शनसौभाग्यञ्च प्राप्य चरणकमलसेवावसरं लब्ध्वाऽपरिमितहर्षभरसम्भृतहृदयः कृतकृत्यो धन्यतमश्च जातः।

उपहारवर्मणो विस्मयकरं प्रीतिप्रदमुदन्तं निशम्य राजवाहनः परमां प्रसन्नतामधिजगाम। महते कल्याणाय प्रयुक्ता कपटनीतिर्न धर्मविरुद्धा पुण्याय चैव भवति। बुद्धिमतां राजनयज्ञानामुपायाः पुण्यावहाः शोभन्ते। कौटिलीयमिदं वचनम्।

इत्युक्त्वा कुमारमर्थपालमभिमुखीभूय स्निग्धां दृष्टिं तस्मिन् निपात्य राजवाहनः प्रावोचत् -

"मित्र ! आचक्ष्व त्वमपि आत्मनो वृत्तान्तम्।"

अर्थपालोऽपि स्मितमोष्ठयोरानीय निजचरितमेवं वर्णयितुमारब्धवान् -

# नवमी-पीठिका

## अर्थपालः

## नवमी-पीठिका

# अर्थपाल:

कुमार ! तस्मिन्नतिगहने कानने भवन्तमपश्यन्तो वयं वयस्या: चिन्तासागरनिमग्ना: किङ्कर्तव्यविमूढा: समभूविम । चिरं परिमार्गणेनाऽपि भवन्तमनुपलभमाना: निराशीभूता: वयं कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यां तिथौ विशालायां महाकालमन्दिरं मिलनङ्केतस्थलं सुनिश्चित्य विभिन्नासु दिक्षु भवदन्वेषणार्थं प्रस्थिता: । मित्रैर्विसृष्टोऽहमितस्ततो भ्रमन् पूर्वोत्तरदिशि काशीजनपदराजधानीं वाराणसीं प्राप्त: । असिधाराकृतिर्भागीरथी किञ्चिद् वक्रीभूय प्रवहन्ती तत्राऽसीति नाम्ना प्रथिता। समीपवर्तिनी च वरुणा नदी वर्तते। असिवरुणयोर्मध्यवर्तिन्यां भुवि वसतिरियं नगरी वाराणसीत्यभिधीयते।

धर्मशास्त्रपुराणेषु प्रसिद्धमिदं यदियं नगरी रुद्रत्रिशूलाग्रसंस्थिता वर्तते। अत्र निवसन्तो भक्तजनास्त्रिनयनमुपास्य भागीरथीमवगाह्य सर्वविधानि पापानि प्रक्षाल्य त्रिविधसन्तापेभ्यो विमुक्ता: पवित्रा: भवन्ति।

वाराणसीं सम्प्राप्य मणिकर्णिकायां विशुद्धनिर्मलस्पटिकरत्नसमोज्ज्वलसलिले स्नात्वा तटवर्तिनि शिवमन्दिरे भगवन्तं त्रिनयनमभ्यर्च्य भगवत्या अम्बिकायाश्चरणयोरहं प्रणनाम। तदनन्तरं मन्दिरं त्रि: परिक्रम्य घट्टसोपानमार्गेणाऽवतरंस्तत्र करतल-निहितशिरसं रुदन्तमिव कञ्चन जनमहमपश्यम्।

कायस्य संगठनसौष्ठवादिगुणैरसौ पुरुषो बलवान् स्वास्थ्यसम्पन्नो बुद्धिमान् व्यवहारकुशलश्च प्रतिभाति स्म। कुतूहलाक्रान्तहृदयोऽहं तन्निकटं समागच्छम्। ईषदुच्छूनारक्तयोर्नयनयो: सततं प्रस्रवन्त्या कवोष्णनयनजलधारयाऽसौ तत्रत्यां भूमिं बहुतरामार्द्रां करोति स्म। मया विचारितम् -

कस्यचिदात्मनीनजनस्य. विपदेवाऽस्य रोदनहेतु:। निश्चयेन मया सहायेन भाव्यम्। तमुपगम्य भूमावुपविश्य वामेतरस्कन्धे च वामकरं सन्निधायाऽहं मृदुवचोभिस्तमपृच्छम् -

"मित्र ! महता दु:खेनेवाऽऽक्रान्तो भवान् रोदिति। यद्यत्र नाऽतिगोपनीयं तत्त्वं किञ्चित् , कथयतु भवान् दु:खकारणम्। संभवत: सहायोऽहं भवतो भविष्यामि।"

चमत्कृम्य स जनो ग्रीवां परिवर्त्य दृष्टिं मयि व्यापारयामास। प्रथमदृष्ट्या नितान्तपरिचितं मामवलोक्याऽविश्वासमापन्नोऽपि निर्निमिषनयने मय्यासज्य कथमपि समुत्पन्नविश्वासो मामवादीत् -

" मित्र ! नाऽस्त्यत्र किञ्चिद् विचारणीयं गोपनीयं वा रहस्यम्। श्रोतुमिच्छति यदि

भवान् मम दुःखकारणं, श्रावयामि भवन्तम्। श्रूयताम् -

पूर्णभद्राभिधानोऽहं सद्गृहस्थसुतः। मणिकर्णिकाघट्टसन्निकटमेवाऽस्माकं पितृपरम्परागतं गृहम्। जनकेन सुतरां शिक्षितोऽपि केषाञ्चिदपि साहसिकानां जनानां सहचारमहमगच्छम्।

स्वच्छन्दमुच्छृङ्खलं चाऽऽचरतो मे द्यूतस्तेयादिनिकृष्टव्यापारव्यसनेषु मानसं निमग्नम्। एभिर्व्यापारैः प्रभूतं धनमुपार्जयन्नहं न कदाऽपि नगररक्षकाणां दृष्टिपथमापतितः। अस्यामेव वाराणस्यां धनदासो वित्तदासश्चेति द्वौ सुसमृद्धौ धनशलिनौ रत्नवणिजौ सहोदरभ्रातरौ वर्तेते। देशदेशान्तरेषु द्वीपद्वीपान्तरेषु च तयोः सार्थाः पोताश्च सञ्चरन्ति। मया चिन्तितम् -

रत्नवणिजोस्तयोरापणभित्तौ सन्धिं कृत्वा कानिचिद् रत्नानि चोरयित्वाऽहं महाधनसम्पन्नो भूत्वा चौरकर्म परित्यक्ष्यामि। सुखेनाऽऽनन्देन च धनादिचिन्तारहितः शेषां जीवनयात्रां निर्वाहयिष्यामि। तदा शीलरूपस्नेहादिगुणसम्पन्नां कामपि तरुणीं सत्कुलविभूषणां पाणिग्रहणसंस्कारेण परिणीयाऽऽत्मीयां कृत्वा सानन्दं गृहे निवत्स्यामि। अयमेवाऽभिलाषो मम मनः दिवानिशं प्रेरयति स्म।

तथा निश्चयं कृत्वैकदाऽहं प्रगाढान्धकारावृते सूचिवेध्ये निशीथे धनदासवित्तदासयोरापणभित्तौ सन्धिं कृत्वां तद्द्वारेणाऽन्तः प्रविश्य प्रभूतानि रत्नानि महार्घाणि विचित्य वस्त्रखण्डे निबध्य पोट्टलिकां बाहुमूले निधाय बहिरागम्य राजमार्गमाश्रित्य गृहाय प्रस्थितः। कज्जलश्यामिकासंलिप्ते निशीथे नगराधिपतिना क्वचित्क्वचिन्मार्गेषु स्थापितानां दीपानां मन्दालोकमुपेक्षमाणोऽहं गृहं प्रति सञ्चलितः।

परं मन्दभागधेयो गृहसन्निकटं समागतोऽहं कैश्चिन्नगररक्षकैर्मन्दालोकेऽवलोकितः। तैश्च पाशेषु बद्धः। विमुक्तये पलायनपरो बहुकृतप्रयासोऽप्यहं नगररक्षकाणां प्रचुरसंख्यत्वादायुधबाहुल्याच्च निगृहीतो न साफल्यमवाप। किञ्चिदपि प्रतिकर्तुमक्षमोऽहं रत्नमोषणापराधे मृत्युदण्डेन दण्डितः। नगराधिपतिनाऽऽदिष्टम् -

"करिचरणपेषणत्वमेव प्राप्नोतु इति। सर्वे जनाः पश्यन्तु रत्नचौरो जनः कथं दण्ड्यते।"

हस्तयोः पादयोश्च गुरुभारस्थूलदृढकाष्ठस्थूणबद्धोऽहं गोपुरसमीपं राजमार्गे निक्षिप्तः। मृत्युदण्डेन दण्डितानामपराधिनां वधाय राजकीयहस्तिशालायां मृत्युञ्जयो नाम बलशाली नृशंसस्वभावोऽतिविशालकायो भीतिप्रदो गजोऽवर्तत। प्रचुरमदपानेनोन्मत्तीकृतो मृत्युञ्जयोऽसौ गजो वधाय मे प्रेषितः।

कण्ठाभरणभूतानि क्षुद्रघण्टिकाजालकानि वादयन् बृंहितैर्दिशां प्रान्तराणि निनादयन्नसौ गजो मां पददलितं कर्तुं सहसाऽतिवेगेन दुद्राव। परन्तु भयाक्रान्तोऽप्यहं

निगडिताभ्यामपि हस्ताभ्यां तं काष्ठस्थूणमुत्पाट्य मेघगर्जनं कृत्वा हस्तिनमधिक्षिप्तवान् । भीतश्च गजः पश्चादपसरन् पौनःपुन्येनाऽऽधोरणेन तीव्राङ्कुशाघातैः मे पेषणाय प्रेर्यमाणो मया च द्विगुणगर्जनेन सह काष्ठस्थूणेनाऽऽक्षिप्यमाणो भयात् पश्चादेवाऽपससार । तदा तारस्वरेण सङ्गर्ज्य भयरहितोऽहं नगररक्षकानुवाच -

"अरे रे प्रवीराः प्रहरिणः ! किमर्थमयं युष्माभिः कीटतुल्यो गजो मम वधाय प्रेर्यते? कश्चनाऽपरो बलवत्तरो गजः समानेयो येन क्रीडां कृत्वाऽहं परलोकं गच्छेयम् ।"

अथ मम मेघगर्जनसमाभिर्गर्जनाभिः काष्ठस्थूणोत्तोलनेन च नितरां भीतोऽसौ दन्ती हस्तिपकस्याङ्कुशप्रहारानुपेक्षमाणो जनसम्मर्दं पादाघातैः सम्पेषयन् तीव्रवेगेन पलायितः । ममैतं पराक्रममवलोक्य विस्मयान्विताः सर्वे जनाः मां भूयोभूयः प्रशशंसुः । तस्मिन् समये गोपुरद्वारालिन्दोपर्युपविष्टो नगराधिपतिः सर्वमेतद् दृश्यं पश्यन्नासीत् । पलायिते हस्तिनि काष्ठस्थूणबन्धनान्मां मोचयित्वा उपरि अलिन्दे समाहूय स प्रोवाच -

हे वीर ! अद्भुतेन पराक्रमेण त्वं शोभसे । मृत्युञ्जयो नाम महत्तमो बलशाली गजो येन हुङ्कारगर्जनेनैव भाययित्वाऽपसारितस्तस्य पराक्रमस्य प्रशंसा शब्दशतैरपि कर्तुं न शक्यते । अतोऽधिको बलशाली हस्ती कुत्र लभ्यते? अद्भुतपराक्रमशालिनाऽपि त्वया स्तेयसदृशं कदाचरणमाचर्यते? त्यजेदं पापाचरणम् । सत्कार्येषु चित्तं संयोजय । आर्येणाऽपि न त्वयाऽनार्यवदाचरणीयम् । सत्कुलजात एव त्वं प्रतिभासि ।

नगराधिकारिणा तथा सम्बोधितेन मया सलज्जेन पापकर्माणि परित्यक्तुं प्रतिज्ञातम् । तदनन्तरमसौ मम दण्डविमुक्तये समादिदेश । अथ निजसेवायां मां नियुज्य मित्रवद् व्यवहरत् । अहमपि तं प्राणरक्षकं नगराधिपतिं कृतज्ञताभावपरिपूरितहृदयः सततमहोरात्रमसेवे । एकस्मिन् दिवसे विश्रम्भगोष्ठ्यामसौ नगराधिकारी निजचरितमेवमवर्णयत् -

मगधजनपदराजधान्यां कुसुमपुर्यां राजहंसाभिधानो नरपतिः परमपराक्रमशाली नीतिज्ञः प्रजावत्सलश्च वर्तति । तस्य मन्त्रिणो विद्वद्वरेण्यस्य राजनीतिप्रयोगप्रवणस्य धर्मपालस्य त्रयः सुता अवर्तन्त - सुमन्त्रः, सुमित्रः कामपालश्च । त्रयोऽपि ते विद्वांसः पराक्रमशालिनो नीतिज्ञा आयुधसञ्चालननिपुणाश्चाऽऽसन् । परं कामपालस्तेषु तथाभूतगुणयुक्तोऽपि रसिको भोगविलासाभिरुचिः सततं साहसिककार्येष्वासक्तचित्तश्च बभूव ।

विटेषु वाराङ्गनासु च नितरामासक्तोऽसौ कामपालः कुसुमपुरस्य लावण्यमयीभिर्वाराङ्गनाभिः सुभूषितेषु वेश्यालयेषु सदा विहरति स्म । एवं व्यसनेषु समासक्तचित्तस्य तस्य नियमने धर्मपालस्तस्य जनको न कथमपि समर्थो बभूव । एकस्मिन् दिवसे कतिपयैः समप्रकृतिभिर्वयस्यैः सहाऽसौ स्वच्छन्दं पर्यटन् कुसुमपुरान्निर्गतः ;

विभिन्नान् जनपदान् परिभ्रमन्नसौ कामपालो हिमवतो रमणीयानामधित्यकानामुपत्यकानां प्राकृतिकसौन्दर्यदर्शनेनाऽऽकृष्टहृदय उत्तरोत्तरं गच्छन् अलकनन्दा-सरस्वतीसङ्गमेऽवस्थितां सर्वतो नभोभेदिभिर्गिरिशिखरैः परिवेष्टितां मणिभद्रस्य यक्षसैन्याधिपस्य प्रधाननगरीं मणिभद्रपुरीमवाप। तत्र तेन यक्षनायकसुता तारावली परिणीता। चिरकालं तौ नवप्रणयिनौ हिमवतो रमणीयेषु प्रदेशेषु कलकलनिनादिनीनां सरितां द्रोणीषु हिमाच्छन्नेषु गिरिशिखरेषु भोजदेवदारुतरुसुशोभितास्वधित्यकोपत्यकासु स्वच्छन्दं परस्परं करग्रहणं कुर्वन्तौ विजह्रतुः। परमेकस्मिन् दिवसे तारावलीवचन-सङ्क्रुद्धोऽसौ कामपालः सर्वैरलक्षितो मणिभद्रपुरान्निर्गत्य सुदूरं प्रस्थितः।

तदनन्तरमनेकानि स्थानानि परिभ्रमन्नसौ कामपालो भगवतो नीललोहितस्य नगरीं वाराणसीं प्राप। तस्मिन् समये रसिकजनैः समायोजितस्य वसन्तोत्सवस्याऽऽमोदे परमहर्षनिमग्नायाः वाराणस्याः रमणीयां शोभां वर्णयितुं महाकवयोऽप्यक्षमा अवर्तन्त। नगरबाह्योद्याने विविधवर्णकुसुमसमृद्धिविभूषिते कामदेवायतने महान्तं जनसम्मर्दमालोक्याऽसौ कामपालस्तन्मन्दिरं निकषा समागम्य वसन्तोत्सवस्य निरीक्षणे दत्तचित्तो बभूव।

अस्मिन्नेवाऽवधौ काशीजनपदाधिपस्य चण्डसिंहस्य सुता नवयौवनवयःसमारूढा परमसौन्दर्यशालिनी सखीभिः समावृताऽनङ्गमभ्यर्चयितुं कामदेवायतनं प्रविवेश। राजकन्यायाः रूपेण वयसा नवयौवनेन च तस्य वराकस्य कामपालस्य मनस्तत्क्षणमपहृतम्। कामपालोऽसौ रसिकजनशिरोमणिरल्पेतराभिर्नवयौवनशलिनीभिर्लावण्यवतीभिः प्रमदाभिर्मनोऽभिरामाभिः सहवाससुभगत्वमवाप्याऽपि तथाभूतं दिव्यज्योतिःस्वरूपं सौन्दर्यं वसुधातले न पूर्वमनुबभूव।

राजनन्दिन्याः सौन्दर्यपाशे बद्धेन तेनाऽनुभूतं लावण्यमिदमनङ्गरङ्गप्रतिमं तस्योपभोगाय विधात्रा निर्मितम्। दीपशिखया शलभ इव तेन रूपेण कामपालः सर्वेष्वङ्गेषु ज्वलितुमारेभे। विस्मृतनिमेषव्यापारो मन्त्रिसुतः कामपालस्तस्याः राजसुतायाः कामदेवायतनाद् बहिरागमनं प्रतीक्षाञ्चकार। बहिरागतायाः राजनन्दिन्याश्चाऽपि दृष्टिः सहसा मुग्धभावभरितचित्ते निश्चले निर्निमिषव्यापारे कामपाले पतिता। सा चाऽप्यनङ्गशरप्रहारप्रहता स्थगितेव चकितेव क्षणं तत्र निरुद्धगतिस्तस्थौ। तदनन्तरं कामपालं स्नेहमयेन कटाक्षेण प्रहृत्य स्मितसुशोभिताधरा ततः प्रतस्थे। परं कामपालस्य चित्तं विकलमप्यपहृत्य सा राजसुता कान्तिमती निनाय।

अपहृतहृदयेन परं लोकव्यवहारनिपुणेन कामपालेन कान्तिमत्याश्चन्द्रिकानाम्नी सेविका बहुभिरुपहारैर्मधुरवचोभिश्च कथमपि स्वमनोऽनुकूला विहिता। तन्माध्यमेन

परस्परसम्पर्कं रहसि लब्ध्वा तयोर्नवप्रणयिनोः महता प्रणयरतिविलासानन्देन रजन्यो व्यतीयुः। कतिपयदिवसानन्तरं राजकन्या कान्तिमती गर्भं बभार। तेजःसमुद्दीप्त-वदनमतिसौन्दर्यसुशोभनसर्वावयवं सुतं सा प्रसुषुवे। घटनेयं राजकुलं प्रक्षुब्धञ्चकार। अपकीर्तिभयाद् राजमाता तां कामपालकान्तिमतीसन्ततिं नगराद् बहिः क्रीडापर्वतशिखरे प्रचिक्षेप।

कामपालो वाराणस्यां महावैभवसम्पन्ने भवने न्यवसत्। तत्रैव सुगुप्तरूपेण कान्तिमती समागच्छति स्म। तत्रैका भिल्लजातीया सेविका प्रमदाऽवर्तत। विदितवृत्तान्तः कामपालस्तां भिल्लसेविकां क्रीडापर्वतं गन्तुमादिदेश। यदि स शिशुर्जीवत्यत्राऽऽनेय इति। सेविका तत्र गत्वा व्यलोकयत् - शिशुरसौ प्राणरहित इव धरातले निश्चेष्टः सम्मुद्रितनयनोऽशेत। तं मृतमवगम्य करयोः समुत्थाप्य सा शिशुश्मशानमगच्छत्।

श्मशाने सन्देहसङ्क्रान्तमनोभिः श्मशानरक्षकैर्गृहीता भृशञ्च ताडिता सा भिल्लसेविका सकलं रहस्यमुद्घाटयामास। कामपालस्य भवनमपि सा निर्दिदेश। विदितवृत्तान्तेन रोषारुणिमनयनेन नरपतिना कामपालस्य वधः समादिष्टः। रक्षकाश्चाऽपि तमसाऽऽवृतनिशीथिन्यां सुगुप्तरूपेण कामपालं रज्जुभिर्बद्ध्वा श्मशानं निन्युः। तत्र तस्य शिरश्छेत्तुमेकेन रक्षकेण चन्द्रहासः समुत्तोलितः।

तस्मिन् समये न जाने कीदृशमद्भुतं शक्तिसञ्चरणं कामपालस्य वपुषि समुद्बभूव। एकेनैव हस्तप्रक्षेपणेन बन्धनानि विच्छिद्याऽसावाक्रम्य घातकहस्तमाकुञ्च्य चन्द्रहासं जग्राह। कामपालस्य चन्द्रहासाघातैः केचन रक्षकाः यमलोकाय प्रस्थिताः शेषाश्च प्राणान् रक्षन्तः कान्दिशीकाः बभूवुः। मृत्युमुखाद् बहिरागतः कामपालोऽपि प्राणरक्षायै समीपस्थेषु गहनवनेषु पलायनञ्चक्रे।

वनेषु निरुद्देश्यं भ्रमतः कामपालस्य दृष्टिः सहसा लाावण्यगुणेनेव निर्मितायां प्रमदायां पपात। बहुभिः सेविकाभिः परिवृता सहसा लावण्यगुणेनेव तेजसा च सकलमरण्यं दीपकशतैरिव प्रकाशसमुज्जवलं विदधती सा बाला काचिदुच्चवंशदीपिकेव प्रतिबभौ। निकटमागत्य कामपालं प्रणम्य सा निकटवर्तिनो महोत्तुङ्गपादपस्या-ऽधश्छायायामुपवेशनं सङ्केतयामास। उपविष्टेषु तत्र जनेषु कामपालस्तामपृच्छत् -

"भद्रे ! का त्वं कुतश्च समायाता ? मय्येतादृशी कृपा कस्मात् कारणाद् वर्तते ?"

सा रमणी वीणातन्त्रीषु झङ्कृतिमिव समुत्पादयन्ती माधुर्यगुणमयैरिव वचोभि-रुदतरत् -

"हे वीर! गन्धर्वराजस्य चित्ररथस्य सुताऽहं मुक्तावली वर्ते। यक्षनायकस्य मणिभद्रस्य सुता तारावली मम हृदयनिर्विशेषा सखी। बाल्यादावां वनपर्वतभ्रमणव्यसनिन्यौ सखीभिः परिवृते परितः स्वच्छन्दरूपेण परिभ्रेमतुः। यक्षाधिपेन्द्रः कुबेरश्चावयो-

रतिशयेनाऽस्निह्यत्।

भवता तारावली परिणीता। तदनन्तरं वयस्ययोरावयोः परस्परसम्मिलनभ्रमणावसरा अवसिताः। परं कमप्यविज्ञाप्यैव भवति कुत्रचिदन्तर्हिते मणिपुराच्च प्रचलिते हृदयप्रमाथिन्या पीडया विह्वला सा तारावली मामुपजगाम। तदनन्तरं सर्वत्राऽन्वेषण-पराभ्यामावाभ्यां भवान् कुत्रचिदपि नाऽवलोकितः।

एकस्मिन् दिवसे भूलोके पर्यटन्त्यहमुपवाराणसि श्मशानसन्निकटमार्गेण गच्छन्ती शिशुमेकमपश्यम्। औत्सुक्यभराक्रान्तहृदयया मयोपगम्य निरीक्षितम् -

"अतिस्वरूपवान् तेजसा सम्पन्नो दैदीप्यमानो नवजातशिशुरेको निश्चेतन इव धरायां वर्तते।"

करुणार्द्रचित्ताऽहं तं शिशुमङ्के निधाय ध्यानावस्थितमनसा व्यलोकयम्- "जीवनसूत्रमत्राऽतिसूक्ष्मं तिष्ठत्येवेति"।

विविधोपचारैस्तं शिशुं सचेतनं विधाय यक्षाधिराजं पितृतुल्यं कुबेरं दर्शयितुमनयम्। न जाने केनाऽनिर्वचनीयेन विधिना तं शिशुमुपलक्ष्य मम हृदये मातृस्नेहवात्सल्यभावना संभृता। सकलं वृत्तजातं निशम्य यक्षाधिराजो मामुवाच-

"वत्से ! शिशुरयं मगधाधिराजराजहंससचिवधर्मपालसुतस्य कामपालस्य काशिराज-चण्डसिंहनन्दिन्याः कान्तिमत्याश्च परस्परस्नेहानुरागपरिणतिः। तारावल्यै कुपितः कामपालो भ्रमन् वाराणसीं जगाम। तत्र तेन सुगुप्तरूपेण काशिराजसुता कान्तिमती पाणिना गृहीता। तयोः परस्पररतिविलाससंयोगजन्योऽयं शिशुस्तारावल्या एवाऽवगन्तव्यः। वर्तते तारावल्याः कर्तव्यमिदानीमस्मिन् शिशौ। सैव तस्य जननी कामपालस्य भार्यात्वात्। सपत्न्याः सन्ततिमेनामङ्के निधाय सा मगधराजराजहंसस्य निवासे विन्ध्यारण्ये महादेवीं वसुमतीमुपगमिष्यति। तस्यै चैनां सचिववंशपरम्पराभूतां सन्ततिं समर्प्य प्रत्यागम्य च पत्युश्चरणौ सेविष्यते।"

यक्षाधिपस्य कुबेरस्य वचनानि निशम्य मया समर्पितं कामपालसुतं सा तारावली मगधराजमहिष्यै समर्प्य गुरुजनानामनुमतिं प्राप्य भवदन्तिकमागमिष्यति।

गन्धर्वराजसुतायाः मुक्तावल्याः वचांसीमानि समाकर्ण्य परमविस्मयसम्भृतहृदयोऽपि कामपालः प्रसन्नचित्ततां ययौ। तारावल्यै परमानुरागस्तस्य मनसि पुनः जजागार। सोत्कण्ठाभ्यां नयनाभ्यामसौ मुक्तावलीं निर्निमेषं निरैक्षत। तस्मिन्नेव काले किमप्यनिर्वचनीयं दिव्यं ज्योतिराविर्बभूव। यक्षनन्दिनी तारावली परिपूर्णशशिमण्डलमिव वदनमावहन्त्यात्मानं प्रकटयामास।

चिरकालानन्तरं तारावलीं निजहृदयेश्वरीं प्रणयिनीं सम्मुखमागताम-वलोक्याऽऽनन्दसम्भृतहृदयः कामपालः भुजौ प्रसार्य तां वक्षसाऽऽसज्य प्रगाढालिङ्गन-

बद्धाञ्चकार। अथ च वारम्वारमसङ्ख्यचुम्बनैरोष्ठौ कपोलौ नयने चाऽऽवृणोत्। हृदयावेगे च किञ्चित्प्रशान्ते तौ प्रणयिनौ मुक्तावलीं प्रत्यक्षस्थितां प्रेक्ष्य सलज्जौ पृथग्भूत्वा तस्थतुः। अथ याममात्रं मिथः संलापैस्तौ तारावलीकामपालौ प्रसाद्य मुक्तावली यथाऽभिलषितज्जगाम।

यक्षबालाप्रभावेण कामपालेन वाराणस्यां मनोरमं समृद्धिमच्च विशालं भवनमधिकृतम्। तारावल्या सह विविधभोगविलासाननुभवतस्तस्य दिवसाः रजन्यश्च महता हर्षेण व्यतियन्ति स्म। परं कामपालस्य मनसो विह्वलत्वं न विलुप्तम्। कान्तिमत्याः स सततं स्मरति। स तारावलीमुवाच –

"प्रियतमे ! तारावलि! कान्तिमत्यै स्पृहयाम्यतितरामिति। निरपराधमपि मां राजा चण्डसिंहो मृत्युदण्डेनाऽदण्डयत्। तव भाग्येनैवाऽहं जीवामि। प्रतिकर्तुमक्षमस्य मम प्राणा अहर्निशं पुटपाकानलेन दह्यन्त इव।अथ च कान्तिमतीमपि विरहज्वालाकुलितां ते भगिनीमवलोकयितुमिच्छामि।"

कामपालस्य वचनं निशम्य स्मितपूर्वाभिभाषिणी तारावली तमुवाच –

"आर्यपुत्र ! मा शोकं कार्षीः। आयातु भवान्। भवतः प्रिया कान्तिमती भवद्विरहविह्वला सततं भवतः स्मरति। तया सह भवतोऽविच्छिन्नं सातत्येन मिलनं भविष्यति। प्रबन्धो मया तथा विधीयते। यदि भवतः कान्तिमतीमवलोकयितुमभिलाषो वर्तते तर्हि मया सहाऽऽगम्यताम्।"

यक्षबाला दिव्यप्रभावयुता तारावली सुगुप्तरूपेण केनाऽप्यनवलोक्यमाना निशीथे कामपालं काशिराजस्य चण्डसिंहस्य शयनकक्षे प्रवेशयामास। कामपालस्तं नरपालं गहननिद्रोत्सङ्गशायिनं निद्रावशङ्गतमपश्यत्। क्रोधावेशविवशोऽसौ कटिबद्धमसिं करे गृहीत्वा चण्डसिहं पादाघातेन प्रहृत्य प्रबोध्य कठोरस्वरेणाऽचकथत् –

"राजन् ! भवतो जामाताऽहं समागच्छम्। भवदनुमतिमुपेक्षमाणेन मया भवतः सुता कान्तिमती पाणिग्रहणसंस्कारेण गान्धर्वविधिना परिणीता। आवयोः सङ्गमेन सञ्जाता सन्ततिः परिणयफलं भवता क्रीडापर्वतशिखरे ततश्च श्मशानक्षेत्रे निपातिता। मम भार्याऽपि कान्तिमती बलान्निरुद्धा। आत्मना कृतानामपराधानां परिमार्जनाय समायातोऽहं साम्प्रतम्। अनेन खड्गप्रहारेण शतशः खण्डिते भचच्छरीरे मम भार्या भवतो दुहिता मया सह गमिष्यत्येव।"

कामपालस्य वचनान्यतिकठोराणि कुलिशप्रहारसमानि समाकर्ण्य यमदूतकल्पं मम रौद्ररूपञ्चाऽवलोक्य भयभीतस्य कातरस्य महीपतेश्चण्डसिंहस्य सर्वाण्यङ्गानि सरोमोद्गमभयविकम्पितानि स्वेदार्द्राणि च सञ्जातानि। हृद्गतिरतितरां ववृधे। अतिविनीतभावेन कामपालं प्रणम्याऽश्रुगद्गदवचसाऽसौ व्याजहार –

"वीर ! अतिमूर्खोऽस्म्यहं भवति पापकृच्च। पराक्रमी वीरो नीतिज्ञश्च भवान्। भवत: सामर्थ्यमजानता मया तथाऽऽचरितम्। मर्यादामुल्लङ्घ्य मृत्युदण्डविधानं कृतम्। प्रात: सूर्योदये सञ्जाते प्रकाशितेषु च दिगन्तरेषु बालातपेन, शास्त्रोक्तविधिनाऽहं स्वसुताया: कान्तिमत्या: करं भवते समर्पयिष्यामि। अथ च भवते वाराणस्या: शासनप्रबन्धमपि समर्प्य विगतचिन्तो भविष्यामि।"

अपरेद्यु: प्रभातवेलायामसौ राजा चण्डसिंह: स्वकन्यायास्त्रिभुवनमहिलासंहति-तिलकरूपाया: रूपशीलादिगुणविभूषिताया: करं शास्त्रोक्तविधिना कामपालाय समर्पयामास। अथ च तं नगराधिपपदेऽपि न्ययोजयत्।"

पूर्णभद्रस्तु मणिकर्णिकाघट्टसोपानपङ्क्तिषूपविष्टो वृत्तमेतच्छ्रावयन् क्षणं विरम्य पुन: बभाषे -

"एवं स्वकीयजीवनघटनाचक्रं श्रावयन् मां नगराधिपतिरसूचयद् यदसावेवाऽहं कामपाल:। साम्प्रतं तारावलीकान्तिमतीभ्यां कलत्राभ्यामहं सुखेनाऽऽनन्देन च भौतिकसुखान्युपभुञ्जे। मम सुतो मगधाधिपस्य राजहंसस्य संरक्षायां वर्तत इति ज्ञात्वाऽहं विगतचिन्तो वर्ते। द्वयोरपि भार्ययो: प्रणयरससम्भृतहृदययो: सेवापरायणयो: सङ्गति: सततं मां कष्टरहितं चिन्तावितानशून्यञ्च विदधाति। कान्तिमती काशिराजसुता सततमत्र मया सह निवसति, परं यक्षिणी तारावली कदाचिद् वाराणस्यां तिष्ठति, कदाचिच्चाऽऽकाशमार्गेण स्वपितृगृहं मणिभद्रपुरं गच्छति।

पूर्णभद्र: पुनरप्याह -

"नगराधिपस्य कामपालस्य पूर्वचरितमाकर्ण्य सुखदाश्चर्येण मम मनो हर्षनिर्भरं बभूव। विधातुर्विधानस्येदमद्भुतं निदर्शनमासीत्। प्राणरक्षकस्य गुणग्राहिणो नयज्ञस्य तस्य वीरोदारस्वभावस्य सेवायां सततं वर्तमानोऽहं सुखमेवाऽन्वभवत्। परं विधिगति: केन ज्ञायते वार्यते च। समयान्तरालेन काशिराजश्चण्डसिंहो वार्धक्यमापन्न: शिथिलगात्रो मृत्युना गृहीतो दिवङ्गतो बभूव। द्वाभ्यां भार्याभ्यां तस्य नरपालस्य द्वौ सुतावास्ताम् - ज्येष्ठश्चण्डघोष: कनिष्ठश्च सिंहघोष:।

शासनपरम्परां कुलपरम्पराञ्च पालयता कामपालेन ज्येष्ठश्चण्डघोषो राजसिंहासने प्रतिष्ठापित:। परं प्रमदाजनेषु नवयौवनरूपगुणविभूषितेष्वतितरामासक्तचित्तस्य तस्य कामपिपासा पौन:पुन्येन सम्भोगैरपि न सन्तृप्तिमाससाद। सीमोल्लङ्घनपरस्य तस्य रतिविलासासक्तमानसेन्द्रियस्य काय: क्षयरोगेणाऽऽक्रान्त:। तस्य हंसरूपो जीवात्मा स्वल्पेनैव समयेन भौतिकशरीराद् बहिरागत्य भूलोकं परित्यज्य स्वर्गलोकञ्जगाम।

स्वर्गङ्गते चण्डघोषे कामपालोऽसौ शासनप्रबन्धकर्ता नगराधिपति: कनिष्ठं वैमात्रेयं भ्रातरं सिंहघोषं राजसिंहासनारूढञ्चकार। चतुर्दशवर्षदेशीयस्य तस्य

बालमहीपालस्य सरंक्षणभारमपि स्वीकुर्वन् शासनधुरमपि दधानो राजकार्याण्यसौ सञ्चालयामास।

शनैः शनैरायुषा संवर्धमानः कामपालसंरक्षायां राजनयं धनुर्विद्याञ्च शिक्षमाणोऽसौ सिंहघोषो नवयौवनेन विभूषितो रूपबलशौर्यादिगुणसमन्वितो बभूव। परं नवयौवनाविष्कृत्या समं तस्मिंस्तारुण्यवयसि सुलभा असहिष्णुतोन्मत्ततादिगुणा आविर्बभूवुः। पिशुनाः मत्सरिणः परगुणासहिष्णवः परोन्नतिमसहमानाश्चाऽनेकदुष्टप्रकृतयो चाटुकाराः जनास्तस्याऽन्तरङ्गतां प्रापुः। सततं तं परिवारयन्तस्तेऽतिदुराचरणाः मदिरापायिनो रमणीषु प्रमदासु सततमासक्तचित्ताश्च सिंहघोषमपि राजसिंहासनप्रतिष्ठितं तथैव दिव्यादिव्यगुणैर्विभूषयन्तो मिथ्याप्रशंसावचनैः प्रशशंसुः। गच्छति च काले ते कामपालविषये पैशुन्यमित्थं प्रकटयाञ्चकुः -

कामपालोऽयं भवतो वैमातृकभगिनीपतिरतिदुष्टस्वभावो धूर्तो विश्वासघातकश्च वर्तते। दुराचरणस्य तस्य न कुलं ज्ञायते न च शीलम्। प्रथमं तावदनेन भवतो भगिनी कान्तिमती छलेनाऽतिसन्धाय दूषिता। तदनन्तरञ्च निशीथे निभृतं नरपालशयनकक्षं प्रविश्य मृत्योर्भयेन तं भाययामास। प्राणभयेन तेन नरपालेन सकलगुणविभूषिता राजकन्या तस्मै तस्कराय प्रदत्ता। अपि च काशीपतिश्चण्डसिंहो भवतो जनकस्तं दुराचारिणं नगराधिपतिपदे न्ययोजयत्। भवतो वैमात्रो भ्राता चण्डघोषोऽप्यनेनैव धूर्तेन ध्रुवं विषादिप्रयोगैः सुगुप्तषड्यन्त्रं रचयित्वा व्यापादितः।

अथ चाऽत्र हेतुरयमेव सम्भवति, स्वल्पायुषं भवन्तं राजसिंहासनप्रतिष्ठितं विधाय स्वच्छन्दं मनोभिलाषितमाचरेत्। पुनः प्रजासु च विश्वासमापादयेत्। भवन्तं राजपदप्रतिष्ठितं कृत्वाऽन्तरङ्गविश्वासमापाद्य विश्वासघातकोऽयं भवतो भगिनीपतिरवसरं लब्ध्वा षड्यन्त्रं रचयिष्यति। अतो ध्रुवमेवाऽयं वधदण्डेन दण्डनीयः।

स्वल्पायुर्नवयौवनमदोन्मत्तोऽविमृश्यकारी स राजा सिंहघोषो निश्चयेन मूर्खो नयबुद्धिशून्यश्च वर्तते। प्रतिदिवसं प्रणीताभिः कुमन्त्रणाभिः पिशुनैस्तस्य मनः कामपालं स्वभगिनीपतिं हितकारिणं प्रति विद्वेषभावैः सम्भृतम्। अवसरं प्राप्याऽसौ सिंहघोषः कामपालस्य वधाय सुगुप्तषड्यन्त्ररचनासु प्रावर्तत। परं कामपालस्य प्रियायाः तारावल्याः यक्षिण्याः प्रभावेणाऽसौ किञ्चिदप्यपकर्तुं न प्रबभूव।

परमेतेष्वेव दिवसेषु तारावली यक्षनायकसुता सपत्नीजन्यसुलभेर्ष्यया वाऽन्येन वा केनचिद्धेतुना कुपिता पितुरन्तिकं मणिभद्रपुरं जगाम। कान्तिमती स्नेहातिरेकसम्भृतहृदयां तां सहोदरामिव भगिनीमग्रजां सदा सादरं सम्मानयामास। परं विधिः केन निवार्यते? मणिभद्रपुराय प्रस्थिता तारावली दीर्घकालपर्यन्तं यदा न प्रत्यावृता तदाऽनन्यमनस्कचित्ता कान्तिमती सततमौदासीन्यभावं भेजे। ननान्दुरिदमौदासीन्यभावं सिंहघोषभार्या मल्लिका

ध्यानावहितचेतसाऽलक्षयत्। कारणञ्चाऽवबुध्य सा भर्तारं सकलवृत्तान्तमुवाच। तारावल्या अनुपस्थितिमवगम्य सिंहघोषोऽपि कामपालमपकर्तुमवसरं लेभे।

केनचिदपि हेनुना राजप्रासादं समागतं कामपालं विश्वासघातकोऽसौ सिंहघोषो वञ्चनां कृत्वा प्रहरिभिर्बन्दीकृतवान्। लोहशृङ्खलाभिर्निगडितोऽसौ भगिनीपतिः कारागारे निक्षिप्तः। अनेनैव षड्यन्त्रं विधाय विषप्रयोगेण मेऽग्रजश्चण्डघोषो हत इत्यपराधेनाऽसौ लाञ्छितः। अथ चाण्डालान् वधिकानसौ नरपतिः समादिदेश -

"अतिनिकृष्टस्वभावमेनं कामपालं तैलमिश्रितकज्जलेन कृष्णवदनं विधाय विपरीतभावेन रासभे समारोप्य नगर्या राजमार्गेषु भ्रामयत। डिण्डिमवादनैश्च तस्याऽपराधाः घोषणीयाः। तदनन्तरं श्मशाने वधस्थलं नीत्वा तस्य उभे चक्षुषी खड्गाग्रेण निष्कास्य चन्द्रहासप्रहारेण शिरश्छेद्रो विधेयः।"

राजादेशेन कामपालः सम्प्रति कालकारागारे प्रहरिभिः सर्वतः सुरक्षिते मक्षिकाभिरप्यगम्ये निगडनिबद्धो वर्तते। अपरेद्युः प्रभाते सूर्योदये सत्येवाऽसौ दण्डितो भविष्यति। स्वामिनो दुःखोदन्तमवलोकयितुमसर्थोऽहं भागीरथीतीरे मणिकर्णिकाघट्टे तिष्ठामि। सम्प्रत्येव प्राणान् परित्यज्य स्वामिनोरपि पूर्वं स्वर्गं प्राप्य तत्र तं प्रतीक्षिष्ये।"

निजवृत्तान्तं राजवाहनं मित्राणि च श्रावयताऽर्थपालेन क्षणं विरम्य पुनरप्यग्रे वर्णितम् -

समुच्चार्यमानि वचनानि पूर्णभद्रो मम स्कन्धे शिरो निधाय तारस्वरेण क्रन्दितुमारेभे।

तारावल्या यक्षिण्या मगधाधिपभार्यायै पट्टमहिष्यै 'वसुमत्यै समर्पितः शिशुः कान्तिमतीसुतोऽहमेवाऽऽसम्। पूर्णभद्रवृत्तान्तं निशम्य मया ज्ञातम् -

अयमेव कामपालो मम जनकः, कान्तिमती च मम जननी। जनकस्य विपत्समाचारानवगम्य मम नयनाभ्यामश्रुजलधारा वेगेन प्रावहत्। तथाऽप्यवसरस्य गाम्भीर्यमनुभूय पितृत्राणयोजनां झटिति मनसि निश्चित्याऽहं पूर्णभद्रमवोचम् -

"भद्र! श्रीमतः कामपालस्य श्रीमत्याः कान्तिमत्याश्च विधिवञ्चिता सन्ततिरहमेवाऽस्मि मन्दभाग्यः। पालनपोषणादिसंस्कारेभ्योऽहं मगधेश्वर्यै समर्पित आसम्। सम्प्रत्यहं पितुः परित्राणार्थमेव विधात्रा प्रेषितः।"

तदनन्तरमहं किञ्चित्कालपर्यन्तं विस्मयप्रहर्षविस्फारितलोचनं पूर्णभद्रं मनसि निश्चितां योजनां बोधितवान्।

अपरेद्युर्नवोषसाऽरुणाभे प्राचीदिक्क्षितिजे सप्ताश्वरश्मिस्यन्दने च सूर्यमण्डले किञ्चिदुन्नते वाराणसी नगरी सम्भ्रमेण व्याकुलीभूता समदृश्यत। लोकप्रियोऽयं प्रजारञ्जनो नगराधिपतिः कामपालश्चण्डघोषवधापराधेन दूषितो वधाय वधस्थलं

नीयत इति कर्णाकर्णिकया निशम्य कामपालं निरपराधं मन्यमानानां प्रजानां सम्मर्दाः राजमार्गेषु समवेताः बभूवुः। उवद्रवाशङ्कया राजादेशेन प्रचुरसङ्ख्यकाः विविधायुध-सुसज्जिताः सैनिकाः स्थाने-स्थाने सन्नियोजिताः।

तत्र मम सङ्केतं प्राप्य पूर्णभद्रो नगरप्रमुखचतुष्पथनिकटमागम्य निभृतमतिष्ठत्।

अहमपि च तस्य सङ्केतेनैकस्मिन् मार्गस्थिते पुरातने जीर्णभवने स्वात्मानं सुगोपयित्वाऽतिष्ठम्। मया तथागुणविशिष्टं गरलमाविष्कृतमासीद् यथा त्वचि प्रविष्टं तद् गरलं गरलाक्रान्तं जनं मूर्छितं विधाय कायेन मृतमिव प्रदर्शयति। परं विशेषोपचारैर्विषाक्तो जनः सचेतनो भवति। सुसूक्ष्मसूचिकामेकां तरलगरलेनाऽऽपूर्य प्रक्षेपणयन्त्रेण च तस्याः प्रक्षेपणप्रबन्धो मया तथा विहितो, यथा लक्ष्यस्थानं प्रविश्य सा कार्यं साधयेत्। सकलं प्रबन्धं विधाय कार्यसिद्धयेऽहं संसाधितसकतेन्द्रियः सज्जस्तत्र सावधानमनसाऽतिष्ठम्।

सहसा दूरात् सुतीक्ष्णडिण्डिमध्वनयः श्रुतिगोचराः बभूवुः। तेषां मध्ये राजकीयघोषणाश्चाऽप्यश्रूयन्त। विपरीतमुखं रासभारूढं सुदूरादायान्तं जनमेकमहमपश्यम्। वसनरहितश्चाऽसौ जनः कज्जलमिश्रिततैलसंलिप्तकायो रक्तकनेरपुष्प-स्रगलङ्कृतकण्ठः सुदृढमुञ्जतन्तुविरचितरज्जुपाशनिबद्धसकलगात्रः सर्वतस्तीक्ष्णधार-चन्द्रहासधारिभी रक्षकैश्चाण्डालैश्च परिवृतः केनाऽप्यपरिचीयमानस्वरूपो मयाऽवलोकितः। मम हृदयस्य गतिस्तीव्रतमा सञ्जाता।

चतुष्पथमागत्य डिण्डिममाहत्य चाण्डालप्रमुखेन तारस्वरेणोद्घोषितम् -

"कामपालेनाऽनेन नगराधिपतिपदप्रतिष्ठितेन राज्यलोभाच्चण्डघोषो नरपतिर्मेऽग्रजो भोजने गरलं प्रयुज्य घातितः। सम्प्रत्ययं महाराजं सिंहघोषं मां व्यापादयितुं षड्यन्त्रं रचयति। अतः प्रजापालकेन महाराजेन राजद्रोहापराधमुद्घोष्याऽयं प्राणदण्डेन दण्डितः। राज्यद्रोहिणोऽस्य दण्डाधिकारिणो नयने तीक्ष्णाग्रेण खड्गेन निष्कास्य शिरश्चन्द्रहासेन छेदनीयम्। योऽपि जन एवमाचरिष्यति, सनिकारमसौ दण्डेनैवंविधेन क्लेशितो मृत्युदण्डभागी भविष्यति।"

निश्चयेन अनेनैव मम जनकेन भवितव्यम्। रोषारुणनयनस्य कम्पमानकायस्य मम धमनिषु रुधिरमुत्क्वथितुमारब्धम्। परं समयापेक्षिणा मया कथमपि संयमित आत्मा। लक्ष्ये च समागते, तस्मिन् गर्दभे, प्रक्षेपणयन्त्रं मया दक्षिणेनाऽङ्गुष्ठेनाऽवनमितम्। तत्क्षणं तरलगरलसम्पूरिता सूचिका प्रक्षेपणयन्त्राद् बहिरागत्य तीव्रगत्या प्रसृता मम जनकस्य पृष्ठभागत्वचं प्रविश्य तत्र समाविष्टा केनाऽप्यलक्षिता धरायां पतिता। तत्क्षणं मम पितुः शरीरं निश्चेतनं सदधो लम्बितम्।

कामपालं कोऽपि विषसूचिकया हतवानिति समाचारो दावाग्निवत् सर्वस्मिन्नगरे

प्रससार। चन्द्रहासान् करेषूत्तोलयन्तश्चण्डाला: प्रहरिणश्च जनकस्य मे शरीरं निश्चेतनं रज्जुबन्धनाद् विमुक्तं कृत्वा भूमिशयानमकुर्वन्। परमेतस्मिन्नेव काले नगराधिपहत्यासमाचाराकर्णनसमुत्तेजितमानसा: प्रजाजना: सहस्रश: राजानमपवदन्त आक्रोशञ्च प्रकटयन्त: कोलाहलायमाना: समवेता: अभूवन्। राजप्रासादेऽपि सिंहघोषेण राजपुरुषै: समानीत: समाचार एष श्रुत:।

पूर्णभद्रो मे वचसा सकलां योजनां मया संयोजितां कान्तिमतीं मम जननीं पूर्वमेव समसूचयत्। तयाऽसौ नरपति: प्रार्थित: -

"राजन्! मम भर्तारमपमानितं कृत्वा मृत्युदण्डेन च दण्डयित्वा भवता स्वाभिप्राय: पूर्णतां नीत:। मम पति: स्वर्गङ्गत:। अधुना मयाऽपि नारीणां धर्म: परिपालनीय:। पति: पापशीलो वा पुण्यशीलो वा दुराचरणो वा सदाचरणो वा स्यान्नारी तमनुगच्छति। एष एव नारीणां परमो धर्म:। अतो भवान् मां भर्तारमनुगन्तुमनुमन्यन्ताम्। असौ मम पतिर्भवतो भगिनीपति:। कुलपरम्परामनुसृत्य राजवंशानुरूपं तस्याऽन्त्येष्टिसंस्कारो भवतु।"

रिपुभार्याया: वैमातृकभगिन्या: प्रार्थनामिमां निशम्याऽन्त:करणेऽतितरां प्रसन्नोऽपि बहिर्विषादमतिशयेन प्रकटयन् सिंहघोषस्तथाऽनुमतिं ददौ। इयं विपत्तिरेतावतैव विनङ्क्ष्यतीति तस्य आशाविरुद्धमेवाऽवर्तत। तेनाऽऽदिष्टम् -

"भगिनीभर्तुरन्त्येष्टिकर्माणि निजवंशपरम्परामनुसृत्याऽनुष्ठेयानि।"

तदनन्तरं महता समारोहेण तत:पितुर्मृतशरीरं राजसेवकैर्मम मातुरन्तिकमानीतम्। कान्तिमती मे जननी पूर्वमेव घोषणां प्रासारयत् -

"अन्त्येष्टिकर्मणि सा पत्या सार्द्धं स्वर्गं गमिष्यति।"

अथ तदनुरूपमेव तया सर्वोत्तमानि वस्त्राभूषणनि धारितानि प्रसाधनञ्च कृतम्।

मम परामर्शं सम्मान्य पूर्णभद्रसाहाय्येन मम जननी कान्तिमती निजभर्तृशरीरं निजं विजनं कक्षमनैषीत्। तत्र च तत् कुशशय्यायां धरायामेवाऽशाययत्। अहमपि केनाऽपि विधिना लोकानां दृष्टिं परिहरन् जननीसकाशं तद्गेहं प्राविशम्। तदनन्तरमस्माभिस्तस्य कक्षस्य कवाटं मुद्रितम्।

अन्त:प्रविष्टोऽहं शान्तनिश्चेष्टं पितुर्वपुषमद्राक्षम्। अनिर्वचनीयैर्भावैरुद्वेल्लितकायं मां जननी निरैक्षीत। स्नेहाश्रुनिर्भरनयना सा मां वीक्ष्य भर्तारमपि ह्येकाग्रमनसा निरीक्षाञ्चक्रे। मनसि समुद्भूतान् भावान् कथमपि महता प्रयासेन सन्नियम्य मया पितुश्चिकित्सा प्रारब्धा। प्रथमं तावत् तस्य कज्जलमलिनं वदनमन्यानि च गात्राणि प्रक्षाल्य वस्त्राणि परिधाय गरलसूचिकाक्षतबिन्दुमन्विष्य तीक्ष्णधारया छुरिकया मांसांशं परितो कर्तयित्वा क्षतस्थले ओष्ठौ निधाय मुखेन सकलं गरलं सञ्चोष्य निष्ठ्यूतम्।

तदनन्तरमहं विषनाशकानगदान् निर्माय तस्यांशं क्षतस्थले प्रलेप्य शेषञ्च गोघृतेन सम्मर्द्य मुखेऽपातयम्। शनैः शनैः पितुः कायस्य नीलिमा विलुप्ता, श्वासप्रश्वाससञ्चारः समजनि धमनिषु च स्पन्दनं प्रारब्धम्। स्वल्पेन समयेन जनको मम कामपालो नयने समुन्मील्य आश्चर्यचकित इव परितो दृष्टिं व्यापारयामास। जननी मे पतिमवलम्ब्य समुपावेशयत्। तदनन्तरमहं विषनाशकमगदं पुनः निर्माय पुनः घृतेन पितरमपाययम्। शक्तिसञ्चरणञ्च तस्य शरीरे प्रादुर्भूतम्।

सम्यक् सचेतनीभूते पितरि पूर्णभद्रः सकलं वृत्तमवर्णयत्। मम सुत एव मम प्राणान् अरक्षदिति विदित्वाऽसौ विस्मयेनाऽऽनन्देन च विह्वलमानसो मां चरणपतितं भुजाभ्यामुत्थाप्य वक्षसाऽऽसज्य गाढं बबन्ध। चिरमश्रुसलिलैर्मामार्द्रयामास। तदनन्तरं जनन्या समाकृष्टोऽहं तदङ्के समुपविष्टो वात्सल्येन समुल्लसन्तीभिः स्तन्य-धाराभिरार्द्रीकृतः। पौनःपुन्येन वक्षसाऽऽसज्य मां कपोलयोर्नयनयोश्चिबुके भाले चाऽपि चुम्बनशतान्यङ्कितवती। अश्रुभरगद्गदकण्ठा सा मामवादीत् -

"वत्स ! अधन्या पापशीला च किमहं ते वदामि? जात एव त्वं मया परलोकयात्रायै परित्यक्तः। परं त्वया पितरावावां रक्षितावुपकृतौ। कठिनहृदया सा तारावली यक्षिणी या त्वामुपलभ्याऽपि यक्षाधिपकुबेराद् विदितवृत्तान्ताऽपि मन्निकटं नाऽनैषीत्। अथ च पालनपोषणहेतोस्त्वं देव्यै वसुमत्यै समर्पितः। अथवा कुतो तादृशानि भाग्यानि पुण्यानि वा, यत्ते बालसुलभाव्यक्तवर्णरमणीयानि वचांसि निशम्य बाललीलाश्चाऽवलोक्य स्पर्शसुखकराण्यालिङ्गनान्यनुभूय परमहर्षनिमग्नाऽभविष्यम्। तथाऽपि विधिरतिदयालुः कृपालुश्च वर्तते, येन पितृभ्यां पुत्रो भार्यया च भर्ता पुनः संयोजितः।"

परमानन्दसागरे निमग्नोऽहं भविष्यति किं करणीयमिति पितरमपृच्छम्। पिता मामवोचत् -

"वत्स ! भवनमस्माकमिदमतिविशालं सुरक्षितञ्च वर्तते। राजदुर्गमिवेदं भवनं शत्रुभिर्न जेतुं शक्यते। अत्र प्रचुरः कोषोऽसङ्ख्यानि च रत्नानि शस्त्रास्त्राणि सञ्चितानि सन्ति। खाद्यपदार्थानां भण्डाराः वर्तन्ते। भवनस्य सुगुप्तकक्षादेका पृथिवीगर्भे निर्मिता सुरङ्गा भागीरथ्याः द्वितीये तीरे गहनारण्यपर्यन्तङ्गता। मां जीवितं विदित्वाऽसौ कृतघ्नो राजा सिंहघोषो न पुनर्मां निग्रहीतुं क्षमः। पूर्वं तावदसौ मां प्रवञ्चनां कृत्वा रज्जुपाशैर्बबन्ध। तथाऽपि नाऽस्माभिः साम्प्रतं प्रत्यक्षरूपेण शत्रुत्वं घोषणीयम्।

अत्र वाराणस्यां बहवो राजकर्मचारिणः सेनानायकाश्च मयोपकृताः निवसन्ति। तेषामनेके राज्ञे कुप्यन्ति। प्रजाजनेषु चाऽप्यहं लोकप्रियः। अवसरेषु ते सर्वे मम सहायाः भविष्यन्ति। अतः प्रथमं तावदस्माभिरत्र जनपदे बाह्या आन्तरिकाश्चोपद्रवा उत्पादनीयाः

नरपतिश्च बलहीनः करणीयः । बलकोषसञ्चयोऽप्यस्माभिः प्रभूतं विधेयम् । तदनन्तरमसौ राजा सुगुप्तरूपेण निगृह्य बन्दीकरणीयः । पितुर्योजनेयं सर्वाङ्गसम्पूर्णा, तदनुरूपमेव करणीया बभूव ।

पार्थिव: सिहंघोषो गुप्तचरैरचिरादेवाऽस्माकं स्थितेः परिचितो बभूव । छलप्रवञ्चनेऽतितरां प्रवीणोऽपि सिहंघोषो नास्मानपकर्तुं क्षमो बभूव । कामपालं मम पितरं पुनः बद्धुं समागताः राजसैनिका अस्माकं प्रहारैः प्रहताः विद्रुताः । भवनं परितः परिवृत्याऽपि ते स्वाभीष्टसम्पादने न समर्थाः बभूवुः । भवनप्राकारस्योल्लङ्घनेऽसमर्थास्ते सुदूरस्थप्रबलप्रहारक्षमैरायुधैस्तथा प्रहताः यथा न कोऽपि तत्राऽवस्थातुं साहसञ्चक्रे । सैन्यबलेन किमप्यपकर्तुमक्षमोऽसौ दुराचरणो मम मातुलः सुगुप्तरूपेण षड्यन्त्रं विरचय्य पितरं निग्रहीतुं प्रायतत । परमस्माभिस्तस्य सर्वे प्रयासाः विफलीकृताः । तदनन्तरमस्माभिर्योजना संयोजिता, केनाऽप्युपायेन सिहंघोषं निगृह्य कारागारे निक्षिप्य शासनप्रबन्धोऽधिकरणीय इति ।

पूर्णभद्रस्य साहाय्येन मया राजभवनस्य राज्ञः शयनकक्षस्य सविस्तरं विवरणमधिगम्य चित्रमेकं निर्मितम् । ततो निजभवनस्यैकस्मात् कक्षाद् राजप्रासादपर्यन्तं धरागर्भे सुरङ्गायाः निर्मितिरस्माभिः प्रारब्धा ।

सुरङ्गां खनन्तो वयं धरागर्भेऽतिरमणीयं मनोरञ्जनक्षममावासभवनमपश्याम । तदवलोक्य मया विदितम् –

"साक्षात् स्वर्गमिव समागताः वयम् । तत्राऽल्पेतराणां प्रमदानां समुदायोऽवर्तत । तासु काश्चन वृद्धाः काश्चन प्रौढाः काश्चन यौवनमदोन्मत्ता युवतयोऽभवन् ।

तत्रैका किशोरवयसा शोभमाना दिव्यसौन्दर्यसमृद्धा तेजसा कान्त्या च सकलमावासभवनं दीपयन्ती तरुणी मयाऽवलोकिता । तामवलोक्याऽनिवर्चनीयैर्भावैरभिभूतहृदयोऽहं तत्राऽनिमिषलोचनः समभूवम् । पश्यतो मम हृदयं तया तत्क्षणमपहृतम् । सुतप्त-काञ्चनसमकान्तिमत् तच्छरीरं विधात्रा महता प्रयासेन विशिष्टैः सौन्दर्यसंस्थापकैरुपकरणैः सर्वाङ्गसुन्दरं निर्मितम् । निर्निमिषनयनाभ्यां निरीक्षन्तं मां निरीक्ष्य सा किशोरी मन्दमन्दपवनाहतमृदुचन्दनवल्लरीव चकम्पे ।

कुद्दालान्युरगास्ययन्त्राणि हस्तेषूत्तोलयतः सुरङ्गामार्गेणाऽऽवासगृहं प्रविशतोऽस्मान् विलोक्य सर्वाः प्रमदाः भयभीताः परिकम्पितसर्वाङ्ग्यश्चुक्रुशुः । परं सविनयं मृदुवचोभिरहं ताः समाश्वासयम् । नाऽत्र किमपि भयकारणम् । कृतार्थयन्तु भवत्योऽस्मान् परिचयप्रदानेन । मम सुमृदुमधुरवचनैः समाश्वस्तासु तासु वयोवृद्धैका महिला पदद्वयमग्रेसरीभूता मां प्रणम्य कथयितुमारभत –

"भद्र ! सर्व एष महिलाजनो भवच्छरणं प्रपन्नः । प्रथमं तावन्निजपरिचयप्रदानेन

सह भवताऽत्राऽऽगमनकारणं प्रयोजनञ्च कथनीयम्। अथ अभयञ्च प्रदानीयम्। तदनन्तरं वयं भवतः प्रश्नानुत्तरिष्यामः।"

वृद्धायाः युक्तियुक्तवचनानि निशम्य समाश्वस्तहृदयोऽहं तामवोचम् -

"मातः ! काशीजनपदे वाराणस्यां नगराधिपतिः कामपालो महाराजचण्डसिंहस्य जामाता वर्तते। चण्डसिंहस्य दुहिता कान्तिमती तेन परिणीता। तयोः सुतोऽहमर्थपालः। विधेर्वैपरीत्येन कान्तिमत्याः भ्राता सिहंघोषो राजसिंहासनारूढो भगिनीपतिं मिथ्याराजद्रोहापराधं समारोप्य मृत्युदण्डेन दण्डितवान्। परं परमप्रभुः कारुणिकस्तस्य प्राणान् ररक्ष। सम्प्रत्ययं दुराचरणः काशीजनपदाधिपः प्रत्यक्षाप्रत्यक्षरूपेण षड्यन्त्रं विरचय्य केनाऽप्युपायेन विधिना रक्षितस्य तस्य मम जनकस्य प्राणान् पुनर्जिहीर्षति। तत्प्रतिकारार्थं तं राजानं रज्जुभिर्बद्ध्वाऽहं राजशासनमधिकरिष्यामि। इति हेतोर्मया निश्चितं किञ्चित्कार्यं कर्तुम्। अतः स्वभवनात् सुरङ्गां खनन्नहमिदं स्वर्गतुल्यं स्थानं समागतः।

भवद्दर्शनसौभाग्यञ्च लेभे। इत्यस्माकं परिचयोऽत्राऽऽगमनस्य च हेतुः। अथ भवतीभिरपि स्वपरिचयो देयः। अथ च गर्भगृहेऽस्मिन्निवासस्य को हेतुः ?"

सा वृद्धा धरातलपर्यन्तं प्रणता करावायोज्य बद्धाञ्जलिर्मामवोचत् -

"वीर ! महाराजचण्डसिंहस्य जामातरं नगराधिपतिं कामपालं को न जानाति ? राज्ञः सम्बन्धेन पूजनीयोऽसौ सर्वेषाम्। तस्य सुतो भवानस्मद्वात्सल्यपात्रम्। प्रजावत्सलो नगराधिपतिः कामपालः सर्वेषु न्यायानुसारं व्यवहरति। भवानपि तत्सदृशो दयालुः न्यायी वदान्यः पराक्रमी च प्रतिभाति। भवतः न किमपि भेतव्यमस्माभिः। काः वयं किमर्थं चाऽत्र गर्भगृहे निवसाम, इति श्रूयताम् -

राज्ञश्चण्डसिंहस्य द्वे भार्ये अवर्तेताम्। लीलावती कलावती च। लीलावती द्वे अपत्ये प्रासूत - चण्डघोषं कान्तिमतीं च। कलावत्या एकः सुतो बभूव - सिंहघोषः। युवराजपदाधिष्ठितश्चण्डघोषो मदयन्तिकानाम्नीं परमलावण्यवतीं राजकन्यामुवाह। द्वयोः संयोगेन कन्यारत्नमेकं धरायामवततार। सा मणिकर्णिकेत्यमिधानेन विभूषिता बभूव। परं कन्याजन्मसमये प्रसववेदनया मदयन्तिका स्वर्गवासिनी बभूव। पितामहश्चण्डसिंहः पौत्र्यै भृशं स्निह्यन् मणिकर्णिकेति नाम्ना तां विभूष्य पालनपोषणभारमङ्गीकृत्य लीलावत्युत्सङ्गे तां निदधौ।

कन्यायाः शुभसामुद्रिकलक्षणान्यवलोक्य ज्योतिर्विद्भिरुद्घोषितम् -

मणिकर्णिकायाः परिणेता वीरेष्वग्रगण्यो महतः साम्राज्यस्य सञ्चालको भविष्यति। तस्मिन् समये रतिविलासेष्वाकण्ठनिमग्नश्चण्डघोषोऽकथनीयां दशां प्रपन्नः। सुतां नितरामुपेक्षमाणोऽसौ सततं नवयौवनवतीषु रमणीयासु रमणीषु भृशमासक्तचित्तस्ताभिः

परिवृतो यौवनसुखान्यनुबभूव।

महाराजेन चण्डसिंहेन पौत्र्याः मणिकर्णिकायाः विवाहो मालवजनपदाधिपस्य मानसारस्य सुतेन दर्पसारेण निर्धारितः। परं तदैव कामपालो रहसि कान्तिमतीं गान्धर्वविवाहविधिना परिणिनाय। कदाऽपि कोऽपि मणिकर्णिकामपि न वञ्चयेत् कान्तिमतीसमावस्थाञ्च न प्रापयेदिति भयात् तेन मणिकर्णिकायाः सुरक्षाव्यवस्था निर्धारिता। तेन निश्चितम् - एषा राजकन्या लोकदृष्टिभ्यः सुदूरं रक्षणीया। न च कश्चिज्जनो द्रक्ष्यत्येनां नाऽपि च तादृशी घटना घटिष्यति। इति विचार्याऽसौ नरपतिः निजशयनकक्षभित्तिसंलग्नभूमिगर्भे विशालं सुविस्तृतं गर्भभवनं निर्मातुं समादिदेश। अत्र विविधकक्षाणां प्रकोष्ठानामुपवनस्य जलाशयस्याऽन्यासामपि सुविधानां रचना तेन कारिता। अथेदं गर्भगृहं सर्वविधलौकिकसुखसाधनसम्पन्नं कृत्वा शतवर्षभोग्याभिरुप-भोगसामग्रीभिस्तेन सम्पूरितम्। गर्भभवनमार्गश्च राज्ञः शयनकक्षे वर्तते।

गर्भभवनरचनानन्तरं महाराजश्चण्डसिंहो मामाहूय गर्भगृहसंरक्षाभारं मयि समारोप्याऽन्याश्चाऽपि सेविकाः न्ययूयुजत्। मणिकर्णिकायाः मनोविनोदाय समवयस्काः काश्चन बालकन्यकाश्चाऽपि तेन नियुक्ताः। विविधविद्याः कलाश्च शिक्षयितुं नृत्यगीतवाद्यचित्रकलाविशारदाः विविधशास्त्रपारङ्गताः शिक्षिकाश्चाऽप्यत्र नियुक्ताः। सर्वां सर्वाङ्गपूर्णां व्यवस्थां विधायाऽसौ राजा सर्वासामस्माकं स्थितिरत्र गर्भभवने चकार। अकथयच्च -

ममाऽऽदेशपर्यन्तं भवतीभिरत्रैव स्थेयम्, बहिर्न गन्तव्यमिति।

"वत्स ! नास्त्यत्र काचिदपि न्यूनताऽपर्याप्तता वा। यदा गर्भभवनमिदं वयं प्रविष्टा, मणिकर्णिका राजकन्या चतुर्दशवर्षदेशीयाऽऽसीत्। चत्वारः संवत्सराः व्यतीताः। इयम-धुनाऽष्टावर्षदेशीया नवयौवनेन लावण्येन च सुशोभते। परमधुनाऽपि न राजाऽस्याः स्मरति।"

वृद्धायाः वचनानि श्रुत्वा भृशं चिन्तितेन मया प्रोक्तम् -

"महाराजश्चण्डसिंहो नेदानीं विद्यते धरातले। तस्य स्वर्गगमनान्तरं चण्डघोषो राजसिंहासनमध्यतिष्ठत्। परं मर्यादाश्चोल्लङ्घ्य रतिविलासेषु निमग्नोऽसौ क्षयरोगाभिभूतः स्वल्पेष्वेव दिवसेषु पितरमनुजगाम। सम्प्रति तस्य वैमातृको भ्राता सिंहघोषो राजसिंहासनमधितिष्ठति। दुराचरणोऽसौ नरपतिस्तथाविधैश्चाटुकारैः परिवृतः प्रजासु सततमत्याचरति। तस्योपद्रवैरत्याचारैश्च प्रपीडिताः प्रजाजनाः सततं क्लिश्यन्ति रुदन्ति क्रन्दन्ते च। अथाऽहं सुरङ्गामुत्खनन् राज्ञः शयनकक्षं प्रविश्य तमत्याचारिणं सिंहघोषं रज्जुपाशैर्बद्ध्वा बन्दीकरिष्यामि। अथ राज्यशासनमधिकृत्य सर्वामिमां प्रमदासंहतिं विस्तृतनीलगगनतलं धरातलं नेष्यामि।"

ममैतानि समाश्वासनपूर्णानि हर्षदायीनि वचांसि निशम्य स्मितविभूषितौष्ठी सा वृद्धा पुनर्मामवोचत् –

"वत्स ! सम्प्रति नाऽतिकष्टकरः प्रयासोऽवशिष्टः। अस्य प्रकोष्ठस्य छदिषि या भवता चतुष्कोणा वर्गाकाररेखाऽवलोक्यते, सैव गर्भगृहद्वारस्यावरोधिनी शिला वर्तते। स्वल्पप्रयासेनोपरिष्टात् कराभ्यां कृता सा शिलैकतोऽपसृत्य द्वारमुद्घाटयिष्यति। तदनन्तरञ्च राज्ञः शयनगृहम्।"

पूर्णभद्रसाहाय्येनाऽनायासेन तां शिलामपसार्य चरणनिक्षेपध्वनिं परिहरन्तौ सोपानपङ्क्तिमारुह्याऽऽवां निशीथसमये राज्ञः शयनकक्षं प्राविशाव।

विविधपरिकल्पनैः सुसज्जितमिदं शयनगृहं राजकीयवैभवसुसम्पन्नमवर्तत। सम्भवतः सिंहघोषस्याऽपि रहस्यमेतदविदितमासीद् यत्तस्य शयनगृहस्याऽधस्तात् सुरङ्गायां गर्भगृहे तस्य भ्रातृजा सुगुप्तरूपेण सेविकाभिः सेविता निवसति। तस्य राज्ञः प्रकरणे-नेदमपरिचितं सुसंरक्षितं शयनगृहमजानन्नेकलोऽसौ सिंहघोषः विगतचिन्ताशङ्कोऽत्र प्रगाढनिद्रावशंवदः स्वपिति।

तं सिंहघोषं मातुलं तथा निश्चिन्तभावेन स्वपन्तमवलोक्य कोपवह्निना मम हृदयं प्राज्ज्वलत्। अयमेव दुराचरणो नृशंसः स्वार्थपरायणः कुत्सितप्रकृतिः कृतघ्नो नरपतिर्यो मे जनकाय हितकारिणेऽपि सुकठोरं मनसाऽपि न चिन्तनीयं वधदण्डमादिदेश। अथ च स्वसरि स्वल्पमात्रमपि स्नेहभावं नाऽरक्षत्। प्रसन्नचित्तोऽयं जीविताया एव तस्याः भर्तृचिताप्रवेशमन्वमन्यत।

तमवलोक्य कोपभराक्रान्तहृदयोऽहं सुप्तस्य तस्य मुखं सुदृढवस्त्रखण्डेन बबन्ध। चमत्कृत्य सुप्तोत्थितोऽसौ हस्तपादं न्यपातयत् प्रास्फुरच्च। मुखबन्धनहेतोः 'गो' 'गो' इति शब्दोच्चारणमेव तस्य कण्ठात् विनिःसृतम्। तस्य वशीकरणे सक्षमे मय्येकले सत्यपि पूर्णभद्रो मे सहायः सर्वासु परिस्थितिषु सुसन्नद्धोऽवर्तत। एकलोऽसौ वीरो दश वीरान् पराजेतुं समर्थोऽभूत्।

सिंहघोषं रज्जुपाशैर्बद्ध्वाऽहमवोचम् –

"मातुल ! अहं तव भगिन्याः कान्तिमत्याः भगिनीभर्तुः कामपालस्य च सुतोऽर्थपालो भागिनेयोऽस्मि। सम्प्रति तव कालः समायातः। यथा कृष्णो देवकीसुतो मातुलं कंसं मथुराधिपतिं जघान, तथैवाऽहं मातुलं त्वां काशीजनपदाधिपतिं यमलोकं प्रेष्य सर्वान् लोकान् तवाऽत्याचारेभ्यो विमुक्तान् करिष्यामि।"

स तु निष्करुणो निर्दयो नृशंसो राजा सिंहघोषः पौनःपुन्येन हस्तपादं संयोजयन् दीनकृपणवचोभिः क्षमां ययाचे। परं मनागपि न द्रवीभूतोऽहं तस्मिन् दयां वा कृपां वा सुदूरमपसार्य दृढमुञ्जरज्जुभिः सर्वाङ्गेषु बद्धं सततं मुष्टिकाभिः पादाघातैश्च

ताडयंस्तेनैव द्वारेण गर्भगृहमनयम्, यत्र ता: गर्भभवनस्थिता: मणिकर्णिकासहिता: प्रमदा: मां प्रतीक्षमाणा अवर्तन्त। पूर्णभद्र: सिंहघोषं स्कन्धे धृतवान्।

धरागर्भे गर्भभवने सर्व: प्रमदाजनो मां प्रत्यैक्षत। परं मम नयने मणिकर्णिका-कान्वेषणपरे अवर्तेताम्। एकेनैव दृष्टिपातेन सा मम हृदयं मन: प्राणान् शरीराङ्गानीति सर्वस्वमपजहार। लज्जावनतसर्वावयवा सा वृद्धाया: धात्र्या: पृष्ठान्तरालान्मां साचिवीक्षणैरालोकयत्। सहसैवाऽऽवयो: नयनसम्मिलनं सञ्जातम्। केनचिद्दिव्यप्रकाशेनेव परिवृतोऽहं स्वात्मनि नन्दनोपवने विहरन् पीयूषबिन्दूनिवाऽऽस्वादयम्। स्वल्पसमयं सर्वस्याऽपि विस्मृत्य तामेवाऽनिमिषलोचनोऽपश्यम्। तत: कथमप्यात्मानं संयम्य मनो निगृह्य सिंहघोषं स्कन्धेन वहता पूर्णभद्रेण प्रमदाजनेन च सह स्वपितृगृहं न्यवर्ते।

गृहमागम्याऽहं सिंहघोषं रज्जुबन्धनविमुक्तं कृत्वा हस्तपादं तस्य लोहनिगडैर्बबन्ध। तदनन्तरं तं कक्षस्यैककोणे संस्थाप्य पितरावाहूयाऽदर्शयम्। स तु कातरो दीन: काशीजनपदाधिपति: सिंहघोष: स्वापराधेभ्य: क्षमायाचनां कुर्वन् करुणं चक्रन्द। परं नाऽस्माभिरसौ विमुक्त: कृत:। सर्वे प्रजाजनास्तस्य निष्ठुरपापाडम्बरेभ्य: संत्रस्ता अवर्तन्त। विमुक्ते तस्मिन् ध्रुवं विद्रोहं कृत्वा पाषाणेष्टिकाशकलप्रहारैरेव तं हन्यु:।

तदनन्तरं नाऽवशिष्टे कस्मिंश्चिद् राजवंशीये उत्तराधिकारिणि राजप्रशासनं राजसिंहासनसहितमस्मदधिकाराधीनं बभूव। प्रजाजनानामनुमत्या मया जनक: कामपालो राजसिंहासनारूढ: ससमारोहं राज्याभिषेकं विधाय विहित:। अहमपि युवराजपदमलञ्चकार। सिंहघोषोऽपि सावमानं कारागारबन्धनरूपेणाऽतिकठोरदण्डेन दण्डित:।

चण्डघोषसुता मणिकर्णिका परमनवयौवनरूपलावण्यसमन्विता जगतीतलैकप्रमदारत्नं पूर्वस्यां दिशि नवोदितपरिपूर्णमण्डलबालभास्करसमोज्ज्वलाभारुणगौरवर्णं वदनमण्डलं धारयन्ती मम मनो हृदयमन्त:करणञ्च स्ववशमनैषीत्। त्रिभुवनमहिलासंहतिरपि न दास्याधिकारिणी बभूव तस्य सौन्दर्यस्य। जननी मे परमवात्सल्यभावेन तामङ्के समारोप्य चुम्बनालिङ्गनसहस्रै: कृतार्थयन्ती अश्रुक्लिन्ननयना सगद्गदमवादीत् -

"गर्भस्थिताया एवाऽस्या: विवाहो मया निजसुतेन निर्धारित:। परं मम जनकश्चण्डसिंहस्त्वेनां मालवजनपदाधिपसुताय दर्पसाराय दातुमुत्सुकोऽवर्तत। जन्मसमयेऽस्या: जननी प्रसववेदनया स्वर्गङ्गता। कतिपयवर्षं मम जननी, अस्या: पितामही एनामपालयदपोषयच्च। परमायुषश्चतुर्दशे वर्षे न जाने कुत्रेयं नयनागोचरतामगमत्। चिरमन्वेषणेनाऽपि नैवाऽस्या: स्थितिरस्मामिर्विदिता। साम्प्रतं मया ज्ञातं, पितामहेनैवेयं धरागर्भे गर्भभवने सुगुप्तरूपेण संरक्षिता।

सम्प्रतीयं मणिकर्णिका मम भ्रातृजा षोडशवर्षदेशीया रूपगुणसम्पन्ना विवाहयोग्या वर्तते। विवाहयोग्यो मम सुतोऽनुरूपोऽस्याः वरः। योग्यस्य योग्येन सह सम्बन्धो भवतु। मम सङ्कल्पोऽपि नूनं सफलो भवतु।"

इति वचनान्युच्चार्य मात्रा मे मनसः प्रिया मणिकर्णिका शास्त्रोक्तपाणिग्रहणसंस्कार-विधिना मह्यं प्रदत्ता।

एवं वयं सर्वविपद्विनिर्मुक्ताः महादानन्दमनुभवन्तः सुखेन न्यवसाम। मदीया माता तारावली यक्षिणी पुनः सुप्रसन्ना भर्तृविरहविह्वला प्रेमपरिपूर्णहृदया पितुरन्तिकमाजगाम। अहं स्वयमेव मणिभद्रपुरमगच्छम्। तत्राऽगणितमृदुवचनैश्चाटुशतैस्तामहं प्रसाद्य सुपरितुष्टां विधाय काशीमानीतवान्।

एकस्मिन् दिवसे कुमारस्य स्मृतिसन्दर्भेण विकलचित्तोऽहं कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यामुज्जयिन्यां शिप्रातटवर्तिनि महाकालमन्दिरे मिलनसङ्केतस्य संस्मरन् प्रयाणाय समुत्सुकोऽभूवम्। परं तदानीमेवाऽङ्गजनपदसन्देशहराः समागम्य मामसूचयन्-

"अवन्तिजनपदस्य शासनाधिकृच्चण्डवर्मा चम्पाधिपं महाराजं सिंहवर्माणमाक्रमितुं सेनया सह चम्पायै प्रस्थितः। अङ्गराजः सहायतायै भवन्तमामन्त्रयति।

अयं चण्डवर्मा पूर्वमेवाऽस्माकं रिपुः। मित्राणां परित्राणाय शत्रूणाञ्च विनाशाय कृतनिश्चयोऽहं काशिराजसैन्येन सह चम्पामागच्छम्। अत्राऽऽगत्य मया कुमार-दर्शनसौभाग्यसुखमनुभूतम्। अथ मे मातुलस्य सिंहघोषस्य दण्डविषये भवानेव प्रमाणम्। सम्प्रत्यसौ काश्यां कारागृहे वर्तते।"

एवं निजवृत्तं वर्णयित्वाऽर्थपालः कुमारस्य राजवाहनस्य चरणौ पुनः संस्पृश्य चरणधूलिं भाले चचर्च। कुमारोऽपि मित्रस्याऽर्थपालस्य बुद्धिवैभवं पराक्रमं साहसं प्रत्युत्पन्नमतित्वञ्च भृशं प्रशशंस। तेन कथितम् -

"अस्मिन् प्रमोदहर्षभरेऽवसरे बन्धनविमुक्तोऽसौ सिंहघोषो मे समक्षमुपस्थापनीयः। तदनन्तरं कुमारः प्रमतौ दृष्टिं निपात्य निजवृत्तान्तश्रावणायाऽनुरुरोध। राजवाहनस्य चरणयोः प्रणम्य प्रमतिः निजवृत्तमेवं वर्णयितुमारेभे।"

# दशमी पीठिका

## प्रमतिः

## दशमी-पीठिका

### प्रमतिः

कुमार ! भवन्तमलभमानेन मया मित्रैरन्यैः सह परस्परमुज्जयिन्यां मिलनसङ्केतसमयं निश्चित्य भवतोऽन्वेषणाय प्रस्थितम्।

विभिन्नासु दिक्षु प्रस्थितेषु मित्रेष्वहं विन्ध्यगिरिक्षेत्रेषु परिभ्रमन्नुत्तुङ्गामधित्यकामेकां प्राविशम्। तत्रैकस्य सुविशालशाकतरोरधस्तादागत्याऽहमतिष्ठम्। तस्मिन् सन्ध्यासमयेऽस्ताचलशिखरमारुरुक्षोर्दिनकरस्याऽरुणरश्मिनिचयैः प्रतीचीदिक्क्षितिजं रुधिरसंलिप्तमिव प्रतीयाय। सकलदिवसं पादाभ्यां सञ्चरणेन भृशं परिश्रान्तोऽहमग्रे गन्तुमसमर्थ आसम्। शाकतरुसन्निकटमेव तत्राऽधित्यकायां शीतलसलिलसम्भृतं जलाशयमवलोक्य विश्रमेच्छयाऽहं हस्तपादं प्रक्षाल्य जलमाचम्य सन्ध्योपासनायै चित्तमेकाग्रमकरवम्।

सन्ध्योपासनानन्तरमहं सर्वतः प्रसृतं निशान्धकारमतिगहनमन्वभूवम्। तस्मिन् कज्जलनिभे प्रगाढान्धतमसि नयनव्यापारस्तु विफलताङ्गतः। हिंस्रजन्तुभिर्गहने तस्मिन्नरण्यप्रदेशे मासंभोजिनां पशूनामङ्गारप्रतिमानि नेत्राणि भयदायीन्यवर्तन्त। क्षणे क्षणे तेषां भयावहगर्जनैः कान्तारैः सह कातरजनहृदयान्यपि कम्पितानि। यात्रापरिश्रान्तस्तस्मिन् भयावहे घोरे नरमांसगृध्नुभिर्जन्तुभिर्व्याकुले वनप्रदेशेऽपि निद्रयाऽहमभिभूतः। कमप्यन्यमुपायमनवलोकयता मया शाकपादपस्याऽधस्तादेव समतलभूमौ मृदुकिसलयानां शय्या विरचिता। तदनन्तरमुपरि करावायोज्याऽञ्जलिं बद्ध्वाऽहं न्यवेदयम्-

"अत्रत्याः वनदेवताः वृक्षदेवताश्च ! अस्मिन्नरण्ये घोरे यूयमेव मे रक्षितारः। स्वप्नावस्थां गते मयि भवन्तो मां रक्षन्तु।"

इति कथयित्वा दक्षिणभुजमुपधानं कृत्वा तत्र पर्णशय्यायां मया शयनं कृतम्। सुप्तावस्थायां गतवति मयि केनचिदनिर्वचनीयेन स्पर्शानुभवेन अङ्गान्यङ्गानि मे परमानन्देन सम्पूरितानि। इन्द्रियेष्वाह्लादः समुद्भूतः। अन्तःकरणं हर्षेण प्रपूरितम्। त्वचि रोमोद्गमः सञ्जातः। दक्षिणभुजः पस्पन्द। किमिदं सर्वं भवतीति विचारैर्मे निद्रा व्यपगता। मयाऽनुभूतम् -

"मृदुतूलिकाशयने शुभ्रास्तरणे शयानोऽहमुपरि शुभ्रकौशेयरचितेन शशिरश्मिनिकरैरिव निर्मितिनोल्लोचेनाऽऽच्छादितो वर्ते। पार्श्वपरिवर्तनं कृत्वा दक्षिणतो दृष्टिनिपातेन मयाऽऽलोकितम् -

"विशालपरिणाहायां शय्यायां रमणीयचित्रविचित्ररङ्गरञ्जितायां प्रमदानां नवयौवनवतीनां वर्गः प्रगाढनिद्राधीनः स्वपिति। वामतः पृष्ठपरिवर्तने सति महाश्चर्यकरेण वृत्तेन मे हृदयं स्पन्दितम्। मदधिष्ठितशयने काचिदनिन्द्यसुन्दरी रूपलावण्यवती रमणी एकपार्श्वे स्वपिति ; अनङ्गरङ्गप्रतिमानि तस्या अङ्गानि विलक्षणदिव्यसौन्दर्येण दीप्यन्ते स्म। निश्चिन्तभावेन स्वपन्त्यास्तस्याः कन्दर्परसस-म्भृतकलशाविव कुचौ श्वासग्रहणेन सार्द्धं समुदयन्तौ निःश्वासेन सह निम्नतामुपगच्छतः। नन्दनवनसौन्दर्यलक्ष्मीरेव साक्षाच्छरीरधारिणी तत्राऽऽगत्य शयनमधिरुह्य स्वपितीति मयाऽनुभूतम्।"

सर्वमेतदवलोक्याऽनुभूय च महाश्चर्येण स्तब्धभूत इवाऽहं व्यचिन्तयम् -

"कुत्र तस्मिन् गहनारण्ये मे शयनसाक्षी शाकतरुः कुत्र चेयं शशिरश्मिकोमला मृदुतूलिका शय्या ? केयं रूपवती कामिनी त्रिभुवनसौन्दर्यललामभूता ? काश्चेमाः स्वर्गाप्सरःसमसौन्दर्यशालिन्यो निश्चिन्तभावेन स्वपन्त्यो रमण्यः। विचित्रमिवैतद-चिन्तनीयं मे प्रतिभाति।"

विचारैरेभिरान्दोलितमुन्मथितञ्च मे मानसम्।

तथा परमसौन्दर्यशालिन्या मनोहारिण्या मम पार्श्वे एकशय्यायां स्वपन्त्या तरुण्याऽनुरागेणाऽऽसक्तिभावेन च मे मनो हृतम्।अहं तस्मिन्नेव वामपार्श्वे परिपूर्णं शरीरपरिवर्तनमकरवम्। तां तरुणीमालिङ्गनबद्धां कर्तुमुत्पन्नामदमनीयां प्रबलमाकांङ्क्षां कथमिव कथमपि निरुध्याऽहं तां निर्निमिषमपश्यम्। कदाचिदियं मम स्पर्शेन व्यपगतनिद्रा भूत्वोत्थायोत्क्रोशितुमारभेतेति भयादहं न तस्याः स्पर्शने क्षमोऽभूवम्।

सहसा तया कामिन्या पार्श्वपरिवर्तनं कृतम्। अस्मिन् कर्मणि तस्याः दक्षिणभुजो मे वक्षस उपर्यपतत्। अजानत्येव सा मे सन्निकटं समायाता। अहमपि स्वकीयं दक्षिणभुजं प्रसार्य तां कटिप्रदेशेन गृहीत्वा समीपतरमाकृष्य स्वकीयावतितृषितौ शुष्काविव रदनच्छदौ तस्याः पारिजातनवकिसलयोपमयोररुणमृदुलौष्ठयोर्न्यदधाम्। तदनन्तरं सुप्तोऽहमिति व्याजेन नयने न्यमीलयम्। मया विचारितम् -

"यद् भविष्यति तद् भविष्यति ! सम्प्रति हृदयमनोहारिणीं कामिनीमिमां विना जीवनधारणमसम्भवमेव।"

सम्भवतस्तस्मिन् क्षणे साऽपि किशोरी वा कामिनी वा व्यपगतनिद्रा सञ्जाता। कामावेशेन तस्याः वपुः सुदृढतरुस्कन्धसमाश्लिष्टा मृदुवल्लरी मृदुपवनाघातेनेवाऽऽचकम्पे। सकलान्यङ्गानि स्वेदार्द्राणि सञ्जातानि। वक्षसि निहितेन भुजेन मां दृढमाश्लिष्य शिरो-

वक्षःस्थलञ्च किञ्चिदुन्नमय्य सा एकाग्रदृशा मामपश्यत्। अथ सहसाऽऽवयोर्वपुषी प्रबलवेपथुना विकम्पिते। परमानुरागेणाऽऽसक्तिभावेन च विवशीभूतयोः परस्परमतितृषितनयनैः पश्यतोरीषदालिङ्गनबद्धयोरावयोरधराभ्यां सस्पर्शसम्मिलनमधिगतम्।

परं तस्मिन्नेव क्षणे परमानुरागासक्तिपरवशस्याऽपि मे चक्षुणी केनाऽप्यदृश्यानिर्वचनीयप्रभावेण निमीलिते अभूताम्। गहननिद्रया चाऽहं वशीकृतः। परं किञ्चित्कालानन्तरमेव मे निद्रा पुनः व्यपगता। जाग्रदवस्थायां सम्प्रति मयाऽवलोकितम् -

"तदेवेदमरण्यं यत्र शाकपादपस्याऽधस्तान्मृदुकिसलयशय्यायां कठिनस्पर्शभूतले मया सुप्तम्। न च तत्र तच्चन्द्रकिरणकोमलं शयनं न च सा नवयौवनवती तरुणी।"

तस्मिन्नेव क्षणे प्राच्यां नवोषसा समुदितम्। ततश्चोदयतो बालभास्करस्य मण्डलस्य मरीचयो वनप्रान्तराण्यरुणवर्णमयान्यकुर्वन्। निर्मलसलिले प्रतिबिम्बमानास्ते वारुणीवर्णेन तद् रञ्जयामासुः। उत्थितुमिच्छुकस्याऽपि मेऽङ्गान्यतितरां श्रान्तानीव स्थगितानीव कार्येष्वशक्तान्यवर्तन्त।

मया चिन्तितम् -

"रजन्यां मया यद् दृष्टं वाऽनुभूतं वा किमिदं स्वप्नो वा चमत्कारो वाऽवर्तत ? किमियं काचिद् दैवी सम्पत्तिरासीदथवाऽऽसुरी माया ?"

एवंविधैर्विचारैः समाक्रान्तचित्तोऽहं स्वल्पसमयं तथैव चेष्टारहितः शिश्ये।

अकस्माद् वनप्रान्तरमध्यादागतैर्नूपुरध्वनिभिर्मे नयने समुन्मीलिते। ते ध्वनयः समीपं समीपतरं वाऽऽजग्मुः। मया दृष्टम् -

काचिदनिन्द्यसुन्दरी रूपवती जलाशयात् समागतां पदवीथिकामाश्रित्य शनैः शनैः मन्निकटमागत्याऽनिमिषिताभ्यां लोचनाभ्यां मामपश्यत्। सुतप्तकाञ्चनमयानीव तदङ्गानि बालभास्करारुणिमरश्मिसंस्पर्शमवाप्योज्ज्वलतराणि दैदीप्यमानानि बभूवुः।" मम शिरोधानं समागत्य तस्मिन्नेव किसलयशयने समुपविश्य सा मे शिरो मातेव निजोत्सङ्गे दधार। अनन्तापारसुखानन्दमनुभवन्नहं तथैव चक्षुषी निमीलितवान्। परमस्नेहार्द्रकरस्पर्शैः मां भाले परामृशन्ती विनताभ्यामोष्ठाभ्यां कपोलौ परिचुम्ब्य सा प्रोवाच -

"वत्स ! कामपालसुतस्याऽर्थपालस्य परमसुहृत् त्वं प्रमतिरसि। अतस्त्वं ममाऽपि पुत्रः। त्वयाऽर्थपालजन्मवृत्तान्तो वसुमत्या महादेव्या श्रुत एव। मणिभद्राभिधानस्य यक्षनायकस्य सुता तारावली यक्षिणी कदाचित् कामपालसुतमर्थपालं महादेव्यै पालन-

पोषणनिमित्तेन समर्पितवती। बालकोऽसौ कामपालस्य भार्यया काशीराजसुतया कान्तिमत्या प्रसूतः। अहमपि तारावली कामपालस्य प्रथमा भार्या। अनेन सम्बन्धेन अर्थपालो ममाऽपि सुतः। अतोऽर्थपालस्य परममित्रं त्वमपि मम सुतः।

एकस्मिन् समये धर्मपालसूनोः कामपालादकारणमेव कुपिताऽहं पितुरन्तिकं जगाम। तस्मिन् समये मे जनको यक्षपतिसेनायामलकापुर्यामुपस्थित आसीत्। मार्गे विन्ध्याटव्यां मार्गश्रमक्लान्तिजन्यकष्टापन्नशरीरा जलाशयस्यैकस्य तीरवर्तिन्यां भूमावहं सुष्वाप। अहं स्वप्नमालुलोके -

"कश्चिद् ब्रह्मराक्षसो महाभयानको महाकायो मे समक्षमागम्य कथयति -

निष्कारणमेव त्वं भर्तरि कुपिता। अनेनाऽपराधेन त्वं नियतं दण्डनीया। अतो मासावधिकमहं तव शरीरे निवत्स्यामि। तावत्कालं प्रियेण वियुक्ता त्वमर्धविक्षिप्तमनोदशामवाप्येतस्ततश्च भ्रमिष्यसि।"

सहसा मम निद्रा व्यपगमत्। निजशरीरस्याऽवस्थामवलोक्याऽहं वस्तुतो विक्षिप्ताऽर्धोन्मत्तताङ्गता। कृष्णवर्णं वपुः, विप्रकीर्णाः कठोराः कुन्तलाः, समुन्नताः दन्ताः, सर्वाङ्गानि च वक्राण्यासन्। एनां दुर्दशां कुरूपावस्थामापन्ना कथमहं स्ववदनं दर्शयिष्यामि, इति समीपवर्तिनि विन्ध्यवासिंन्याः देव्याः मन्दिरे निवसन्ती देवीमुपासमाना दिवसानगमयम्।

अयमेकमासस्याऽवधिर्मा सहस्रसंवत्सरावधिरिव समपीडयत्। परं विधातुः परमानुग्रहेण व्यतीते मासावधौ मया स्वस्वरूपं पुनः प्राप्तम्। तदा मया मनसि निर्णयः कृतः -

"पूर्वमहं पितुरन्तिकं गत्वा पित्रोराशीर्वादान् समधिगम्य तदनन्तरं यक्षाधिपस्य कुबेरस्य चरणयोः प्रणम्य ततः पत्युरन्तिकं वाराणसीं गमिष्यामि।"

तथा विचार्य मन्दिरादहं जलाशयनिकटं समागत्य त्वाञ्चाऽत्र सुषुप्सुमपश्यम्। वनदेवताभ्यः प्रार्थनां याच्ञां च विधाय त्वमस्वाप्सीः। वपुषा सुरूपं सुगठितञ्च तरुणमर्थपालमित्रं कदाचिन्नरमांसगृध्नवो हिंस्रजन्तवो रजन्यां मा भक्षयेयुरिति परित्राणार्थं सहैव नेतुं निश्चिकाय। मन्त्रबलसामर्थ्येन त्वामुत्सङ्गे निधाय व्योमपथेनाऽहं कौबेरीमलकापुरीमभिलक्ष्योत्तरदिशि प्रतस्थे।

मार्गे गच्छन्त्या मया श्रावस्ती नगरी समवलोकिता। तस्मिन् भगवतः शिवस्य रथयात्रोत्सवः समवर्तत। शिवभक्तानां विशालः सम्मर्द आराध्यदेवस्योपासनायै तत्रैकत्रित आसीत्। भगवन्तं शिवमभ्यर्च्याऽग्रे गन्तव्यमित्यभिलाषेण समाक्रान्तं मे हृदयम्। परमस्य तरुणस्य सुतस्योत्सङ्गसमारूढस्य किं कुर्यामिति विचाराक्रान्ता

व्योम्नि स्थिता दृष्टिं व्यापारितवती।

अस्मिन् ग्रीष्मर्तौ श्रावस्तीनगराधिपस्य हर्षवर्धनस्य सुता नवमालिका सप्तभूमिकप्रासादस्य कुमार्यन्तःपुरस्य छदिषि शुभ्रनिर्मलोल्लोचाधस्तान्मृदुतूलशयने सुविशाले स्वपिति स्म। तन्निकटमेव तस्याः सख्यः सेविकाश्चाऽस्वपन्। नवमालिकाशय्यायां पर्याप्तं स्थानमासीत्। ताञ्च शयनस्यैकपार्श्वे शयानामवलोक्य प्रगाढनिद्रासवशंगतं त्वाहमहं राजकन्यायाः पार्श्वे शायितवती।

श्रावस्त्यां भगवतो नीलकण्ठस्य रथयात्रोत्सवस्य दर्शनं कृत्वा देवतायै च प्रणामाञ्जलीन् समर्प्य पुनः निवर्त्य त्वामहं नेष्यामीति विचार्याऽहं तत्र गता। निवर्त्य मया दृष्टम् -

त्वञ्च राजसुता च नवमालिका परस्परस्नेहानुरागभावैः परिपूर्णावास्ताम्। 'प्रमतिरयं राजसुतां कामयत' इति विज्ञाय मनो मे परमानन्देन सम्पूरितम्। परन्तु नाऽयमवसरः सम्मिलनस्य द्वयोरपि प्रणयिनोरवर्तत। 'प्रमतिः स्वगुणैः पराक्रमेण च स्वयमेव श्रावस्तीमागत्य राजकन्यामधिकरिष्यति' इति विचारभराक्रान्ताऽहं मन्त्रसामर्थ्येन त्वां पुनः निद्राधीनं कृत्वाऽत्राऽनैषम्।

सूर्योदयसमयः समुपस्थितः। सूर्यालोके तव आकाशमार्गेण नयनं न समुचितम्। अहमेकाकिनी पितुरन्तिकं मणिभद्रपुरं गन्ताऽस्मि। त्वं श्रावस्तीं गत्वा राजनन्दिनीं नवमालिकां परिणेतुं स्वयं प्रयतस्व। ध्रुवं सा ते भार्या भविष्यति।"

इति कथयित्वा मृदुमधुरवचोभिर्मां समाश्वास्य मातृसमा मामालिङ्गनपाशे साऽबध्नात्। वात्सल्यभावेन सा पयोधराभ्यां स्रवन्तीभिः पयोधाराभिर्मामार्द्रयित्वा शिरसि समाघ्राय चुम्बनशतैरुपकृतवती। तदनन्तरं स्नेहविह्वला सा यक्षिणी मां पुनराश्वास्य व्योमपथेनोत्तरवर्तिदिशि समुत्पपात।

कुमार ! तस्यां रजन्यां सप्तभूमिकराजप्रासादान्तःपुरछदिषि मृदुतूलशयनेऽवलोकिता श्रावस्तिराजसुता नवमालिका मम मनो हृदयमन्तःकरणं सर्वमपहृतवती। निशायामनुभूता सा घटना याथार्थ्यसम्पन्नाऽभूत्, न तु सा स्वप्नमात्रमवर्तत। राजसुतां परिणेतुं विह्वलीभूतमानसोऽहं झटिति त्वरितगतिः श्रावस्तीमभिलक्ष्य प्रतस्थे। स्वल्पेन कालेन श्रावस्त्याः बाह्यपरिसरप्रदेशान् प्राविशम्।

सघनवसतियुतेषु श्रावस्तिबाह्यपरिसरप्रदेशेषु पुष्करणो नाम ग्रामो वर्तति। तत्र मुख्यमार्गस्य सन्निकटमेव महान् जनसम्मर्द एकत्रितः कोलाहलायमानो बभूव। कुतूहलाक्रान्तहृदयोऽहमपि जनसम्मर्दं प्रविश्य तत्रत्यं दृश्यमवलोकितवान्। परितः

परिवृतिं विधाय बहवो जनाः कुक्कुटयोर्द्वन्द्वयुद्धं पश्यन्ति स्म। द्वौ सुपुष्टकायौ कुक्कुटौ परस्परं युयुधाते। तयोः प्रत्येकं दक्षिणचरणे तीक्ष्णधारेण लघुक्षुरसदृशेनाऽसिपत्रेण सुसन्नद्धोऽवर्तत। परितः परिवृतिषु स्थिताः जनाः कदाचिदेकस्य कदाचिच्चाऽपरस्य कुक्कुटस्य युद्धोन्मादं जयघोषणैः सतालीवादनध्वनिं वर्धयन्ति स्म। अहमपि तस्मिन् जनसम्मर्देऽग्रेसरीभूम ताम्रचूडद्वन्द्वयुद्धावलोकनेन मनोऽरञ्जयम्। परं तद्विषमं युद्धं निरीक्ष्य सहसा सस्मितं जहास। मां हसन्तमवलोक्यैकेन नागरिकेण वेषादिबाह्यचिन्हैर्ब्राह्मणविटकल्पेनाऽहं हास्यकारणं पृष्टः। मया उत्तरितम् -

"असमानगुणसम्पन्नयोः कुक्कुटयोर्द्वन्द्वयुद्धमवलोक्याऽहं हसामि।"

तेन पृष्टम् - कथमेतत् ?

मया उत्तरितम् -

"आर्य ! बृहदाकारः कुक्कुटोऽयं नारिकेलजातीयः पौरस्त्यः। परं द्वितीयोऽयं कुक्कुटः किञ्चित्स्वल्पवपुरपि बलाकाजातीयः पाश्चात्यः । अयं पाश्चात्यस्ताम्रचूडः स्वल्पाकारोऽपि स्फूर्तिगुणसम्पन्नो ध्रुवं बृहत्कायं नारिकेलजातीयं पौरस्त्यं ताम्रचूडं पराजेष्यते । एवंविधास्ववस्थास्वसमानगुणबलसम्पन्नौ कुक्कुटौ द्वन्द्वयुद्धाय प्रेर्येते इत्यवलोक्याऽहं हास्यरोधनं नाऽपारयम्। पौरस्त्यस्य ताम्रचूडस्य पराजयो यदि ध्रुवमेव, एतयोर्युद्धस्याऽवलोकनस्य को लाभः ?"

मम कथनमाकर्ण्य तस्य वृद्धब्राह्मणविटस्य रदनच्छदौ स्मितेन शुशुभाते। बलाकाजातीयोऽसौ पाश्चात्यः कुक्कुटस्तस्यैवाऽऽसीत्। हस्तं मे गृहीत्वा स्कन्धञ्च परामृश्य तेतोक्तम् -

स्वल्पायुरपि भवान् चतुरः प्रतिभाति। ततः स्वकीयपोट्टलिकातः कर्पूरसुगन्धितां ताम्बूलवीटिकामेकामादायाऽसौ मामभिननन्द। तदनन्तरमावां पुनः कुक्कुटद्वन्द्वयुद्धावलोकने दत्तावधानौ बभूविव। तौ कुक्कुटौ परस्परद्वन्द्वयुद्धे तस्मिन् विजयाय प्रायतेताम्। प्रहारे प्रतिप्रहारे च दर्शकास्तारस्वरेण जयघोषणैः सह तालीवादनमपि चक्रुः। स्वल्पेन काले सहसा पाश्चात्यो बलाकाजातीयस्ताम्रचूडः पौरस्त्यस्य ताम्रचूडस्य पृष्ठतः समागत्य तीव्रगत्या तथा पादेन प्रजहार यथा तस्य पादबद्धमसिपत्रं पौरस्त्यकुक्कुटस्य नारिकेलजातीयस्य वपुषः पारं प्रविश्य तं व्यदारयत्। स च पौरस्त्यस्ताम्रचूडः स्खलितचरणोऽधः पतितः। वृद्धब्राह्मणविटस्य पाश्चात्यकुक्कुटो विजयपदप्रतिष्ठामलभत।

देवशर्माभिधानोऽसौ वृद्धब्राह्मणविटो निजताम्रचूडविजयेनाऽतितरां प्रमुदितो मम

हस्तं गृहीत्वा हर्षेणाऽवकर्षयन् मां स्वगृहमनैषीत्। मयि हार्दिकस्नेहराशिमभिव्यञ्जयन्नसौ स्नानभोजनादिभिर्मां सत्कृतवान्। स्वल्पसमयं तस्य गृहे विश्रम्याऽहमग्रे गन्तुमनुमतिं ययाचे। योग्यसेवा मह्यं निवेदनीया, स्मरतु भवान् पुनरागमनस्य, अनुगृह्णातु मां सर्वदा, इति कथयित्वाऽसौ मां विसृष्टवान्।

देवशर्मणो गृहान्निःसृत्य स्वल्पेन समयेनाऽहं श्रावस्तीं प्रविष्टः। मध्याह्नसमयानन्तरं पश्चिमाभिमुखो दिनकरो व्योमशिखरादधोऽवतरन् दृष्टिपथं गतः। राजमार्गमभितः संस्थितानां विपणीनामुभयोः पार्श्वयोर्विविधवस्तुसम्भृतानापणांस्तदुपरि च निर्मितानि निवासभवनान्यवलोकयन्नहमग्रे ससार। केषामपि भवनानां गवाक्षान्तरालेभ्यो बहिर्नयनानि व्यापारयन्तीनां सुगौराङ्गिनीनां मृगनयनीनां प्रमदानां मुखमृगाङ्काः दिवसालोकमपि लज्जास्पदतां विदधानाः मम नयनयोश्चमत्कृतिं समुदपादयन्। श्रावस्त्याः राजमार्गोऽयं राजप्रासादसमक्षं व्यरमत्।

चिरं पादसञ्चरणहेतुना परिश्रान्तोऽहं रात्रिनिवासमपि व्यचिन्तयम्। राजप्रासादसमक्षं सर्वजनप्रवेशानुमतं विशालं विविधवनस्पतिपत्रपुष्पफलसम्पत्तिसमन्वितमुद्यानमेकं मयाऽवलोकितम्। मनो विनोदनाय बहवो नागरिकास्तत्र समवेताः। तत्र केचन तपर्तुसुलभकुसुमविकाससौन्दर्यदर्शनाय समासक्तचित्ताः, अपरे कमलपुष्करिणीतटस्थिताः हंसादिजलपक्षिदर्शनप्रसन्नान्तःकरणाः, अन्ये च पुष्पवीथिकासु भ्रमन्तः सहचरैः सार्द्धं मिथः कथासंलापपरायणाः, परे च स्थाने स्थाने विरचितासु वेदिकासु विश्रमन्तस्तत्र भ्रमन्तीनां रमणीनां मुखकमलदर्शनसमुत्सुकाः मयाऽवलोकिताः। केचन रसितजनाः प्रियाभिः सार्द्धं रसगर्भितक्रीडासु समासक्तचित्ताः लतामण्डपान्तरेषु प्रविष्टा अवर्तन्त। मार्गश्रमक्लान्तकायोऽहमप्येकस्यां मरकतमणिजटितवेदिकायामुपविश्य भाविकार्यक्रमम-चिन्तयम्।

सहसा राजहंसानां सारसानाञ्च समवेतसुमधुरकलनिनादो मे विचारसरणिं बभञ्ज। मुखमुन्नमय्य मया दृष्टम्-

एका तरुणी नवयौवनेन सुशोभमाना लावण्यगुणेनैव विधिना निर्मिता चरणनिहित-नूपुररवैः पर्यटनपराणां युवकानां हृदयान्यपहरन्ती इतस्ततो नयने व्यापारयन्ती चित्रपटहस्ता भ्रमति। वारम्वारं चित्रपटालिखितां पुरुषाकृतिमवलोक्य कस्याऽप्यन्वेषणे कृतप्रयासा सा प्रतीयाय।

मुखमुन्नमय्य ध्यानावहितचेतसा मया दृष्टं यत्तस्मिन् चित्रपटे ममैवाकृतिरालिखिता-ऽवर्तत। एतदवलोक्य विस्मयेन हर्षेण च मम नयनेऽश्रुजलविलन्ने अभूताम्। निकटं

समागत्य मामवलोक्य सा नवतारुण्यविकसिता प्रमदा सहसा निरुद्धगतिर्बभूव। चित्रलिखितसमाकृतिं मां विलोक्य विस्मयप्रमोदभरविकसितसरसिजानना सा निकटतरमाससाद।

विस्मृतनयनावरणनिमीलनव्यापारामेकाग्रदृष्ट्या मामेव निरीक्षमाणां तामहमवोचम्-

"भद्रे ! अतिरमणीयमिदं स्थानं मनोविनोदकरम्। अत्र सर्वे जनाः विश्रमायाऽनुमताः। चिरं भ्रमणेनाऽतिक्लान्तशरीराऽत्रभवती प्रतिभाति। यदि रोचते भवत्यै, मुहूर्तमात्रं विश्रम्य मामनुगृह्णातु।"

मम कथनमाकर्ण्य स्मितेनौष्ठौ विभूष्य सा मदन्तिकमुपविष्टाऽचकथत् -

"आर्य ! महाननुग्रहो मयि भवतो वर्तते।"

तदनन्तरं विविधदेशविषयसम्बद्धेषु वार्तालापेषु निमग्नावामां जातौ। तया स्वपरिचयं पृष्टोऽहमुदतरम् -

"भद्रे ! यायावरोऽहमनेकेषु प्रदेशेषु परिभ्रमन् श्रावस्तीमाससाद। अतिरमणीया हृदयाकर्षकरी चेयं नगरी मह्यमतितरां रोचते। अद्यैव समागतोऽहं कानिचिद्दिनानि निविवत्सुरस्मि।"

ममेमं प्रस्तावमाकर्ण्याऽतितरां प्रमुदिता सा प्रमदा मामगादीत् -

"आर्य ! दूरदेशात् समागतो भवान्। मार्गपरिश्रान्तश्च प्रतीयते। यदि भवान्नाऽनुचितं मन्यते, मम गृहं स्वनिवासेनाऽऽतिथ्यावसरप्रदानेन च पवित्रीकरोतु। यावत्कालपर्यन्तं निवासस्याऽभिलाषस्तावद् भवानस्मद्गेहे निवसतु। भवदातिथ्येन वयमस्मद्गृहसदस्याः भृशं प्रसत्स्यामः।"

प्रमदायाः प्रस्तावमाकर्ण्य हार्दिकीं कृतज्ञतामहं विज्ञापयामास। ममाऽभिलषितस्य निवासस्य प्रबन्धो विधिसामर्थ्येन स्वयमेव समजायत। प्रमदया सार्द्धमहं तस्य गृहमागच्छम्। स्वच्छं सुनिर्मितं स्वल्पाकारमपि तद्गृहं सुमृद्धं सुपरिष्कृतञ्चाऽऽसीत्। स्नानसन्ध्योपासनाभोजनादिकार्याणामनन्तरं सा मे शयनस्याऽपि प्रबन्धञ्चकार। ग्रीष्मर्तुरजन्यां छदिषि मुक्ताकाशतले मे शयनमास्तीर्णम्।

साऽपि तरुणी प्रमदा भोजनादिव्यापारेभ्यो निर्वृता छदिरारुह्य मे शय्यां निकषा समागत्य भूमावेवोपविष्टा। सम्प्रत्यावयोर्विविधविषयकाः वार्तालापाः बभूवुः। "राजसुतायाः नवमालिकायाः सेविका चित्रलेखाऽहं वर्ते," इत्यात्मानं सा परिचाययामास।

तामहमपृच्छम् -

"चित्रपटं हस्ते धृत्वा त्वया को मृग्यते ?"

चित्रलेखया चित्रपटो मे समक्षं प्रसारितः। तस्मिंस्तदवस्थं दृश्यमालिखितमवर्तत, यदाऽर्थपालस्य जननी तारावली मां राजकन्यायाः नवमालिकायाः पार्श्वे शयनेऽशाययत्। परं तस्मिन् दृश्ये केवलं ममाकृतिरेवाऽङ्किताऽवर्तत। आलेख्यस्य भावान् कलाञ्चाऽनुभूय मम हृदयं चित्रकरं बहुतरं प्राशंसत्। रहस्यवृत्तान्ते पृष्टे सति सा चित्रलेखा प्रावोचत्-

"एकस्यां रजन्यां शयनेऽवस्थिता राजसुताऽपश्यत् -

एकोऽतिरूपवान् लावण्यसम्पन्नः सुघटितसर्वावयवस्तेजसा दीप्तिमन्मुखमण्डलो युवा तस्य पार्श्वे स्वपिति।

मन्मथमवलोक्य रतिरिव मनोरमा मे स्वामिनी तं युवानमवलोक्य वर्णयितुमशक्यैर्भावैर्विह्वला बभूव। पञ्चशरशरहता सा सततं तमेव हृदयहारिणं जनं चिन्तयति। तद् दृश्यं स्वप्न आसीन्मतिभ्रमो वाऽभवत्, माया वाऽवर्तत याथार्थ्यं वाऽविद्यत इति विधिरेव जानाति। परं तदारभ्य स्वप्ने जागरणे भोजने पाने सखीजनेन सह विश्रम्भालापेषु सा राजकन्या तस्यैव स्मरति। सखीजनस्य महताऽनुरोधेनाऽस्मत्स्वामिनी तं तरुणं तस्यामेव स्थित्यामस्मिंश्चित्रपटेऽलिखत्। एनं चित्रपटं करे गृहीत्वाऽहं तं राजकन्याचित्तचौरं जनं सर्वत्राऽन्विष्यमाणा भ्रमामि। परमसौभाग्येनाऽद्य चित्रपटलिखिताकृतिसदृशो जनो मयाऽवलोकितः।"

चित्रलेखायाः वचनानि निशम्य मे मनो हृदयमन्तःकरणसहितानि बाह्यकरणानि पीयूषपयोनिधौ निमग्नानि जातानि। आत्मनोऽनुभावान् श्रावयित्वा मया कथितम् -

"मातृतुल्या मम यक्षिणी तारावली। सा मे सकलं रहस्यमाचचक्षे। विदितराजकन्यापरिचयोऽहं तामेव हृदये दधामि। अथ च सुदूरदीर्घमध्वानमतिक्रम्य श्रावस्तीं प्रविष्टः। सा त्रिभुवनललामभूता राजनन्दिनी मे प्राणानां मनसो हृदयस्याऽऽत्मनश्च स्वामिनी। तां नवमालिकामेव वा साधयेयं नश्वरं कायं वा पातयेयमिति मे प्रतिज्ञा।"

मम हृदयोद्गारान्निशम्य समाश्वस्तहृदया विश्वासमापन्ना सा चित्रलेखा राजकन्यालिखितं चित्रपटं निर्दिश्य प्रावोचत् -

"आर्य ! भवतः सन्दिष्टमहं राजकन्यायै निवेदयिष्यामि।"

चित्रपटं करे गृहीत्वा विविधवर्णरङ्गसहितं कूर्चमादाय तत्साहाय्येन स्वहृदयप्रतिष्ठिता सा राजकन्या मया तस्यामेव दशायां वदनं पयोधरसहितं किञ्चिदुत्थाप्य नेत्रत्रिभागेन मां सततमवलोकयन्ती वक्षसि निहितभुजा रतिविलासप्रणयिनी तत्राऽङ्किता।

तदनन्तरं चित्रलेखामहं पुनः प्रोवाच

भद्रे ! मम वचनेन सा राजकन्या त्वया वक्तव्या -

"गहने विन्ध्यवने शाकतरोरधस्तान्निशायां निद्राङ्गतेन केनचिद् युवकेन स्वप्ने वा यथार्थे वा काचिद् रमणी दृष्टा।

अथ यदि राजनन्दिन्याः मय्यनुग्रहो भवति, सूचितव्योऽहम्। नवमालिकाया आनुकूल्ये सति स्वयमेवाऽहं कन्यान्तःपुरगमनं मिलनोपायञ्च साधयिष्यामि।"

मम वचनानि प्रणयानुरागगर्भितानि निशम्य सा चित्रलेखा चित्रपटं करे गृहीत्वा निजशयनकक्षमगच्छत्। स्वप्नेषु राजनन्दिनीमेवाऽवलोकयतो मम सा रजनी सुप्रभाता बभूव। अपरेद्युश्चित्रलेखा सपदि नित्यकर्मनिर्वृता चित्रपटहस्ता कन्यान्तःपुरं गत्वा मध्याह्नसमये प्रत्यायाता। अरविन्दवन्मुखमण्डलमतिगौरवर्णं मनःप्रसादेनाऽतितरां विकसितमवर्तत। समागत्य सा मे चरणयोः प्रणिपत्याऽवोचत्-

"आर्य! भवता लिखितमात्मनिश्चत्रमवलोक्य राजकन्या विस्मयकुतूहलप्रणयानन्द-निर्भरमानसा विह्वला बभूव। एकान्ते सा मधुरवचनैर्मामिदमाह -

सखि! प्रियमिलनविलम्बो मे ध्रुवमेव मरणहेतुर्भविष्यति। त्वमेव मे प्राणसमा सखी वर्तसे। तथाविधमुपायं साधय, येनाऽहं तं प्राणबल्लभं प्रियतमं जीवनसहचरमविलम्बमेव लभेय।"

चित्रलेखाया इमानि मनोमुग्धकराणि वचनानि निशम्य शीघ्रं प्रत्यागमनं प्रतिज्ञायाऽहं नगराद् बहिः पुष्करणग्रामं गत्वा देवशर्मणो वृद्धब्राह्मणसविटस्य गृहं प्राप्तः। मामवलोक्याऽतिप्रसन्नसवदनोऽसौ ब्राह्मणो विश्रामभोजनादिभिः सत्कृत्य शीघ्रप्रत्यागमनकारणं पप्रच्छ। मयाऽपि स प्रोक्तः -

"आर्य! मयि भवतोऽनुग्रहं स्नेहं वात्सल्यभावञ्चाऽनुभूयाऽहं पुनरप्यागमनस्य धाष्ट्र्यञ्चकार। श्रावस्त्याः नरपतिरयं हर्षवर्धनः परमधार्मिकस्वभावःप्रजावत्सलश्च वर्तते। तस्य सुता नवमालिका रतिरिव सौन्दर्यगुणसम्पन्ना पारिजातपल्लव इव मृदुलगात्री नवमालिकाकुसुममिव सौरभमयी वर्तते। पृथिव्यामवतीर्णा सा लक्ष्मीरेव साक्षात्। विधिस्तां मे स्वप्नेऽदर्शयत्। तामेव निमित्तीकृत्य पञ्चशरो मां पञ्चभिः शरैः सततं मर्मसु हिनस्ति। मन्मथसुतीक्ष्णशरप्रहतोऽहं जीवनधारणमपि कर्तुं न शक्नोमि। राजसुता सा मे प्रणयिनी मय्यनुरक्ता सततं मम स्मरति। अस्य प्रणयरोगस्य चिकित्सायै भवानेव धन्वन्तरिः। भवच्छरणमहं प्रपन्नः। भवानेव मम प्राणानां रक्षणे प्रभवति।"

मम कथनं निशम्य देवशर्मा करतलयोः शिरः निधाय स्वल्पसमयं यावदुपायं चिन्तयामास। ततः भालमुन्नमय्याऽसौ मामुवाच -

"वत्स ! कठिनतमे दुष्करेऽस्मिन् कर्मणि मया प्रयासः करणीयः । भवति स्नेहो वा वात्सल्यं वा मामस्मिन् दुष्करे कर्मणि नियुनक्ति। यदि सा राजसुता भवति तथैवाऽनुरक्ता यथा भवांस्तस्यां, तदा कार्यमेतन्निश्चयेन सेत्स्यति।"

इति कथयित्वाऽसौ विटो ब्राह्मणो निजयोजनामवर्णयत् । मयाऽपि सा समर्थिताऽनुमोदिता च । अपरेद्युरुदिते बालभास्करे पूर्वदिक्क्षितिजेऽरुणालोकेन प्रकाशिते जगति मां नववधूवेशेन प्रसाध्य वस्त्राभूषणैश्चाऽलङ्कृत्य स देवशर्मा राजसभामानयत् । तत्राऽसौ राजानं प्रणम्य जगाद -

"राजन् ! श्रावस्त्याः बाह्यप्रदेशेषु पुष्करणग्रामवास्तव्योऽहं ब्राह्मणः । ममेयं बालिका एकला सन्ततिः । प्रसवकालेऽस्याः जननी प्रसववेदनया पञ्चत्वङ्गता। महद्भिः प्रयासैर्वात्सल्यस्नेहेनेयं पालिता पोषिता वर्धिता च। अहमेवाऽस्याः जनकः अहमेव जननी, अहमेव भ्राता, अहमेव सर्वविधबन्धुः। द्वादशवर्षे मयेयं सुता सद्वंशजाताय विप्रसुताय प्रदत्ता। स तु विद्याध्ययनायोज्जयिनीं गतः। परमियं बालिका पितृगृहे निवसन्ती समयं यापयति। तारुण्ये वयसि विद्यमानायामप्यस्यामसौ भर्ता विलम्बायते। नवयौवनायुषि पदं निदधानानां कन्यानां रक्षणमतिकठिनकार्यमसिधाराव्रतमिव वर्तते। मातृविहीनाञ्च रक्षणं पुनः कठिनतरं दुष्करमेव।

वार्धक्यहेतोऽहमस्याः सुतायाः रक्षणेऽक्षममिवाऽऽत्मानमनुभवामि। अतो मया निर्णयो विहितो यदुज्जयिनीं गत्वाऽहमस्याः भर्तारं स्वजामातरं प्रत्यानेष्यामि। तदनन्तरं सुतां जामात्रे समर्प्य विगतचिन्तः समापितगृहस्थकर्तव्यभारो वानप्रस्थं स्वीकृत्य वनेषु वत्स्यामि।

देव ! परमधार्मिकस्वभावो भवान् प्रजावत्सलो नरपतिः। विप्रोऽहं भवतोऽतिथिर्भवच्छरणं प्रपन्नः। स्वधर्मं विचार्य प्रार्थनां मे भवानङ्गीकरोतु। इयं तरुणी मम सुता ब्राह्मणवधूर्भवता तावद् रक्षणीया, यावदहमुज्जयिनीं गत्वा जामातरमानीय श्रावस्तीं प्रत्यागच्छामि। राजानस्तु सदा गवां ब्राह्मणानाञ्च रक्षितारो भवन्ति। मम याच्ञामङ्गीकृत्य भवानेतां बालिकां रक्षतु।"

नरपतिर्हर्षवर्धनो विप्रस्यैनां याच्ञां स्वीकृतवान्। ब्राह्मणवधूवेशधारकोऽहं तेन महीपालेन कन्यान्तःपुरे सुतायाः नवमालिकायाः संरक्षायां प्रेषितः। तत्रैषा विप्रवधूः सुरक्षिता भविष्यतीति।

तदनन्तरं चित्रलेखासाहाय्येन मे परिचयमवाप्य मय्यनुरक्ता सा राजनन्दिनी नवमालिका कुसुमपेलवा विकसितहृदया लज्जावरक्तकपोला परमं हर्षमवाप। प्रणय-

रतिविलासेभ्यो विह्वलीभूतहृदययोः सोत्कण्ठचित्तयोरावयोः रजन्यो दिवसाश्च सुगुप्तसंयोगापन्नयोः व्यतियन्ति स्म। एवञ्च त्रयाणां मासानामवधिर्व्यतीतः।

ग्रीष्मान्ते वर्षर्तुः समाजगाम। मेघाच्छन्नदिवसेषु कदाचिद्धारासारवर्षणेन कदाचिच्च लघुजलबिन्दुवर्षणेन धरणी निर्भरमाप्यायिता। तादृशीषु रजनीषु प्रगाढालिङ्गननिबद्धयो-रावयोरानन्दस्य हर्षस्य च न काऽपि सीमा बभूव। तदनन्तरमाकाशं विमुच्य मेघैरन्तर्हितम्। आश्विनमासस्य घनविमुक्ते निर्मलनीलव्योम्नि विहरन्तीनामुत्पतन्तीनां बलाकानां पङ्क्तयः स्फुरत्तारकरेखासदृशाः शुशुभिरे। कृष्णपक्षस्याऽष्टमी तिथिरवर्तत। भगवतः कार्तिकेयस्य यात्रोत्सवदिवसः समायातः। राजधान्याः श्रावस्त्याः पश्चिमे दिग्विभागे पञ्चक्रोशकल्पं सुविशालमेकं निर्मलनीरपूरितं पुण्डरीकेन्दीवरतामरसकमल-कुमुदशोभितं हंसक्रौञ्चसारसबकादिजलपतत्रिनिनादितं सरोऽवर्तत। तस्य पूर्वयि तटे कार्तिकेयदेवस्य विशाले भव्ये मन्दिरे शिवभवानीसुतस्य मयूराधिष्ठिता भक्तजनमनःप्रसादनी देवप्रतिमा सुप्रतिष्ठिताऽवर्तत। अस्मिन् यात्रोत्सवे राजा प्रजाजनाश्च सर्वे समभावेन समारोहेण भक्तिभावसम्भृतहृदयाः सम्मिलिताः भवन्ति। नरपालस्यान्तःपुरजनाश्चाऽपि तत्र गत्वा भगवन्तं स्कन्दं पूजयन्ति।

पूर्वयोजनानुसारमहमपि नववधूवेशे सुप्रसाधितो राजसुतायाः सखीभिः सेविकाभिश्च सह यात्रोत्सवनिमित्तं तत्र स्कन्दमन्दिरं जगाम। तत्र प्रथममस्मिन्नुत्सवे भक्तजनैः समानीताः देवमूर्तयो जलाशये विसर्जिताः। तदनन्तरं मन्दिरगर्भं प्रविश्य देवपूजाः सम्पादिताः। पश्चाच्च जलाशयस्नानविधिः प्रावर्तत।

मम योजना पूर्वमेव सुसम्बद्धा सुघटिता चाऽवर्तत। जलाशयस्य गभीरजले निमज्ज्याऽऽत्मानमहं पश्चिमतीरवर्तिनि सुदूरे तटे केनाऽप्यलक्षितो जलाद् बहिरायातः। तत्र नववस्त्रयुगलं करे धारयन् देवशर्मा विटो ब्राह्मणः समुपस्थित आसीत्। नारीजनोचितान्यार्द्रवस्त्राणि परिहृत्य मया पुरुषजनोचितवसनयुगलं धारितम्। तदनन्तरमहं तेनोपकारिणा देवशर्मणा सार्द्धं पुष्करणग्रामे तद्गृहमायातः।

इतश्च विप्रवधूरूपिणीं मां जलाशयाद् बहिर्निर्गच्छन्तीमनवलोक्य नृपतेरन्तःपुरिकासु महान् सम्पभ्रमः समुत्पन्नः। सर्वे जनाः मामाकारयन्त इतस्ततः परितोऽगच्छन्। नृपतिरपि समाचारमेनमश्रौषीत्। तस्याऽऽदेशेन मत्स्यजीविनः सकलं जलाशयमुन्मथि-तवन्तः। परं यद्यहं तत्राऽभविष्यं तदैव ते मामध्यगमिष्यन्। शोकसन्तप्ताः सर्वे जनाः राजप्रासादं प्रत्यागताः।

मामनासाद्य राजसुता भृशमरोदीत्। करुणं विलपन्ती सा तां विना न भोक्ष्य इति

भोजनादिव्यापारांस्तत्याज। तस्याः दशामिमामवलोक्य कन्यान्तःपुरे महान् कोलाहलः समुद्बभूव। परिजनाश्चक्रन्दिरे, सख्यो रुरुदुः नगरनिवासिनश्च विविधभावेषु संलेपुः। नरपालोऽमात्याश्च किङ्कर्तव्यविमूढाः सञ्जाताः।

देवशर्मणो गृहमागत्य मम सप्त दिवसाः व्यतीताः। सप्ताहानन्तरं प्रशान्ते किञ्चिद् ब्राह्मणवधूसम्भ्रमे देवशर्मा मां जामातृरूपेण प्रसाध्य विद्वत्पण्डितवेशधारिणमकार्षीत्। ततः तेन सहाऽहं राजसभाभवनमाजगाम। सभां प्रविश्याऽसौ देवशर्मा राजानं प्रार्थयामास –

"राजन् ! उज्जयिनीतो जामाता मम समायातः। तत्रत्यविश्वविद्यालयस्याऽयं स्नातकः। योग्येभ्य आचार्येभ्योऽनेनाऽनेकासां विद्यानामध्ययनं कृतम्। स्मृतिशास्त्रेष्वयं पारङ्गतश्चतुष्षष्टिकलासु च व्यावहारिकपक्षेण प्रवीणः। धनुर्बाण-गदा-खड्ग-कुन्ताद्यायुधसञ्चालने न कोऽप्येनमतिशेतुं समर्थः। यन्त्रतन्त्रप्रयोगेषु कुशलतमोऽयं वर्तते। पुराणेतिहासानां वेत्ता नवनवसाहित्यकाव्यनाटकादिनिर्माणे पटुरयं परगुणानां प्रशंसकः। मित्राणां सहायको विश्वसनीयश्चाऽत्युदारस्वभावो गर्वशून्यश्च। मितसत्यप्रियहितवादी। कमपि दुर्गुणमस्मिन्नाऽहं प्रेक्षे। सर्वगुणसमन्वितं प्रशंसनीयमेतादृशं जामातरं लब्ध्वा कृतकृत्योऽस्म्यहं जगतीतले। अयमेव मेऽन्तिमोऽभिलाषो यदेतस्मै विदुषे सर्वगुणसम्पन्नाय विप्रयुवकाय जामात्रे कन्यां समर्प्य वानप्रस्थधर्ममाचरेयम्। सम्प्रति भवान् सुतां मे समर्पयतु, येनाऽहं कर्तव्यपालनं कृत्वा ऋणमुक्तो भवेयम्।"

वृद्धब्राह्मणस्यैतानि वचांसि श्रुत्वा महाराजस्य हर्षवर्धनस्य वदनं पीतिमानं प्रपन्नम्। अतिलज्जितोऽसौ मुखमवानमत्। न चाऽसावेकवचनस्याऽपि समुच्चारणे समर्थ आसीत्। सर्वे मन्त्रिणोऽपि त्रपाभरेणाऽवनतवदनाः बभूवुः। देवशर्माऽपि तान् सर्वाननेकैकशोऽवालुलोके। ततो मन्त्रिष्वेकः घटनां समग्रां संक्षेपेण वर्णयित्वाऽवोचत्–

"हे ब्राह्मण ! तदारभ्य भवतः सुता नाऽस्माभिर्न चाऽन्येन केनाऽप्यवलोकिता। तस्मिञ्जलाशयेऽन्यत्र सर्वत्राऽन्वेष्यमाणाऽपि सा नोपलब्धा। पश्यतु भवान्, यद् भूतं तद् भूतम्। न च भवितव्यता केनचिद् वार्यते। असारोऽयं संसारोऽनित्यः। अतः शोकं परित्यज्य धैर्यं धारणीयम्। यदि कामपि राजकीयसहायतां भवानभिलषति तत्कथयतु। प्राणपणेनाऽपि भवान् प्राप्स्यति। भवतोऽयं जामाता सर्वविधविद्यासु व्यवहारेषु च कुशलः पुनः निजयोग्यां वधूं परिणीय जीवनयात्रां सुखेन निर्वक्ष्यति।"

मन्त्रिणो वचांसि निशम्याऽसौ वृद्धब्राह्मणस्तारस्वरेण क्रन्दितुं प्रावर्तत। नयनजलधाराश्च प्रावहन्। असौ प्रावोचत् –

"मम सुता यदि न जगति जीवति, तदाऽहमपि प्राणधारणेन किं करिष्यामि। निष्प्रयोजनं मे जीवनम्।"

एवमसौ नयनजलधारां विमुञ्चन् सगद्गदं रुदन् राजद्वारे शुष्ककाष्ठचितां चितां चित्वाऽऽत्मानं जीवितमेव दग्धुं प्रायतत। तं तथा प्रयतमानवलोक्य मन्त्रिभिः सह राजा हर्षवर्धनोऽप्यतिविकलः प्रोवाच –

"हे विप्र ! न भवता तथाऽनर्थो विधेयः। भवतः सुताया अनुपलब्ध्या प्रथममेवाऽहं पापपङ्कनिमग्नो न्यासभ्रंशेन च सम्पीडितहृदयोऽस्मि। पुनः ब्रह्महत्यारूपं पातकं कथं सहेय? भवता यकिञ्चिदप्यभिलषिष्यते तदेवाऽभिलप्स्यते। भवतो वचांसि निश्चयेन मे माननीयानि भविष्यन्ति।"

ततो देवशर्मा प्रोवाच –

"राजन् ! यद्येवं तर्हि श्रूयताम् –

मम सुता यदि गता सा नूनं गता। तस्योपलब्धिर्न कथमपि सम्भवा। अयं युवा विप्रो मम जामाता ननु मम सुतः। प्रतिश्रुतं मयाऽस्मै कन्यासम्प्रदानम्। वचनानि मे नाऽन्यथा भवितुमर्हन्ति। अयं विद्यास्नातको विप्रो मेधावी नयज्ञो वीरः पराक्रमशाली सर्वगुणसम्पन्नो वर्तते। वरेषु ये गुणाः मृग्यन्ते ते सर्वेऽस्मिन् वर्तन्ते। यदि भवान् स्वसुतां मम धर्मसुतां मन्यमानोऽस्मै प्रदास्यति, ताञ्चोपयम्याऽयं सन्तुष्टो भविष्यति, तदैव मम दुःखं कन्यादानेन सह मन्दतां यास्यति। अन्यथाऽऽत्मदाहेन मम प्राणपरित्यागः निश्चितः। अथ च अनभिमते भवति राजभवनद्वारे चितां विचित्य वैश्वानरं प्रज्ज्वाल्य नश्वरमिदं वपुः भस्मतां नीत्वा सुतामवलोकयितुं स्वर्गयात्रा मया करणीया। अयमेव मम निर्णयः।

ब्राह्मणस्य दृढनिश्चयं विज्ञाय माञ्च निजसुतायोग्यं वरं ज्ञात्वाऽसौ राजा नववमालिकां विप्रस्य धर्मसुताममन्यत। अथ च निजदुहितुः मृणालपटलमृदुलं करं मह्यमुपहृतवान्। शास्त्रोक्तविधिना विवाहसंस्कारेण देवशर्मणा धर्मजनकेन प्रदत्ता सा मे प्रिया भार्या बभूव।

एवञ्च स्वल्पेन कालेन मम मनोरथाः विटानामग्रगण्यस्य वृद्धविप्रस्य साहाय्येन सफलतां प्रयाताः। सन्तुष्टे विधौ पुरुषार्थेन केऽर्थाः न सिध्यन्ति? विधिपौरुषयोः संयोगः सर्वार्थसाधकः।

तदनन्तरं मम योग्यतया भृशं सन्तुष्टो नरपतिः शासनधुरं मम सुदृढयोः स्कन्धयोर्निधाय विगतचिन्तो बभूव। महाराजहर्षवर्धनस्य सुता नवमालिका तस्यैकला

सन्ततिरवर्तत। अविद्यमाने कस्मिंश्चिदन्यस्मिन्नुत्तराधिकारिणि तेनाऽहं युवराजपदेऽभिषिक्तः।

एवं नवमालिकाकुसुमपेलवां रमणीयां मनोमुग्धकारिणीं सर्वगुणसम्पन्नां श्रावस्तिराजसुतां नवमालिकामुपलभ्य प्रणयविलासरतिसुखान्यनुभवन् श्रावस्त्याः प्रशासनसञ्चालनसूत्रधारोऽहं परमं साफल्यमध्यगच्छम्। कतिचिद्दिवसानन्तरं मित्रसन्देशमधिगम्य चम्पेश्वरस्य सिंहवर्मणः सहायतायै चण्डवर्मणोऽवन्तिशासकस्य विनाशाय सेनया सहाऽहं चम्पां प्रविष्टः। अत्राऽऽगत्य भवद्दर्शनसौभाग्यभागहं भवच्चरणसेवायां समुपस्थितः।

प्रमतिचरितमाकर्ण्य राजवाहनो विकसितनलिनीदलवदनः परममुदितः सर्वान् कुमारान् वयस्यानवलोक्य स्मितेनौष्ठौ विभूषयामास। "उत्साहवन्तः प्रज्ञावन्तो विधेरानुकूल्यं सम्प्राप्य सफलतामधिगच्छन्ति," इति कथयित्वोत्थाय प्रमतिं सुदृढालिङ्गनपाशे बद्ध्वा तं वर्धापयामास। तदनन्तरं मित्रगुप्ते नयने व्यापारयन् तमात्मचरितं श्रावयितुमनुरुरोध।

स्मितविभूषितवदनो मित्रगुप्तोऽपि निजवृत्तान्तमेवं वर्णयितुमारेभे -

# एकादशी-पीठिका

## मित्रगुप्तः

# एकादशी-पीठिका

## मित्रगुप्तः

कुमार ! तस्मिन् समये भवन्तमनुपलभ्य सुहृदो वयं व्याकुलहृदयाः भवतोऽन्वेषणाय कृतप्रतिज्ञा अभूविम। सर्वैर्मित्रैः कृतनिश्चयैः सर्वासु दिक्षु प्रसरद्भिः हायनैकानन्तरं कार्तिकमासस्य कृष्णपक्षस्य चतुर्दशीदिवसो महाकालमन्दिरे मिलनायोज्जयिन्यां सङ्केतितः।

भवन्तमन्विषन्नहं सुह्मजनपदमाससाद। बङ्गसमुद्रतटेऽवस्थिताऽस्य जनपदस्य राजधानी दामलिप्ता धनैर्धान्यैश्चाऽतिसमृद्धाऽवतर्तत। अत्रत्याः व्यापारिणः सार्थवाहाः पोतस्वामिनश्च सुदूरदेशेभ्यो वाणिज्यनिमित्तेन प्रचुरं धनवैभवमर्जयित्वा दामलिप्तां समृद्धतमां प्रतिपादयन्ति स्म। समुद्रतटरक्षणार्थं राजनयज्ञैश्चतुरङ्गिण्या सेनया सह सर्वविधोपकरणसंयुक्ता नौसेनाऽपि सुसङ्घटिता।

मध्याह्नसमयपूर्वमेवाऽहं दामलिप्तामुपागच्छम्। नगराद् बाह्यपरिसरेषु गोपुर-सन्निकटं विशालं रमणीयञ्चोपवनमासीत्। मया दृष्टम् -

"सुवर्णभूषणालङ्कृताः प्रसाधितकायाः नागरिकाः सोल्लासमुपवनं गच्छन्ति। सम्भवतस्तत्र कस्यचिदुत्सवस्याऽऽयोजनमवर्तत। औत्सुक्यभराक्रान्तहृदयोऽहमपि तदुद्यानं प्रविष्टः। इतस्ततो भ्रमन् मनोरमां रमणीयाञ्च तरुपुष्पसमृद्धिमवलोकयन्नहं वाटिकायाः दक्षिणवर्तिभागं समायातः। तत्रैकस्य माधवीमण्डपस्य बाह्यप्रदेशे मरकतमणिरचिताया-मासन्द्यां समुपविष्ट एकोऽतिरूपवान् युवा स्वच्छानि महार्घाणि वसनानि वसानः सप्ततन्त्रिकां वादयन्नवर्तत। सद्वंशजातः समृद्धिशाली सोऽयं युवा कस्यचित् सौभाग्यशालिनः पुत्रः प्रतिभाति स्म।"

तस्मिन् महाजनसङ्कुले शोभनोद्याने तमेकाकिनमासीनमवलोक्य मनसि मे कुतूहलेन पदं निधत्तम्। निकषा समागम्य तस्यैकपार्श्वे निषद्य दक्षिणस्कन्धे च करं निधाय मया पृष्टम् -

"भद्र ! कीदृशोऽयमुत्सवः ? कथमत्र च महान् जनसम्मर्दः ? एतं महोत्सवमुपेक्षमाणो भवान् किमर्थमत्र तिष्ठन्नेकल एव वीणावादने रतः ?"

स युवको विनम्रभावेन मयि दृष्टिं निपात्य मामवोचत् -

"भद्र ! भवानस्मिन्नगरे नवागतः प्रतिभाति। अत एव तथा पृच्छति। एतद्विषयकं भवान् किञ्चिदपि न जानाति। सुह्मजनपदस्य नृपतिरनपत्योऽवर्तत। ज्योतिर्विद्भि-

निर्दिष्टमार्गमनुसरन्नसौ सन्ततिप्राप्तिहेतोस्तपश्चरितुं विन्ध्यारण्ये विन्धवासिन्याः दुर्गायाः मन्दिरं जगाम। हायनैकपर्यन्तेन सुकठोरेण तपसा सुप्रसन्ना देवी विन्ध्यवासिनी स्वप्ने समुपस्थिता तं जगाद -

वीर ! तव नियमैर्व्रतैस्तपसा चाऽहमतिप्रसन्ना। तव जाया द्वे सन्तती प्रसविष्यते। एकं पुत्रमन्याञ्च पुत्रीम्। स्वदेशे मन्दिररचनां कारयित्वा त्वया मम प्रतिमायाः प्रतिष्ठा कारणीया। त्रिवर्षदेशीया तव सुता प्रतिदिवसं प्रातःकाले मम पूजार्थं तत्र मन्दिरं प्रवेक्ष्यति। प्रतिमासञ्चाऽत्र चन्द्रमण्डले सम्पूर्णे समायोजिते महोत्सवे सा बालिका कन्दुकनृत्येन मां पूजयिष्यति। कार्यक्रमोऽयं तस्याः विवाहावधिकं वर्तते। सततं कन्दुकनृत्यकलाभ्यासादियं कन्या नाम्ना कन्दुकावती ज्ञेया। सा तमेव प्रियं विवक्ष्यति यं सा प्रेमपूर्णनयनाभ्यां द्रक्ष्यति। कन्दुकावत्याः परिणयनानन्तरं तव पुत्रो भगिनीभर्तुः संरक्षकत्वे शासने च जनपदस्य शासनधुरं वक्ष्यति।

विन्ध्यवासिन्या आदेशं सम्मान्य नरपतिस्तुङ्गधन्वा स्वकीयां राजधानीं दामलिप्तां प्रत्याजगाम। नगरस्य बाह्योद्याने विशालं सुन्दरं भव्यञ्च मन्दिरं निर्माय तेन तत्र भगवत्याः विन्ध्यवासिन्याः दुर्गायाः प्रतिमा प्रतिष्ठापिता। स्वल्पेनैव समयेन महामहिषी महल्लिका परमरूपगुणशालिनी गर्भं बभार। गर्भावधौ सम्पूर्णे दशमे मासे सा परमलावण्यसम्पन्नां गौरारुणवर्णां ज्योतिर्मयैरङ्गैः प्रसवभूमिमपि दिव्यालोकेन पूरयन्तीं कन्यामजीजनत्। तदन्तरं सा पुत्रमेकमपि प्रासूत। सा कन्या कन्दुकावती नाम्ना कृता राजपुत्रश्च नाम्ना भीमधन्वा बभूव।

त्रिवर्षकल्पा सा राजसुता कन्दुकावती कन्दुकनृत्येन देवीं पूजयितुं मन्दिरङ्गता। ततः प्रभृति प्रतिदिवसं सा देवीमाराधयितुं मन्दिरं गच्छति, पूर्णिमादिवसे च कन्दुकक्रीडामभिनयति देवतासमक्षम्। अस्माद्धेतोरयमुत्सवः सर्वत्र कन्दुकोत्सवनाम्ना प्रथितो बभूव। राजसुतायाः कन्दुकनृत्यमवलोकयितुं मन्दिरप्राङ्गणे महान् जनसमुदायः समवेतो विद्यते। अद्यैवाऽयमुत्सवो भविता। अत एवाऽत्रोद्याने महान् जनसम्मर्दो भवताऽवलोक्यते।

अहमस्यां नगर्यां सर्वत्र प्रथितस्य समृद्धिशालिनः सार्थवाहस्याऽर्थदासस्य सुतः कोशदासोऽस्मि। कन्दुकावत्याः सेविका वाराङ्गना चन्द्रलेखा विलक्षणेन मनोहारिणा हृदयाकर्षकरेण रूपलावण्येन नवयौवनेन च सम्पन्ना वर्तते। राजनन्दिन्याः प्रियसखी साऽवगन्तव्या। सा मेऽन्तरङ्गप्रणयिनी। तां विना नाऽहं प्राणानपि धारयितुं क्षमः। परन्तु राजसुतायाः सहोदरो भीमधन्वा चाऽपि तस्यामतितरामाकृष्टचित्तो वर्तते। तामसौ बलात्कारेण रुणद्धि मदागमनञ्च तस्याः निवारयति। मयि दृढमनुरक्तायाः

मामेव कामयमानायाश्चन्द्रसेनायाः मन्निकटागमनं भीमधन्वा न सहते। अद्याऽस्मिन् कन्दुकोत्सवे राजकन्यासख्यमापन्ना मन्मिलनोत्कण्ठिता सा तया सार्द्धमत्रोपवने मम दर्शनपथं समागमिष्यति। चन्द्रसेनादर्शनौत्सुक्यपरिपूर्णहृदयोऽहमत्र तां प्रतीक्षमाणो वीणावादनेन मनो विनोदयामि।"

कोशदासे निजवृत्तान्तं वर्णयत्येव पृष्ठतो नूपुरझङ्कृतिध्वनिः श्रुतिगोचरो बभूव। परिवर्त्य मया महार्घैर्वस्त्राभूषणैः सुसज्जिता रूपेणोपवनं प्रकाशयन्ती तरसा कोशदासं निकषा समागच्छन्ती काचित् प्रमदाऽवलोकिता। निकटमागतायां तस्यामतितरां प्रसादगुणविकसितवदनः कोशदासः समुत्थायाऽग्रेसरीभूय भृशमुद्वेलितमानस आत्मानं नियन्त्रयितुमक्षमस्तां प्रगाढालिङ्गमपाशे बबन्ध। सा तरुणी नवयौवनौद्गमविकसितगात्रा तमाश्लेषं प्रगाढतरं विधाय प्रियस्य कोशदासस्य कपोलावरुणाभ्यामोष्ठाभ्यामगणितचुम्बनै-रलञ्चकार। तदनन्तरं किञ्चित् प्रशान्ततां गते हृदयावेगे द्वौ प्रणयिनौ मां निकषा समुपविष्टौ। कोशदासो मामुवाच -

"मित्र ! इयमेव मम प्राणबल्लभा प्रणयिनी चन्द्रलेखा। एनामहं दिवानिशं जपामि। वियोगोऽस्याः हृदयं सततमुत्क्वथयतीव। इयमपि मयि प्रणयविह्वला सदा मिलनोपायं चिन्तयति रचयति च। परं राजसुतो भीमधन्वाऽस्यामासक्तचेताः बलात्कारेणैनां निरुध्य मम प्राणानिवाऽपहरन् वर्तते। सलिलाद् बहिरागतो मत्स्य इव निरन्तरमाकुलीभूतोऽहं भीमधन्वनो राजशक्तिभयाद् भीतः किञ्चिदपि प्रतिकरणेऽसमर्थो नाऽनया संयोगावसरान् प्राप्नोमि। अतो मया हृदि निर्णयो विहितः, कथमपि दर्शनमस्याः विधाय प्राणान् परित्यज्य सकलदुःखेभ्यो विमुक्तो भवेयम्।"

कोशदासस्येमानि वचांसि हृदयान्तःकीलितानि निशम्य चन्द्रसेनायाः नयने अश्रुभरार्द्रे सञ्जाते। प्रियतमस्य वदनं कुन्दकुसुमकोमलकोरकसमेन शुभ्रवर्णेनाञ्जलिनाऽऽवृत्य सा बभाषे -

"प्रियतम ! मह्यमतितुच्छवाराङ्गनायै साहसमेतादृशं न त्वया करणीयम्। कुत्र त्वमस्य नगरस्य सुप्रथितयशसः समृद्धिशालिनोऽर्थदासस्य सुतः, कुत्र चाऽहं राजकीयसेवायां रता राजसुताचरणसेविका वाराङ्गना। समुज्ज्वलवंशजा पवित्रा मनोहररूपगुणसुशोभिता वधूस्त्वया वरणीया। मयि प्रगाढानुरक्तस्त्वं लोके वेशदासनाम्नाऽपि जनैः कथ्यते। त्वयि परलोकं गते लोकापवादोऽयं सत्यमेव सेत्स्यति, वाराङ्गनाः क्रूरहृदयाः प्रणयिजनप्राणापहारिण्यो भवन्तीति।

अथ च प्राणपरित्यागसाहसं कुर्वाणं त्वामवलोक्य प्रथममहमेव प्राणांस्त्यक्ष्यामि। यदि त्वं मां विना जीवनं नाऽभिलषसि नय मां दूरदेशे, यत्र सर्वेभ्योऽप्यपरिचितावावां

नवीनां जीवनयात्रां प्रारभेव।"

चन्द्रसेनावचनान्याकर्ण्य कोशदासो मामाह -

"भद्र ! भवताऽनेकेषु देशेषु भ्रमणं कृतम्। विभिन्नानाञ्च देशानां गुणदोषनिरूपणमपि कृतं भवेत्। भवानेव ब्रवीतु कतमस्तथाविधो देशो यत्रत्याः जनाः साधवः सहृदयाः परोपकारिणो न्यायशीलाः सन्ति। धनैर्धान्यैश्च सम्पन्ने तथाविधे देशे प्रियया सह निवसन्नहं वाणिज्येन जीविकामर्जयिष्यामि।"

कोशदासस्य वचनानि निशम्य प्रहसन्नेवाऽहं तस्य दक्षिणहस्ते वामकरं निधाय प्रावोचम् -

"वीर ! अतिविस्तीर्णेऽस्मिन् संसारे सज्जनाः वा दुर्जनाः वा सर्वत्र भवन्ति। जनपदानां रामणीयकस्य समृद्धिसम्पन्नत्वस्य च न काऽपीयत्ता भवति। स्वदेशं वा स्वस्थानं वा स्वगृहं वा सर्वो जनः कामयते। जन्मभूमिः स्वर्गादपि गरीयसी भवति। अस्मान्नगरात् प्रोषितो भवान् पितरावेवोत्पीडयिष्यति। भवता मनसि विचारणीयम् -

अस्मिन् नगरे भवतां वंशपरम्परागतं सुसमृद्धं वाणिज्यं वर्तते, मित्राणि सन्ति स्नेहशीलाः परिजनाः परिचिताश्च वर्तन्ते। सर्वविधसुखसुविधासम्पन्नं गृहमस्ति। परस्मिन् देशे प्रोषितो भवान् नवं सूत्रमवलम्ब्य जीवनयात्रां प्रारप्स्यते। पदे पदे व्यवहारेषु कठोरकाठिन्यमनुभविष्यति। तदा भवतो विचारसरणी भविष्यति -

इयं चन्द्रसेनैव मे सकलविपदां हेतुः।

अतो भवताऽत्रैव दामलिप्तायां निवसता तथोपायो विधातव्यो यथा चन्द्रसेनामधिगम्य प्रियया सह सुखेन निवासो भूयात्। तथाविधमुपायमहं भवन्तं दर्शयिष्यामि। अनेन भवतः सर्वाणि कार्याणि प्रयोजनानि च सेत्स्यन्ति।"

ममैतानि सुदृढविश्वासपरिचायकानि वचांसि निशम्य चन्द्रसेनाकोशदासौ प्रसादसुमुखौ मामनिमिषलोचनैर्निरीक्षाञ्चक्रतुः। तस्मिन्नेव समये बह्वीनां प्रमदानां हासपरिहास-मिश्रितकलरवध्वनयः श्रुतिगोचराः बभूवुः। चन्द्रसेना तत्क्षणं सत्वरं ससम्भ्रमं त्वरायमाणा समुत्थिता। अहो, राजनन्दिनी कन्दुकावती देव्याः दुर्गाया उपासनायै समायाता। अधुना मया गन्तव्यम्। तदनन्तरं मामभिमुखीभूय साऽगादीत् -

"आर्य ! कन्दुकावत्याः राजनन्दिन्याः कन्दुकनृत्यं सकलप्रजाजनानामनुमतमपि कष्टेनाऽवलोकयितुं शक्यते। तत्र विशिष्टा आमन्त्रितजना एव प्रवेशाधिकारं लभन्ते। तथाऽपि भवन्तं तत्राऽहं नयामि। राजसुतायाः सौन्दर्यं नृत्यकलाप्रावीण्यञ्च लोकेऽस्मिन्ननुपममेव। सौभाग्यवन्तो जना एव तां राजनन्दिनीं पश्यन्ति। राजसुतां तयाऽभिनीतञ्च नृत्यमवलोक्य भवतो जीवनयात्रा धन्यतमा सफला च भविष्यति। मम

प्रियोऽपि तत्र प्रविशतु। उभौ भवन्तौ मामनुसरताम्। अहमपि राजसुतां निकषा गमिष्यामि।"

इति कथयित्वा सा चन्द्रसेना राजकुलसेविका मन्दिरमभिमुखीभूय प्रस्थिता। कोशदासेन सहाऽहमपि तामनुससार।

वाटिकायाः दक्षिणवर्तिनि भूभागे विशालं भव्यमुत्तुङ्गशिखरं दुर्गामन्दिरं निर्मितमवर्तत। तस्य गर्भगृहेऽष्टभुजा दुर्गाप्रतिमा प्रतिष्ठिता। मन्दिरस्य प्रधानद्वारसमक्षं विशाले प्राङ्गणे रङ्गपीठस्य रचना शिल्पिभिर्विरचिता। तत्समक्षं सभाभवने सम्माननीयेभ्योऽतिथिभ्यः पीठासनान्यवर्तन्त। मां कोशदासञ्चाऽग्रिमपङ्क्तिस्थित-पीठासनयोर्द्वयोः समुपवेश्य चन्द्रसेना स्वयं रङ्गपृष्ठतो गता।

पीठासनयोः स्थितयोरावयोः समक्षं रङ्गपीठप्रवेशो यवनिकावृत आसीत्। स्वल्पेन समयेन यवनिकायामपसारितायां बह्वीभिः सौन्दर्यशालिनीभिः प्रमदाभिः परिवृता परमलावण्यशालिनी नवयौवनोद्गमविभूषिता कृशतनुः दिव्यसौन्दर्यसमुमुज्ज्वला तेजसा सकलं रङ्गपीठं प्रकाशयन्ती काचिद् बाला स्वात्मानं प्रकटयाञ्चक्रे। तामरसदलसवर्णयोः करयोः रक्तवर्णकन्दुकमलम्बमाना सा रङ्गपीठमवातरत्। वामपार्श्वे चन्द्रसेना चाऽवर्तत। तया सेव्यमाना राजनन्दिनी कन्दुकावती दर्शकगणलोचनानन्ददायिनी तत्र समवस्थिताऽभवत्।

कन्दुकावत्यां नयनपथमागतायां मम सकलान्यङ्गानि सर्वाणीन्द्रियाणि च जडीभूतानि। स्पन्दनशून्यत्वञ्चोपस्थितम्। धरातलसौन्दर्यस्य सा कापीयत्ताऽऽविर्बभूव। तथाविधं नारीसौन्दर्यं न कदाऽपि पूर्वं मयाऽवलोकितम्। जपापुष्पराशिसमरक्ताधर-स्वामिन्याः राजसुतायाः सङ्केतमवाप्य चन्द्रसेनासहिताः सर्वाः सख्यः रङ्गपीठस्य पृष्ठभागे गत्वा नैपथ्यान्तरिताः बभूवुः। द्वयोः करयोः कन्दुकमुत्थाप्य मन्दिरद्वारमध्य-गतदृष्टिमापन्नां दुर्गाप्रतिमामभिलक्ष्य सविशेषनृत्यमुद्रया भगवतीं प्रणम्य सा कन्दुकनृत्याभिनयं प्रारेभे।

प्रथमं तावत् कन्दुकावती दक्षिणेन करेण कन्दुकमुच्चिक्षेप। तदनन्तरं भुवि पतितमुपर्युच्छलन्तं कन्दुकं कदाचिद् दक्षिणेन कदाचिच्च वामेन करेण भूमाववपातयन्ती तथैव पौनःपुन्येन निपातयन्ती प्रोत्क्षिपन्ती रङ्गपीठे त्वरितगत्या वर्तुलाकारं बभ्राम। क्रमशस्तस्या उत्क्षेपणावक्षेपणभ्रमणगतिः ववृधे। तदनन्तरं सा रङ्गपीठमध्यभागमागम्य द्वयोः करयोरङ्गुष्ठौ किञ्चिदिव व्यावृत्य कोमलाङ्गुलिसमूहं प्रसार्योपर्येव कन्दुकं मालाकारेण तथा भ्रामयाभास यथा एक एव कन्दुकोऽगणितसंङ्ख्यको ददृशे। अथ कदाचित्तं कन्दुकं मन्दैः कदाचिच्च मध्यमैः कदाचिच्च द्रुतैर्निर्दयप्रहारैस्ताडयन्ती

निपातयन्ती प्रोत्थापयन्ती सा विविधगतिप्रचारान् प्रादर्शयत्। सभामण्डपे दर्शकदीर्घायां स्थिताः सर्वे दर्शकाः राजनन्दिन्याः नृत्यकौशलमभिलक्ष्य स्तम्भिता इव विस्मयाभिभूता इव निश्चला अवर्तन्त।

परं मह्यं तु सा राजनन्दिनी देवताप्रसादाद् भुवि समवतीर्णा दिव्याङ्गनेव मे हृदयेनैव क्रीडन्ती प्रतीयाय न तु कन्दुकेन। कन्दुके निपातितानां तस्याः कृशाङ्ग्याः हस्तप्रहाराणां माध्यमेन कामदेवो मेऽङ्गेष्वेव प्रजहार।

कन्दुकनृत्यसंलग्नचित्ता सा राजकन्या स्वात्मनोऽपि विसस्मार। मनसो वपुषश्चाधिकारोऽपि तस्याः नाऽवशिष्टः। केशाः विकीर्णाः, आभरणानि स्वस्थानेभ्यो विचलितानि, भालात् कपोलाभ्याञ्च स्वेदजलधाराः प्रावहन्, श्वासः प्रमाणाधिको बभूव। वक्षस उत्पतनभावेन तत्र धारितो मुक्ताहारः सततमवपतन्निव प्रतिभाति स्म। तदनन्तरं रभसा नृत्यन्त्यास्तस्याः नृत्यगतिस्तीव्रा, तीव्रतरा तीव्रतमा च सञ्जाता। सकलो रङ्गपीठो रक्तवर्णैः कन्दुकैरसङ्ख्यताङ्गतैः राजसुतागतिभिश्च संभृतोऽवालोक्यत। घटिकाद्वयं कन्दुकनृत्याभिनयं सम्पाद्य राजसुता व्यरमत्।

तदनन्तरं रङ्गपीठमध्यस्थिता राजनन्दिनी पुनः कन्दुकमञ्जल्यामुत्थाप्य विशिष्टाभिनवभङ्ग्या भगवतीं दुर्गां प्रणनाम। सर्वाः सख्यः सेविकाश्च पुनस्तां परिवारयामासुः। चन्द्रसेना सुमधुरकण्ठस्वरेण देव्याः स्तुतिं जगौ। सम्पूर्णे चाऽस्मिन्ननुष्ठाने सखीजनपरिवृता राजकन्या रङ्गपीठादवतीर्य उद्याने बभ्राम।

अस्मिन् समयेऽहञ्च कोशदासश्च माधवीलतामण्डपं निकषा बकुलतरोरधस्तादतिष्ठाव। वामहस्तो मया कोशदासस्य स्कन्धे निहितः। भ्रमन्ती कन्दुकावती तामेव दिशं समाजगाम। चन्द्रसेनायाः कर्णे किमपि विज्ञाप्य साऽऽवां कुतूहलगर्भदृशोपचकार। परं प्रथममेवाऽहं निर्निमिषलोचनाभ्यां तामालोकयन्नासम्।

सहसाऽऽवयोर्दृष्टिसम्मिलनं सञ्जातम्। विद्युतां समूहश्चाकचक्येन महता चमत्कृतिं समाजगाम। दृष्टिसम्मिलने सञ्जाते राजसुतावपुः किञ्चित् कम्पितम्। भालपट्टश्च प्रस्वेदबिन्दुभिश्चर्चितम्। तामेव प्रियां हृदि धारयन् विकलोऽहमभूवम्। राजनन्दिन्या अपि सम्भवतस्तथैवाऽनिर्वचनीया दशाऽवर्तत। परं कथमप्यात्मानं नियम्य सा त्वरितगत्या सखीभिः परिवृता राजभवनाय प्रस्थिता।

हृदयोन्माथिनाऽतितीव्रेण शूलेनाऽतितरां व्याकुलीभूतस्य मम प्राणाः कण्ठगताः बभूवुः। मन्मथो मयि सम्पूर्णशक्त्या कोदण्डचापमाकृष्य कर्णान्तं प्रजहार। कायो मम जडीभूतः। इन्द्रियाणि शिथिलानि सञ्जातानि। मनो विह्वलताङ्गतम्। सर्वास्याऽपि विस्मृत्य तामेव दिशं मे दृष्टिर्गता यां मे प्रिया सुविशालश्यामनयना राजनन्दिनी

ह्यप्सरसामपि रामणीयकं तिरस्कुर्वाणा हृदयहारिणी समाश्रियत्।

निश्चलं निस्तब्धं तथाऽवस्थितं मां स्कन्धेन सञ्चाल्य कोशदासः सचैतन्यञ्चकार। हस्तं गृहीत्वाऽसौ मां स्वगृहं निनाय। भव्यप्रासादस्य तस्य विशालतां समृद्धिमत्तां साजसज्जाञ्चाऽवलोक्य विस्मयाभिभूतेन मया चक्षुषी विस्फारिते। मामतिथिमवलोक्य कोशदासस्य जनकोऽतितरां प्रहृष्टो बभूव। प्रचुरोत्साहेन समारोहेण मामातिथ्येनाऽनुभाव्य स विश्रामाय प्रबन्धमकरोत् दिवसश्रमक्लान्तकायोऽहं तस्मिन् मध्याह्नोत्तरसमये कन्दुकावतीं मनसि हृदये च दधानः निद्रया भगवत्योत्सङ्गीकृतः।

सायंसमये दिनमणिमण्डलेऽस्ताचलशिखरं समारूढेऽरुणप्रकाशावरक्तवर्णेषु सत्सु सकलजगद्वस्तुषु कोशदासश्चन्द्रसेनया सह मामुपजगाम। स्वल्पकालयाऽपि निद्रया विगतक्लमोऽहमुत्थाय तयोः स्वागतञ्चकार। समीपस्थितायां बृहदाकारकाष्ठपीठिकायां तौ परस्पराश्रयेणोपविष्टौ। स्मितविभूषितवदनोऽहं चन्द्रसेनामपृच्छम् -

"भद्रे ! किमियं वार्ता, कथं त्वमेतेन राजसुतेन भीमधन्वना मुक्ता ? येन त्वमेवंविधा मदोन्मत्ता प्रमदा साटोपं गर्वमुद्वहसि?"

कोशदासं करेण प्रहृत्य स्मितशोभमानवदना सा चन्द्रसेना तूष्णीमेव तस्थौ। कोशदासो मयि दृष्टिं निपात्य चन्द्रसेनामुवाच -

"सुन्दरि ! अनेनैव विधिनाऽऽजीवनं त्वया मय्यनुकम्पा विधेया।"

परं चन्द्रसेना न किमपि कथयामास। केवलं कदाचिन्मयि कदाचिच्च कोशदासे दृष्टिं व्यापारयामास। तदा मया कथितम् -

"भद्रे ! भीमधन्वनो मोक्षोपायो मया विचारितः।"

चन्द्रसेनाकोशदासाभ्यां सोत्सुकैर्नयनैर्वीक्ष्यमाणोऽहमकथयम् -

"भद्रे ! अद्भुतप्रभावमञ्जनमेकं मे पोट्टलिकायां वर्तते। अस्य नेत्राञ्जनस्य प्रयोक्ता दर्शकैर्वानर इवाऽवलोक्यते। यदीयं चन्द्रसेना मदिरेक्षणा नयनयोस्तदञ्जनं प्रयुञ्जीत, ध्रुवमेवाऽसौ भीमधन्वा वानरीमेनां द्रक्ष्यति। वानरीं ज्ञात्वा विरक्तः सन्नसावेनां त्यक्ष्यति।"

चन्द्रसेनोवाच -

"आर्य ! अहमस्मि भवतः सेविका। अतितरामनुग्रहो मयि वर्तते, येन मानवीं मां भवान् वानरीकरोति। परन्तु विरमत्वियं वार्ताऽत्रैव। भीमधन्वनो मोक्षस्योपायः सिद्ध एव। अस्माकं सर्वाणि कार्याणि साम्प्रतं सेत्स्यन्ति। मनोऽभिलाषाश्च सम्पूरयिष्यन्ते।"

मया पृष्टम् -"कथमेतत्?"

चन्द्रसेना प्राह -

"अद्य कन्दुकोत्सवानन्तरं वाटिकायां भ्रमन्त्या राजनन्दिन्या किङ्किरातपादपस्याऽधस्तात् स्थितो भवानवलोकितः। वपुषः सौन्दर्येण मन्मथं तिरस्कुर्वन्तं भवन्तमवलोक्य सा राजनन्दिनी परममनुरक्ता मुग्धा चाऽभवत्। देव्याः विन्ध्यवासिन्या आदेशः- कन्दुकावती यस्मिन् जनेऽनुरङ्क्ष्यते, स एवाऽस्य भर्ता भविष्यति। राजनन्दिन्याः विवाहानन्तरं राजसुतो भीमधन्वा भगिनीभर्तुरादेशे वर्तिष्यते।

स्वगतमनोऽभिलाषं राजनन्दिनी मामकथयत्। अहं स्वजननीं सूचयिष्यामि। जननी मे राजमहिषीं भणिष्यति। सा महाराजं कथयिष्यति। दुहितुः कामनां विज्ञाय महाराजस्तुङ्गधन्वा कन्दुकावतीं भवते प्रदास्यति। तदनन्तरं राजसुतो भवत आदेशान् पालयिष्यति। देवताया अयमेव आदेशः।

इत्थञ्च राजशासनव्यवस्थायां भवदायत्तां सत्यां भवतो बिभ्यदसौ भीमधन्वा न मामवरोद्धुं क्षमिष्यते। न च स्वेच्छाचारेण व्यवहरिष्यति। सम्प्रति द्वित्रिदिवसावधिकं मे विप्रयोगः। कथञ्चिदपि सहिष्येऽहं दुःखमेतत् तावत् कालपर्यन्तम्। पश्चादावयोर्मिलनं ध्रुवमेव।"

एतानि वचनान्युच्चार्य प्रियञ्च कोशदासं प्रगाढालिङ्गनैरुपकृत्य तस्य कपोलौ सानुरागैश्चुम्बनैरङ्कितौ विधाय चन्द्रसेना तस्मात् स्थानादगच्छत्। कोशदासेन सहाऽहं निशीथपर्यन्तं वार्तालापसुखमनुभवन्नासम्। तदनन्तरं गहननिद्रापरवशावावां सुप्तौ।

रजन्यां जागरणेन पूर्वदिवसयात्रापरिश्रमेण च प्रभातजागरणमावयोरतिविलम्बितम्। उन्नमिते सुदूरमाकाशे भास्करे सहसाऽऽवयोर्निद्रामदो व्यपगतः। अथ निर्वृतेषु प्रातःकालीनदैनिककृत्येषु मनोविनोदनायाऽऽवां तदेवोपवनङ्गतौ, यत्र दुर्गामन्दिरसमक्षं कन्दुकावती कन्दुकनृत्यमभिनिनाय।

राजकुमारो भीमधन्वाऽपि कतिपयैः सेवकैः सह तत्र भ्रमन्नासीत्। मामवलोक्य प्रसन्नमुखोऽसौ समीपमागत्याऽतिविनीतभावेन व्यवहरत्। प्रासादाय चाऽसौ मां निमन्त्रयामास। राजकुमारस्य मधुरवचनैर्वार्तालापैश्च विश्वस्तहृदयोऽहं कोशदासं पुनर्मिलनं प्रतिज्ञाय भीमधन्वना सह राजप्रासादं जगाम। तत्र मम भोजनादिव्यवस्थां विधाय तेन विश्रामस्याऽपि प्रबन्धो विहितः।

क्लान्तकायोऽहं राजकुमारनिर्दिष्टशय्यायां मृदुतूलकोमलायां शशाङ्कास्तरणाच्छादितायां शयानस्तत्क्षणं निद्रादेव्या क्रोडीकृतः सुखदस्वप्नाननुबभूव। मयाऽनुभूतम्-

"शनैः शनैः पदानि निदधती मम प्रिया समागत्य सन्निविश्य प्रगाढं मां भुजयोर्बध्नाति।"

तत्क्षणं मे निद्रा व्यपगता। विस्मयेन क्षोभसम्भृतेन मयाऽवलोकितम् -

"हस्तपादं मे लोहमयनिगडशृङ्खलाभिर्बद्धं वर्तते। राजकुमारो भीमधन्वा सप्तभिरष्टभिर्वा सेवकैः खड्गहस्तैः सह तत्र मम समक्षं तिष्ठति।"

विगतनिद्रं मामवलोक्य तर्जयन्नसौ प्राह -

"अरे दुष्ट ! भगिनीं ममोपयम्य मयि प्रभुत्वमाकाङ्क्षसे ? सम्प्रति मृत्युरेव त्वां वरिष्यति। तव दुराचारिणश्चन्द्रसेनायाश्च मध्यगतो वार्तालापो मया विदितः। ममैका सेविका वेशपरिवर्तनं विधाय सततं चन्द्रसेनया सह वर्तते। त्वया सह कोशदासस्य विश्रम्भवार्तालापेषु गवाक्षमध्यसंलग्नकर्णा सा सर्वं शुश्राव। यदि त्वं कन्दुकावतीं मम भगिनीं परिणेष्यति, अहं तव वशंवदताङ्गतस्तवाऽऽदेशान् पालयिष्यामि। तदनन्तरं त्वं चन्द्रसेनां कोशदासाय प्रदास्यति। सम्प्रति स्वाभिप्रायस्य फलं भुङ्क्ष्व।"

इति कथयित्वाऽसौ क्रूरो नृशंसो दुष्टकर्मा भीमधन्वा समीपस्थितान् सेवकान् आदिदेश -

"अस्यामेव दशायामयं दुराचरणः सुदूरे समुद्रे प्रक्षेपणीयः।"

भीमधन्वन आदेशमाकर्ण्य परमप्रसन्नास्ते सेवकाः मां स्कन्धेष्वारोप्य समुद्रतटं निन्युः। तत्र च तरणिष्वारोप्य सुदूरगभीरसागरे समुच्छलत्तरङ्गेषु प्रक्षिप्य मां ते प्रतिनिववृतिरे।

लोहशृङ्खलानिगडितोऽप्यहं कथञ्चित् पादाभ्यां हस्ताभ्याञ्च पयोनिधिजले सन्तरन् भाग्यवशादायुषः सावशेषत्वाच्च काष्ठस्थूणमेकं लेभे। तदेवोपगूहतो मे गभीरपयोनिधौ अहोरात्रो व्यतीतः। बहु विकल्पयतो ममाऽपसृते दिवसे क्षपाऽप्यपचीयत। प्रभातकाले समुदिते बालभास्करमण्डलेऽरुणायिते च बङ्गसागराम्भसि इतस्ततो मया दृष्टिर्व्यापारिता। परं दिवानिशं पयोनिधिक्षारसलिलस्नानेन च चलत्तरङ्गाघातैश्चेतस्ततः प्रक्षेपणेन संघट्टनेन च शिथिलगात्रोऽहमर्धमूर्छित इव स्थितो यमदूतागमनवेलां प्रत्यैक्षत। सहसा मया दक्षिणदिशः समागच्छन्ती काऽपि बृहदाकारा तरणिरवलोकिता। विधिनियोगेन तत्रत्यानां नाविकानामहं दृष्टिपथमागच्छम्। निकटं समागम्य, मामुद्धृत्य नौकायां समानीय नायकसमक्षं ते समुपस्थितञ्चक्रुः। ततः स्कोतराभिधानं यवननायकं ते प्रोचुः -

"नायक ! अयं कोऽपि युवा समुद्रे काष्ठस्थूणाश्रयेण सन्तरन्नायसनिगडनिबद्धोऽस्माभिर्लब्धः। ध्रुवमस्मभ्यमयं सहस्रद्वयदीनारराशिं प्रदास्यति।"

नाविकानां वचनानि श्रुत्वा मयि च दृष्टिं व्यापार्याऽसौ शोभनो यवननायकः किञ्चिज्जहास। आयसनिगडनिबद्धं मामेकतः समुपवेश्य भोजनपानादिभिरुपचकार।

वपुषि मे काचिदपि शक्ति: सञ्चचार।

किञ्चिदग्रेसरीभूतायां तरण्यां सुविशालकायो युद्धपोतोऽनेकनौकापरिवृतोऽदृश्यत। सुह्मजनपदराजकीयध्वजायुतोऽसौ पोतोऽस्मदधिष्ठाननावं प्रत्यधावत्। युद्धपोतमवलोक्य भयभीतो यवननायक: स्वतरणिं दूरं प्रणुदितामियेष। परं युद्धपोतसंलग्नाभिस्तरणिभि: झटिति मृगदंशकैरिवाऽऽक्रम्य यवनतरणि: परिवारिता। तत्क्षणमेव तत्रस्था: सैनिका: महालम्बकोदण्डेभ्य: निशितशरवर्षणं प्रारभन्त। निरुपाया: यवना अपि सुह्मवीरवारणाय कोदण्डानादाय शरविक्षेपणञ्चक्रिरे। परन्त्वसमानोभयपक्षयुद्धे बहवो यवनवीरा: पञ्चत्वङ्गता: वा व्रणिता: वा नौकायामेव वा पतिता:। अवलोक्येममुपस्थितं महाविनाशं यवननायको भालं करतलयुगलेनाऽवलम्ब्य तरण्यामेवोपाविशत्। तदाऽहं तं प्रोवाच -

"हे वीर ! मां बन्धनेभ्यो विमुक्तं कुरु। एतान्निगडानपसार्य करौ मे शस्त्रास्त्रैर्विभूषय। अहमेकलस्तव रिपून् व्यापादयिष्यामि। तव शत्रवो ध्रुवं पराजयं प्राप्स्यन्ति।"

ममौज:पूर्णवचोभि: प्रभावितोऽन्यं कमप्युपायमनवलोक्याऽसौ यवननायको बन्धनेभ्यो मां मुमोच। आयसनिगडानपनीय मां धनुषा शरसम्भृतनिषङ्गेण तीक्ष्णधारेण च खड्गेन सुसज्जितमकरोत्। तदनन्तरमहमाक्रमतो नौसैनिकान् सुह्मदेशीयान् प्रतिभटांस्तथा प्रबलशरवर्षेणाऽभिभूतांश्चक्रे यथा तेषां गतिरवरुद्धा। तत्र प्रतिभटा अपि शरवर्षणं प्रारेभिरे।

परं ममाऽऽयुधदक्षत्वप्रतिकरणे न ते क्षमा: बभूवु:। मम शरवर्षया बहव: प्रतिभटा: स्वर्गङ्गता:, परे विकलाङ्गा: सञ्जाता अन्ये च विनष्टायुधा: जाता:। तेषां कायेभ्य: प्रसरता रुधिरप्रवाहेण नीलसलिलसम्पूर्ण: सलिलनिधि: स्थाने स्थाने रक्तरेखाङ्कितो बभूव।

अस्मिन्नेवाऽवधौ सन्निकृष्टे सति तस्मिन् युद्धपोते तरसोत्प्लुत्याऽहं तमारुरोह। मम पराक्रमेणोत्साहिता: हतावशिष्टा: यवनसैनिका अपि मामन्वसरन्। तत्राऽवशिष्टान् शत्रुपक्षसैनिकान् वशीकृत्य मया पोतनायकोऽपि जीवन्नेव निगृहीत:। अरे, स तु पूर्वपरिचित: प्रतीयाय। असौ सुह्मजनपदस्याऽधिपते: सुतो युवराजो भीमधन्वाऽवर्तत।

भीमधन्वाऽपि मां परिचिकाय। प्रथमं तावल्लज्जावनतवदनस्तूष्णीमेव तस्थौ। परं सर्वत: शस्त्रसन्नद्धैर्यवनवीरै: परिवृतमात्मानमवलोक्य मे चरणयो: शिरो निधाया-ऽतिविनम्रवचोभि: प्राणभिक्षां ययाचे। तदा मया विहस्योक्तम् -

"प्रिय राजकुमार भीमधन्वन् ! विधेर्विधानं त्वयाऽवलोकितम्। त्वं मम प्राणानाम-पहरणाय सैनिकान् समादिष्टवान्। परं सम्प्रति तव प्राणा: मदायत्ता:। परं नाऽहं

प्राणांस्तवाऽपहरिष्यामि। त्वं मम प्रियायाः सहोदरो भ्राता।"

ममाऽऽदेशं परिपालयद्भिर्यवनसैनिकैरसौ भीमधन्वा दुराचरणो विश्वासघातको हस्तपादे सुदृढमुञ्जतन्तुविरचितरज्जुपाशैः बद्ध एकतो रक्षितः। विजयमदमदोन्मत्तास्ते यवनाः किलकिलायन्तो ननर्तुः। तस्मिन् युद्धे यवनतरणिः क्षतविक्षता बभूव। परं स युद्धपोतः सुविशालाकारः सर्वविधसुखसुविधायुतो रमणीयश्चाऽवर्तत। तमधिकृत्याऽहं यवननायकसहितान् सर्वान् यवनवीरान् युद्धपोतमारोढुमामन्त्रयामास। मम वीर्यं पराक्रमं साहसं शस्त्रसञ्चालनदाक्ष्यं नेतृत्वसामर्थ्यञ्चाऽवलोक्य गुणांश्चाऽन्याननुभूय यवनाः मां भृशं सम्मान्य नेतृत्वपदप्रतिष्ठया सभाजयामासुः।

मयाऽऽदिष्टाः नाविकाः युद्धपोतं दामलिप्तादिशि प्रणुनुदिरे। निगडनिबद्धो भीमधन्वाऽपि तत्राऽवर्तत। तस्मिन्नेव क्षणे सुतीव्रवेगः प्रभञ्जनः सहाहाकारं समुत्पेदे। पोतवाहिनां सुप्रयत्नेषु सत्स्वपि झञ्झावातेन पोतो विरुद्धदिशि बलान्नीतः। स्वल्पेन समयेन वयं हरितवनस्पतिपरिपूरितं द्वीपमेकं प्रकृतिरामणीकसमृद्धं सम्प्राप्ताः। सम्भवतस्तत्र भोजनार्थं फलानि मूलानि पानार्थञ्च निर्मलं मधुरं सलिलं लभ्येत, इत्याशासमन्वितैरस्माभिः पोतस्तम्भनं तत्र कृतम्। अस्मिन्नेव क्षणे प्रभञ्जनोऽपि शममवाप।

तदनन्तरं वयं सर्वे पोतयात्रिणो राजकुमारं भीमधन्वानं तत्रैव पोते स्थितं परित्यज्य शुष्कभूमिं समागताः। समक्षमेव तत्र समुत्तुङ्गशिखरः पर्वतोऽवर्तत। पर्वतशिखरादवतरन्ती जलप्रवाहेण मुक्तं हसन्ती सुशीतलाम्भःपरिपूर्णा जलधारा समुद्राम्भसि विलयमवाप। समुद्रतटवर्तिनो विशालाः शिलाखण्डास्ततो गिर्युपत्यकास्तदनन्तरञ्च विविधपुष्पफलसमृद्धाः गिरिशिखरं यावद् विस्तीर्णास्तरवः। सर्वमेतद् दृश्यमतिरमणीयं हृदयहारि च प्रतिभाति स्म। अनोकहानां स्थूलस्कन्धान् मृदुलविटपभुजैः समालिङ्गमानाश्चित्रविचित्रकुसुमभारविनम्राः वल्लर्यः शिखरपर्यन्तं समारूढाः मदहर्षभरोन्मग्नाः पुष्पाण्यवर्षन्।

रमणीयमिदं दृश्यमवलोक्याऽऽत्मानं नियन्तुमक्षमोऽहं जलधितटवर्तिप्रस्तरखण्डानुल्लङ्घ्य गिर्युपत्यकामुत्तीर्याऽधित्यकामारुह्याऽनायासमेव भूधरसानुमुदगच्छम्। शिखरदृश्यमनुपमं समीक्ष्य मनो मे प्रफुल्लम्।

शिखरे तत्र समतलक्षेत्रमध्ये शुभ्रसमकोणपाषाणखण्डैराबद्धे जलाशये सोपानपङ्क्तयोऽवरुरुहुः। निर्मलशीतलनीलसलिले शुभ्रनीलपीतारुणादिचित्रविचित्रवर्णानि पद्मान्यगणितसङ्ख्यकानि निर्मलनीलव्योम्नि निशायामगणिततारकानीव शोभन्ते स्म। हंससारसक्रौञ्चबकजलकाकादीनां वारिविहारिणां पतत्रिणां निनादैः प्रान्तराणि ध्वनिध्वा-

नितानि बभूवुः। जलाशयस्याऽपरस्मिन् पार्श्वे गगनचुम्बिस्वर्णमण्डितशिखरोज्ज्वलं भवानीपतिमन्दिरमेकं मे दृष्टिगोचरमभूत्।

शान्तपवित्रवातावरणाभिभूतोऽहमौत्सुक्यपरिपूरितहृदयो भ्रमन्नेव देवगृहमभिलक्ष्य प्राचलम्। द्वारदेशं गत्वा भगवन्तं नीललोहितं प्रणम्य सरसस्तटमुपगम्य वसनानि तटवर्तिशिलायां निधाय जलाशयमवतीर्य शीतलाम्भस्यात्मानं निमज्जयामास। तदनन्तरं जलाद् बहिरागत्य वस्त्राणि परिधाय कमलदलपुटके जलमादाय मन्दिराभ्यन्तः प्रविश्य भगवन्तं नीलकण्ठमपूजयम्। ततश्च कांश्चनाऽमृतस्वादून् कमलकन्दान् सरसबिसभङ्गानास्वाद्य श्रमक्लान्तकायो देवगृहपृष्ठप्रदेशे विश्रमाभिलाषी समुपविष्टः।

तत्र भविष्यत्कार्यक्रमविचारसरण्यां निमग्नोऽहमकस्मादेव घनघोरगर्जनाट्टहासध्वनिमाकर्ण्य ससम्भ्रममुत्थितः। पृष्ठतः परिवर्त्य मया दृष्टम् -

"अतिविशालपरिणाहो महाभयानकाकारः पुरुष एकस्तत्र राक्षसनिभस्तिष्ठति।"

ध्यानावहितचेतसा निमेषशून्यदृष्ट्याऽवलोकयन्तं मामसौ पुरुषः घनघोरगिरा प्रोवाच-

"हे मनुष्य ! जलाशयस्याऽस्य रक्षकोऽहं ब्रह्मराक्षसः। अनुमतिं विना त्वयाऽत्र स्नातं कमलकन्दाः बिसभङ्गाश्चाऽऽस्वादिताः सलिलञ्च पीतम्। वद कस्त्वम् ? कुतः कस्माच्च हेतोरत्र समायातः ?"

भयरहितोऽहं तारस्वरेण प्रावोचम् -

"सौम्य ! ब्राह्मणसुतोऽहमितस्ततो भ्रमन् भारतवर्षस्य पूर्वदिग्विभागे सुह्मजनपदराजधानीं दामलिप्तामगच्छम्। तत्र शत्रुभिर्निगृहीतो जलनिधिसलिले मरणाय पातितो यवनसांयात्रिकाणां हस्तगतो बभूव। तैः सार्द्धमहमद्याऽत्र द्वीपतटं समागतोऽस्मि। अत्र यथेच्छं पर्यटन् समुद्रतटादागम्य गिरिसानुं समारूढः निर्मलसलिलेऽभिषिक्तः शिवपूजार्चनपवित्रीकृतमानसो भोजनपानादिनिर्वृतः श्रमशिथिलसर्वाङ्गो विश्रमाभिलाषी गिरिशिखरेऽत्राऽतिष्ठम्। अकस्मादेव भवानायातः। सम्प्रति भवानेव निर्दिशतु भवतां कोऽभिलाषः ?"

ब्रह्मराक्षसोऽवदत् -

"हे पुरुष ! त्वं निर्भयो व्यवहारकुशलश्च प्रतिभासि। मम प्रश्नानामुत्तराणि समुचितानि दातव्यानि। अन्यथा त्वामहं भक्षयिष्यामि।"

अहमपि निर्भयविनीतवचोभिरकथयम् -

"सौम्य ! यत् किञ्चिदपि प्रष्टव्यं वतति, तत् पृच्छतु भवान्।"

तदनन्तरमावयोरेवंविधो वार्तालापोऽभवत् -

ब्रह्मराक्षसः -"किं वस्तु क्रूरतमं वतति ?"

अहम् - "स्त्रीहृदयम्।"

ब्रह्मराक्षसः -"गृहस्थस्य प्रियाः हिताश्च के गुणाः ?"

अहम् -"भार्यागुणाः।"

ब्रह्मराक्षसः -"का कामना बलवत्तमा ?"

अहम् -"सङ्कल्पः।"

ब्रह्मराक्षसः -"दुष्करं केन साध्यते ?"

अहम् -"बुद्ध्या।"

ब्रह्मराक्षसः -"तवोत्तरेषु कानि निदर्शनानि ?"

अहम् -"धूमिनीगोमिनीनिम्बवतीनितम्बवतीचरितान्यत्र निदर्शनानि।"

तदनन्तरं तानि चरितानि क्रमेण मया वर्णितानि।

## धूमिनी-चरितम्

अस्ति त्रिगर्तो नाम जनपदः। तस्य राजधानी चाऽपि त्रिगर्ताभिधाना त्रिषु लोकेषु विश्रुता। तत्राऽतिसमृद्धस्य शिल्पकुशलस्य पुष्करस्वामिनस्त्रयो पुत्राः समभूवन्। ते च धनको धन्यको धान्यकश्चेति नामभिः प्रसिद्धाः बभूवुः। ते त्रयः पद्मपुरवास्तव्यस्य शिल्पिनस्तिस्रः कन्यकाः परिणिन्युः। तासां नामानि क्रमशः पद्मिनी, कमलिनी धूमिनी चेत्यासन्। ते त्रयोऽपि पुष्करस्वामिनः सुताः पितेव शिल्पकलासु परमप्रवीणा अवर्तन्त।

कदाचिद् विधिनियोगाद् द्वादशवर्षं मेघानां स्वामिन इन्द्रस्य कोपेन मेघाः न ववर्षुः। भयानको दुष्कालः समुपस्थितः। भोजनाभावश्च सञ्जातः। धान्यानि न समुद्भूतानि। ओषधयः शुष्कतां गताः। पादपाः पुष्पफलपत्ररहिताः सञ्जाताः। निरभ्रे नीलाकाशे मेघानां चिह्नमपि नाऽऽलोक्यत। सरितो विरलसलिलाः बभूवुः। जनशून्येषु जलाशयेषु पङ्केषु निरुदकेषु सत्सु तलप्रदेशेषु स्फोटकाः समुत्पन्नाः। उत्सानां स्रोतस्सु जलानां लेशमात्रमपि नाऽवशिष्टम्। वनस्पतीनां कन्दमूलानि तरूणाञ्च सरसपत्राणि सुदुर्लभानि सञ्जातानि।

दुर्भिक्षभावात् समाजोत्सवाः समाप्ताः। लोकानामानन्दोत्साहाः विनष्टाः। चौर्यसाहसादिकर्माणि सर्वत्र प्रवृद्धानि। जनाः परस्परं भक्षकदृष्टिभिरवलोकयामासुः। इतश्चेतश्च सर्वासु दिक्षु पशूनां मनुष्याणाञ्चाऽपि कङ्कालकलेवराः लुठन्तोऽवालोक्यन्त। भयप्रदैश्चीत्कारैर्भाययन्तो वायसाः व्योम्नि समुत्पतन्तो दृष्टिपथं समाजग्मुः। नगराणि ग्रामाश्च जनशून्यतां प्रापुः।

धनकधन्यकधान्यकानां गृहेषु सुसमृद्धेषु प्रचुराणि धनानि धान्यानि च सङ्गृहीतान्यवर्तन्त। परं शनैः शनैः तैः सर्वाण्युपभुक्तानि। तदनन्तरं गृहाणां पशवो गोवृषभाश्वाजावयश्चाऽपि तेषामुदरगर्तेषु समाविशन्। तदनन्तरं ते दासान् दासीश्च निहत्याऽभक्षयन्। यदा तु किञ्चिदपि नाऽवशिष्टं, बालकानपि ते भक्षयामासुः।

एकस्मिन् दिवसे किमप्यन्यद् भोज्यं वस्तु नोपलभ्य तैरग्रजभार्या पद्मिनी भोजनाय कल्पिता। अन्यस्मिन् दिवसे मध्यमभ्रातृभार्या कमलिनी तेषामाहारविषया सञ्जाता। तदनन्तरं ते निश्चिक्युः - परेद्युः कनिष्ठभ्रातृभार्यां धूमिनीं ते भक्षयिष्यन्ति।

रमणीया सर्वाङ्गसौन्दर्यसम्पन्ना धूमिनी पत्युरतिप्रियाऽवर्तत। प्रियाविरहाशङ्कितो विह्वलमानसो धान्यकस्तया सह निशीथिन्याः प्रगाढेऽन्धकारे सूचिवेध्ये गृहान्निर्जगाम। तौ त्वरितगत्या प्रचलन्तौ गहनमरण्यं जग्मतुः। भार्यायाः मरणभयात् स धान्यकः स्वयं श्रान्तशरीरोऽपि पथि क्लान्तसर्वावयवां कोमलाङ्गीं प्रियां भार्यां धूमिनीं कदाचित् करमवलम्ब्य, कदाचित् क्रोडे निधाय कदाचिच्च स्कन्धमारोप्य सुदूरं वनानि बभ्राम। गहनेष्वरण्येषु यत्र कुत्राऽपि हरितवनस्पतयः समुपालभ्यन्त, तेषां फलैर्वा, पुष्पैर्वा, मूलैर्वा, पत्रैरपि वाऽऽहारजातं परिकल्प्याऽपि प्रथमं प्रियां धूमिनीं सन्तृप्तामकरोत्, पश्चाच्च किञ्चिदाहारजातं स्वयं भुङ्क्ते स्म। एवमनेकदिवसान् सञ्चलन् धान्यकः प्रियया सह त्रिगर्तनगरादतिदूरमपससार।

एवं दीर्घां यात्रां कुर्वतस्तस्यैकस्मिन् दिवसे मध्याह्नकालः समुपस्थितः। दिवाकरस्य तपनस्य सुतप्तरश्मिभिर्धरातलमतितरां ततापः। क्वचिद्धरितवनस्पतिसम्भृतप्रदेशोऽद्रक्ष्यत इत्याशासन्तानसम्भृतमानसोऽसौ धान्यकश्चलन्नेवाऽऽसीत्।

सहसा धान्यकस्य दृष्टिर्निकृत्तपाणिपादे विच्छिन्नकर्णनासिके धरण्यां विचेष्टमाने रुधिरार्द्रकाये जने निपतिता। सुमनोहराकृतिं तरुणवयसं तथाभूतां दशामापन्नं तं रुण्डमुण्डं जनं प्रेक्ष्याऽसौ करुणार्द्रचित्तः पत्न्या परामृश्य तं सव्येतरस्कन्धे निधाय प्राचलत्।

स्वल्पं मार्गमतिक्रम्य ते त्रयोऽपि प्रचुरहरितवनस्पतिसुभूषितं कन्दपुष्पफलपत्रमूल-सम्पन्नमरण्यं सम्प्रापुः। मृगव्यपशवोऽपि तत्र प्राचुर्येणाऽवर्तन्त। एकस्मिन् स्थाने किञ्चिज्जीर्णं गृहं कूपसमन्वितमवलोक्य ते तत्र निवासमकल्पयन्। दीर्घयात्रापरिश्रान्तास्ते तादृशं स्थानं स्वर्गसममन्यन्त। सर्वसुविधासम्पन्नं तत्स्थलं मत्वा धान्यकस्तत्र निवासमकल्पयत्।

अथ धान्यकस्तं प्रदेशं परितो भ्रमन् कन्दमूलफलादिकं सङ्गृह्याऽऽनयति। कदाचित् कमपि मृगादिकं व्यापाद्य भार्यायै समुपहरति। एवञ्च भार्यायाः पोषणं

कुर्वन्नसौ तं रुण्डमुण्डमपि सेवते। इङ्गुदीतैलादिपरिचर्यया पोषकबलवर्धकामिषशाकादिभक्षणेन च हस्तपादरहितोऽपि जनोऽसौ कतिपयेष्वेव दिवसेषु रोपितव्रणः सुपुष्टशरीरोऽभवत्।

एकस्मिन् दिवसे आहारान्वेषणार्थं सुदूरं निर्गते धान्यके जीर्णगृहे सा पतिप्राणा धूमिनी निकृत्तपाणिपादं रुण्डमुण्डं सुपुष्टशरीरं मनोरमावयवमवलोक्याऽनङ्गशरप्रहताऽतितरां कामवासनयाऽभिभूता बभूव। रिरंसया सा रुण्डमुण्डमुपजगाम। रुण्डमुण्डेन बहुशो निराकृताऽपि प्रबलरतिकामुका सा बलात्कारेण तस्मिन्नरीरमत्। रतिक्लमश्रान्तकाया च जीर्णगृहाभ्यन्तरं प्रविश्य शयनमधिशिश्ये।

तदनन्तरमाहारसामग्रीचयसमन्वितं सुदूरादायान्तं मार्गश्रमखिन्नशरीरं भर्तारमवलोक्य सा दुराचारिणी धूमिनी पर्णशयने शयाना शिरोरुग्व्याजेनाऽऽर्तरवेणाऽस्वानीत्। स्नेहार्द्रहृदयं भर्तारं समीपमागतं कुशलं पृच्छन्तं सा कूपात् सलिलमानेतुं प्रार्थयामास। सोऽपि वराको धान्यको वनपरिभ्रमणपरिश्रान्तकायोऽपि प्रियाया अनुरोधात् करकं रज्जुञ्चाऽऽदाय कूपं गतः। कुपाज्जलमुदञ्चन्तमेव तं सा स्वैरिणी धूमिनी पृष्ठतो गत्वा प्रणुद्य कूपेऽपातयत्।

"यमलोकं गतो मे भर्ता" इति मत्वा सा धूमिनी रुण्डमुण्डं स्कन्धे निधाय देशान्तराय प्रस्थिता। स्वल्पेन समयेन सा ग्राममेकमगच्छत्।

रुण्डमुण्डं प्रणयिनं विकलेन्द्रियं स्कन्धमारोप्य देशाद् देशान्तरं भ्रमन्तीं तामवलोक्य ग्रामे ससम्भ्रमं कोलाहलः प्रसृतः। काचित् पतिव्रता सती विकलाङ्गं हस्तापादरहितं परिणेतारं स्कन्धेनोद्वहन्ती पातिव्रतधर्मप्रमाणं निदर्शयन्ती भ्रमति। लोके पूजिता सत्कृताऽधिगतविविधोपहारा प्राप्तभोजनवसनाभरणा सा ग्रामाद् ग्रामान्तरं देशाद् देशान्तरं बभ्राम। एकेन सद्गृहस्थेन तस्यै सुघटिता शकटिकाऽपि प्रदत्ता। पतिव्रतां नारीं पूज्यतमामलौकिकगुणविभूषिताञ्च सम्मानयन्ति जनाः।

पातिव्रतधर्मपाखण्डिन्यास्तस्याः यशःपताका ग्रामेषु नगरेषु जनपदेषु च सततं सर्वासु दिक्षु प्रस्फुरिता। सम्प्रति रुण्डमुण्डं शकटिकायामारोप्य स्वयमेव वाहनभूतौ बलीवर्दौ प्रचोदयन्ती सा श्रीपुरं नाम नगरं विधिवशात् सम्प्राप्ता। नागरिकास्तां बहुविधं सच्चक्रुः। नगरप्रशासनेन सुपूजिता सा तत्रैव निवासाय मतिञ्चक्रे।

नागरिका अपि तां धूमिनीं तत्र नगरे निवासाय प्रार्थितवन्तः। सम्मिल्य सर्वे ते तस्यै नातिवृहन्नातिस्वल्पं सुघटितं गृहमुपजह्रुः। गृहस्थैर्जनैस्तयोः जीविकायै मासिकवृत्तिर्निर्धारिता। तदनन्तरं सा कपटपतिव्रता धूमिनी सविलासं श्रीपुरनिवासिनी सञ्जाता। श्रीपुरनिवासिनो जनास्तां सततं देवीमिव पूजयन्ति स्म।

इतस्तु गभीरे कूपे पतितोऽपि धान्यकः कटिदघ्नजलभावान्न पञ्चत्वङ्गतः। कटिदघ्ने जले तिष्ठन्नसौ तारस्वरेण सहायतायै भृशञ्चक्रन्द। विधिनियोगाद् वणिजां सार्थः कश्चित्तेन मार्गेण गच्छन्नासीत्। जलाभिलाषेण केचन यात्रिकाः कूपमुपजग्मुः। धान्यकस्याऽऽक्रन्दमाकर्ण्य ते तं कूपाद् बहिरुदाहरन्। तदनन्तरं तैर्वणिग्भिः सार्द्धं परिभ्रमन्नसौ धान्यको विधिनियोगाच्छ्रीपुरं समाससाद।

श्रीपुरस्य राजमार्गेषु किङ्कर्तव्यविमूढः पर्यटन्नसौ धान्यको धूमिन्याः दृष्टिपथ-मायातः। वातायनाद् बहिर्नगरकार्यजातं विलोकयन्ती सा भर्तारमवलोक्य तं परिचिकाय। क्वचिद् रहस्यं मम न भिद्येतेति शङ्कया सा तारस्वरेण चुक्रोश। सा प्रोवाच -

"अयमेवाऽसौ पापीयान् दुराचरणो जनो येन मे भर्ता विकलाङ्गो विहितः।"

धूमिन्या आक्रन्दमाकर्ण्य तद्वचनविश्वस्ता अतितरां प्रकुपिताः श्रीपुरनागरिकास्तं दोषरहितमपि धान्यकं निगृह्य नगरन्यायाधिकरणं निन्युः। सङ्क्रुद्धो न्यायाधीशः समादिदेश -

"हस्तपादेन लोहशृङ्खलाभिर्बद्धोऽसौ पापीयाञ्जनोऽपराधी बध्यभूमौ समानीय शिरसा विच्छेदनीयः।"

धान्यकस्य हस्तौ पृष्ठतः शृङ्खलाभिर्बद्ध्वा बलादाकर्षन्तः घातकास्तं बध्यभूमिं निन्युः। नागरिकाणां महान् सम्मर्दोऽप्यौत्सुक्यभराक्रान्तो बधिकाननुजगाम। दुर्भाग्यहता धूमिन्यपि दृश्यमेतदवलोकयितुं तानन्वगच्छत्। न्यायाधीशोऽपि सहयात्री बभूव।

बध्यभुवमानीतो धान्यको धूमिनीमवलोक्य न्यायाधीशमवदत् -

"श्रीमन्! मृत्युपूर्वनिवेदनं मम शृणोतु भवान्। यदि मयाऽस्याः पतिव्रतायाः पतिः हस्तपादकर्णनासिकाभिर्विकलाङ्गो विहितस्तदा दण्डोऽयं मयि समुचितः। परं भवताऽसौ विकलाङ्गोऽपि जन एकवारं गभीरं प्रष्टव्यः। अहं तदपराधी वर्ते न वा वर्ते। यद्यसौ मां सापराधमेकवारं कथयति, तदाऽहं ध्रुवं वधदण्डेन दण्डनीयः।

धान्यकस्य वचनानि निशम्य न्यायाधीशः पतिव्रतायाः भर्तारमानेतुमादिदेश। झटित्येव नागरिकाः धूमिनीगृहं गत्वा तं पतिव्रताभर्तारं रुण्डमुण्डं स्कन्धेष्वारोप्य बध्यभुवमानिन्युः। घटनास्थलं समानीतो रुण्डमुण्डो धान्यकस्य तामवस्थामवलोक्य नयनजलैः प्रसरद्भिः धरणीमार्द्रयन् कथमपि लुठन्नेव परोपकारिणश्चरणयोर्निपत्य सकरुणकण्ठं विललाप। क्षमाञ्च ययाचे। न्यायाधीशेन पृष्टोऽसौ धान्यकस्योपकारान् सविस्तरं वर्णयामास। तेन प्रोक्तम् -

"धान्यकोऽयं परोपकारी सदाचारी पुण्यशाली करुणार्द्रहृदयो वर्तते। परमियं धूमिनी पुंश्चली स्वैरिणी दुराचारिणी चाऽस्ति। वासनाभिभूतयाऽनया निजप्राणरक्षको भर्ता

कूपे निपातितः।"

तस्याः दुराचाराणां गाथा रुण्डमुण्डेन सविस्तरं वर्णिता।

रुण्डमुण्डस्य कथां निशम्य न्यायाधीशो रोषेणाऽऽरक्तनयनो बभूव। तत्रोपस्थिताः सर्वे नागरिकाः धान्यकं प्रशशंसुः। दुराचारिणीं पापकारिणीं पुंश्चलीं पतिद्रोहिणीं धूमिनीं ते धिक्चक्रुः। कुपितो न्यायाधीशो धान्यकं बन्धनाद् विमोच्य पलायनप्रयासकारिणीं धूमिनीं मृत्युदण्डेनाऽदण्डयत्। धान्यकोऽयं सम्प्रति श्रीपुरे निवत्स्यतीति, धूमिन्यधिष्ठितं गृहं नागरिकैःधान्यकनिवासाय सुनिश्चितम्। तदनन्तरं धान्यकः सदाचारिणीं कामपि तरुणीमुपयम्य सुखेन श्रीपुरे न्यवसत्।

अतोऽहं ब्रवीमि - "स्त्रीहृदयमतिक्रूरमिति।"

मया वर्णितां रुचिकरीं नीतिगर्भितां कथां निशम्याऽतितरां प्रभावितहृदयो ब्रह्मराक्षसो गोमिनीकथायै निवेदयामास। अहमपि गोमिनीचरितं वर्णयन् भार्यागुणानेवं प्रावोचम्-

## गोमिनीचरितम्

दक्षिणभारते द्रविडजनपदस्य राजधानी काञ्ची धनधान्यसमृद्ध्या शिल्पोद्योगैः विद्यया राजनयेन च जगति सर्वाण्येव नगराण्यतिशेते। तत्र देवभद्राभिधानोऽगणितधन-सम्पत्त्यधिष्ठाता कोटिकोटिसुवर्णराशिस्वामी श्रेष्ठी न्यवसत्। तस्य पोताः द्वीपद्वीपान्तरेषु सार्थाश्च धरायां सकलजगति विचरन्ति स्म। तस्यैकलः सुतः शक्तिभद्रो बभूव। शनैः शनैश्चन्द्र इव तारुण्येन शुक्लपक्षे वर्धमानोऽसौ शक्तिभद्रो द्वाविंशतिवर्षीयो बभूव। विभिन्नेभ्यः स्थानेभ्यो विवाहप्रस्तावास्तस्मै प्रस्तूयन्ते स्म। विवाहयोग्यं वयःप्रपन्नानां तरुणीनां चित्ताकर्षकरीणां लावण्यगुणेनेव विरचितानां समृद्धगृहकन्यकानां संरक्षकाः शक्तिभद्रस्य गृहं परितश्चेरुः। परन्तु शक्तिभद्रः कमपि सम्बन्धं न स्वीचकार। जनकेन भृशं समवबोधितोऽप्यसौ कथमपि केनचिदपि प्रस्तावेन न परितुतोष। तेन कथितम् -

"पितः ! अतिसमृद्धिशालिगृहकन्यकानामानयनेन को लाभः ? स्वयमेव वयमगणितधनसम्पत्तिस्वामिनः। अतिसौन्दर्यसम्पन्ना सद्वंशजा कन्याऽप्यननुगुणा किं सुखं प्रदास्यति ? दुःखदैव सा भविष्यति। अपरिचितजनैरानीताः परिणयप्रस्तावाः कथं विश्वसनीयाः ? परप्रत्ययादाहृता वधूर्न कथमपि मह्यं रोचते। अहं स्वयमेव गुणवतीं वधूमन्विष्य परिणेष्यामि।"

सुदीर्घकालमेवं कथयन्तं शक्तिभद्रं निरुपायः श्रेष्ठी प्रोवाच-

"वत्स ! वधूविहीनं गृहं न मह्यं रोचते। त्वं स्वयमेव गत्वा वधूमन्विष।"

पित्रा तथाऽनुमतः शक्तिभद्रः कार्तान्तिकवेषधारी भूत्वा सहस्रसुवर्णधनराशिमादाय पोट्टलिकानिबद्धधान्यप्रस्थो यात्रायै निर्जगाम। यत्र कुत्रचिदपि समागतं तं जनाः समवेताः भविष्यद्वृत्तान्तं पप्रच्छुः। लाक्षणिकविद्याभिज्ञेन तेन प्रोक्तानि भविष्यद्विषयक-कथनानि प्रायशः सत्यानि भवन्ति स्म। अतस्तस्य ज्योतिर्विद्यायाः परा प्रसिद्धिः प्रसृता। स्थानस्थानेषु जनाः भविष्यज्ज्ञानाय तं पर्यवारयन्। विवाहयोग्यकन्यका-नामभिभावका अप्यस्मै भविष्यदधिगन्तुं कन्याः प्रदर्शयाञ्चक्रुः।

शक्तिभद्रो यत्र क्वचित् सल्लक्षणसमन्वितां सौन्दर्यगुणसम्पन्नां सवर्णामनुगुणां कन्यां पश्यति, शालिप्रस्थपोट्टलिकां प्रदर्श्य पृच्छति -

"भद्रे ! किमनेन शालिप्रस्थेन सतृप्तं मामभ्यवहारयितुमर्हसि ?"

परन्तु विहस्य सा कन्या कथयति -

"कथमनेन शालिप्रस्थेन गुणवद्भोजनस्य सम्भावना ?"

एकस्मिन् दिवसे शक्तिभद्रः पर्यटन् कावेरीतटमनुगच्छन् समन्तपुरं नाम लघुपुरं सम्प्राप। सरितस्तीरे वितर्दिकायां समुपविष्टं तं स्नानाभिलाषिणो देवोपासकाश्च भक्तजना अपश्यन्। वितर्दिकायां स्थितं कार्तान्तिकं सामुद्रिकविद्यालक्षणसमन्वितमवलोक्य भविष्यज्ज्ञानाय बहवो भक्तजनास्तमुपाजग्मुः।

तत्रैकेन वयोवृद्धयुगलेन सहाऽष्टादशवर्षदेशीयां रूपवतीं सल्लक्षणसम्पन्नां कन्यामवलोक्य शक्तिभद्रस्य चित्तमाकृष्टं बभूव। एकैकशः समुपस्थितजनानां शारीरिकलक्षणानि संलक्ष्याऽसौ तेषां भविष्यमकथयत्। तस्य वृद्धयुगलस्याऽपि वारः समायातः। गोमिनीनाम्न्याः निजकन्यायाः विवाहविषयकं प्रश्नं वृद्धा पप्रच्छ।

शुभलक्षणसमन्वितां कन्यां निजयोग्यां विलोक्य शक्तिभद्रो मनसि सन्तुष्टो बभूव। शारीरिकलक्षणैर्बाह्यचिह्नैश्च सा तरुणी तथैव गुणसम्पन्ना प्रतीयाय, यथा शक्तिभद्रोऽभिललाष। सर्वाण्यङ्गानि तस्याः सुघटिनानि समुचितानुपातवर्तीन्यासन्। कायेन नातिदीर्घायाः नातिह्रस्वायाश्च तस्यास्तन्वङ्ग्याः करतलाङ्गुलयः शतदलपटलानी-वाऽरुणवर्णा आसन्। तत्र यवमत्स्यकमलकलशादिमङ्गलरेखानामङ्कनान्यभवन्। करतलसमुदिताभिः रेखाभिः सा प्रतिभाशालिनी विद्याविभूषिता धनवती दीर्घायुषा सम्पन्ना प्रतिभाति स्म। सरलशुभ्रवसनावृताऽपि साऽद्भुतमाकर्षणं विकिरति स्म। विरलभूषणावयवाऽपि वदनेऽसाधारणं प्रभावशालि च तेजो दधार।

कन्यायाः सौन्दर्येण बाह्यशारीरिकलक्षणैश्चाऽतितरां प्रभावितो विस्मितः सन्तुष्टः प्रहृष्टान्तरात्मा च शक्तिभद्रः पुनः गुणकुलशीलपरीक्षायै कन्यायाः पितरमुवाच -

"श्रीमन् ! मया कन्यालक्षणेष्वितोऽप्यधिकं विचारणीयम्। अतो भवद्भ्यां सायन्तने

समयेऽत्राऽऽगन्तव्यम्। रिक्तसमयोऽसौ भविष्यति, अतः सविस्तरं सर्वं कथयिष्यामि।"

तदनन्तरं स्वगृहपरिचयं दत्त्वा तद् वृद्धयुगलं जगाम।

स्वल्पसमयानन्तरं गतेषु स्नानाभिलाषेषु देवपूजकेषु भक्तजनेषु समुपस्थिते चैकान्ते स शक्तिभद्रः कार्तान्तिकरूपं परित्यज्य स्नानध्यानादिनिर्वृतो वणिजो वेशं धृत्वा नगराय प्रस्थितः। तेन स मार्गोऽवलम्बितो यत्र तस्याः कन्यायाः गृहमवर्तत। शक्तिभद्रेणाऽवलोकितम् -

"विशालं परं स्थाने स्थाने विशीर्णं गृहं वर्तते। गृहे न कश्चित् प्रमोदभरो दृश्यते। प्रमुखद्वारकपाटं पिहितमस्ति।"

कमपि जनं किमपि न कथयित्वाऽसौ विपणिं गत्वा वणिजमेकं तद्गृहविषयकं पप्रच्छ।

वणिगसौ प्रोवाच -

"कदाचिदसौ वृद्धजनोऽतिसमृद्धिशाली नगरश्रेष्ठिपदप्रतिष्ठितो बभूव। तस्य व्यापारिकपोताः देशदेशान्तरेषु सन्तरन्त आयात-निर्यातव्यापारेषु संलग्नाः सर्वासु दिक्षु परिबभ्रमुः। परं विधेर्वैपरीत्यं को जानाति ? भाग्यक्रमेण तस्य पोताः सामुद्रिक-प्रभञ्जनैर्भग्नाः, सागरदस्युभिर्वा लुण्ठिताः। इत्थं विनष्टे धने उत्तमर्णैरादातृभिर्ऋणशोधनार्थं पौनःपुन्येनाऽनुरोधाः विहिताः। अधमर्णैः दातृभिः ऋणशोधननिषेधः कृतः।

सर्वं भाग्यस्यैव दोषः। यो जनः कस्मिन्नपि समये जनानां सहस्रं प्रतिदिनं पालयति स्म, अद्य स्वपरिवारस्याऽपि पालनं तस्य दुष्करम्। तस्यैका सन्ततिर्विवाहयोग्या कन्या परमरूपवती गुणवती सर्वसल्लक्षणसम्पन्ना कुलीना वर्तते। योग्यपात्राय तां समर्प्य वानप्रस्थधर्ममङ्गीकृत्य भार्यया सह वने वत्स्यामीति तस्य विचारः।"

कुलशीलविषयकं कन्यायाः विज्ञाय शक्तिभद्रः पुनः कावेरीतटमागम्य कार्तान्तिकवेशं धृत्वा देवमन्दिरसमीपं वितर्दिकायां समुपविष्टः। सा कन्या सवर्णा सत्कुलप्रसूता चाऽवर्तत। परं तस्याः गुणानामपि परीक्षा करणीया।

सायंसमये वृद्धयुगलं पुनस्तत्राऽऽजगाम। शक्तिभद्रः कन्याविषयकं किञ्चित् कथयित्वा कन्यां तामुवाच -

"भद्रे ! लक्षणैस्त्वं प्रतिभाशालिनी बुद्धिमती गुणवती च प्रतिभासि। मम पोट्टलिकायामिदं शालिप्रस्थं विद्यते। किं त्वमनेन शालिप्रस्थेन मां गुणवता भोजनेन सन्तर्पयितुं क्षमा ?"

अभिप्रायगर्भितां दृष्टिं मातरि व्यापार्य सा कन्या गोमिनी सुकोमलमरुणवर्णमञ्जलिं शक्तिभद्रस्य पुरतः प्रसार्य स्वीकृतिमभिव्यञ्जितवती। शालिपोट्टलिकां तस्या अञ्जलिमध्ये

धृत्वा शक्तिभद्रः पुनः प्रोवाच -

"भद्रे ! श्वोऽहं मध्याह्नसमये तव गृहं भोजनायाऽऽगमिष्यामि।"

तदनन्तरं सा कन्या मात्रा पित्रा च सार्द्धं गृहाय प्रस्थिता। शक्तिभद्रोऽपि विस्मृतनिमेषाभ्याञ्चक्षुर्भ्यां तां तावन्निरीक्षाञ्चक्रे यावत् सा नगरभवनराजिभिर्नान्तर्हिता।

गृहं गत्वा गोमिनी पोट्टलिकामुद्घाटयामास। तत्र सा शालिधान्यान्युत्तमकोटिकान्यपश्यत्। प्रातः सा धान्यान्यपमृज्य धूल्यादिमालिन्यं दूरीकृत्य शिलास्तरे प्रासार्य शुष्कतां निनाय। तदनन्तरमुलूखले काष्ठमुसलेन सृमृदु सङ्घट्याऽखण्डैरेव तण्डुलैस्तुषं पृथक् चकार। ततश्च धात्रीमाहूय तुषचयं दत्त्वा जगाद् -

"भद्रे ! गुणशाली तुषराशिरेषः स्वर्णकारप्रयोगयोग्यः। एतेन विभूषणानां मृजाक्रियां ते सम्पादयन्ति। तुषचयेन कश्चिदपि स्वर्णकारः काश्चित् कपर्दिकास्तुभ्यं प्रदास्यति। कपर्दिकाविनिमयेन त्वया शुष्ककाष्ठानि मृन्मयी हण्डिका शरावयुगलमिति सामग्री समाहरणीया।"

धात्र्या तत्सकलं कार्यजातं निर्व्यूढम्।

तदनन्तरं सा गोमिनी काष्ठमये उलूखले तण्डुलान् निधाय लोहपत्रावृतखदिरकाष्ठरचितमुसलेन सम्मर्द्य किञ्चिदरुणवर्णं चूर्णं पृथक् चकार। तच्च चूर्णं शूर्पेणोत्क्षेपणावक्षेपणं कृत्वा शोधयित्वा ररक्ष।

मध्याह्नसमये कार्तान्तिकोऽसौ समागन्ताऽऽसीत्। तदागमनसमयात् पूर्वमिव गोमिनी तण्डुलेभ्यः पृथक्कृतमरुणवर्णं चूर्णं हण्डिकायां पक्त्वा मण्डं कल्पयामास। तदनन्तरं चूल्हिकायामर्धदग्धानि काष्ठानि निर्वाप्य कोकिलान् कल्पयामास। कोकिलान् तण्डुलचतुर्थांशञ्च धात्र्यै दत्वा सा प्रोवाच -

"विपणिं गत्वाऽस्य विनिमयेन त्वया लवणवेषवारतैलघृतवैदलादिसामग्रीचयो यथासमयमानेयः।"

गोमिन्या आदेशं परिपालयन्ती सा धात्री कोकिलतण्डुलविनिमयेन सकलं सामग्रीचयमानिनाय।

मध्याह्नसमये ज्येष्ठमासस्य सन्तपति सुतीक्ष्णकिरणैस्तपने मध्याकाशे, सन्तपत्सु च जगति सर्वेषु प्राणिषु प्रखरातपेन, शक्तिभद्रो कार्तान्तिको गोमिनीगृहद्वारं समागम्य लोहार्गलां खटखटयामास। धात्री तरसा धावन्ती द्वारमुद्घाटयामास। गोमिन्याः जननी जनकश्च प्राघुणिकस्य स्वागताय द्वारि समुपस्थतुः। शक्तिभद्रो स्वागतेन सह गृहाभ्यन्तरं समानीतः। महार्घसाजसज्जाचयविरहेऽपि बृहदाकारप्रकोष्ठाः सुरुचिपूर्णरीत्या सुशोभिता अवर्तन्त। स्वच्छता तत्र सर्वत्र समदृश्यत।

एकस्मिन् सुशीतले कक्षे मुहूर्तं विश्रम्य सोऽतिथिः स्नानार्थं स्नानागारे समानीतः। घर्मसन्तप्तोऽसौ शक्तिभद्रो मृन्मयकलशेषु सन्निहितस्य सुशीतलजलस्याऽभिषेकेन परमं सुखं लेभे। स्नानानन्तरं गोमिनी तण्डुलारुणचूर्णपरिकल्पितं मण्डं वेषवारादिद्रव्यैरवधृत्य लवणेन संयोज्य शक्तिभद्राय प्रेषयामास। मण्डं पीत्वा शक्तिभद्रस्य क्लमः सकलो व्यपगतः। शरीरे चाऽसौ प्रफुल्लतामनुबभूव।

तदनन्तरं शक्तिभद्रो भोजनशालां समानीतः। तत्र पीठिकायामेकस्यां भोजनसामग्री परिष्कृत्य सन्निहिताऽवर्तत। घृतवेषवारविधृतरससम्पूर्णः शरावस्तत्राऽवर्तत। एकस्मिन् शरावे सुशीतलजलं पानीयं तत्राऽवर्तत। भोजनमिदमुपभुज्य शक्तिभद्रस्तथा सन्तृप्तिमनुबभूव यथा षट्त्रिंशद्विधभोजनैरपि सुदुष्कराऽऽसीत्। भोजनमनु गोमिनीपरिकल्पितस्वच्छमृदुशयनेऽसौ सुष्वाप।

दिवसस्य तृतीये प्रहरेऽस्तङ्गमितप्राये भास्करे स्वप्नोत्थिते शक्तिभद्रे गोमिन्याः पितरौ तत्र समुपस्थितौ बभूवतुः। स्वागतेनाऽनेन शक्तिभद्रस्य चेतः प्रफुल्लमासीत्। गोमिनीमाहूय तस्याः करतलभालपट्टचरणादिगात्ररेखानामवलोनस्याऽभिनयं कृत्वा कार्तान्तिकवेषधारी शक्तिभद्रो जगाद -

"भद्र ! कन्येयमतिसौभाग्यशालिनी। सुसमृद्धस्य सुप्रतिष्ठितस्य च कुलस्य वधूरियं भविष्यति। विवाहयोगोऽपि सन्निकटमेव वर्तते।"

कार्तान्तिकस्य वचनानि निशम्य गोमिन्याः पितरौ प्रफुल्लहृदयौ विकसितवदनौ बभूवतुः। गोमिनी चाऽपि हृदये लज्जाविमिश्रं सुखमनुभवन्ती आरक्तकपोला दक्षिणचरणाङ्गुण्ठनखेन भुवमवलिखन्ती मुखमवनमयामास।

तदनन्तरं शक्तिभद्रस्त्वरितगत्या समन्तपुरात् प्रस्थानं कृत्वा काञ्चीं प्रपद्य पितुश्चरणयोः प्रणनाम। यात्रावृत्तान्तं संश्राव्य सोऽकथयत् -

"पितः ! समन्तपुरस्य सा सद्वंशजाता सद्गुणलक्षणसम्पन्ना कन्या गोमिनी अस्मत्कुलवधूपदयोग्या।"

देवभद्रोऽपि सुतस्य मनोबन्धं प्रियं बहु मन्यमानः गोमिन्याः कुलशीलविषयकं परिचयं विस्तरेणाऽधिगम्य तां कुलवधूं विधातुं निश्चिकाय।

विवाहस्य सकलान्यनुष्ठानानि महता समारोहेण सम्पन्नानि। शक्तिभद्रस्य भार्या देवभद्रकुलवधूः काञ्चीनगरीं समायाता। अत्र सा व्यवहारकुशलतया सेवया व श्वश्रूं श्वसुरञ्चाऽन्यान् गृहसदस्यान् परिजनांश्च स्वायत्तीचकार। आलस्यं परित्यज्य सर्वान् सेवमाना सा गृहकार्येषु दत्तावधाना बभूव। व्यवहारकुशलता स्वभावसारल्यं परदुःखकातरता वृद्धजनानां समादरः बालकेषु स्नेहो भर्तरि भक्तिश्च तस्याः स्वाभाविकाः

गुणा अवर्तन्त। एभिर्गुणैः सा सर्वेषां सम्मानास्पदतां ययौ। श्रेष्ठी श्वसुरो देवभद्रो भर्ता शक्तिभद्रो वा तदनुमतिं विना न किमपि कार्यं करोति स्म।

गोमिनीचरितमेव संश्राव्य तं ब्रह्मराक्षसमहमवोचम् -

"अतोऽहं ब्रवीमि - भार्यागुणा एव हितकारिणो भवन्ति।"

गोमिनीवृत्तान्तं निशम्याऽतितरां प्रहृष्टमानसो ब्रह्मराक्षसो निम्बवतीकथाश्रावणायाऽनुरुरोध। मयाऽपि सा कथा कथयितुमारब्धा -

## निम्बवतीचरितम्

पश्चिमभारतस्य सौराष्ट्रप्रदेशे सागरतीरे बलभीति नाम्ना प्रथितं मनोरमं समृद्धञ्च पत्तनं वर्तते। तत्र गृहगुप्तो नाम वणिजामधिपतिः श्रेष्ठी निवसति स्म। द्वीपद्वीपान्तरेषु सञ्चरद्भिर्व्यापारिकपोतैरायातनिर्यातैरसौ तथाभूतां धनसम्पत्तिमर्जयामास, यथा धनपतेः कुबेरस्याऽप्यैश्वर्यं तुच्छं प्रतिभाति स्म। गृहगुप्तस्य सुता रत्नवती शीलसौन्दर्यादिगुणैर्विश्वस्य समुज्ज्वलं रत्नमिव प्रथिताऽभवत्।

बलभ्याः शतक्रोशान्तराले दक्षिणदिशि मधुमतीति नाम्ना प्रथितायां नगर्यां समुद्रभद्रो नाम सार्थवाहः कोटिकोटिधनरत्नस्वामी अवर्तत। समुद्रभद्रस्यैकलं सुतं बलभद्रं स्वकन्यायै योग्यं वरं विदित्वा तत्कुलं धनसम्पत्तिविभवञ्च स्ववंशानुरूपं विज्ञाय गृहगुप्तो निजां गुणशीलां नवयौवनविभूषितां कन्यां रत्नवतीं तस्मै प्रददौ। रत्नवती पत्या सार्द्धं श्वसुरालयं सम्प्राप्ता।

मिलनस्य प्रथमनिशायां बलभद्रो भार्यायाः विमुखोऽजायत। नवविवाहिता रत्नवती नवसङ्गमे सुरते लज्जया विरागमुपदर्शयन्ती विघ्नवती बभूव। रत्नवत्याः व्यवहारेणाऽतिरुष्टो बलभद्रो भार्यायाः गर्वमेव तद्धेतुममन्यत। सा न मयि स्निह्यतीति भावनया कोपकषायितमानसोऽसौ कक्षाद् बहिर्निर्जगाम। विवाहानन्तरं पितृगृहं प्रयातायां रत्नवत्यां द्विरागमनाय नाऽसौ पुनः श्वसुरालयं बलभीपत्तनं जगाम। पितुरादेशं मित्राणामनुरोधं श्वसुरप्रार्थनाञ्चाऽप्यसौ तिरश्चकार।

कतिपयसमयानन्तरं बलभद्रनायकत्वे व्यापारिकक्रेयविक्रेयवस्तून्यादाय समुद्रभद्रस्य सार्थो मधुमत्याः बलभीपत्तनं गतः। एकस्मिन् दिवसे पत्तनस्य प्रमुखविपणिमार्गेण पादाभ्यां गच्छन्तं भर्तारं बलभद्रं गृहछदिषि स्थिता रत्नवती ददर्श। परिणेत्रा परित्यक्तोपेक्षिता च सा सदैव मनस्यदूयत। केचन जनाः तां दुर्लक्षणामभाग्यसंच्छन्नां पितृगृहेऽपि कथयन्ति स्म। निम्बवत्कटुस्वभावत्वादेवेयं पत्या परित्यक्तेति केचन वदन्ति स्म - "नेयं रत्नवती अपितु निम्बवती वर्तते।"

इत्थं सर्वेषां पितृगृहसम्बन्धिनामवहेलनापात्रं सखीभिश्चाऽप्युपेक्षिता रत्नवती मनस्युत्पीडिताऽवर्तत। किमहं करोमि, क्व गच्छामि, किं मे भविष्यतीति चिन्तासन्तानैः सर्वदा मनसि वचसि काये साऽदूयत।

रत्नवत्याः प्रतिवेशिनी प्रातिवेशिकगृहस्वामिनः श्रेष्ठिनः सुता कनकवती तस्याः बालवयस्या स्नेहमयी समवर्तत। परस्परं प्रगाढसौहार्दसम्बन्धे उभे अपि वयस्ये सुखदुःखप्रश्नानुयोगभागिन्यौ आस्ताम्। कनकवती सम्प्रत्यपि अनूढाऽऽसीत्। अथ कदाचिदुभे बालवयस्ये मुहूर्तं रहस्यवार्तालापेषु तस्थतुः। इदमेव रत्नवत्याः जीवने सुखमात्रमवशिशेष।

परिणेतारं विपणिमार्गेणाऽधो गच्छन्तं विलोक्य रत्नवत्याः हृदयं शोकेन, क्षोभेण च परिपूर्णं सञ्जातम्। विश्वसनीयामेकां सेविकां प्रेष्य सा बलभद्रस्य सकलां व्यापारिकगतिविधिमजानात्। बलभद्रो दश दिनानि बलभीपत्तने निवत्स्यति।

रत्नवत्याः गृहे वृद्धैका संन्यासिनी प्रायशः समागच्छति स्म। रत्नवत्याः सा बहुसम्मानास्पदा बभूव। परेद्युः समागतां संन्यासिनीं रत्नवती निर्मक्षिके चैकान्ते प्रकोष्ठे समानीय पादयोः शिरो निधाय सदीर्घोच्छ्वासं सगद्गदं प्रस्फुटितस्वरं रोदितुं प्रवृत्ता। प्रवहद्भिरश्रुभिः रुदन्त्याः रत्नवत्याः शिरसि समाश्वासनपूर्वं करं निधाय सा संन्यासिनी रुदनकारणं पप्रच्छ। रत्नवती प्रोवाच -

"मातः ! जानात्येव भवती, परिणेत्रा तिरस्कृता परित्यक्ता चाऽहं दीर्घकालात् पितृगृहे वसामि। पतिगृहे तिरस्कृताऽसम्मानिता च नारी पितृगृहेऽप्यनादरपात्रं भवति। दशमासं गर्भे धारयन्ती माताऽपि सततं तां सुतामवहेलयत्युपेक्षते च। ईदृशीनां भाग्यरहितानां नारीणां जीवनधारणमपि मरणतुल्यमेव। पुटपाक इव दह्यमानानां तासां जीवनं मरणादपि कष्टकरमेव। कुलवधूनां तत्कष्टं सर्वदुःखेभ्योऽतिरिच्यते। प्रज्ज्वलन्निदर्शनञ्चाऽहमेव भवत्समक्षं तिष्ठामि। भवती मे जननीसमा, मयि स्नेहसम्भृतभावा वर्तते। अतः कोऽपीदृश उपायो विधेयो येन मे दुर्भाग्यमपेयात् पतिमिलनसौभाग्यञ्च भवेत्। अन्यथा न मम प्राणधारणस्य किमप्यौचित्यं प्रयोजनं वा वर्तते ? भर्तृविरहव्याकुला श्वसुरकुलपरित्यक्ता ध्रुवं प्राणांस्त्यक्ष्यामि।"

संन्यासिनी रत्नवतीवदनं करतलेनाऽऽवृत्य वस्त्राञ्चलेन तस्याः प्रवहन्त्यश्रूणि प्रममार्ज। तामुत्सङ्गे कृत्वा समाकृष्य वक्षसा चाऽऽसज्ज्य सा बभाषे -

"वत्से ! मा त्वयेदृशी साहसवार्ता विधेया। आत्महननं सर्वपापेभ्योऽतिरिच्यते। बुद्धिमती विमृश्यकारिणी च त्वमसि। यत् किञ्चिदपि करिष्यसि, कुलपरम्परायोग्यमेव करिष्यसि। अहं तव निर्देशपालिका त्वदनुकूलमेवाऽऽचरिष्यामि। पतितिरस्कृता त्वं

वैराग्यमापन्ना पारलौकिककल्याणाय साधनायै प्रवर्तस्व। यदि च सांसारिकभोगाकाङ्क्षा, पत्युः प्रसादनाय प्रयतस्व।

पूर्वजन्मकृतदुष्कर्मणामेवैष प्रभावो यत् सद्वंशजाता महैश्वर्यधनस्वामिनी अनुपम-सौन्दर्यसम्पन्ना नवयौवनशालिनी स्वाभिमानिनी त्वं भर्त्रा तथा तिरस्कृता यथाऽसौ तव मुखदर्शनमपि परिहरति। बुद्धिर्मेऽस्मिन् विषये सर्वथाऽक्षमा न किञ्चिदपि विचारयति! यदि त्वमेव भर्तृविद्वेषनिराकरणाय तस्य च प्रसादनाय कञ्चिदुपायं चिन्तयसि, योजनां वा युनक्षि, मां कथय। अहं तव कार्ये सहायिका भविष्यामि। तथाऽपि त्वया सकलं कार्यं विमृश्य करणीयम्। अविमृश्यकारिणो हि जनाः पश्चात्तापं सततमनुवन्तीति।"

संन्यासिन्याः कथनमाकर्ण्य रत्नवती मुहूर्तं दक्षिणकरतलनिहितकपोला विचारयन्ती स्थिता। तदनन्तरं दीर्घं निःश्वस्य सा प्रोवाच –

"मातः! नारीभ्यो विशेषतश्च कुलवधूभ्यः पतिरेव दैवतम्। एतदतिरिक्तं तासां सौभाग्यस्योपायो न विद्यते। पतिसेवैव परमो धर्मः। अतः पतिप्रसादनोपायश्चिन्तनीयः।

मातः! एषु दिवसेषु व्यापारिकसार्थनायको भूत्वा मम भर्ताऽस्मिन् पत्तने वाणिज्याय समायातः। मम भवनस्य प्रातिवेशिकं सख्याः कनकवत्याः गृहम्। सा मे बालवयस्या प्रियसखी। आयुषा रूपेणाऽऽकृत्या च सा मे प्रतिकृतिरेव। तस्याः जनको धनगुप्तोऽपि प्रभावशाली सम्पन्नः समृद्धिशाली राजसभायां प्रतिष्ठितो वर्तते। भवत्या मे पतिरित्थं कथनीयः –

अस्य पत्तनस्य प्रसिद्धस्य श्रेष्ठिनो धनगुप्तस्य सुता कनकवती भवन्तं प्रमुखविपणि-मार्गेण गच्छन्तं स्वगृहबलभीस्थिता निरैक्षत। हृतहृदया सा सम्प्रति भवन्तं कामयते। भवानेव तस्याः हृदयबल्लभः प्रियतमः। विवाहाभिलाषिणी सा पुनर्भवन्तपवलोकयितु-मीहते। भवताऽद्य मध्याह्नसमये प्रमुखविपणिमार्गेण तस्य गृहसमक्षं गन्तव्यम्। गृहबलभ्यां स्थिता सा भवन्तमीक्षिष्यते। भवांश्च तामीक्षिता। एवमन्योन्यदर्शने सञ्जाते करणीयमपि भविष्यति।"

अन्येद्युः प्रातः सा संन्यासिनी बलभद्रमुपगम्य तथैव सर्वं व्याजहार। बलभद्रोऽपि कनकवत्याः सद्वंशसौन्दर्यशीलनवयौवनादिविषयकं विदित्वा परमौत्सुक्योत्कण्ठितहृदयः समावर्जितचित्तश्च बभूव। मध्याह्नसमयेऽसौ विपणिमार्गे कनकवत्याः गृहस्य समक्षं गत्वा गतागतमकरोत्। तस्मिन् समये सा रत्नवती विविधप्रसाधनैरात्मानं प्रसाध्य महार्घैः रत्नजटितैः कनकाभरणैः कोशेयवसनैश्च विभूषिता गृहबलभीं गत्वा पर्याटीत्। अथ चैकस्मिन् करे कन्दुकमादाय क्रीडाभिनयमपि सा प्रादर्शयत्।

रत्नवत्याः रूपं यौवनं क्रीडाभिनयञ्चाऽवलोक्य संन्यासिनीकथितान् भावांश्च संस्मृत्य बलभद्रस्य हृदयगतिः प्रमाणाधिका बभूव। तां कनकवतीमवगच्छन् पक्ष्मनिमेषस्याऽपि विस्मृत्याऽसावालुलोके। तस्मिन्नेव क्षणे रत्नवती करनिहितकन्दुकं, तथा छदिषः प्राक्षिपद्, यथाऽसौ बलभद्रसमक्षं पपात। बलभद्रोऽपि सव्येतरे करे कन्दुकं समुत्थाप्य बलभीमपश्यत्। तथाभूतं बलभद्रमभिलक्ष्य रत्नवती साभिलाषं स्मितविभूषितौष्ठी बभूव।

तस्मिन्नेव क्षणे रत्नवतीप्रेषिता संन्यासिनी विपणिमार्गेण गत्वा बलभद्रमामन्त्र्य गृहद्वारपार्श्वस्थितप्रकोष्ठं समानिनाय। साऽकथयत् -

"कनकवती निजं कन्दुकमभ्यर्थयते।"

तदानीमेव कनकवती (रत्नवती) स्वयमागम्य कन्दुकमभ्यर्थयामास। तामवलोक्य बलभद्रः ससम्भ्रममुत्थाय कन्दुकं समर्पयामास। परं कन्दुकमर्पयता सहसा परस्परमङ्गस्पर्शेन द्वयोरपि शरीरयोर्विद्युद्धारेव सञ्चचार। लज्जावरक्तवदना कन्दुकं हस्तगतं कृत्वा मुखमवनमय्य त्वरितं सा ततः प्रस्थिता। संन्यासिन्या पुनरागमनाय निमन्त्रितो बलभद्रोऽपि स्वविश्रामस्थानं गतवान्। तदनन्तरं तयोर्द्वयोर्मिलनं प्रतिदिवसं तस्मिन्नेव कक्षे समभवत्।

फाल्गुनमासस्य कृष्णपक्षस्य पञ्चमी समायाता। बलभीपत्तने कामदेवोत्सवानामायोजनानि समभवन्। नगरबाह्योद्याने सुप्रसाधिताः सुभूषिताश्च प्रमदाः देवपूजनार्थं कामदेवमन्दिरं गच्छन्ति स्म। रत्नवती तत्र गमनं निश्चिकाय। सा बलभद्राय सन्देशं प्राहिणोत् -

"अद्य मध्याह्नसमये कामदेवोत्सवावसरे देवपूजनव्याजेन कामदेवायतनोद्यानं सङ्केतस्थानं वर्तते। तत्राऽशोककुञ्जे तयोः संयोगो भविष्यति।"

प्रणयिन्याः रूपसौन्दर्यपाशबद्धो गुणप्रकृतिवशीभूतहृदयो बलभद्रः सन्देशस्योपेक्षणे न समर्थ आसीत्। निश्चितसमये कामदेवायतनोद्यानेऽशोककुञ्जे स्थितो बलभद्रः प्रणयिनीं गुणनिर्जितां कनकवतीं (रत्नवतीं) प्रतीक्षाञ्चक्रे।

कामदेवोत्सवदिवसे प्रातःकाले रत्नवती प्रस्थानायोद्यता बभूव। सा प्रचुरं रत्नाभूषणादिकं स्वर्णमुद्रासहितं समुद्गके निधाय देवपूजनयोग्यानि च वस्त्राभूषणादीनि परिधाय संन्यासिन्या सह कामदेवायतनोद्यानं प्रति प्रातिष्ठत। मार्गे सा संन्यासिनीं प्रत्यबोधयत्-

"मातः ! इतः निवृत्य भवती मे वचनात् पितरं कथयतु -

व्यापारनिमित्तेन भवदीयो जामाता बलभद्रो बलभीपत्तनं समाजगाम। स तु लज्जित एवाऽऽसीत्। यतो निष्कारणं रत्नवती तेन तिरस्कृतोपेक्षिता च। श्वश्रूश्वसुरौ

चाऽपि न सम्मानितौ। न मातुर्न पितुर्न हितेच्छुकानां बान्धवानां न च मित्राणामादेशं वाऽनुरोधं वाऽङ्गीचकार। अथ च रत्नवतीं परित्यज्याऽसौ तां परित्यक्तामिव तस्याः पितृगृहे निवासमकारयत्। असौ भवतो दुहितृपतिः प्रत्यक्षागमनमसहमानो लज्जितो गुप्तरूपेण रत्नवतीं निनाय। भवता काऽपि चिन्ता न करणीया।"

संन्यासिन्या सह रत्नवती मध्याह्नकल्पे समये कामदेवायतनोद्यानं सम्प्राप। तस्मिन् समये देवपूजनाय समागतानां प्रमदानां महान् सम्मर्दस्तत्र समवेतो बभूव। सौभाग्यसंरक्षणार्थं विवाहिताः सधवाः नार्यः, समुचितसौभाग्यप्राप्तये चाऽनूढाः युवतयस्तत्र देवपूजनार्थं समाजग्मुः।

स्थालिकासु समुज्ज्वलपित्तलकांस्यधातुरचितासु पुष्पाण्यक्षतानि रक्तहरिद्राचूर्णराशिञ्च सज्जीकृत्य घृतदीपसुशोभितं मन्दिरं प्रविशन्तीनां पूजां निर्वर्त्य च बहिरागच्छन्तीनां प्रमदानां पङ्क्तयः सौन्दर्यसागरोत्तालतरङ्गमण्डलानीव प्रतिभासन्ते स्म।

वसन्तर्तोः शुभागमनेन कामदेवायतनोद्यानस्य प्रकृतिरामणीयकं दिव्यमनुपमं नन्दनवनस्येवाऽवर्तत.। विविधपुष्पविभूषितवीथयो देवतायाः स्वागतायेव पुष्पवृष्टिमिव ववर्षुः। रसालानोकहेषु सौरभप्रसारिण्यो मञ्जर्यः प्रपुस्फुटुः। किङ्किराततरुषु कनकपिङ्गलवर्णानि पुष्पमुकुलानि प्रमुदितानि। पाटलशाल्मलिपादपेषु बृहदाकाराणामरुणपुष्पगुच्छानामनुपमा शोभा परितो वितस्तार। अशोककुञ्जं निकषा स्थितो बलभद्रो विह्वलत्वमापन्नो हृदयहारिणीं प्रियतमां कनकवतीं प्रतीक्षाञ्चकार। तस्मिन्नेव क्षणे दूरादेव कनकवतीरूपेण समागच्छन्तीं रत्नवतीमवलोक्य तस्य हृद्गतिरतितरां ववृधे।

अशोककुञ्जमुपगम्य रत्नवती दृष्टिमुन्नमय्योच्छलत्स्नेहोद्गारैर्बलभद्रमालुलोके। क्षणेन परस्परमालिङ्गननिबद्धयोस्तयोः शरीरे एकाकारे इव बभूवतुः। परं सद्यः पृथग्भूय समयज्ञा रत्नवती नयनाभ्यां नयनयोः सङ्केतं विधाय देवपूजनस्थालिकासहिता कामदेवायतनं प्रविश्य सत्वरं बहिरागच्छत्। तदा संन्यासिनी तावुभावपि अशोककुञ्जान्तरालं समानीय प्रोवाच -

"वत्स बलभद्र ! कनकवतीयं निजगृहान्निष्क्रम्य तव चरणावुपाश्रिता। मनः प्राणान् हृदयं शरीरञ्च सर्वस्वमेवाऽनया तुभ्यं समर्पितम्। क्षणमात्रमपीयं तव वियोगमसहमानाऽत्र समायाता। स्वगृहमेनां नय सुखेन च जीवनं यापय।"

तदनन्तरं संन्यासिन्याः सङ्केतेन रत्नवत्या किङ्किरातकोरकगुम्फिता माला बलभद्रस्य कण्ठे पिनद्धा। बलभद्रोऽपि संन्यासिन्याः कराभ्यां मौक्तिकस्रजमादाय कम्बुसमं सुमनोहरं कनकवती (रत्नवती) कण्ठं सुशोभयामास। ततश्च रत्नवतीं

कनकवतीमेव मन्यमानो बलभद्रः प्रियायाः हिमशुभ्रं करकिसलययुगलं कराभ्यां गृहीत्वाऽऽजीवनं सहचारभावं प्रतिजज्ञौ। अथ प्रियया सह बलभद्रः सार्थविश्रामस्थानं प्रति जगाम।

सार्थरक्षकमवबोध्य बलभद्रस्तं पितुः सकाशं सम्प्रैषयत्। स्वयञ्च प्रभूतरत्नस्वर्णादिकं धनमादाय रत्नवत्या सह बलभीपत्तनस्योत्तरदिशि समुद्रतटवर्तिनीं द्वारिकापुरीमभिजगाम। मार्गे तेनैका युवती दासी दशकनकनिष्कैः सेवायै क्रीता।

द्वारिकायां बलभद्रेण निजो वस्त्रव्यवसायः प्रारब्धः। व्यावसायिककुशलतया विधेरनुकूलभावेन च तस्य व्यवसायः सततं समुन्नतिं प्राप। बलभद्रः प्रभूतधनोपार्जनेन सह द्वारिकानागरिकाणामनुपमं स्नेहं सम्मानञ्चाऽपि प्राप्तवान्। सार्वजनिककार्येभ्यो विविधसाहाय्यदानेन याचकेभ्यश्च प्रचुरधनराशिवितरणेन नागरिकैरसौ सम्मानितो बभूव।

रत्नवती गृहकार्यकुशला सुयोग्या गृहिणी सिद्धा। नागरिकमहिलासंहतिषु सा सम्मानितं स्थानमलभत। बलभद्रस्याऽनेन सम्मानेन प्रोन्नतिभावेन च नगरपालो बलदेवसिंहोऽसूयया हृदये जज्वाल। परन्त्वसौ बलभद्रस्य किञ्चिदप्यपकरणे न समर्थो बभूव।

अथ द्वारिकायां प्रवसतोः रत्नवतीबलभद्रयोस्त्रीणि वर्षाणि व्यतीतानि। गृहे स्वस्थः सुमनोहरश्च शिशुरपि समायातः। मार्गे क्रीता दासी रत्नवत्याः बलभद्रस्य च भृशं सम्मानस्य स्नेहस्य च पात्रमवर्तत। गृहे दास-दासीजनम्भृते सा प्रधानदासीपदे प्रतिष्ठिता। अतः सा भृशं गर्वं बभार। मदान्विता सा स्वयं किमपि कार्यं न कुर्वाणाऽन्येषु दासेष्वादेशदायिनी सञ्जाता। सा मनसि व्यचिन्तयत् -

"कनकवतीबलभद्रयोः रहस्यज्ञां तां न कोऽप्यपकर्तुं समर्थः।"

अयोग्यादरं प्राप्य को न लघुः गर्वायते।

एकस्मिन् दिवसे रत्नवती दासीं कस्मैचित् कार्याय समादिदेश। परं तत् कार्यं स्वयं न कृत्वा सा दासी कार्यस्य करणायाऽन्यां दासीमादिशत्। क्रीतदास्यास्तथाऽऽचरणेन कुपितो दुर्मनाः बलभद्रस्तां भृशमवाभर्त्सत अतीतडच्च। अनेनाऽऽचरणेन सा क्रीतदासी नितरामकुप्यत। बलभद्रेण प्रताडिता सा झटित्येव नगरपालमुपगता। सा तमुवाच -

"देव ! बलभद्रोऽयं भृशं दुराचरणः पापीयान्। अनेन बलभीपत्तनस्य श्रेष्ठिनो धनगुप्तस्य दुहिता कनकवती अभिसन्धाय पथभ्रष्टा कृता। इयं कनकवती वणिजोऽस्य न विवाहिता भार्या।"

रहस्यपूर्णं छिद्रमिदमधिगम्य बलदेवसिंहोऽतिप्रसन्नो बभूव। बलभद्रस्य तिरस्करण-

मभिलक्ष्यमाणेन तेन द्वारिकापुर्याः पौरवृद्धानां परिषत् समाहूता। तस्मिन् पौरवृद्धजनसमवाये नगरपालोऽसौ बभाषे -

"भद्राः ! अस्माकं नगर्यां योऽयं बलभद्राभिधानो वणिक् समायातः, दुराचरणोऽसौ पापीयान् वर्तते। चौरो विद्यतेऽसौ। स तु बलभीपत्तनस्य श्रेष्ठिनो धनगुप्तस्य सुतामपहृत्याऽत्र समायातः। कनकवती नाऽस्य शास्त्रोक्तविधिना विवाहिता भार्या। समुचितेन दण्डेन दण्डनीयोऽसौ। अपहृतधनोऽसौ नगरादस्मान्निष्कासनीयः।"

नगरपालस्येममारोपमाकर्ण्य प्रकुपितैः पौरवृद्धैर्निर्णीतम् -

"सभायामस्यां बलभद्रं समाहूय तस्याऽपराधः कथनीयः। तदनन्तरमसौ दश दिवसाभ्यन्तरे स्वपक्षं प्रस्तुयात्। सिद्धेऽपराधेऽसौ दण्डितो भविष्यति।"

तथा सति स्वानि भाग्यानि निन्दन् बलभद्रो गृहमागम्य शिरसि करं निधाय चिन्तितमुद्रयोपविष्टः। परिणेतारं तथाऽवस्थं विलोक्य रत्नवती निकटमुपविश्य परमं स्नेहं प्रदर्शयन्ती चिन्ताकारणं पप्रच्छ। चिन्ताकारणं विदित्वा साऽवोचत् -

"आर्यपुत्र ! नाऽस्मिन् विषये भवता चिन्ता करणीया। कार्यमिदमहमेव सम्यग्रूपेण साधयिष्यामि। भवता पौरजनानां सभायां कथनीयम् -

नेयं धनगुप्तस्य दुहिता कनकवती। इयं बलभीपत्तनस्य गृहगुप्तस्य श्रेष्ठिनः सुता रत्नवती मम शास्त्रसम्मता विधिना विवाहिता भार्या। स्नेहानुरागेणैव सा मया कनकवती नाम्नाऽभिधीयते। अस्याः जनकेनैवेयं मह्यं प्रदत्ता। नाऽस्मिन् विषये कथञ्चिदप्यहमपराधी भवामि। अहमपि मधुमतीनगर्याः प्रसिद्धस्य सार्थवाहस्य समुद्रभद्रस्य सुतो बलभद्रः। सम्मानितो नागरिकोऽहं कर्तव्यमुत्तरदायित्वञ्च वहामि। यदि भवन्तो न विश्वसेयुः, बलभीपत्तने मधुमत्याञ्च दूतान् सम्प्रेष्य यथार्थं सत्यमवगच्छेयुः।

इतस्तु बलभद्रेण पौरवृद्धानां परिषदि तथाविधं वक्तव्यं प्रस्तुतम्, अमुतश्च रत्नवती विश्वस्तं सेवकं पत्रेण सह बलभीपत्तने सम्प्रेष्य स्वजनकं गृहगुप्तं सूचयामास। संन्यासिनीमाध्यमेन पूर्वमेव विदितसकलवृतान्तः गृहगुप्तः साम्प्रतं रत्नवतीसमाचारा-नुपलभ्य चिन्ताव्याकुल इवाऽऽसीत्। परमनेन समाचारेण तस्य चिन्ता व्यपगता।

रत्नवत्याः पत्रं प्राप्य झटित्येव सपरिजनो गृहगुप्तो द्वारावतीं समाजगाम। तत्र रत्नवत्याः सर्वं समाचारं वृत्तञ्चाऽधिगम्य पौरवृद्धानां सभायामुपस्थितो भूत्वा सर्वं रहस्यमुद्घाटयामास। तत्र तेन प्रोक्तम् -

"बलभद्रोऽयं मधुमतीनगर्याः सार्थवाहस्य समुद्रभद्रस्य सुतो वर्तते। तस्मै मया निजदुहिता रत्नवती प्रदत्ता। तेन शास्त्रोक्तविधिना सा परिणीता। इयं रत्नवती बलभद्रस्य शास्त्रविधिधर्मसम्मता भार्या वर्तते। बलभद्रे समारोपिताः सर्वेऽपराधाः

सर्वथा मिथ्या: तथ्यहीनाश्च वर्तन्ते। द्वेषेण नगरपालेन बलभद्रे दुराचरणस्याऽपराधाः समारोपिताः।"

गृहगुप्तस्य तथाविधे वक्तव्ये प्रस्तुते पौरवृद्धाः नगरपालं बलदेवसिंहं भृशं भर्त्सितवन्तः। बलभद्रो नगरनिवासिभिः सपरिवारं सम्मानितो बभूव। सकलं वृत्तान्तं निशम्य बलभद्रस्य पितरौ द्वारावतीं समाजग्मतुः। चिरकालानन्तरं पुत्रं पुत्रवधूसहितं सकुशलं सम्मानितञ्चाऽवलोक्य सुप्रसन्नौ तौ भगवते वासुदेवाय धन्यवादानभिव्यञ्जयामासतुः। रत्नवत्या येन व्यवहारकौशलेन भर्ता पुनः प्राप्तः परिवारस्य च प्रतिष्ठा रक्षिता, तदविस्मरणीयमद्भुतञ्चाऽऽसीत्। रत्नवत्याः प्रतिभया प्रभावितौ तौ तां भृशमभिनन्दयामासतुः।

इयं रत्नवती न तु कनकवती इति विदित्वा विस्मयविमिश्रहर्षभरेण सम्भृतो बलभद्रः सहधर्मिण्याः प्रतिभया बुद्ध्या व्यवहारकौशलेन चाऽतितरां प्रभावितः प्रसन्नतामवाप। असौ भार्यायां भृशं सिष्णेह। एवं बलभद्रवंशस्य सुखसमृद्धिप्रतिष्ठासु या सततं वृद्धिर्बभूव तत्र रत्नवत्याः दृढसङ्कल्प एव हेतुरवर्तत।

निम्बवतीचरितं संश्राव्याऽहं ब्रह्मराक्षसमवोचत् -

"अतोऽहं ब्रवीमि - सङ्कल्प एव शक्तिमत्तमः।"

निम्बवतीचरितश्रवणेन परमां प्रीतिमापन्नो ब्रह्मराक्षसो नितम्बवतीचरितस्य श्रावणाय मामनुरुरोध। तदा मया सा कथा एवं प्रारब्धा -

## नितम्बवतीचरितम्

भगवत्या भागीरथ्या कालिन्द्या च सिञ्चितेषु शूरसेनजनपदेषु धनधान्यसमृद्धेषु मथुराभिधाना नगरी त्रिभुवनभालतिलकभूता वर्तते। भगवतो विष्णोरवतारभूतस्य षोडशकलासम्पूर्णस्य कृष्णस्य जन्मभुवि मथुरायां निवसतां जनानां सर्वाणि कल्मषाणि ह्यत्र क्षीयन्ते पुण्याश्चोदयन्ति। तस्यां नगर्यां सिन्धुदत्तो नाम सार्थवाहो प्रथितकीर्तिः व्यापारेणैश्वर्येण समृद्ध्या व्यवहारकौशलेनौदार्येण च सकले भरतखण्डे प्रथितो बभूव। दानशीलतादिगुणैः नगरनिवासिनामसौ सदा सम्मानित आसीत्।

सिन्धुदत्तस्य त्रयः पुत्रा आसन् - इन्द्रगुप्तो देवगुप्तो विष्णुगुप्तश्च। तेषु मध्यमो देवगुप्तश्चपलप्रकृतिर्विविधविद्यासु कलासु च निष्णातः प्रज्ञाप्रतिभासमन्वितो बभूव। परं कुलपरम्परानुकूलं विटेषु गणिकासु चाऽतिरक्तोऽसौ विटकुलेषु वेशवाटेषु च समयमतिवाहयति स्म। कायेन स्वस्थः सुन्दरो बलशालिष्वन्यतमः प्रकृत्योद्दण्डो देवगुप्तो मित्राणां रक्षणाय येन केनाऽपि जनेन कलहायमानो भवति स्म। उद्दण्डप्रकृतित्वादसौ

नगरे कलहकण्टकाभिधानेनाऽपि प्रथित आसीत्।

मथुरानगर्यां देवगुप्तस्याऽनेकानि मित्राण्यवर्तन्त। तैः सार्द्धं कामचारेण वर्तमानस्य तस्य दिवसाः व्यतियन्ति स्म। अनेनैव हेतुनाऽसौ विवाहबन्धनेऽपि नाऽऽत्मानं बबन्ध। पितृभ्यां नित्यमनुरुध्यमानोऽपि देवगुप्तः कथयति स्म -

"निजगुणानुरूपां योग्यां वधूमहं स्वयमेवाऽन्विष्याऽऽनेष्यामि।"

एकस्मिन् समयेऽन्तरङ्गमित्रैः सार्द्धं मनोविनोदनायाऽसौ यमुनातटवर्तिनीं वाटिकां गतवान्। व्यतीते वर्षर्तौ शरदृतोरागमनं बभूव। परितो वनस्पतिषु किसलयानि पुष्पाणि च विकसितान्यदृश्यन्त। श्यामसलिला कालिन्दीधारा स्वविस्तारं संहृत्य सङ्कुचितेवोभयतो विस्तृतशुभ्रसैकतप्रदेशं परित्यज्य मध्यभागे सुविशालशुभ्रशिलातलमध्ये नीलमणिरेखेव शुशुभे। सैकतेषु सुदूरपर्यन्तं कुशकासक्षुपस्तम्बानां श्रेणयो विकसितकुसुममञ्जरीराशिभिर्विभूषिता अवर्तन्त। शरदृतुप्रभावेण समायातानां हंसबकसार-सकारण्डवादीनां पक्षिणां सरसक्रीडाभिः कूजनैश्च प्रभावितं वातावरणं हठादेव मनांसि समावर्जयदासीत्।

अनुपमप्रकृतिरामणीयकदर्शनेन विमुग्धस्य सर्वमन्यद् विस्मृत्य स्थितस्य देवगुप्तस्य मित्रैरागत्य ध्यानभङ्गो विहितः। मित्रेष्वेकतमेन प्रोक्तम् -

"कश्चिच्चित्रकरोऽयं समायातः। बहूनि चित्राणि मनोहराणि तस्य सन्ति। तानि दर्शनीयानि वर्तन्ते।"

देवगुप्तस्याऽपि चित्रकलायामभिरुचिरवर्तत। चित्रदर्शनेऽत्युत्कण्ठितोऽसौ चित्रकरं तत्रैवाऽऽकारयामास। चित्रकरस्य चित्रसङ्ग्रहेऽनेकेषां महापुरुषाणां नरपतीनां प्राकृतिक-दृश्यानां बह्वीनां सुन्दरीणां प्रमदानां धर्मकथानाञ्च चित्राण्यवर्तन्त। तेषु चित्रेष्वति-लावण्यवत्याः हृदयापहरणकारिण्याः कस्याश्चिद्युवत्या आलेख्यमवलोक्याऽसौ विस्मयेनाऽतितरामभिभूतः। इयमेव बाला मे जीवनसङ्गिनी भवितुमर्हतीति तेनाऽनुभूतम्।

देवगुप्तस्य मनसो हृदयस्य च वेधनाय मन्मथस्तामेव प्रमदां शरं विधाय कार्मुके समारोप्य प्रजहार। मुहूर्तं चित्रमवलोक्य देवगुप्तः प्रोवाच -

"मित्र ! आलेख्यमिदमवलोक्य भवच्चित्रकलाकौशलप्रशंसने शब्दानामभावो मम वर्तते। परमस्मिन् चित्रकर्मणि केचन प्रतीकाः विरोधाभासं भजमाना अवलोक्यन्ते। परिवेशेनेयं चित्राङ्किता बाला महोच्चकुलजाता प्रतीयते। परमेतादृशमुन्मादकं सौन्दर्यं कुलवधूनां कुतः सम्भवति ? आभिजात्यानुरूपमियं विनम्रभावेन सव्येतरचरणा-ङ्गुष्ठनखेन भुवं विलिखति। परमेतद्विपरीतं गृहद्वारस्थिता समाश्रितकपाटा बहिर्विलोकयति। सुसमृद्धिलक्षणाऽपि वदने विषादस्य भावान् प्रदर्शयति। कपोलयोः

कनककान्तिविभूषिताऽपि पाण्डुवर्णमभिव्यञ्जयति। द्विवेणिप्रसाधितकुन्तलेषु कुन्दकुसुमस्रग्गुम्पनेनाऽनुमीयते, प्रोषितोऽस्याः परिणेता।

अथ चाऽस्यास्तन्वङ्ग्याः देहयष्ट्यां समानुपातिषु सर्वेष्वङ्गेषु सौन्दर्यस्येयत्ता नाऽऽत्मानं सीमयितुं समर्था। विवाहिता चाप्यनुपभुक्तसौन्दर्याऽमृदितानीवाऽङ्गानि वहन्ती प्रतीयते। अतो मयाऽनुमीयते, कस्याऽपि समृद्धस्य वणिजः सहधर्मिणीयं वर्तते, परं वणिगसौ पुंस्त्वशक्तिरहितो जराजीर्णकायो वा विद्यते। कामनानामुपभोगाद् वञ्चिताऽभ्यन्तरे पुटपाकवह्निनेवेयं दह्यते। अतिकौशलेनेयं भवता चित्रिता।"

देवगुप्तवर्णितचित्ररचनाविश्लेषणमाकर्ण्य बहुतरं प्रभावितोऽसौ चित्रकरस्तस्य कलामर्मज्ञतां प्रशंसन्नाह -

"भद्र ! सूक्ष्मेक्षिका ते कलामर्मज्ञता। सुष्ठु त्वया विश्लेषणं कृतम्। अस्याः प्रशंसायां शब्दानामभावमहं बिभर्मि। इयं कस्याऽपि वृद्धस्य वणिजो तरुणी भार्या वर्तते।"

कुत्र भवतेयमवलोकितेति देवगुप्तेन पृष्टोऽसौ चित्रकरोऽकथयत् -

"अस्त्यवन्तीजनपदराजधान्युज्जयिनी नाम नगरी। तत्राऽनन्तगुप्ताभिधानस्य सार्थवाहस्य गृहमहं केनचित् कार्येणाऽगच्छम्। तस्य नवविवाहितां वधूं नितम्बवती-मवलोक्याऽहं विस्मयमापन्नः। अनन्तगुप्तस्य प्रार्थनामङ्गीकृत्य तस्याः नवोढायाः भार्यायाश्चित्ररचनां विधाय मया सहस्रमुद्रासम्मितं मूल्यमधिगतम्। कुतूहलाक्रान्तचित्तेन मया तस्य चित्रस्य प्रतिकृतिः स्वसङ्ग्रहे रक्षिता।

देवगुप्तेन प्रमदासौन्दर्यापहृतचित्तेन तच्चित्रं सहस्रद्वयमुद्रास्वर्णसम्मितेन मूल्येन क्रीतम्। उज्जयिन्याः सार्थवाहस्याऽनन्तगुप्तस्य परिचयोऽपि तेन तत्र चित्रस्य पृष्ठभागेऽङ्कितम्। तदनन्तरं प्रचुरं स्वर्णरत्नादिकं धनमादाय देवगुप्त उज्जयिनीं लक्ष्यं विधायैकाकी गतवान्। नितम्बवत्याः सौन्दर्यमिव तं समाचकर्ष। उज्जयिनीं प्राप्य देवगुप्तोऽनन्तगुप्तगृहमतिथिरूपेण प्राविशत्।

नितम्बवत्याः लावण्यं चन्द्रसमुज्ज्वलमभिवीक्ष्य देवगुप्तस्य चक्षुषी कर्णान्तविस्फारिते अभवताम्। हृदयगतिश्च प्रमाणाधिका सञ्जाता। सकलान्यङ्गानि स्वेदार्द्राणि जातानि वेपथुश्चाऽऽविर्बभूव। तन्मिलनाभिलाषश्च चरमसीमानं प्रपेदे। कथमहमिदं रमणीरत्नं प्राप्तुं शक्नोमीति विचारसरणी तं समाचक्राम। तां चिन्तयन्नेवाऽसौ निशायां सपत्नीजन्ययेर्ष्ययेव निद्रया नोपकृतः।

परेद्युः प्रातः स्नानध्यानानादिनित्यकार्येभ्यो निर्वृतो देवगुप्तोऽनन्तगुप्तगृहं विसृज्य पान्थशालां जगाम। तत्र विरक्तस्येव रूपमास्थाय नगराधिपतिं जगाम। तत्र तेन

प्रोक्तम् -

"आर्य ! लोकस्याऽसारत्वं क्षणभङ्गुरत्वञ्च विलोक्य संसारविरक्तोऽहं श्मशान-भूमिनिकटं वासं कर्तुमिच्छामि। श्मशानरक्षायाः प्रबन्धं भवान् मदधीनं करोतु।"

श्मशानरक्षणस्याऽऽवश्यकतामनुभवता नगराधिपतिना देवगुप्तस्य प्रार्थना स्वीकृता। स च श्मशानरक्षकपदे नियुक्तः। श्मशानेऽन्त्येष्टिकर्मसम्पादनाय समानीतानां शवानां वस्त्राच्छादनानि तेन लभ्यन्ते स्म। तत्र महार्घाणि मनोरमाणि वसनाच्छादनानि देवगुप्तेनैकत्रितानि।

अर्हन्तिका नाम्नी काचिद् बौद्धभिक्षुणी श्मशाने देवगुप्तेन प्रायशः दृग्गोचरीकृता। देवगुप्तस्तया सह मैत्रीसम्बन्धं युयोज। महार्घाणि वस्त्राणि प्रायः तस्यै प्रयच्छति स्म। देवगुप्तस्यौदार्येण सा बौद्धभिक्षुणी नितरां प्रभाविताऽभूत्। एकस्मिन् दिवसेऽवसरं लब्ध्वाऽर्हन्तिकायाः मनोभावानभिलक्ष्य देवगुप्तस्तस्यै दशसुवर्णनिष्कसम्मितं धनं दत्त्वा तामवोचत् -

"आर्ये ! बहुदिवसं सहभावं भजत्या सस्नेहं संलपत्या मित्रत्वमापन्नया भवत्या स्नेहानुरूपं मे कार्यं करणीयम्। प्रयोजनञ्च सम्पादनीयम्। उज्जयिन्यामनन्तगुप्तो नाम व्यापारी सार्थवाहो निवसति। तेनाऽनिन्द्यसुन्दरी लावण्यगुणेनेव विधिना निर्मिता प्रमदा नवयौवनवती परिणीता। परं वृद्धत्वमापन्नः पुंस्त्वशक्तिरहितोऽसौ नवयौवनोपभोगाक्षमो निन्दापात्रं वर्तते। भोगसुखरहिता सा प्रमदा सततमुदासीनचित्त-वृत्तिरन्यमनस्का वर्तते। विजने भवत्या सा ममाऽन्तिकमानेया। तस्याः मनोऽभिलाषाः परिपूर्णाः भविष्यन्ति जीवनञ्च साफल्यमेष्यति। न चाऽहं तां विना जीवितमात्मान-मिच्छामि।"

देवगुप्तस्योपकारैः प्रभाविता सा बौद्धभिक्षुणी नितम्बवतीमुपगता। परं देवगुप्तस्य प्रणयसन्देशमाकर्ण्य भृशं कुपिता सा निर्भर्त्स्याऽर्हन्तिकां गृहाद् बहिश्चकार। मनसि विक्षुब्धा सा भिक्षुणी पुनः देवगुप्तमुपगम्य सकलं वृत्तान्तमचकथत्। देवगुप्तेन विचारितम्-

"कुलाभिमानिनी कुलवधूः सरलेनोपायेन न वशीभूता भविष्यति। कपटोपायैर्व-ञ्चनैरेव सा विनेया।"

इति विचार्याऽसौ पुनस्तामर्हन्तिकामुवाच -

आर्ये ! त्वया विजने सा कुलवधूरेवं वक्तव्या -

"भद्रे ! श्मशानवासी विरक्तजनोऽसौ लौकिकसुखानि परित्यज्य लोकप्रपञ्चमसारं क्षणभङ्गुरमवबुध्याऽगणितधनसम्पत्तिं विलासवैभवञ्च परित्यज्य सर्वेभ्यः पृथग्भूय पितृवने

निवसति। परममोक्षाभिलाषेण तेन पितृवने निवासो निश्चितः। कुलवधूनां शीलभ्रंशने कथं तस्याऽभिरुचिः सम्पद्यते ? तव पातिव्रतधर्मपरीक्षायै केवलं तादृशः सन्देशः कथितः। कदाचिदनन्तानिन्द्यरूपसौन्दर्यस्वामिनी धनसमृद्धिशालिनी मनोविकारैर्ग्रस्ता भवेः। कदाचिन्नवयौवनप्रपन्नायां त्वयि नारीसुलभचाञ्चल्यं प्रविष्टं भवेत्। तवेन्द्रियसंयमनगुणेन पातिव्रतधर्मपरिपालनेन च परमसन्तुष्टोऽसौ त्वां प्रसन्नां सन्तुष्टाञ्चाऽवलोकयितुमिच्छति।"

तदनन्तरं सा नितम्बवती पुनः वक्तव्या -

"भद्रे ! रूपलावण्यसम्पन्ना बुद्धिमती वैभवशालिनी त्वमसि। अथ च नवयौवनवयसि कृतपदविन्यासा वर्तसे। तव सन्ततीनामपि भविष्यमुज्ज्वलम्। परं भर्ता तव ब्रह्मराक्षसस्यैकस्य छायया ग्रस्तः। अत एवाऽसौ पुंस्त्वशक्तिरहितः। अतस्तव सन्तानप्राप्तिरसम्भवा। श्मशानसन्निकटं कस्याऽप्यघोरमतानुयायिनो मन्त्रसिद्धस्य गृहत्यागिनो निवासः। स्वल्पदिवसमत्र स्थित्वाऽसौ परिव्राजकः सततं भ्रमणशीलोऽस्मात् स्थानात् प्रस्थास्यति। असौ योगसिद्धः परिव्राजकस्तव कष्टानामपहरणे समर्थः। तस्य मन्त्राणां प्रभावेण ब्रह्मराक्षसस्तव परिणेतारं परित्यक्ष्यति। अथ च तव भर्ता पुंस्त्वशक्तिसम्पन्नो भूत्वा त्वयि गर्भं निषेक्ष्यति।

अर्धरात्रे व्यतीते त्वया मया सह श्मशानसमीपस्थितं भैरवमन्दिरं गन्तव्यम्। तत्र दक्षिणचरणमुपरि कृत्वा त्वमात्मानं तस्मै अघोराय तपस्विने दर्शय। असौ तव चरणतलं त्रिशूलाग्रेण मन्त्राङ्कितं करिष्यति। तेन चरणेन त्वया स्वपत्युश्चरणो दक्षिणः सम्मर्दनीयः। तदनन्तरं मन्त्रसिद्धचिह्नप्रभावेण स ब्रह्मराक्षसस्तं परित्यज्याऽन्यत्र गमिष्यति। तदा तव पतिस्तस्य ब्रह्मरक्षसः प्रभावान्मुक्तो रोगरहितः पौरुषं पुनः प्राप्य सन्ततिजननसामर्थ्ययुतो भविष्यति। तदा तव परिणेता त्वदायत्तीभूतस्त्वां देवीमिव सम्मानयन् सततं पूजयिष्यति सत्करिष्यति। एवं तव जीवनमामरणं सुखसमृद्धियुतमानन्देन व्यत्येष्यति।"

देवगुप्तस्य योजनामवगम्य सा बौद्धभिक्षुणी तथैव कार्यं सम्पादयामास। अनन्तगुप्तस्य गृहं गत्वा सा नितम्बवतीं देवगुप्तकथनानुसारं पाठं पाठयामास। विधेर्विधानस्य तथैव भवितव्यतया सा पतिव्रता कुलवधूः वृद्धस्य तरुणी भार्या भिक्षुण्या प्रवञ्चनाव्यापारे निबद्धा। पुत्रस्याऽऽकाङ्क्षया तस्याः मतिः बभ्रंशे। भर्तरि प्रगाढनिद्रावशङ्गते गृहान्निर्गत्य नितम्बवती भिक्षुण्या सह श्मशानसमीपं भैरवमन्दिरं जगाम।

भैरवायतनस्याऽभ्यन्तरे देवगुप्तः प्रथममेवाऽघोरकापालिकतपस्विनो वेशं दधानो भिक्षुकानलं प्रज्ज्वाल्य सुगन्धिद्रव्याहुतिभिरद्भुतोन्मादकं सौरभं प्रासारयन् प्रियतमागमनं

प्रतीक्षमाणः समुपविष्टोऽवर्तत। कृत्रिमजटाभिः कृष्णवर्णश्मश्रुभिश्च तस्य मुखमतिभयानकं प्रतीयते स्म । भिक्षुण्या सह नितम्बवत्याः चरणनिक्षेपध्वनिमाकर्ण्य तेन नरकपालमेकं गृहीत्वा तारस्वरेण मन्त्रोच्चारणं प्रारब्धम्। अथ च प्रचुरलोबानगुग्गुलुराशिं वह्नौ जुहाव।

देवगुप्तस्य तस्य कपटकापालिकस्याऽनेन कार्येणाऽनलस्योत्तुङ्गाः ज्वालाः ऊर्ध्वमुद्गताः धूम्रस्य च सौरभं परितः प्रससार। अस्मिन्नेव क्षणे नितम्बवत्या सहाऽर्हन्तिका मन्दिरं प्रविष्टा। नितम्बवतीं समीपस्थे कुशासने समुपवेश्य सा भिक्षुणी कपटाघोरकापालिकस्य चरणयोः प्रणम्य सविनयमुवाच -

"भगवन् ! इयं नितम्बवती उज्जयिन्याः सार्थवाहस्याऽनन्तगुप्तस्य भार्या वर्तते। ब्रह्मराक्षसाक्रान्तकायोऽस्याः भर्ता पुंस्त्वशक्तिविरहितः सन्तानोत्पादनसामर्थ्यं न दधाति। तेन हेतुना सन्ततिप्रसवाक्षमेयं तरुणी सततं हृदयविदारिण्या पीडया सन्तप्यते। अनेनैव हेतुना भर्ता नाऽस्यामतिशयेन स्निह्यति। भवताऽस्यां तथा कृपा करणीया, यथेयं पत्युः स्नेहमवाप्य लौकिकसुखभोगानुपभुञ्जाना सन्ततिं प्राप्नुयात्। अथ च सततं सुतलालन-सौभाग्यशालिनी वात्सल्यरससुखानि भुञ्जीत।"

कपटकापालिको देवगुप्तो नितम्बवत्याः वदने रक्तरञ्जितां दृष्टिं स्थिरां कृत्वा सङ्केतेनैव दक्षिणं चरणमुत्थापयितुं निर्दिदेश। अघोरकापालिकस्य तया भयानकदृष्ट्या व्याकुलितचित्ता सा कुलवधूः पतिव्रता नितम्बिनी नितम्बवती रक्तकमलराशिमिव मृदुलं सव्येतरं चरणमुत्थाप्याऽग्रे चकार। कापालिकस्तं सुमृदुलं सुखकरं मनोरमं चरणं करतलाभ्यां गृहीत्वा परामृशन् हीरकजटितं स्वर्णनूपुरमेकमाचकर्ष। तदनन्तरं तेन तस्याः जघनवस्त्रं किञ्चिदुपर्युत्थाप्य त्रिशूलाग्रेण जघने त्रिशूलाकृतिः स्वस्तिक-रेखोल्लिखिता। व्रणाद् रुधिरबिन्दवः समुद्गताः।

तदनन्तरमघोरकापालिकः नितम्बवतीं दक्षिणकरेण विधृत्य स्ववक्षःस्थलसन्निकट-माचकर्ष। प्रथमं तावत् सा मुग्धा नायिकेव मोहाविष्टेव कापालिकमुखमालोकयन्ती तच्चेष्टनमनवबुध्यमाना तस्थौ। परं सकरग्रहणं समाकृष्टा वस्त्राञ्चलेनाऽऽकृष्यमाणा हस्ताघातेनैकेन सरभसमात्मानं विमोच्य चीत्कृत्य भैरवायतनाद् बहिरयासीत्। स्थविरां बौद्धभिक्षुणीं भर्त्सयन्ती तर्जयन्ती हन्तुकामेव सा जलाशयसन्निकटमायाता। तत्र स्वच्छजलेन व्रणं विशोध्योत्तरीयं विपाट्य पट्टिकां बद्ध्वा स्वबुद्धिं गर्हमाणा भाग्यानि निन्दन्ती प्रस्खलन्ती शनैः शनैः गृहमाजगाम। तस्य रत्नजटितं स्वर्णनूपुरमेकं देवगुप्तेनाऽपहृतम्।

सम्प्रत्यपि प्रगाढान्धकारः सर्वतः प्रसृत आसीत्। रजन्या अन्तिमः प्रहरोऽवशिष्टः।

नितम्बवत्याः पतिस्तदानीं प्रगाढनिद्रावशङ्गतः सुप्तोऽवर्तत। गृहं प्रविश्य सा कुलवधूः द्वितीयमपि नूपुरं वामपादस्थमवतार्य रोगव्याजेनैकान्ते स्थिता न केनाऽपि सह वार्तालापमकरोत्। एकान्ते स्थितायास्तस्या एवं चत्वारो दिवसाः व्यतीताः।

अथाऽसौ देवगुप्तो नूपुरविक्रयायाऽनन्तगुप्तस्यैवाऽऽपणमुपगतः। अनन्तगुप्तेन नूपुरमभिज्ञातम्। कापालिकमसौ प्रोवाच -

"महाराज ! कुतो भवतेदं नूपुरमधिगतम् ? इदं मम भार्यायाः वर्तते।"

देवगुप्त उदतरत् -

"रहस्यमयीयं वार्ता पौरजनानां नगराधिपतेश्च समक्षमहं वदिष्यामि।"

तदाऽनन्तगुप्तः सेवकमेकं स्वपत्नीसमीपं नूपुरयुगलमानेतुं गृहं प्रति प्रैषयत्। परन्तु भार्यया नितम्बवत्या कथितम् -

"ह्यः सायंतने समये वाटिकायां भ्रमन्त्यां मयि नूपुरमेकं शिथिलबन्धं सव्येतरपादाद् विच्युतम्। भृशमन्वेषणेनाऽपि न मया लब्धम्। द्वितीयमिदं नूपुरं प्रेष्यते।"

गृहादानीतं नूपुरं देवगुप्तेनाऽऽनीतेन नूपुरेण समानाकृति सादृश्यं भेजे। तस्मिन्नेव समये तत्र विपणिस्थाः बहवो व्यापारिणः समवेताः बभूवुः। व्यापारिभिर्वारम्वार-मनुरुध्यमानो देवगुप्तस्तानुवाच -

"नगराधिपतिसमक्षमेवाऽसौ सकलं वृत्तान्तं वर्णयिष्यति।"

तदा ते वणिजो देवगुप्तं नगराधिपतिसमक्षं निन्युः। तत्र देवगुप्तेन कथयितुमारब्धम्-

"देव ! भवदादेशेन श्मशानरक्षकपदे नियुक्तोऽहं सावधानतया पितृवनं रक्षामि। कदाचित् कोऽपि रात्रौ समागत्य शुल्कमदत्वाऽन्त्येष्टिसंस्कारं कुर्यादित्याशङ्कया निशास्वप्यहं श्मशानभूमिषु भ्रमामि। एकस्यां रजन्यां मयाऽवलोकितम् -

काचिदतिगौरवर्णा सौन्दर्येण त्रिभुवनमहिलासंहतिं तिरस्कुर्वन्ती डाकिनी शवमर्धदग्धं चिताया आकृष्य भक्षयति। समीपमागते मयि धावित्वा सा नयनागोचरतां प्रपेदे। रजनीत्रयमेवं क्रमः प्रपेदे।

चतुर्थे दिवसे डाकिनीनिग्रहाय मया दृढो निश्चयो विहितः। पितृवननिकटं शरस्तम्बो-ऽवर्तत। तस्य पृष्ठतो निलीयाऽहं समुपविष्टः। समीपमेकस्यां चितायां शवदहनं बभूव। निशीथे सा डाकिनी व्योमपथेनाऽऽगत्य भूमाववतीर्य चिताया अर्धदग्धं शवमाकृष्य भक्षयितुमारेभे। शरस्तम्बादुत्प्लुत्य बहिरागते मयि डाकिनीसमक्षञ्च स्थितवति सा पलायनपरा बभूव। परं धरणाय कृतप्रयासे मयि तस्याः दक्षिणपादो मम हस्तयोः समायातः। तस्मिन् सम्भ्रमे नूपुरमिदं तत्पादप्रच्युतं श्मशानभूमौ पतितं, पादश्च तस्याः मे हस्ताद् विमुक्तः।

तदा त्रिशूलं निक्षिप्याऽहं तस्याः जघने प्राहरम्। रुधिरबिन्दून् प्रच्यावयन्ती सा डाकिनी तत्क्षणमुत्प्लुत्य सुदूरगगने नयनागोचरीभूता। नूपुरञ्च तन्मया सुरक्षितं स्वपोट्टलिकायां रक्षितम्। अद्य मया धनस्याऽऽवश्यकताऽनुभूता। ततो विक्रयार्थमहमस्याऽनन्तगुप्तस्याऽऽपणमागच्छम्। अयमेवाऽस्य नूपुरस्याऽऽगमनवृत्तान्तः।

देव ! यस्याः नूपुरमिदं वर्तति, सा नूनं शवभक्षिका डाकिनी। तस्याः दक्षिणजघनेनाऽपि त्रिशूलाङ्कितेन भवितव्यम्। अतोऽस्मिन् सम्बन्धे भवानेव प्रमाणम्। यत्कर्तव्यं तदादिशतु।"

देवगुप्तस्येदं कथनमाकर्ण्य नगराधिपतिरनन्तगुप्तस्य भार्यां नितम्बवतीं न्यायाधिकरणमानेतुं समादिदेश। तत्र निरीक्षिकाभिर्निर्णीतं, जघने त्रिशूलक्षतचिह्नाङ्किता डाकिनीयं शवभक्षिका नितम्बवती वर्तति। न्यायाधिकरणिकैर्नगरनिर्वासनदण्डस्तस्यै निर्धारितः।

तदनन्तरं भर्त्रा परित्यक्तां वराकीं नितम्बवतीं नगरनिवासिनो जनाः भर्त्सयन्तोऽपशब्दैस्तिरस्कुर्वन्तो लोष्ठप्रहारैस्ताडयन्तः कराघातैः प्रचोदयन्तो नगराद् बहिः पितृवनभुवि परित्यज्य गताः। निरुपाया निर्दोषा सा नितम्बवती देवगुप्तस्य प्रिया भैरवायतनं निकषा चिरं रुदती स्थिता। तदनन्तरमन्यां काममपि गतिमनवेक्ष्य साऽऽत्मवधं मनसि निश्चित्योत्तरीयं समीपस्थशिंशपातरुशाखायामाबध्य पाशबन्धनं कृत्वा कण्ठे बबन्ध।

परं देवगुप्तस्तु तां छायेवाऽनुससार। त्वरितगत्या वृक्षमारुह्य तरुशाखावलम्बमानां नितम्बवतीं क्रोडे कृत्वोपर्युत्थाप्य कण्ठादुत्तरीयबन्धं मुमोच। तां प्रियामङ्के धारयन्नेवाऽसौ वृक्षादवतीर्य कासारमुपगम्य भूमौ निधाय व्यपगतचेतनां तां जलाभ्युक्षणेन कण्ठस्य वक्षःस्थलस्य च परामर्शेन सचेतनां व्यदधात्।

स्वल्पसमयेन शनैश्चक्षुषी समुन्मील्य सा नितम्बवती परितो निरीहभावेन विलोकयन्त्युत्थायोपाविशत्। अप्रत्याशितेनाऽनेन प्राणरक्षणेन विस्मिता चकिता च दुःखिता बभूव। प्राणधारणेन सम्प्रति किं प्रयोजनम् ? तस्याश्चरणसमीपं तत्र देवगुप्तोऽवर्तत। सभ्यनागरिकसदृशवेशं तं न सा प्रत्यभ्यजानात्, यदयमेवाऽसौ श्मशानरक्षकः कापालिकः। नितम्बवतीमेकाग्रदृशा स्वात्मानमेवाऽवलोकयन्तीं निरीक्ष्य विनम्रमधुरवचोभिः स्नेहमभिव्यञ्जयन् देवगुप्तो बभाषे -

"सुन्दरि ! मथुरानगर्याः प्रसिद्धस्य सार्थवाहस्य सिन्धुदत्तस्य मध्यमः सुतोऽहं देवगुप्तः। वाणिज्यनिमित्तमुज्जयिनीं समागतेन मया त्वत्सम्बन्धिनी गाथा श्रुता। तव रूपगुणकीर्तिपरिचितोऽहं डाकिनीं त्वां कर्णाकर्णिकयोपश्रुत्य विस्मयेनाऽऽक्रान्तोऽपि

महतीं पीडामन्वभवम्। अद्यैव प्रवादोऽयं प्रसृतः। तव परिणेता नागरिकाश्चाऽन्ये मरणाय त्वामत्र पर्यत्याक्षुः। परं भैरवदेवप्रसादेनाऽहमत्राऽऽगतस्तव च प्राणरक्षा जाता। सम्प्रति जन्मान्तरमेव तवेदम्। रूपगुणक्रीतदासोऽहं त्वयि प्राणेभ्योऽप्यधिकं स्निह्यामि। सम्प्रति कः सम्बन्धस्तवाऽनन्तगुप्तेन। स तु ध्रुवं त्वां डाकिनीं मत्वा मृतां दिदृक्षति।"

अनन्योपाया नितम्बवती देवगुप्तं भर्तृरूपेणाऽङ्गीचकार। देवगुप्तोऽपि तां प्राणेभ्योऽपि गरीयसीं प्रियामवगच्छन् मथुरामानीय पितुरनुमत्या परिणिनाय। देवगुप्तसदृशं गुणवन्तं भर्तारं प्राप्य नितम्बवती परमहर्षभरसम्भृतहृदयाऽऽत्मानं पुण्यशालिनीं मेने। व्यतीते च समये देवगुप्तः स्वकीयां योजनामभिसन्धिञ्च नितम्बवतीसमक्षमुद्घाटयामास। तस्या अनुपमसौन्दर्येण समाकृष्टचित्तोऽसौ पञ्चशरशरविद्धो हृदये तामेव दधान उज्जयिनीं गतस्तत्र च तथाविधोऽभिसन्धिस्तेन संयोजितः। परं तावत् देवगुप्तगुणान् प्रति नितम्बवती तथाऽनुरक्ता यथा देवगुप्तस्य तत्साहसं तस्यै रुरुचे। प्रणयरतिरसविलासनिमग्ना सा साहसचातुर्यादिगुणैः भर्तरि स्नेहातिशयसागरे निमग्ना बभूव।

एवं नितम्बतीचरितं वर्णयित्वा ब्रह्मराक्षसमहमवोचम् -

"अतोऽहं ब्रवीमि - बुद्ध्यैव दुष्करकार्याणि साध्यन्ते।"

एवं मया प्रोक्तान्युत्तराणि निदर्शनसहितान्याकर्ण्य नितरां प्रसन्नः सन्तुष्टश्च ब्रह्मराक्षसो मां हार्दिकेनाऽऽतिथ्येन सत्कृतवान्। अथ परस्परस्नेहसम्भृतवार्तालापसंलग्नयोरावयोर्व्योम्न्युद्गतः कस्याश्चित् कामिन्याः करुणक्रन्दनध्वनिः कर्णगोचरीभूतः। दृष्टिमुन्नमय्य मया गगने विलोकितम् -

"कश्चिद् राक्षसः कामपि तरुणीं भुजयोर्दृढं निबध्योत्पतन् व्योममार्गेण गच्छति। करुणं क्रन्दमाना विचेष्टमाना सा तरुणी साहाय्यार्थमाक्रन्दति।"

अस्मिन् विषये निरुपायोऽहं ब्रह्मराक्षसे दृष्टिं बबन्ध। गगनोत्पतनसामर्थ्यं मम नाऽवर्तत। किञ्चिदायुधमपि तादृशं तत्र नाऽऽसीद् येन भूमिस्थ एव तं राक्षसं प्रति प्रक्षिप्य प्रहरेयम्। मन्त्रकीलितकृष्णसर्प इवाऽहं विचेष्टितवान्।

ममैतामवस्थामवलोक्य ब्रह्मराक्षसस्य हृदि करुणा सञ्चरिता। "अरे दुराचारिन्! कथमेनामकामयमानां वराकीं तरुणीमपहृत्य व्योम्नि धावसि?" इति कथयित्वाऽसौ ब्रह्मराक्षसः कोपाकुलो व्योम्न्युत्पत्य तं राक्षसमाचक्राम। राक्षसोऽपि करनिबद्धां तरुणीं धरातले निपात्य ब्रह्मराक्षसेन सह समयुध्यत।

स्वर्गलोकाद् विच्युता कल्पवृक्षमञ्जरीव सा युवतिर्मयोपरि प्रसारितयोर्द्वयोर्भुजयोरङ्के गृहीता। भयपरिकम्पिताङ्गी मदङ्गसंस्पर्शसञ्जातरोमोद्गमा सा तरुणी द्वौ भुजौ मम

कण्ठे परिधाय मां दृढालिङ्गनपाशेऽबध्नात्। तद्गात्रसंस्थर्शरोमाञ्चितेन मया सा बाला हृदयेनाऽऽसज्ज्य दृढालिङ्गनपाशे निबद्धा।

राक्षसब्रह्मराक्षसौ गगनाद् धरातलमवतीर्य पर्वतशिखरे स्थितौ पर्वतशृङ्गखण्डैः पादपस्कन्धशाखाभिः स्वकीयैरङ्गैर्मुष्टिपादप्रहारैश्च परस्परं युयुधाते। परमहं लब्ध्वाऽवसरं तां तरुणीं विगतचेतनामालिङ्गनबद्धां जलाशयतीरमानिनाय। तटवर्तिशिलायां तां शाययित्वा सस्पृहं यदा मया निर्वर्णितम् -

"अरे, सा मे प्राणबल्लभा सुह्मजनपदराजकुमारी कन्दुकावती वर्तते।"

सरसो निर्मलसुशीतलसलिलबिन्दुभिः परिषिञ्चिता सा मे प्रिया कतिपयैरेव क्षणैः चैतन्यमुपागता। शनैः शनैः तस्याः श्वासनिःश्वासगतिः सामान्यतां प्रपेदे। बालरविरश्मिसंस्पर्शविकसितकमलिनीदलसदृशानि नयनपक्ष्माणि सा समुन्मिमील। अविलम्बं मां परिचीय सा सुदृढं साभिलाषं परिषस्वजे। नीरवं रुदती अश्रुधाराप्रवाहैः सा मे गात्राण्युन्दीचकार। अहमपि प्राणेभ्यः प्रियायाः वक्षसा संलग्नायास्तस्या प्रवहन्त्यश्रूणि रदनच्छदस्पर्शनैरेव परिजहार।

समाश्वस्ता कन्दुकावती सञ्जातप्रत्यभिज्ञा सकरुणं रोदं रोदं निजवृत्तान्तमेवमवादीत्-

"प्रियतम ! तस्मिन् कन्दुकोत्सवेऽहं भवन्तमवलोक्य सञ्जातानुरागा प्रणयहृतहृदया विह्वलतां गता। परं चन्द्रसेना भवत्कथाभिर्मामाश्वासयामास। तदैव मया श्रुतं यत् पापीयान् मम सहोदरो भीमधन्वा रज्जुपाशबद्धहस्तपादं भवन्तं पयोनिधौ पातयितुमादिदेश।

श्रुत्वेदं लोमहर्षणकरं मनोहृदयोत्पीडनकरं वृत्तं प्राणाः मम व्युत्क्रमितुमारेभिरे। जीवनधारणं निष्प्रयोजनं मन्यमाना विगतभवविलासरसरुचिरहं भवदनुगमनकृतनिश्चया परिजनदृष्टिभिः परिहृता प्रमदवनमुपागता। तत्र कण्ठे रज्जुपाशमाबध्याऽऽत्महननाय कृतप्रयासायां मयि कालराक्षसोऽयं तत्र समायातः। कृतरतिप्रार्थनो मया भर्त्सितः प्रवृद्धरोषो बलात्कारेण मां करयोराबध्य गगनमार्गेणोत्पतितः। परन्तु विधिनोपकृताऽहं भवता संरक्षिता। साम्प्रतमहं न भवन्तं कथमपि परित्यक्तुमुत्सहे।"

एवं कथयित्वा सा मे प्राणेभ्योऽपि गरीयसी प्रिया राजनन्दिनी कन्दुकावती भुजवल्लरीभ्यां मां शेफालिकावल्लरी रसालतरुमिव सर्वाङ्गेषु सुदृढमाशिश्लेष।

तौ राक्षसब्रह्मराक्षसौ सम्प्रत्यपि लोमहर्षणं कातरजनभीतिप्रदं परस्परं युद्धसंलग्नाववर्तेताम्। कदाचित् समुत्पाटितसुदृढपादपस्कन्धाघातैः कदाचिद् विशालशिलाखण्डप्रक्षेपणैः कदाचिच्च भीतिप्रदसंगर्जनैः सह मुष्टिपादप्रहारैरेव परस्परं प्रहरन्तौ तावन्योन्यं जघ्नतुः। तयोः धराधरखण्डसमकायाभ्यां निस्सरन्त्या रुधिरधारया सकलस्तत्प्रदेशो रक्तकर्दमसंलिप्त इव बभूव।

अहमप्यवसरं लब्ध्वा कन्दुकावत्या सह पर्वतशिखरादवतीर्य जलधितटमुपगम्य

पोतमारुरोह। यवनभटाः मां प्रतीक्षाञ्चक्रिरे। मदादेशेन नाविकाः पोतं दामलिप्तां प्रति प्रणुनुदिरे।

मया सह कन्दुकावतीमवलोक्य पश्चात्तापवह्निदग्धहृदयस्य पूर्वमेवाऽतितरां लज्जितस्य भीमधन्वनो नयने त्रपाभरेणाऽवनेमतुः। प्रियानुरोधेनाऽहं तं श्यालश्रेष्ठं बन्धनविमुक्तं कर्तुं समादिदेश। अचिरेणाऽस्मत्पोतो दामलिप्तापत्तनं प्रविष्टः।

तस्मिन् समये सहाहाकारकोलाहला दामलिप्ता नगरी महोपद्रवग्रस्तेवाऽवर्तत। सुतस्य सुतायाश्च वियोगमसहमानः सुह्मजनपदाधिपतिः नरपतिस्तुङ्गधन्वा प्राणानां मोहं परित्यज्य लोकासक्तिविरतः कृतस्वर्गगमननिश्चयो राजमहिष्या सह बङ्गसागरतटं समायातः। सर्वे प्रजाजनाः राजभक्ताः सहाहाकारं करुणं विलपन्तस्तत्र समवेता अजायन्त।

दृश्यमेतदवलोक्याऽहं राजनन्दिन्या कन्दुकावत्या राजनन्दनेन भीमधन्वना च सार्द्धं त्वरितमविलम्बं तत्स्थानमुपागच्छं यत्र महाराजस्तुङ्गधन्वाऽऽत्महननात् पूर्वं समुद्रं पूजयति स्म। झटित्येवाऽग्रेसरीभूयाऽहं सचरणस्पर्शं राजानं प्रणन्तुमवनतोऽभवम्। सुतं सुताञ्च भीमधन्वानं कन्दुकावतीञ्च तत्समक्षं प्रस्तूय मया सकलो वृत्तान्तो वर्णितः। अतितरां प्रसन्नेन सुह्मजनपदाधिपतिना तुङ्गधन्वना सा त्रिभुवनललामभूता कन्दुकावती शास्त्रोक्तविवाहसंस्कारविधिना मह्यमर्पिता। तदनन्तरमहं युवराजपदेऽभिषिक्तः। भीमधन्वाऽपि मदनुगत आसीत्। मदादेशेनाऽसौ चन्द्रसेना-मत्याक्षीत्। साऽपि प्रणयिनी प्रणयिना कोशदासेन सङ्गता।

निजचरितं विस्तरेण वर्णयन् मित्रगुप्तः क्षणं विरम्य पुना राजकुमारं राजवाहनमवादीत् -

"कुमार ! सुह्मजनपदस्य शासनधुरं वहतो मे कानिचिदेव दिनानि व्यतीतानि, अङ्गजनपदाधिपस्य सिंहवर्मणो निमन्त्रणं मया सहायतायै समधिगतम्। अत्राऽऽगत्य भवद्दर्शनपुण्यलाभो जातः। सम्प्रति भवदादेशं प्रतिपालयन्तो वयं कार्याणि करिष्यामः।"

मित्रगुप्तस्य चरितमाकर्ण्य परमप्रसन्नो राजवाहनो रदनच्छदयोः स्मितभानीय प्रावोचत् -

"भाग्यस्य गतिर्विचित्रा। परं विधिसहायोऽपि पुरुषः पुरुषार्थेनैव साफल्यमधिगच्छति। अतः विधिपुरुषार्थयोः संयोग एव शुभपरिणामकारी भवति।"

तदनन्तरं तेन समीपस्थे मन्त्रगुप्ते दृष्टिर्व्यापारिता। मन्त्रगुप्तोऽपि प्रियादर्शनक्षत-व्रणिताधरस्त्रपाभरेण वामेतरकरेणाऽधरक्षतव्रणमाच्छादयन् कथमप्यात्मानं संयम्य राजवाहनस्याऽऽदेशं परिपालयन् निजवृत्तान्तमेवमवादीत् -

# द्वादशी-पीठिका

## मन्त्रगुप्तः

## द्वादशी-पीठिका

### मन्त्रगुप्तः

राजनन्दन ! भवतो गतिमजानन्तो वयं सुहृदश्चिन्ताग्रस्तमानसाः परमामुद्विग्नतां प्रापुः। अतिदुःखितैरस्माभिस्तस्मिन्नरण्ये सर्वतो भ्रान्त्वाऽन्वेषणं विहितम्। परन्तु कुत्रचिदपि भवतश्चिह्नमात्रमपि नोपलब्धम्। तेन मातङ्गेन सह गतो भवानिति विचारितमस्माभिः। अस्मल्लक्ष्यमुज्जयिनीनगरमासीत्।

तदनन्तरं सैनिकान् सेवकांश्च मगधाधिपस्य राजहंसस्याऽन्तिकं संप्रेष्य वयं निरणयाम-

"विभिन्नासु दिक्षु वर्षैकपर्यन्तं परिमार्गमाणा वयं कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यामुज्जयिन्यां शिप्रातटवर्तिनि महाकालमन्दिरे सङ्गमिष्याम इति।"

तदनन्तरमस्माभिः सर्वैः कुमारैः विविधास्वाशासु प्रस्थितम्। अहमपि पूर्वस्यां दिशि कलिङ्गान् प्रति प्राचलम्।

कलिङ्गजनपदस्य प्रधाननगरं भुवनेश्वरमुपगते मयि सूर्यास्तङ्गमनवेलायामहोरात्र-संयोगकालीनमवतमसं स्वाधिपत्यं प्रासारयत्। मार्गश्रमक्लान्तकायोऽहं नगराद् बहिः पितृवनसमीपं सघनतमालतरुषण्डस्याऽधस्तात् कोमलकिसलयानि सन्निचित्य शयनं विरच्य तत्रैवाऽशयम्। अथ च भाविकार्यक्रमविषयकमचिन्तयम्।

कृष्णपक्षस्याऽन्तिमतिथिरवर्तत। कालाञ्जनसन्निभेन प्रगाढान्धकारेण विफलतां गता मे दृष्टिर्न किमप्यवलोकयितुं समर्थाऽऽसीत्। परितो गहननिस्तब्धतायाः शासनाधिकारोऽवर्तत। परं कदाचिज्झिल्लीझङ्काररवविमिश्राः श्मशानमध्यगत-गोमायुहुङ्कारचीत्कारा अश्रूयन्त। अवश्यायसन्निपातेन वर्धमानेऽपि शैत्ये सकलदिवस-यात्राश्रमजन्यक्लान्तितन्द्रा मामभिबभूव। शनैः शनैः निद्रया मे पक्ष्माणि सम्मुद्रितानि। गहननिद्रापरवशोऽहमस्वाप्सम्।

निशान्तसमये सहसा सुतीव्रसुतीक्ष्णध्वनिर्मां प्राबोधयत्। कस्यचिदतिव्यथितस्य जनस्य करुणकठोरक्रन्दनरवो वृक्षषण्डान्तरालादागत्य पितृवनमध्यसमुत्पन्नो भूत्वा मम कर्णकुहरं प्राविशत्। कोऽपि सकरुणं क्रन्दति स्म -

"हा ! दुर्वृत्तोऽयं तान्त्रिकः कथमपि मां न प्रहास्यति। अस्य क्रूरत्वं राक्षसानप्यतिशेते। प्रियया सह रतिविलासयोग्ये काले निजकार्यसाधनाय समाकृष्टोऽहमनेन क्रूरहृदयेन तान्त्रिकेन। परन्तु किं करोमि ? क्व गच्छामि ? न परिलक्ष्यते तथाविधः कोऽपि वीरो बुद्धिमान् परहितकारी, योऽस्य वधं विधाय मम मुक्तिमार्गं प्रशस्तं कुर्यात्। अथ

च कार्यसिद्ध्यनन्तरमयं तान्त्रिकोऽतिनृशंसोऽनन्तामप्रतिविधेयां शक्तिमुपलभ्य लोकानां जीवनानि दुष्कराणि विधास्यति।"

शब्दानेतान्निशम्यौत्सुक्यसम्भृतहृदयस्य निद्रा मे तत्क्षणं व्यपगता। "कोऽयं तान्त्रिकः, काञ्च सिद्धिमभिलषति, कोऽयमस्य दासभूतः सेवक?" इति चिन्तयन् किसलयशयनादुत्थाय सावधानतया नीरवं तं ध्वनिमनुससार। तमालतरुषण्डस्य पारे मयाऽवलोकितम् -

सुविस्तृतश्मशानभुवि बह्व्यश्चिताः प्रज्वलन्ति। तत्राऽतिविशालमश्वत्थतरुं निकषा शवस्यैकस्योपरि विकरालस्वरूपस्तान्त्रिकः कश्चिदुपविष्टः। वसनरहितोऽसौ चिताभ्यो विचितानामस्थिशकलानां मालिकां कण्ठे दधार। ग्रीवायां नरमुण्डानां स्रगपि समवलोक्यते स्म। सर्वं शरीरं चिताभस्मलेपेन संलिप्तम्। वदनं सघनश्मश्रुणाऽऽवृतं शिरश्च विद्युद्धारावर्णैः प्रज्वलदग्निशिखाभिरिव स्थूलदीर्घजटाभिराच्छादितम्।

शवस्य सन्निकटं हवनकुण्डमिव विरच्य तेन वैश्वानरः सन्दीपितः। तत्र च स्थाल्यां तिलसर्षपाक्षतरक्तकर्णिकारपुष्परोचनाचूर्णराशिरपि दरीदृश्यते। तान्त्रिकस्य समक्षं विशालाकृतिः कश्चिन्मांसादो राक्षसो बद्धाञ्जलिस्तिष्ठति। तान्त्रिको स्फुटस्वरेण मन्त्रपाठं कुर्वन् स्वाहेति ध्वनिना साकं तिलादिसामग्रीद्रव्याणि वह्नौ जुहोति। आहुतिभिः सह सन्दीपिताः वह्निशिखास्तमांसि भित्त्वा निकटस्थितान् प्रदेशान् प्रकाशयन्ति।

कुतूहलाकृष्टहृदयोऽहं निःशब्दपदविन्यासमश्वत्थपादपस्कन्धपृष्ठतो निभृतं स्थितः। तान्त्रिको मन्त्रमेकमस्फुटं समुच्चार्य स्थालीनिहितां सकलामाहुतिसामग्रीमनले प्राक्षिपत्। वह्निशिखाः भृशं समुज्ज्वलन्त्यः परितो भास्वरं प्रकाशं प्रासारयन्। तदनन्तरं तान्त्रिको राक्षसे दृष्टिमुन्नमितां व्यापारयत्। राक्षसोऽपि बद्धाञ्जलिर्विनम्रस्वरेणाऽवोचत्-

"भगवन्! विनीतसेवकोऽहं भवतः। आज्ञाप्यतां किं करणीयं मया?"

तान्त्रिकः समादिशत् -

"गच्छ, कलिङ्गराजस्य कर्दमस्य नवप्रस्फुटितयौवनाढ्यां सुतां कनकलेखाम-विलम्बमत्र समुपस्थापय।"

तान्त्रिकस्याऽऽदेशमुपलभ्य राक्षसस्तत्क्षणं गगने समुत्पपात। मुहूर्तमात्रेणाऽसौ सद्यः प्रस्फुटितनवतारुण्यामेकां तरुणीं करयोर्वहन् तत्रोपस्थित आसीत्। तस्य भुजपञ्जरे निबद्धा लावण्यमयी सौन्दर्यगुणेनेव विधात्रा निर्मिता सजलश्यामलजीमूताडम्बरमध्ये सुतप्तकनकरेखासौदामिनीव विचेष्टमाना सा तरुणी करुणं क्रन्दमानाऽरोदीत्। करुणं तारस्वरेण साऽक्रन्दत् -

"परित्रायतां भो! परित्रायताम्। अस्माद् दुष्टकुणपान्मां परित्रायताम्। हा पितः! कुत्राऽसि त्वम्? हा मातः! सत्वरमागच्छ। बलान्नयति मामयं मांसादो राक्षसः।

सततं प्रवहदश्रुक्लिन्नाननायास्तस्याः कण्ठस्तारस्वरेण क्रन्दनेनाऽवरुद्धः। राक्षसेन

सा राजनन्दिनी कनकलेखा कलिङ्गराजकन्या तान्त्रिकसमक्षं पुष्पोपहाराञ्जलिरिव समुपन्यस्ता। कनकलेखामवलोक्याऽसौ दुर्वृत्तस्तान्त्रिकः परमां प्रसन्नतामध्यगच्छत्। साट्टहासमुत्थाय शवासनात् तरुण्याः कुञ्चितकेशान् मौक्तिकस्रग्भिः गुम्फितान् मेघघटासममसृणश्यामानाजानुलम्बिनो वाममुष्टिकायां निगृह्य समीपस्थं भुवि रक्षितं दीर्घमसिं वामेतरे करे गृहीत्वा तस्याः शिरश्छेत्तुमुदतोलयत्।

तान्त्रिकस्य जघन्यतमामिमां चेष्टामालोक्य रोषारुणिमनयनोऽहमश्वत्थस्तम्भपृष्ठतो निर्गत्य तरसा धावित्वा तान्त्रिकस्य हस्तादसिमाच्छिद्य तेनैव तस्य शिरोऽच्छिदम्। पिङ्गलवर्णेन जटाजूटेन जटिलं कृष्णवर्णश्मश्रुणा च श्यामषण्डं तच्छिरो चिताभस्मावलिप्तकबन्धात् पृथग्भूय भुवि पतित्वा व्यचेष्टत। धारायन्त्रनिर्गतरक्तजलधारयेव सद्यः-प्रस्फुटितरुधिरधारया भुवि शोणितकर्दमो वितस्तार। तत् कृत्तं शिरो मया खड्गाग्रेण विचित्याऽश्वत्थस्कन्धस्य कोटरे निक्षिप्तम्।

ममैतं पराक्रममवलोक्य कुणपः परमप्रीतिसम्भृतहृदयो मां निरैक्षत। बद्धाञ्जलिश्चरणयोर्मे निपत्य व्यपगतपीडोऽसौ बभाषे -

"वीर ! पुण्यं कार्यं कृतं भवता। निकृष्टचरितेनाऽनेन तान्त्रिकेण मन्त्रसाधनैर्वशीकृतोऽहं निरन्तरमुत्पीडितो भर्त्सितस्तर्जितोऽकरणीयेषु कार्येषु सततं नियुक्तो भवामि। यथाऽभिलषितमसौ मन्त्रबलसामर्थ्येन मामनिच्छन्तमपि समाह्वयति स्म। अस्याऽऽतङ्केन निद्राऽपि मां दूरतोऽत्याक्षीत्। भवानद्य पुण्यतमं कार्यं कृत्वा नारकीयमिमं कीटं नरकयातनाभोगाय नरकाग्निदहनाय नरकगामिपथपथिकमकार्षीत्। सङ्ख्यातीताः लोकाः भवता रक्षिताः।

परमरूपस्वामिनीं सर्वगुणलक्षणसमन्वितां राजनन्दिनीमिमां यद्ययं तान्त्रिको यज्ञवह्नावहोष्यत्, सकलभूमण्डलराज्याधिकारसम्पन्नो महतीं सिद्धिमगमिष्यत्। मां भवानद्य दुष्टतमस्याऽस्य तान्त्रिकस्य दासभावादमोचयत्। राजसुतायाश्च प्राणानरक्षत्। अनुगृहीतोऽहं दासस्तव। आदेशं भवतोऽधिगम्य महतीं प्रसन्नतामधिगमिष्यामि।"

राक्षसस्य वचांस्याकर्ण्याऽहमब्रुवम् -

"राक्षसराज ! क्षुद्रेऽपि कार्ये सम्पन्ने यन्मे गुणाः प्रशस्यन्ते, तद् भवतो महिमा। साधूनामियमेव प्रकृतिः, यत्ते स्वल्पेऽपि कार्ये बहु प्रत्युपकारं कर्तुमभिलषन्ति। राजनन्दिनीं प्रति कृतोपकारो भवान् मय्यनुग्रहं करिष्यति। इयमतिसुकुमारा कुसुमपेलवकाया मृदुप्रकृतिः सौन्दर्यमयी त्रिभुवनललामभूता कथमपि कष्टं सोढुमसमर्था भवता लालनीया। पूर्ववत् तां राजप्रासादे संरक्ष्य मयि समुचितमुपकारं भवान् करोतु। अतोऽधिकं न मयाऽपेक्ष्यते।"

ममेदं वचनमाकर्ण्य राजनन्दिनी कनकलेखेव कनकलेखा चमत्कृत्य परिवृत्य

मामवालोकयत्। इन्दीवरदलसमं तस्याः नयनकनीनिकायुगलं जुघूर्णे। मन्मथधनुर्मण्डलाभिभवसमर्थं भ्रूयुगलं धनुर्मण्डलत्वं प्रपेदे। अनुरागसम्भृतहृदयायास्तस्याः कपोलयुगमनुरागेणाऽनुरक्तमभूत्। त्रपाभारावनम्रा सा मुखमवनमय्य वामेतरचरणाङ्गुष्ठनखेन भुवं व्यलिखत्। वाष्पधारा नयनाभ्यां प्रसृत्य कपोलाभ्यां प्रवहन्ती कुचाग्रपतनभिन्ना भूमितलमार्द्रयामास। प्रस्वेदक्लिन्नं रोमोद्गमविषमितं वपुश्चकम्पे। वक्षःस्थलमुन्नतावनतं कुर्वाणाः दीर्घनिःश्वासमारुता अधरं कम्पयन्तो निरीयुः। कथमप्यात्मानं नियम्य वस्त्रप्रान्तेनाऽश्रूणि प्रमृज्य सा स्खलितवचनैर्मामवोचत् -

"आर्य ! असूनां परित्राणकर्ता भवान् मे वपुषो मनसो हृदयस्य प्राणानाञ्चाऽपि स्वामी। मृत्युमुखादाच्छिद्य मां कथमिव विरहानलाहुतिं कर्तुं प्रयतते। कथमपि भवच्चरणसेवासौभाग्यं प्राप्नुयामित्यादेशो भवता करणीयः। भवदादेशं सदा सततं परिपालयिष्यामि। भवन्तमेवाऽनुगमिष्यामि। यत्र भवान् यास्यति तत्रैवाऽहमपि यास्यामि।

यदि च भवानभिलषति मे कन्यान्तःपुरमागच्छतु। न कोऽपि व्याघातो भवन्तं पीडयिष्यति। न च कोऽपि भवतो रहस्यं ज्ञास्यति। सन्ति मयि भृशमनुरक्ताः विश्वस्ताः सेविकाः सख्यश्च। सततं मे रहस्यं ताः रक्षिष्यन्ति वचनानि च मे पालयिष्यन्ति। सम्प्रति भवानेव मे प्राणाः जीवनसर्वस्वञ्च। भवतामहं चरणसेविका। भवद्विरहवह्निदग्धा नूनमहं न प्राणधारणे क्षमा।"

राजसुतायाः कलिङ्राजदुहितुर्वचनानीमानि हृदयं ममोन्ममन्थुः। तस्यास्तिर्यग्वीक्षणैः प्रणयसम्भृतप्रियवचनैश्च प्रथममेव प्रहतोऽहं पुनः प्रगाढं प्रहतः। अयं प्रणयपाशो लोहनिर्मितसुदुढशृङ्खलाभ्योऽपि दृढतरोऽभूत्। अहं राक्षसराजमवोचम् -

"भद्र राक्षसराज ! यदि भवान् मय्युपकारमभिलषति, राजदुहितुरादेशं परिपालयतु। एषा भवताऽपहृत्य समानीता। परमनयाऽत्र स्थित एवाऽहमपहृतः। असति तथा मृदुप्रकृतिरप्यनङ्गोऽचिन्तनीयामवस्थां मे करिष्यति। अतो माममिमाञ्च हरिणशावकाक्षीं सममेव राजप्रासादस्य कन्यान्तःपुरं भवान् नयतु।"

राक्षसस्तत्क्षणमेव ममाऽऽदेशं परिपालितवान्। द्वावप्यावामेकस्मिन् करतले धृत्वा राजनन्दिन्याः कनकलेखाया आवासं निनाय। शुभ्रसुधाद्रवसंलिप्तोऽसौ प्रासादः शरत्कालीनमेघशोभां दधार। कन्यान्तःपुरप्राङ्गणे मां राजसुताञ्च कनकलेखामवतार्याऽसौ यथाभिलषितां दिशमयासीत्।

तस्मिन् समये सर्वे प्रासादवासिनो जनाः प्रगाढनिद्राभिभूताः स्वपन्ति स्म। विजने प्राङ्गणे उभावप्यावां स्थितौ कतिपयक्षणं परस्परं साभिलाषं प्रमुग्धनयनौ व्यलोकयाव। झटिति मया प्रसारितयोर्भुजयोर्मध्ये समावेशिता सा मुग्धा नायिका राजकुमारी कनकलेखा मां प्रगाढं समाशिश्लेष। क्षणं विस्मृत्य सर्वस्य लोकस्याऽन्योन्यालिङ्गननिबद्धावावां

तथैवाऽतिष्ठाव। तदानीं सहसा सुदूरात् कस्याऽपि चक्रिकायाः विरहार्तध्वनिः श्रुतिगोचरीभूतः। ससाध्वसमावां पृथग्बभूविव।

राजकन्या कनकलेखा सर्वासु परिस्थितिषु करणीयं विचार्य प्राङ्गणनिकटस्थसोपान-पङ्क्तिं निजवामहस्तेन मे दक्षिणकरमवलम्ब्याऽऽरुरोह। एकमतिभव्यं सर्वविधसुखसुविधा-विलाससम्पन्नं सर्वोपकरणसंयुतं प्रकोष्ठमावां प्राविशाव। अस्मादेव प्रकोष्ठात् केनाऽप्यविज्ञाता सा राजकन्या राक्षसेनाऽपहृत्य पितृवनं नीता। प्रकोष्ठद्वारभुवि द्वे सेविके भूम्यामेव प्रगाढनिद्रोत्सङ्गशायिन्याववर्तेताम्। कनकलेखया प्रेरितोऽहं निभृतं कक्षं प्रविश्य शुभ्रास्तरणाच्छादिते पर्यङ्के समुपविष्टः।

तदनन्तरं बहिरागतायाः राजसुतायाः करतलस्पर्शमवाप्य तत्र सुप्तं सेविकायुगलं तत्क्षणं जजागार। सुप्तोत्थिते ते सेविके मल्लिकामहल्लिके सकलं व्यापारं निशम्य त्रासेन सङ्कुचिते अभवताम्। परं स्वामिन्याः सङ्केतेनोपदेशेन च प्रशान्तचित्ते समजायेताम्। कदाचित् कालानन्तरं प्रहरिणः समागच्छेयुरिति नीरवं पदनिक्षेपध्वनिमपि परिहरन्त्यौ ते प्रकोष्ठान्तः समाजग्मतुः। आगत्य ते सेविके मम चरणयोः प्राणमताम्। वेणीधृतसुमनःस्रग्भ्यः पतितैः स्वर्णिमपरागैर्मे पादौ रञ्जितौ। तयोरेका वयोगुर्वी सुविनीता मल्लिका मामवोचत् –

"आर्य! आवयोः स्वामिन्याः प्राणरक्षको भवानस्याः वपुषो मनसः हृदयस्य प्राणानाञ्च स्वामी विधिना विहितः। भगवता मकरकेतनेन प्रणयाग्निसाक्षिकमियं भवते समर्पिता। सम्प्रति भवानस्मत्स्वामिन्याः भुजयुगरूपां वरमालां कण्ठे धृत्वा हृदयरूपं रत्नं स्वहृदयविभूषणं करोतु। विगतचिन्तो भवानत्र कन्यान्तःपुरे छदिषि विविक्ते संस्थिते प्रकोष्ठे निवसतु। राजनन्दिन्याश्च प्रणयरसविलासानन्दप्रहर्षमनुभवतु। भवतो रहस्यमुपस्थितिञ्च न कोऽपि ज्ञास्यति।"

इति वचनानि समुच्चार्य सा मल्लिका द्वितीयया सेविकया महल्लिकया सह कक्षाद् बहिर्निर्गता। ममाऽऽतिथ्यस्य समुचितं प्रबन्धं विधाय सा राजकन्या मम हृदयमनोवपुःप्राणानां स्वामिनी ह्यात्मानं मह्यं समर्पितवती। तस्याः प्रगाढालिङ्गनेषु सुदृढं निबद्धोऽहं रतिविलाससुखोपभोगेष्वशेषेणाऽऽत्मानं न्यमज्जयम्। एवं कति दिवसाः व्यतीता इत्यहं न जाने।

राजनन्दिन्या कनकलेखया सह तस्मात् पितृवनाद् यदाऽहं कन्यान्तःपुरं प्रविष्टः शरदृतुः समाप्तप्राय आसीत्। हेमन्तर्तोः शुभागमनं सञ्जातम्। तदनन्तरं शिशिरर्तुः समागत्य प्रयातः। वसन्तसमयो भूमण्डले साम्राज्यं वितस्तार।

फाल्गुनमासस्य रमणीयेषु दिवसेषु मनसां हृदयानाञ्चोन्मादकेन दक्षिणमलयपवनेन रसालानोकहाः नवप्रस्फुटितमञ्जरीभिः सम्भृताः। सौरभमयीनामाम्रमञ्जरीणामास्वादनेन

सुमधुरकण्ठानां पिकानां कुहूरवैर्विरहिणां हृदयानि विदीर्णानि। बकुलपादपानां सौरभान्विताः शुभ्रमञ्जर्योऽधःक्षरन्त्यो भूमितलमाच्छाद्य शुभ्रगुणं सर्वत्र प्रसारितवत्यः। तिलकतरवः प्रतनुशुभ्रकुसुमराशिभिः वन्यभूमीः मकरकेतनस्य विलासक्रीडास्थलीरकुर्वन्। किङ्किरातापादपानां नवप्रस्फुटितारुणसुमगुच्छकाः अङ्गाररूपाः विरहिणां हृदयान्युत्पीडितान्यकुर्वन्। सरसीषु समुद्भिन्नानां पुण्डरीकेन्दीवरतामरससरसिजानां मध्ये विहरतां राजहंसानां सारसानाञ्च क्रेङ्कारध्वनिभिः दिशां प्रान्तराणि निनादितानि।"

मधुसमयस्य तेषून्मादकेषु दिवसेषु कलिङ्गाधिपेन कर्दमेन वनविहारकार्यक्रमो निर्धारितः। महिषीभिर्मन्त्रिभिः परिजनैश्चाऽन्यैः सम्मानितैः पौरैः सहाऽसौ राजा समुद्रतटवर्तिनारिकेलवनमगच्छत्। पितुरनुरोधेन मे प्रणयिनी राजसुता कनकलेखा तत्र गमनाय बाधिता बभूव।

विवशाभ्यां तृषिताभ्यां नयनाभ्यां मां निरीक्षन्ती तिर्यग्दृष्टिपातैः प्रहरन्ती सा मम हृदयस्य स्वामिनी शीघ्रागमनं निवेदयन्ती जनकेन सह प्रस्थिता। अहमपि सर्वेषां लोचनानि परिहरन् कन्यान्तःपुराद् बहिर्निर्गत्य राजपुरुषाणां सम्मर्दे सम्मिलितो भूत्वा समुद्रतटवर्ति नारिकेलकाननं समाससाद।

भुवनेश्वरस्य दक्षिणपूर्वदिशि महेन्द्रगिरेरुपत्यकाया आरभ्य सागरतीरपर्यन्तं विस्तृता समतलभूमिर्वतति। तत्र रसालजम्बूशिंशपाबकुलाशोकतमालशिरीषशाकदम्बकाञ्चनार-निम्बखदिरादितरुषु गणनातीतङ्ख्येषु विद्यमानेष्वपि नारिकेलवृक्षाणामेव प्राचुर्यं वतति। अस्मादेव हेतोरिदं वनं नारिकेलवनमित्यभिधीयते। चन्दनतरवोऽप्यत्र यत्र तत्र समुपलभ्यन्ते। तेषां श्वेतवर्णप्रसूनानामुन्मादकेन सौरभेण सर्वत्र नासिकातृप्तिकरः सुगन्धः प्रसरति। पादपस्कन्धविटपाश्लेषिण्यो वल्लर्यः तरुशिखरेभ्योऽप्युपरि वर्धमानाः शिखाः प्रसारयन्ति। वन्यपतत्रिणो मधुरकलरवैः कर्णेषु पीयूषधारामिव प्रच्यावयन्ति दिशश्च निनादयन्ति। राजपुरुषैः प्रथममेव तत्राऽऽगत्याऽस्मिन्नरण्ये राजविलासानां क्रीडानाञ्च प्रबन्धो विहितः।

कङ्गिराजः कर्दमोऽस्मिन् ऋतुराजसमये सुरम्ये चित्तहारिण्यरण्ये विविधक्रीडाभिर्वि-लासैश्चाऽऽत्मानं व्यनोदयत्। तस्य परिजनाः मन्त्रिणोऽमात्याः राज्याधिकारिणः पौरजानपदाः सेवकाश्चाऽपि तत्राऽऽनन्दामोदभराश्चिक्रीडुः।

कलिङ्गराजेन प्रोत्साहिताः सर्वे जनास्तत्र कदाचिन्मृगयासु कदाचित् पशुपक्षिद्वन्द्व-युद्धक्रीडासु कदाचिदश्वधावनेषु कदाचिद् रथगतिषु कदाचिदक्षक्रीडासु कदाचिन्नृत्य-गीतवाद्यसङ्गीतत्रिकेषु कदाचित् काव्यगोष्ठीषु कदाचित् समुद्रस्नानेषु कदाचिच्च नौकाविहारेषु विविधेष्वन्येषु च क्रीडासुखेषु सततं रताः समयमत्यवाहयन्। राजसेवकेषु सम्मिलितोऽहं कदाचिच्छशिरश्मिकोमलासु रजनीषु प्रियामिलनावसरमपि लेभे। अनेन

क्रमेण पञ्चदशदिवसानामवधिर्व्यतीतः। अथ फाल्गुनमासस्य पूर्णचन्द्रदिवसः समागतः। तस्मिन् दिवसे वसन्तोत्सवस्य विशिष्टमायोजनं कृतमवर्तत।

कलिङ्गानां दक्षिणदिश्यान्ध्रजनपदस्य स्थितिर्वर्तति। आन्ध्राधिपस्य जयसिहंस्य कलिङ्गराजेन कर्दमेन सह वंशपरम्परागतं पुरातनं वैरं प्रावर्तत। कलिङ्गेश्वरसुतायाः कनकलेखायाः रूपलावण्यप्रज्ञाप्रतिभादिगुणगणकीर्तिं चतसृषु दिक्षु प्रसृतां निशम्य जयसिंहः परिणयप्रस्तावं प्रेष्य पुरातनं विवादं समापयितुमियेष। परं सविनयमनुरोधितोऽपि कलिङ्गराजो दुर्दममदाविष्टहृदयः प्रस्तावमेनं नावमंस्त। तिरस्कृत्याऽनया भृशं प्रकुपितो जयसिंहो निभृतं स्थितोऽवसरस्य प्रतीक्षाञ्चकार। कथमपि सा राजनन्दिनी कनकलेखाऽपह्रियेत। परन्त्वद्यावधि नाऽसौ कमपि तथाविधमवसरं लेभे।

फाल्गुनपूर्णिमादिवसे विशिष्टमनोरञ्जनेषु वारविलासिनीभिः सह क्रीडासु कलिंगराजेन सह सर्वे जनास्तथा संसक्ताः यथा सकलः सुरक्षाप्रबन्धो विशृङ्खलितो बभूव। मन्त्रिणां राज्याधिकारिणां सेनापतीनां सैनिकानां परिजनानां सर्वेषा तथाविधा दशा समवर्तत।

प्रभाते बालभास्करे सुदूरनीलसमुद्रक्षितिजात् समुद्गतेऽरुणायिते च नीलसागरसलिले सुसज्जितासु शतशस्तररुणिषु मनोऽभिरामाभिः युवतिभिः परिजनैश्च सार्द्धं महाराजः कर्दमः सागरविहाराय निर्गतः।

आन्ध्राधिपस्य जयसिंहस्य सक्रियैर्गुप्तचरैस्त्वरितं स समाचारः स्वामिसमक्षं प्रेषितः। प्रथममेव युद्धाय कृतनिश्चयेन जयसिंहेन नौसेनया श्येनेन कपोन इव सहसाऽऽक्रम्य कलिङ्गाधिपः पाशेष्वाबद्धः। नृत्यरङ्गेषु वारुणीपानेषु च मदोन्मत्तः कलिङ्गराजः किमपि प्रतिकर्तुमक्षमोऽवर्तत। कर्दमेन सह तस्य भार्याऽपि रिपुहस्ते पतिता। जयसिंहेन कनकलेखाऽधिष्ठिता तरणिरप्याक्रान्ता। नाविकवेषेणाऽहमपि तत्रोपस्थित आसम्।

शस्त्ररहितेनाऽपि मया जयसिंहस्य दुर्दमनीयैर्नौसैनिकैः सह यथाशक्ति सङ्ग्रामो विहितः। परन्तु शस्त्ररहितो न किमपि प्रतिकर्तुं समर्थोऽभवम्। नौसैनिकस्यैकस्य खड्गप्रहारेण शिरसि प्रहतो विगतचेतनोऽहं तस्यामेव तरण्यामपतम्। आक्रमणकारिणस्ते मम प्रणयिनीमपहृत्य त्वरितं प्रयाताः। मुहूर्तेन चेतनामुपलभ्य मया विचारितम् -

"प्रिया मे पितृभ्यां सह शत्रुहस्ते पतिता। अयं कुत्सिताचरणो जयसिंहः प्रथममेव कलिङ्गराजसुतां प्रच्छन्नरूपेणाऽभिलषति स्म। साम्प्रतमयं विजयमदोन्मत्तो ध्रुवं कलिङ्गराजं तस्य महिषीञ्च कनकलेखया सह विवाहाय समुत्पीडयिष्यति। ततस्तदनुमतिञ्च प्राप्स्यति। मयि प्रेमपरायणा मामेव भर्तारं मन्यमाना मामेव ध्यायन्ती सा कनकलेखा कदाचिदपि विपदमेतां न सहिष्यते। परं जयसिंहोऽसावान्ध्राधिपतिः कनकलेखां परिणयनाय विवशां विधास्यति। प्रस्तावमेनमसहमाना सा विषेण वा

कण्ठबन्धनेन वाऽन्येन वा केनाऽप्युपायेन प्राणांस्त्यक्ष्यति। अवस्थायामस्यामहमपि प्राणैः किं करिष्यामि।"

इति विचार्याऽहं समुद्रसलिले निमज्ज्य प्राणपरित्यागं विनिश्चित्य तरणितलतः समुत्थातुमैच्छम्। परं व्रणजनितपीडा मां न्यवारयत्। विधिनियोगेन सा तरणिरपि जलनिधिलहरीप्रवाहैः सञ्चोदिता सागरसैकततीरमासाद्य स्थिरा बभूव। तत्र केचन नाविकाः मत्स्यजीविनश्च नौकासु स्थिताः मामपश्यन्। करुणापूर्णहृदयास्ते व्रणिताङ्गं मामुत्थाप्य गृहमानयन्। चिकित्साप्रबन्धञ्च विहितवन्तः। किञ्चित् स्वस्थीभूतेन रूढव्रणेन मयाऽऽत्महननविचारः परित्यक्तः। प्रियायाः कनकलेखायाः वृत्तान्तजिज्ञासयाऽहमान्ध्रजनपदराजधानीमान्ध्रनगरं प्रति प्रतस्थे।

आन्ध्रनगरं समापन्ने मयि दिनमणिरस्तञ्जगाम। निशान्धकारस्य साम्राज्यं सर्वतो विस्तृतम्। नगरस्य गोपुराणि सम्मुद्रितान्यभवन्। अपरिचितजनानां नगरप्रवेशो निषिद्धः। नगरद्वारोपान्तं संस्थितां पान्थशालां गत्वाऽहं विश्रामाय स्थानं प्रार्थितवान्। तत्र नागरिकेनैकेन विप्रेण मित्रत्वमहमापन्नः। परस्परं मिथः संलापैरसौ विप्रो मामसूचयत् -

"भद्र ! कलिङ्गेश्वरेण कर्दमेन सहाऽऽन्ध्रजनपदाधीश्वरस्य पुरातनं वैरं वंशपरम्परागतं वर्तते। आन्ध्राधिपेन जयसिंहेन कलिङ्गाधिपः सभार्यः कारागारदण्डेन दण्डितः। तमसौ राजा सततं घोरं समुत्पीडयति। तस्य वधमिच्छन्नपि कनकलेखानिमित्तं तं रक्षति। अतिशयेनाऽऽसक्तचित्तस्तां प्रच्छन्नरूपेणाऽभिलषति। परं सा कलिङ्गनन्दिनी यक्षेणैकेनाऽधिष्ठिता। कमपि युवानमवलोक्य विक्षिप्तचित्ता सा तं दन्तैश्छेत्तुं धावति। आन्ध्राधिपेन सततं विधिसहितं चिकित्स्यमानाऽपि न कथञ्चित् स्वास्थ्यं लभते। तान्त्रिकाणां मन्त्रपाठानामपि न कश्चित् प्रभावो लक्ष्यते। सम्प्रति महाराजस्य घोषणेयं वर्तते -

यः कश्चित् कलिङ्गराजतनयां कनकलेखां नीरोगतां नेष्यति, एकलक्षस्वर्णनिष्कसम्मितप्रसादशुल्कमधिगमिष्यति।"

विप्रेण प्रोक्तं समाचारं विज्ञाय समाश्वस्तचित्तेन मया ज्ञातम् -

"मम प्रिया जीवति, मम च सततं स्मरति। परं मिलनोपायस्तु मयैव करणीयः।"

पान्थशालायाः नाऽतिदूरं पितृवनमासीत्। तत्र भ्रमणायाऽहमगच्छम्। श्मशानस्य प्रान्तभागे वटतरुरेकोऽतिपुरातनोऽवर्तत। जटाभिरावृतोऽसौ वटपादपो विस्तीर्णप्रदेशमभिव्याप्य प्रसृत आसीत्। वटवृक्षस्य निकटमागत्य मया दृष्टम् -

"न्यग्रोधपादपकोटरगता लघ्वी पौट्लिकैका तत्र विद्यते।"

कुतूहलसम्भृतमानसोऽहं पोट्टलिकां विचित्योद्घाट्य च तत्र काषायवर्णजीर्णवस्त्राणि

पिङ्गलवर्णकृत्रिमजटाः श्मश्रूश्चाऽवलोकितवान् ।

कृत्रिमपिङ्गलजटाभिः शिरः श्मश्रुभिश्च वदनं विभूष्य काषायजीर्णवसनैः शरीरमाच्छाद्याऽहं मान्त्रिकस्य भूतबाधाहरस्य वेषमधारयम् । तदनन्तरं तत्रैव पितृवने तपोवह्निमहं प्रज्ज्वालितवान् । स्वल्पेष्वेव दिवसेषु शिष्या अनेके मां निकषा समवेताः समभूवन् । शिष्याणां माध्यमेन ममाऽलौकिकानां सिद्धीनां यशः सर्वत्र प्रसृतम् ।

अलौकिकसिद्धपुरुषरूपस्य मम प्रसिद्धिः सर्वत्राऽऽन्ध्रमगरे प्रसरन्ती लोकान् विश्वासमापन्नान् अकरोत् । सर्वे जनास्तत्र मां भूत-भविष्यद्-वर्तमानत्रिकालसिद्ध-पुरुषरूपेणाऽजानन् । अलौकिकसिद्धीनामयं साधकः सर्वेषां मनोऽभिलाषाणां पूरयिता दुःखानाञ्च निवारको वर्तते । प्रभूतधनाकाङ्क्षिणो रोगाक्रान्ताः रिपुप्रतिकाराभिलाषिणः शत्रुपीडिताः, विविधविलासप्रणयिनः, कामुकाः, प्रणयिनीवशीकरणमानसा असफलप्रयासाः विरहविह्वलाः विरहिणः, सन्तानाभिलाषिणः शिशुक्रीडावात्सल्यप्रणयिनो गृहस्थजना इत्येवंविधानां लोकानां श्रेणयो मे तपोवह्निसमीपं समवयन्ति स्म ।

अहमपि शिष्याणां साहाय्येन सुगुप्तानन्तर्निहितान् रहस्यान् विज्ञाय तेषामभिलाषानपूरयम् । एवञ्च ते मयि सुदृढं भक्तिमन्तो विश्वासमापन्नाश्च सञ्जाताः । अथ च ते मम कार्याणि निर्देशांश्च महतोत्साहेन सम्पादयितुं तत्परा समजायन्त ।

अथ क्रमेण ममाऽलौकिकशक्तिसिद्धीनां सामर्थ्यस्य यशः कर्णाकर्णिकया जयसिंहस्याऽऽन्ध्राधिपस्य कर्णौ प्राविशत् । कलिङ्गराजकन्यां कनकलेखां कामयमानोऽसौ महीपतिर्मनसि चिन्तासन्तानपरायणः सततमुद्विग्न आसीत् । कनकलेखाऽभिभवकारको यक्षः कथमपि न तां परिहरति स्म ।

मम सिद्धीनां यशसा प्रभावितो राजा जयसिंह एकस्मिन् दिवसे प्रभाते मे तपोवनवह्निसमीपमाजगाम । सर्वं जानन्नप्यहं चक्षुषी सम्मुद्र्य समाधौ परमब्रह्मणि लीन इव तस्योपस्थितिमजानन्निवाऽतिष्ठम् । जयसिंहो बहुकालं तथैव मम चरणयोरन्तिकं शिरोऽवनमय्योपाविशत् । परन्तु न मया नयनपक्ष्माण्युन्नमितानि न च दृष्टिपातेनाऽप्यसौ कृतार्थीकृतः । तदा मम शिष्यास्तं समवाबोधयन् -

"राजन् ! अद्याऽस्माकं गुरुः समाधौ स्थितो न नयनोन्मीलनं विधास्यति । भवताऽन्येद्युरागन्तव्यम् ।"

कनकलेखायौवनोपभोगोत्सुकमानसोऽसौ राजा तस्मिन् दिवसे तथैव निराशो राजप्रासादं निववृते ।

अन्येद्युः पुनः प्रभाते कामी स राजा स्वतामेव पश्यंस्तत्र समायातः । परं पूर्ववच्छिष्यैर्निषिद्धो न मम दर्शनस्य सौभाग्यमसौ लेभे । सप्तदिवसं यावदनेन क्रमेण निरन्तरमसौ तत्राऽऽयातः । मम समाधिं प्रचारयन्तोऽन्तेवासिनो न कमपि जनमन्व-

मन्यन्त गुरोदर्शनाय।

अष्टमे दिवसे पुनः समायाते राजनि जयसिंहे, तस्योपस्थित्यामेव मया नयने समुन्मीलिते। तत्क्षणं स राजा मम चरणधूलिं कराङ्गुलिभिः संस्पृश्य भालपट्टं निजं सुशोभयामास। तदनन्तरमसौ किरीटविरहितं मस्तकं मम चरणयोर्निधाय प्रणतो बभूव। किमपि वक्तुमवसरं राज्ञेऽदत्त्वाऽहमवोचम् -

"भवानान्ध्रजनपदस्याऽधिपतिर्महीपतिर्जयसिंहः किम् ? भवतः प्रिया कनकलेखा यक्षेणाऽधिष्ठिता, भवांश्च तां कामयमानो विरहवह्निना पीडितो भवति। इत्येव किं भवतः प्रयोजनमिष्टम् ?"

वचनानि मे श्रुत्वा विस्मयाभिभूतश्चमत्कृतिमापन्नो मयि विश्वसन् बुद्धिरहितो जयसिंहः प्रार्थितवान् -

"भगवन् ! एषैव मम कामना। कामना च मे सफला भवतु। तेन रमणीरत्नेन मम सौभाग्यं वर्धताम्, इत्येवाऽहं भवन्तं प्रार्थये।"

अहमपि क्षणं विरम्य नयने निमील्य ध्यानावस्थितचेता इव भूत्वा पुर्नयने समुन्मील्य राजानमुवाच -

"राजन् ! यां राजकन्यां भवान् कामयते, साऽतिसौभाग्यशालिनी वर्तते। तस्याः परिणेता सौभाग्यशाली जनो निश्चयेन चक्रवर्तित्वमधिगमिष्यति। मन्दाकिन्यादिशुभपुण्यसलिलसम्भृतसरिन्मालासुशोभितां निखिलां धरित्रीमसौ प्रशासिष्यति। अतो भवतः कामना सर्वथा समुचिता।

परं कन्याऽसौ यक्षेणैकेनाऽधिष्ठिता। परमशक्तिसम्पन्नोऽसौ यक्षः कस्याऽपि पुरुषस्य तया सह सङ्गमनं न सहते। बलशालिषु शिरोमणिरसौ वर्तते। मन्त्रवेत्तारो भूतबाधाहरणोपजीविनस्तस्माद् भीताः वेपथुमन्तो दूरादेव पलायन्ते। परमहं तथा यतिष्ये यथाऽसौ यक्षो पुण्डरीकवदनां नीलकमलमदिरनयनां राजनन्दिनीं कनकलेखां परित्यज्य गच्छेत्, सा च कलिङ्गकन्या भवन्तं कामयेत। भवांस्तस्याः परिणेतृसौभाग्यमधिगच्छेत्। सम्प्रति भवता गन्तव्यम्। सप्तदिवसानन्तरं भवानत्र सायन्तनवेलायामागच्छतु। अस्मिन्नवधौ भवतः प्रयोजनसिद्धये साधनामहं साधयिष्यामि।"

प्रस्थिते च राजनि स्वकीयेषूद्योगेषु मया संलग्नम्। श्मशानं निकषा बृहज्जलाशयोऽवर्तत। निर्मलाम्भःसम्भृते तस्मिन् जलाशये नीलपीतारुणश्वेतकमलकुमुदकह्लारादीनां विकासोऽशोभत। हंससारसक्रौञ्चबकजलकाकादिनीलनीरविहारिणां वयसां विहारविलासैरतिरमणीयस्य तस्य सरसः प्रान्तराणि कलकोलाहलक्रेङ्कारध्वनिभिर्निनादितान्यासन्। गुरुजनेभ्योऽधीतयन्त्रविद्यायाः साहाय्येन मया प्रयोगो विहितः। सर्वेषामपि दर्शनार्थिनां प्रवेशस्तत्र निषिद्धः।

तदनन्तरं स्वस्थानादारभ्य जलाशयस्याऽधस्तात् तन्मध्यभागपर्यन्तमेका सुरङ्गा मया खनित्रमादाय निर्मिता। जलाशयस्य भूमितलमध्ये समतलशिला विस्तीर्णा तथा स्थापिता यथा जलाशयजलं सुरङ्गायां न प्रविशेत्, परं पाषाणशिलामपसार्य कश्चिज्जनः सुरङ्गामार्गेण जलाशयं प्रविशेत्। प्रबन्धमेवं विधायाऽहं पुनस्तपोवह्निनिकटमागत्य समाधौ स्थितः।

सप्तमे दिवसे दिनस्वामिनि भास्करेऽस्ताचलशिखरं समारूढे सुवर्णवर्णेनाऽऽदित्य-मण्डलतिलकेन सुशोभिते पश्चिमदिक्क्षितिजे, स्वामिनमवलोक्य लज्जयेवाऽऽरक्तायां सन्ध्यायामसौ राजा जयसिंहः समागत्य मम चरणयोः प्रणनाम। परमौत्सुक्याभिलाष-सम्भृतहृदयोऽसौ कामी नरपतिर्बद्धाञ्जलिर्मे समक्षमतिष्ठत्। तदा करुणां प्रदर्शयता मयोक्तम् -

"राजन्! भवतो मनःकामनां पूरयितुं मयोपायो विचारितः। त्रिभुवनललामभूताथा अस्याः कलिङ्गराजनन्दिन्याः परिणेता सकलभूमण्डलस्याऽधिपतिरप्रतिहतरथश्चक्रवर्ती सम्राड् भविता। दिग्दिगन्तरेभ्यः समागत्य सामन्तनरपतयस्तस्य चरणाङ्गुलिनखान् स्वमुकुटजटितमणिकान्तिभिरालोकितान् करिष्यन्ति रञ्जितांश्च विधास्यन्ति। तथाऽपि भुवि कल्याणाभिनिवेशिन्यः सिद्धयो जनैरुद्योगशीलैरेव प्राप्यन्ते। भवतो गुणैः समाकृष्टोऽहं हृदये भवतः कार्याय प्रयते।

राजन्! जलाशयसलिलमिदं मया मन्त्रसिद्धं विहितम्। निशीथे भवान् जलाशयं प्रविश्य मध्यभागं गत्वा निमज्जनं करोतु। क्षणं तलप्रदेशे समुपविश्य श्वासनिरोधं करोतु। तदनन्तरं जलाशयाद् बहिरागतस्य भवतो रूपं सर्वथा परिवर्तितं भविष्यति। भवतो नवयौवनोद्दीपितं सुगठितं वपुः सर्वेषामाकर्षणकरं मनोहरं भविष्यति। तद्दिव्यसौन्दर्यसुशोभितं शरीरं स्वर्गाप्सरसामपि कामनाकेन्द्रं स्पृहणीयं सम्पत्स्यते। भवतस्तादृशं रूपं प्रेक्ष्य कनकलेखाधिष्ठानभूतो यक्षो ध्रुवं तां परित्यज्य पलायिष्यते। केनाऽपि प्रकारेण भवतः साम्मुख्यं सोढुं नाऽसौ क्षमिष्यते।

राजन्! जलाशये प्रवेशात् पूर्वं भवताऽस्य जलस्य परीक्षा करणीया। कदाचित् तत्र कोऽपि नक्रादिको हिंस्रजन्तुः सम्भवति। तदनन्तरं पूर्णिमाचन्द्रचन्द्रिकाद्योतितायां रजन्यां भवता जलप्रवेशो विधेयः। तस्मिन् समये जलाशयं परितः मन्त्रिणो राजसंसत्स-दस्याः पौराः जानपदाश्च विश्वस्तसैनिकैः सह संस्थिताः भवेयुः। सिद्धिसाधनविषये भवता मन्त्रिभिरन्तःपुरिकाभिश्चाऽवश्यमेव परामर्शः करणीयः।

सम्प्रति भवान् स्वप्रासादं गच्छतु। श्वः स्नानध्यानादिभिः पवित्रीभूय भवता सकलदिवसमुपवासः समाचरणीयः। भगवांच्छिवश्चाऽभ्यर्चनीयः। अष्टोत्तरशतरुद्राक्ष-गुलिकामालिकां शुभ्रमौक्तिकैकावलिञ्च कण्ठे परिधाय कौपीनमात्रवसनो भवान् जलाशयं

प्रविश्य दिव्यं रूपं सन्धार्य बहिरागच्छतु। निश्चयेन भवान् साध्यमेतत् साधयिष्यति। साऽनिन्द्यरूपस्वामिनी लावण्यमयी अनन्तगुणविभूषिता राजकन्या ध्रुवं भवन्तं वरिष्यति। तदनन्तरं सकलं भूमण्डलं विजित्याऽप्रतिहतरथगतिश्चक्रवर्ती भवान् सम्राड् भविता।"

मम परामर्शं स्वीकृत्य मूर्खोऽसौ राजा जयसिंहोऽविमृश्यकार्यकारी कनकलेखा-प्रणयविलासस्वप्नेषु निमग्नः राजप्रासादं गतः। अपरेद्युः मम योजनामनुसृत्याऽसौ सकलान्यपि कार्याणि चकार। दिवसालोके मत्स्यजीविभिरागत्य जालप्रक्षेपणैर्जलाशय-जलमुन्मथ्य हिंसकजलजन्तुविषये परीक्षा कृता। जलाशयं परितः शस्त्रास्त्रसुसन्नद्धाः सैनिकाः स्थितिमकार्षुः।

सायंसन्ध्यासमये मन्त्रिभिः राजसभासदस्यैः पौरैर्जानपदैः सैनिकैश्च सार्द्धं नरपतिरान्ध्रजनपदाधीशो जयसिंहो जलाशयतटमाजगाम। समागते तस्मिन्नग्निहोत्रो मया याजितः। ततो निशीथेऽसौ राजा रुद्राक्षमालामेकावलिञ्च कण्ठे परिधाय कौपीनमात्रवसनो जलाशयं प्रविष्टः।

तस्मिन्नेव क्षणे निजवस्त्राणि शरीरादवतार्याऽहं पोट्टलिकायां निबध्य तत्रैव पाषाणशिलातले समगोपयम्। राजनि जयसिंहे जलाशयतलमध्यप्रदेशं सम्प्राप्ते पूर्वमेव सुरङ्गामार्गेण प्रविष्टोऽहं पाषाणशिलामपसार्य श्वासमवरुध्य तत्रैव सम्प्राप्तो यत्र जयसिंहोऽवर्तत। अथ जयसिंहं बलादाकृष्य क्षणेनाऽहं दुराचरणं तमाक्रान्तवान्। आक्रमणेनाऽनेन किङ्कर्तव्यविमूढस्य जयसिंहस्य कण्ठं सुदृढं गृहीत्वा मया तस्य श्वसननलिका द्वाभ्यां कराङ्गुष्ठाभ्यां तथा मडमडायिता यथाऽसौ - 'गौं गौं' इति समुच्चरन् विचेष्टमानसर्वगात्रो यमलोकाय प्रतस्थे। तस्य भौतिकशरीरं कलेवरं निश्चेष्टं प्रशान्तञ्च सुरङ्गायामेव पतितम्।

तदनन्तरं नराधिपस्य तस्य नराधमस्य कौपीनमुत्तार्य मया परिहितम्। रुद्राक्षमालया मौक्तिकस्रजा चाऽपि मया निजकण्ठः सुशोभितः। जयसिंहस्य मृतशरीरं तत्रैव सुरङ्गामार्गे निक्षिप्य तेनैव शिलापाषाणेनाऽऽवृत्य जलाशयादहं बहिरागच्छम्।

जलाशयाद् बहिर्जयसिंहस्य मन्त्रिणो राजसंसत्सदस्याः परिजनाः पौराः जानपदाः सैनिकाश्च तमेव प्रतीक्षमाणा अतिष्ठन्। कौपीनं रुद्राक्षमालामेकावलिञ्च समवलोक्य तैर्निश्चितम् - मन्त्रसिद्धिसामर्थ्येन परिवर्तितरूपोऽयं नरपतिर्जयसिंहो वर्तते। मामेव जयसिंहं मन्यमानास्ते समवेतेनोच्चैःस्वरेण जयजयकारध्वनिभिर्वनप्रान्तराणि गुञ्जरितानि चक्रुः।

अथ राजकीयवस्त्राभूषणैः सुसज्जितो विभूषितः शिरसि राजमुकुटं धारयन् राजचिह्नाङ्कितध्वजालङ्करणविभूषितरथमष्टाश्वैर्वाह्यमानमारूढोऽहं पूर्वतोऽप्यधिक-सौन्दर्यतेजःसमुज्ज्वलवपुषा शोभमानः प्रजाजनैरभिनन्द्यमानो राजमार्गमुभयतो गृहबलभी-

स्थिताभिर्युवतिभिरक्षतवर्षणैः सत्क्रियमाणो राजप्रासादमाससाद। प्रहरावशिष्टायां रजन्यामहं राज्ञो निजप्रकोष्ठे सुरक्षिते सुकोमले सुष्वाप।

प्रभाते राजप्रासादे सङ्गीतितानां गीतिकानां वाद्यमानानां तूर्याणाञ्च ध्वनिभिर्मे निद्रा व्यपगता। उत्थाय गवाक्षमार्गेण मयाऽवलोकितम् -

"अरुणवस्त्राभरणा नर्तकीवोषाः पूर्वदिक्क्षितिजविभागे आविर्भवन्ती दृग्गोचरतामुपैति। उषसमनु अनुरागसम्भृतहृदयो बालभास्करोऽपि आरक्तमण्डलेनोदयन्नवलोक्यते। सकलं जगदवर्णनीयशोभासंभृतारुणवर्णालोकेन व्यापृतं वर्तते।

शिष्याणां गुप्तचर्यया मया राजप्रासादस्य भौगोलिकस्थितिः याथार्थ्येन पर्यभिज्ञाता। आचारव्यवहाराश्चाऽपि भृशं शिक्षिताः। अनेन ज्ञानेन स्वाभाविकबुद्ध्या च दैनिक-कृत्यैर्निर्वृत्य स्वल्पाहारमुपभुज्य दिवसस्य द्वितीये प्रहरे राजसभां गत्वा राजसिंहासनेऽहं विराजमानोऽभूवम्। विस्मयचकिताभिर्दृष्टिभिर्मामेव निरीक्षमाणान् मन्त्रिणो राजसभासदश्चाऽहमवोचम् -

"भद्रपुरुषाः ! मन्त्रसिद्धिचमत्कारोऽस्माभिरद्याऽवलोकितः। शरीरं मे नवयौवनेन दिव्यसौन्दर्येण च महनीयं सञ्जातम्। नास्तिकानां शिरांसि लज्जयाऽवनमितानि। सम्प्रति सवेदमन्त्रोच्चारणं देवपूजनं विधीयताम्। ब्रह्मविष्णुशिवशक्तिमहादेवतानां मन्दिराणि सविशेषमलङ्कृत्य तत्र नृत्यगीतवाद्यैः सह देवतार्चनप्रबन्धाः क्रियन्ताम्। अस्मद्रूपपरिवर्तनमहोत्सवे कारागृहेभ्यो बन्दिनो विमुच्यन्ताम्। ब्राह्मणेभ्यो याचकेभ्यश्च तथाप्रमाणं धनं प्रदीयतां यथा तेषां निर्धनत्वं तथाऽपसरेद् यथा मे कुरूपत्वं मन्त्रबलैरपसृतम्। जनपदे सप्तदिवसमितानां राजकीयमहोत्सवानामुद्घोषणं विधीयताम्।"

मम प्रस्तावानां सर्वैरनुमोदनं विहितम्। मन्त्राणां प्रभावं सामर्थ्यञ्च ते मुक्तकण्ठं प्रशशंसुः। तदनन्तरमहं पुनः राजप्रासादे निजकक्षं प्रविष्टः।

अथ मध्याह्नभोजनसमये मया भोजनशालायां कनकलेखायाः सेविका मल्लिकाऽवलोकिता याऽभिसारसमये तस्य प्रकोष्ठस्य बहिर्द्वारदेशे सुप्ताऽवर्तत। विस्मयचकिता सा मां पौनःपुन्येनाऽवालोकयत्। भोजनानन्तरं स्वकक्षे गतोऽहं तामेव सेविकामाहूयैकान्तेऽपृच्छम् -

"भद्रे ! कदाऽप्ययं जनो भवत्या पूर्वमवलोकितः ?"

आश्चर्यचकिता सा मल्लिका क्षणं मां निरीक्ष्य स्तब्धचित्ताऽभवत्। तदनन्तरं "भवांस्तु स एव" वचनमिदं समुच्चार्य हर्षविह्वला परित्यक्तसकलशिष्टाचारपरम्परा मां सुदृढमालिङ्ग्य समवोचत् -

"आर्य ! अहो भवानिन्द्रजालिको नूनम्। असम्भवमिदं सर्वं पश्यामि। कथयतु

भवान्, सर्वमिदं किं वा कथं वा समजायत ?"

संक्षेपेण सकलं घटनाचक्रमाचक्ष्य मया कथितम् -

"मल्लिके ! गत्वा त्वं स्वस्वामिनीं निभृतमिदं रहस्यमाचक्ष्व। तां मम व्यक्तित्वेनाऽपि परिचितां विधेहि। तां कथय -

जयसिंहमान्ध्रधिपतिं व्यापाद्याऽहं तेनैव नाम्ना आन्ध्रजनपदाधिपो भूत्वा राजसिंहासनमधितिष्ठामि। रजन्याः प्रथमे प्रहरे कनकलेखामवलोकयितुं तस्याः प्रकोष्ठमागमिष्यामि।"

सर्वस्मिन्नगरे समाचारोऽयं विद्युद्वेगेन प्रसृतः, परिवर्तितरूपो राजा जयसिंहः कनकलेखां कलिङ्गराजनन्दिनीमद्य रजन्यां द्रक्ष्यति। कलिङ्गकन्याधिष्ठितो यक्षः किं करिष्यति? तां त्यक्ष्यति वा न वा त्यक्ष्यति ? इत्यौत्सुक्यनिर्भराः जनाः प्रतीक्षापरवशाः स्थिताः।

रजन्याः प्रथमे प्रहरे बह्वीभिः सेविकाभिः परिवृतोऽन्तःपुररक्षकैश्च रक्षितोऽहं, सेविकानां करेषु सन्निहितैर्विविधैरुपहारद्रव्यैर्महार्घैर्वस्त्राभूषणैः सह कनकलेखाप्रकोष्ठद्वारमुपागतः। सर्वानन्यान् जनान् बहिः परित्यज्य तथैव मल्लिकया पूर्वपरिचितया सेविकयाऽनुगम्यमानोऽन्तः प्राविशम्। प्रविश्य द्वारकपाटयुगलं सम्मुद्रितम्। मल्लिकया पूर्वमेव विदितवृत्तान्ता कनकलेखा मामेव प्रतीक्षमाणा कुतूहलभराक्रान्ताऽतिष्ठत्।

प्रविशत्येव मयि तं प्रकोष्ठं चिरन्तनदुःखभागिनी विरहोत्पीडिता कनकलेखा नवमालिका सुदृढसहकारतरुमिव प्रसारिताभ्यां विटपभुजाभ्यां मामाशिश्लेष। अहमपि द्वयोर्भुजयोर्वक्षसि च कुसुमकोमलानि तदङ्गान्यालिङ्गनबद्धानि चकार। दृढं भुजनिबद्धायाः कनकलेखाया ओष्ठौ नयने भालं कण्ठं कपोलौ हनु वक्षश्च वारम्वारं परिचुम्ब्याऽपि नाऽहं तृप्तिमगच्छम्। कलिङ्गनन्दिन्याः नयनाभ्यामविरलं प्रवहन्त्यश्रूण्योष्ठाभ्यामेव प्रमृज्य मन्दस्वरेण तस्याः दक्षिणे कर्णेऽहमवोचम् -

"प्रिये ! आवयोः दुःखानामवसानवेला समायाता। विधिरनुकूलतां गतः। त्वं मया पुनः प्राप्ता।"

ततो मम सङ्केतं समवबुध्य मल्लिका द्वारमुद्घाट्य द्वारदेशे स्थितं दासीवर्गं प्रकोष्ठान्तः समानिनाय। पट्टमहिषीसमुचितैः वस्त्राभरणैः प्रसाधनैश्च प्रसाधितायाः कनकलेखायाः सौन्दर्येण प्रकोष्ठोऽपि समुज्ज्वलेनाऽऽलोकेनाऽऽलोकितो बभूव। तदनन्तरं वामपार्श्वे तां कलिङ्गनन्दिनीं प्रतिष्ठितां विधायाऽहं कक्षाद् बहिरायातः।

कनकलेखया सह सामान्यावस्थायां बहिरायान्तं मां विलोक्य राजप्रासादस्थिताः सर्वे सेवकाः सेविकाश्च परमविस्मयमापन्नाः हर्षसम्भृताः जयजयकारैर्विस्तीर्णमम्बरमपि निनादितमकुर्वन्। ममाऽऽदेशेन कलिङ्गराजः कर्दमो महिष्या सह कारागारात् ससम्मानं

विमुक्तो राजप्रासादं समानीतः। राजराजोचितवस्त्राभूषणैः सुभूषितोऽसौ मम दक्षिणेतरे पार्श्वे तिष्ठन्तीं कनकलेखां स्वसुतामवलोक्य परमां प्रसन्नतामध्यगच्छत्।

तस्मिन्नेव समये ममाऽऽदेशेन कलिङ्गराजस्य चाऽऽशीर्वदिन पुरोहितवर्गो विवाहमण्डपं परिकल्प्य लग्नमण्डपे विवाहसंस्कारोचितान् मन्त्रान् पठन् यज्ञाग्नौ हवनसामग्रीणामाहुतीः प्राक्षिपत्। ततो विवाहवेद्यां समुपविष्टेन कलिङ्गाधिपेन कर्दमेन प्रियदुहितुः कनकलेखायाः कमलपुष्पाञ्जलिरूपावरुणवर्णौ कौशेयकोमलौ करौ शास्त्रोक्तविधिना मह्यं समर्पितौ। मनसोऽभीप्सितां प्रियामुपलभ्य परमप्रसन्नमनसो मे सा रजनी सानन्दं व्यतीता। प्रणयरतिविलासानुपभुञ्जानस्य मे तस्मिन्नेव प्रसङ्गे मदोन्मत्तया तया कलिङ्गनन्दिन्या प्रियया महोपहाररूपेण रदनच्छदक्षताः प्रदत्ताः।

कलिङ्गनन्दिनीमुपलभ्याऽहं आन्ध्रजनपदप्रशासनव्यवस्थां सुव्यवस्थितामकार्षम्। सम्प्रति तस्य जनपदस्य शासकोऽहमेवाऽऽसम्। पुत्ररहितस्य कलिङ्गराजस्य जनपदस्य शासनभारोऽपि तस्य जामातुः कनकलेखाभर्तुः सुदृढयोः स्कन्धयोरापतत्।

आन्ध्रकलिङ्गजनपदयोः शासनधुरं वहतो मम कानिचिदेव दिनानि व्यतीतानि, समाचारोऽयं मया प्राप्तो यदवन्त्यधिपेनाऽङ्गजनपदः समाक्रान्तः। अङ्गजनपदाधीश्वरस्य साहाय्यसन्देशमुपलभ्य सेनया सह समायातोऽहं विधिनियोगाद् भवतां सुहृदां कुमारस्य राजवाहनस्य च दर्शनसौभाग्यसुखं प्राप्तवान्। अतः परमहर्षमनुभवामि। चन्द्रदर्शनेन सागरसलिलमिव भवद्दर्शनेन हर्षभरेण मम हृदयमुल्लसतीव।

मन्त्रगुप्तस्य वृत्तमेतदाकर्ण्य मन्दस्मितसुशोभितवदनो राजवाहनो मित्रस्य मन्त्रगुप्तस्य अप्रतिमसाहसं बुद्धिविकासं सौभाग्यञ्च भृशं प्रशंसन् प्रोवाच -

"बुद्धिसाहससंयोगः विधेरानुकूल्यं प्राप्य कठिनतमान्यपि कार्याणि साधयति।"

तदनन्तरमसौ राजवाहनो विकसितपुण्डरीकदलशुभ्रां दृष्टिं विश्रुते व्यापारयामास। विश्रुतेनाऽपि स्ववृत्तान्त एवं वर्णितः -

# त्रयोदशी-पीठिका
# विश्रुतः

## त्रयोदशी-पीठिका

### विश्रुतः

कुमार ! तस्मिन् सायंकाले नयनागोचरताङ्गतवति भवति भवन्तमन्विषन्तोऽप्यलभमानाः वयं सर्वाणि मित्राणि व्याकुलीभूय सुदूरं यावदरण्येषु परिबभ्रमिम। रजन्याः प्रगाढेऽन्धतमसे बहुकालमलातानादाय वयं यत्र तत्र भ्रान्ताः। अपरेद्युरपि बहुसमयं परिमार्गणे रताः किञ्चिदपि चिह्नं भवतोऽनवलोक्य देशदेशान्तराणि गत्वा भवदन्वेषणनिश्चयमकार्ष्म। हायनानन्तरं कार्तिकमासस्य कृष्णपक्षस्य चतुर्दश्यामुज्जयिन्यां महाकालमन्दिरे सम्मिलनमस्माकं भवितेति निश्चयं विधाय वयं विभिन्नासु दिक्षु प्रस्थिताः।

विन्ध्यवनस्य दक्षिणपश्चिमदिशि मया प्रस्थितम्। प्रचलति मयि मध्याह्नसमयो जातः। व्योममध्ये प्रतपन् दिनकरो धरातलमतितरां सन्तपति स्म। नीरवे निस्तब्धेऽरण्ये पिपासाकुलोऽहं कूपमेकमपश्यम्। समीपं गत्वा तत्राऽद्राक्षम् -

"दशवर्षदेशीयः कोमलाभिराममनोरमाकृतिस्तृट्क्षुद्विह्वलो बालकः कश्चित् कूपपरिवृतिवेद्यामुपविशति। रुदतस्तस्याऽश्रुसलिलबिन्दवो भूमिमार्द्रयन्ति।"

करुणार्द्रेण मया तच्छिरोन्यस्तहस्तेन रोदनकारणं पृष्टः स बालकश्चरणयोर्मे निपत्य गद्गदकण्ठेन प्रावोचत् -

"आर्य ! परां विपत्तिमापन्नोऽहम्। भवन्तं साहाय्यं याचे। भगवता परमेश्वरेण भवानत्र मम सहायतायै प्रेषितः। वृद्धसंरक्षकेण सार्द्धं गच्छन्नहमासम्। पिपासाकुलं मामवलोक्य जलमानेतुमसौ मम वृद्धसंरक्षकः कूपं निकषा समाययौ। परं जलाकर्षणसमये वार्धक्यजनितनिर्बलत्वादसौ निजसन्तुलनविनाशेन कूपे पतितः। स्वल्पकायोऽहं बालकस्तमुद्धर्तुमक्षमः किङ्कर्तव्यविमूढोऽस्मि। अयं वृद्ध एव मम परमाश्रयः। एतदेव मम रोदनकारणम्।"

बालकस्य वृत्तमाकर्ण्य करुणाद्रवितहृदयेन मया कूपे निरूपितम्। तत्र वृद्धजनस्त्वेकः कटिपर्यन्तं जले स्थितो निरुपायमेवोपरि विलोकयति स्म। कूपसमीपमेव वटपादपस्यैकस्य सटाः शाखाभ्यो धरातलपर्यन्तमवलम्बमाना अवर्तन्त। तासामुपयोगितामवगम्य लम्बमानाः सटा आच्छिद्य परस्परं ग्रन्थिबन्धनं कृत्वा दीर्घरज्जुरिव मया कल्पिता। सा च कूपे लम्बायिता। तदाश्रयेणाऽहं वृद्धसज्जनायाऽवलम्बं दत्त्वा तं कूपादुदधरम्।

कूपपतनसम्भ्रमेण विकलान्तःकरणं वृद्धसज्जनं समुचितमाश्वास्य तत्रैव

न्यग्रोधपादपस्य छायायामहमुपावेशयम्। बालकं वृद्धञ्च तृट्क्षुद्व्याकुलाववलोक्य मया समीपस्थबिल्वपादपशाखास्ववलम्बमानानि परिपक्वानि पिङ्गलहरितवर्णानि मालूरफलानि शरप्रहारेण पातितानि। तान्याहृत्य मया ताभ्यां प्रदत्तानि। तदनन्तरं वृद्धस्य पोट्टलिकायां निहितं पात्रमादाय वटजटारज्जुपाशाश्रयेण कूपाज्जलमुद्धृत्य तावपाययम्। स्वस्थीभूतयोश्च तयोः वृद्धमहं विनीतभावेन कुतूहलाक्रान्तहृदयेनाऽपृच्छम्-

"आर्य ! को भवान्, कस्य च वंशस्य दीपकोऽयं बालकः ? कुतो चेयं विपत्तिः ? एवंविधेषु सर्वप्राणिभयङ्करेषु विपिनेषु कोमलकायेन बालकेन सह कथं वा भवान् भ्रमति ? न चेत् काऽपि कार्यातिपत्तिर्विस्तरेण निजवृत्तमभिधीयताम्।"

ममैतानि वचांस्याकर्ण्य सजलनयनोऽभूदसौ वृद्धः। कथमप्यात्मानं नियम्याऽश्रुनिरुद्धकण्ठोऽसौ मामुवाच -

"महाभाग ! दीर्घेयमावयोर्विपत्कथा। प्रतीकारोऽपि न सुकरः। तथाऽपि कथाया एतस्याः भवते निवेदनेन हृदयोत्पीडकोऽयमतिगुरुः दुःखभारो लघुतामेष्यति। शृणोतु भवान् -

अस्ति विन्ध्यारण्यदक्षिणेषु विदर्भो नाम जनपदो धनैर्धान्यैश्च समृद्धः। तत्र पुष्पवर्माभिधानो भोजवंशीयो नरपतिः प्रजाजनमनोरञ्जनो बभूव। पराक्रमी नयज्ञः सत्यवादी न्यायप्रियो धार्मिक उदारस्वभावश्चाऽसौ नरपालो धर्मशास्त्रग्रन्थानार्षान् प्रमाणीकृत्य लोकपरम्पराश्च सम्मान्य शासनं सञ्चालयामास। विविधविद्यापारङ्गतोऽसौ विनम्रव्यवहारोऽपि कौटिल्यादिप्रणीतं दण्डनीतिं पालयामास।

राजकीयशासनविभागेषु सुयोग्यान् कार्यकुशलान् उपधाविशुद्धान् राज्याधिकारिणो मन्त्रिणश्च नियुज्य पुष्पवर्मा स्वयमपि प्रत्यक्षाप्रत्यक्षरूपेण राज्यकार्याणि निरैक्षत। पुण्यश्लोकोऽसौ नरपतिः स्वल्पेतराणां विविधगुणकलाविद्याशिल्पपारङ्गतानां गुप्तचराणां साहाय्येन जनपदस्य बाह्यानाभ्यन्तरिकांश्च समाचारानवगम्य तदनुसारं व्यवहरति स्म। आवर्जितविविधशक्तिसिद्धिरसौ भविष्यद्विपत्तिसङ्कटाननुमीय तेषामागमनात् पूर्वमेव निराकरणं विदधाति स्म।

साम-दान-भेद-दण्ड-मायानामुपायानां सन्धि-विग्रह-यान-आसन-संश्रय-द्वैधीभावानां षण्णां गुणानां प्रयोगैरसौ सर्वाभ्योऽपि बाह्याभ्यन्तरिकविपद्भ्यो विमुक्तः सन् प्रशासनसञ्चालको बभूव।

इत्थञ्च तस्मिन् विदर्भजनपदे सर्वत्र सुखशन्तिसाम्राज्यमवर्तत। प्रजाजनाः भयरहिताः सन्तो दैनिकव्यवहारेषु धर्मनियमान् पालयन्ति स्म।

अथ कालक्रमेण विधातुः सृष्टिक्रमेण दीर्घमायुरुपभुज्य वृद्धत्वमापन्नः पुष्पवर्मा

पुण्यार्जिताय देवलोकाय प्रतस्थे। तस्य गुणानां संस्मृत्य प्रजाजनानां मनःसु शोकप्रवाहाः समुद्वेल्लितवन्तः। अमरलोकं सम्प्राप्ते पुष्पवर्मणि मन्त्रिपरिषदा निर्वाचितस्तस्य पुत्रोऽनन्तवर्मा राजसिंहासनमध्यारुरोह। पितुरुत्तराधिकारी सर्वगुणसम्पन्नोऽप्यसौ दण्डनीत्यां न तथाऽऽस्थावान् बभूव। अनेन नीतिप्रयोगेण प्रशासनं शिथिलं सञ्जातम्। राजकर्मचारिणः स्वेच्छाचारेणाऽऽचरन्। अनन्तवर्मणो मन्त्रिषु वसुरक्षितः कुलक्रमागतः स्वामिभक्तः सर्वविधामात्यगुणसम्पन्नोऽवर्तत। वृद्धत्वमापन्नोऽपि नीतिज्ञोऽसौ स्वामिनं सत्पथावलम्बनाय सततं प्रेरयामास।

सिंहासनारूढं सम्प्राप्तनवराजपदमनन्तवर्माणं विषयोपभोगेषु ललितकलासु च समासक्तचित्तं राजप्रशासनकार्याणि समुपेक्षमाणं समवलोक्य तस्य वृद्धस्य मन्त्रिणो हृदयं सततमदूयत। एकस्मिन् दिवसेऽवसरं लब्ध्वाऽसौ राजानमुवाच –

"तात ! भवानतिगौरवास्पदस्य यशस्विनो महतो भोजवंशस्य विभूषणम्। पितुः सर्वान् गुणान् भवानुत्तराधिकारे सम्प्राप्तवान्। नृत्य-गीत-वाद्य-चित्रकर्म-काव्यरचना-कलाकौशलादिषु विशेषतासु निष्णातो भवान् जगत्यद्वितीयः। एषां प्रयोगैर्भवान् सकलान् गुणिनो जनान् विस्मयविमुग्धचित्तान् सततं करोति। परं सुपण्डितो भवान् न दण्डनीतिं पालयति।

यद्यपि विदितवेदितव्यस्य भवते किमपि नोपदेष्टव्यमस्ति, तथाऽपि भवतो राज्यस्य च हितेच्छया मया वृद्धेन मन्त्रिणा किमपि कथनीयमेव।

प्रशासनसञ्चालनाय दण्डनीतिव्यवहारोऽनिवार्यः। अव्यवहृतेयं दण्डनीतिरसन्तप्त-कनकविभूषणमिव न प्रकाशते। तया विरहितो राजा न ज्ञातुं क्षमते – कस्तस्य शत्रुः कश्च मित्रं कश्चोदासीनः। शत्रुमित्रयोर्भेदकरणेऽसमर्थ एवाऽसौ भवति। चाटुकृद्भिः परिवृतोऽसौ चाटुभिर्वञ्चितो न यथायोग्यं व्यवहरति। स्वकीयाः परकीयाश्च सर्वे जनास्तमभिसंदधति। राज्याधिकारिणस्तस्य माहात्म्यं न गणयन्ति। राजादेशान् समुपेक्षमाणोऽसौ कर्मचारिवर्गः स्वेच्छं व्यवहरति।

एतास्ववस्थासु प्रजाजनानां कल्याणाय रञ्जनाय च राजा नाऽवसरं लभते। न च मनः संदधाति। राजकार्याण्युपेक्षमाणोऽसौ न प्रजानां हितमवलोकयति। एतादृशं राजानमनुभूय प्रजाजनेष्वतिस्वेच्छाचरणप्रवृत्तिर्वर्धते। राजकीयमर्यादां न पालयन्तस्ते-ऽव्यवस्थामुत्पादयन्ति। एवञ्च स्वयं पतिताः प्रजाः राजानमपि पतनगर्तेषु निपातयन्ति। अतो विपदः समुपस्थिताः स्युः, ततः प्रागेव भवता सावधानेन भवितव्यम्।

एतास्ववस्थासु भवतः कर्तव्यमिदं, पुरातनैर्मनीषिभिः प्रदर्शितं दण्डनीतिपथमवलम्ब्य भवान् प्रजास्वनुशासनपालनभावानुद्दीपयतु। विभागाध्यक्षा अन्ये च कर्मचारिणो

भवताऽनुशासनीयाः सन्मार्गे च प्रवर्तनीयाः। गुप्तचरव्यवस्था सुदृढा शक्तिसम्पन्ना च कर्तव्या। भवानेव स्वयं तां व्यवस्थां प्रत्यक्षरूपेण सञ्चालयतु। बाह्यविषयेषु कलाकौशलादिषु रुचिं दधानो भवान् दण्डनीतिपथमपि परिपालयतु। इयं भवतां वंशपरम्परागता विद्या। अस्याः सम्यक् परिपालनेनैव राज्यप्रशासनं सुरक्षितं सत् स्थिरतां प्राप्स्यति। बाह्याभ्यन्तरविपद्भ्यश्च विनिर्मुक्तं भविष्यति। भवतः शासनमेवंविधे-नाऽऽचरणेन सर्वदा सुरक्षितं राजप्रजाहितकरञ्च वर्तिष्यते।"

वृद्धामात्यस्य वसुरक्षितस्योपदेशान्निशम्य, "तथैव व्यवहरिष्यामि," इति कथयित्वाऽसौ नरपतिरनन्तवर्माऽन्तःपुरं समाययौ। तत्र पुनरप्यसावन्तःपुरिकाणां मनोरमाणां प्रमदानां मध्ये विश्रम्भगोष्ठीषु प्रणयरतिविलसनेषु निममज्ज। अस्मिन्नेवाऽन्तरे कदाचित् प्रसङ्गे समुपस्थितेऽसौ पार्थिवोऽन्तःपुरसेवकसेविकानां समक्षं वसुरक्षितसमुपदिष्टा-नुपदेशानुदीरयामास।

अथ तत्र राज्ञोऽन्तःपुरे विहारभद्रो नाम सेवकोऽनन्तवर्मणो मुखानुरागी प्रकृत्या विलासी वार्तालापेषु सुमधुरचतुरस्वभावोऽवर्तत। नृत्य-गीत-वाद्य-चित्रकर्मादिषु बह्वीषु ललितकलासु प्रवीणोऽसौ बभूव। महिलासु , विशेषतः परस्त्रीषु तस्याभिरुचिरवर्तत। परच्छिद्रान्वेषणे परनिन्दने चाऽतिकुशले तस्मिन् राजाऽनन्तवर्माऽपि भृशं स्निह्यति स्म। मन्त्रिणोऽपि तस्मै कर्णेजपायोत्कोचराशिं दत्त्वा स्वकार्याणि साधयन्ति स्म। परेषां मनोभावान् विज्ञाय तदनुकूलञ्च व्यवहृत्याऽसौ सर्वेषां वशीकरणे सक्षमो बभूव। राज्ञाऽनन्तवर्मणोदीरितानि वचनानि निशम्य विविधमुखविकारान् प्रदर्श्य स्मित्वाऽसौ राज्ञे विपरीतमेवोपदिदेश। विहारभद्रो राजानमुवाच -

"राजन्! यदि कश्चिज्जनोऽस्मिन् जगति भाग्येन सम्पत्तिं लभते, राज्यमधिकरोति, धूर्ताः वञ्चकाः जनास्तं परिवारयन्ति। उच्चावचान् वक्रसरलानुपदेशानुपदिशन्तस्ते राजानं वञ्चयन्तः स्वप्रयोजनानि साधयन्ति। ते कथयन्ति-

लोकोऽयं दुःखहेतुर्वर्तति। परलोकेऽतितरां सुखसमृद्धिसमुन्नतयो नरेणाऽनुभूयन्ते। शिरो मुण्डयित्वा मृगचर्माणि वल्कलवसनानि वा परिधाय कुशासनमास्तीर्याऽनशनेन सह तपश्चरणमेव श्रेयः। एवमुपदिशन्तस्ते राज्ञः सर्वस्वमपहरन्ति। ते धूर्ताः पाखण्डिनो जनाः राजानं भार्यापुत्रेभ्यः प्राणेभ्यश्चाऽपि वियोजयन्ति। यदि च कोऽपि समृद्धिशाली जनो नरपतिर्वा बुद्धिमत्तरो भवति, तदा ते धूर्तास्तं परिवार्य विविधसिद्धिवर्णनैः प्रलोभयन्ति। राजानं परिवार्य परस्परं परामृश्य ते कथयन्ति -

मन्त्रसिद्धिसामर्थ्येनैकया कपर्दिकया लक्षस्वर्णमुद्रा आपादयितुं वयं समर्थाः। आयुधैर्विना रिपुविनाशः सम्भवति। सेनां विनाऽपि चक्रवर्तिपदं लभ्यते। सर्वमेतत्

सम्भवति, यदि भवानस्मदुपदिष्टमार्गमाश्रयेत। राज्ञे ते राजनीतिमेवमुपदिशन्ति -

राज्ञोऽध्ययनाय चतस्रो विद्या: - त्रयी, वार्ताऽऽन्वीक्षिकी दण्डनीतिश्च। ऋग्यजु:-सामवेदानामध्ययनं त्रयी। कृषि: पशुपालनं वाणिज्यमिति तिस्रो वार्ता:। उद्योगाश्चैव तदन्तर्हिता: भवन्ति। अध्यात्मविद्याऽऽन्वीक्षिकी। शासनविद्या च दण्डनीति:। एतासु चतसृषु विद्यासु दण्डनीतिरेव नरपालस्य प्रशस्या।

त्रयीवार्ताऽऽन्वीक्षिकीणां विद्यानामध्ययनं दीर्घसमयापेक्षिकमल्पफलञ्च विद्यते। न चाऽस्मिन् जन्मनि तत्सम्भवम्। अतो दण्डनीत्यध्ययनं पालनं वाऽनिवार्यमुपयोगि च। दण्डनीतिरध्येया। आचार्येण कौटिल्येन श्लोकै: षट्सहस्रैरियं ग्रन्थबद्धा कृता। अस्या अध्ययनं प्रयोगेषु च व्यवहरणं सकलसिद्धिप्रदं भवति।

परं तेषां धूर्तानामुपदेशाननुसरन्तस्ते राजानो वृद्धत्वमापद्यन्ते। न च ते ऐहिकलौकिकसुखोपभोगावसरांल्लभन्ते। कौटिल्यकृतनीतिग्रन्थातिरिक्ता: बहवो नीतिशास्त्रग्रन्था अन्येऽपि विद्यन्ते। तेषामपि च परिशिष्टरूपेण व्याख्यारूपेण च ग्रन्था: विद्यन्ते। अनन्तपारेयं ग्रन्थपरम्परा किल। अथ च पूर्णाध्ययनं विना दण्डनीत्या: सम्यग्ज्ञानमपि न भवति। पुनस्तदनुसारेण व्यवहरणं कठिनतमं कुत्सितं निरुपयोगि हृदयचित्तोत्पीडनकरं ननु वर्तति।

दण्डनीतिशास्त्रग्रन्थेषु प्रथमं तावदुपदेश: -

भार्यापुत्राश्चाऽपि न विश्वसनीया:। न च विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेदिति। प्रशासनिककार्येषु मितव्ययता व्यवहरणीया। निजव्ययेष्वपि कृपणता समुचिता। आत्मकुक्षिकृतेऽपि प्रभूतमोदनं न पक्तव्यम्। अन्नादिपूर्तिसीमा निर्धारणीया। इयन्ति तण्डुलानि इयतामोदनानां पाकायेयदिन्धनमित्येव गणना सततं कर्तव्या बुद्धिविघातिनी भवति।

पुनश्च दण्डनीतिशास्त्रग्रन्थेषु राज्ञो दिनचर्या रात्रिचर्या वाऽतिकठोरा कष्टकरी च निर्धारिता। दण्डनीत्याचार्यैर्निर्धारितेयं चर्या एवंविधा वर्तति -

ब्राह्मे मुहूर्ते सूर्योदयात् प्रागेव नरपतिरुद्बुध्येत। मुखं प्रक्षाल्य वाऽप्रक्षाल्य वा मुष्टिमात्रं वाऽर्द्धमुष्टिमात्रं वा ओदनं मुखे निधाय दिवसस्य प्रथमे प्रहरे राजकीयमाय-व्ययगणितं शृणुयात्। परमस्य श्रवणेन निरीक्षणेन वा किं भवति। विविधविभागानामध्यक्षा अतिधूर्ताश्चौरा: राजभृतिनिग्राह्यधनाद् द्विगुणं वा चतुर्गुणं वा चौयदिवाऽपहरन्ति। कौटिल्येन चत्वारिंशद्विधानां राजकीयकराणां विधानं विहितम्। परमेते वञ्चका: स्वबुद्धिवैभवेन सहस्रविधानाहरणोपायान् चिन्तयन्ति।

द्वितीये प्रहरे दिवसस्य धर्मासनमधिष्ठितो राजा विवादान् निर्णयति। इयमपि

विपत्तिरेवैका। परस्परं विवदतां वादिप्रतिवादिनां कर्कशकोलाहलैर्धर्मासनस्थस्य तस्य कर्णौ दह्येते। प्राड्विवाकादयो न्यायाधिकारिणो न्यायार्थिभ्यो जनेभ्य उत्कोचमाहृत्य जयं वा पराजयं वा निर्णयन्ति। तेन तेषामधिकारिणां गृहाणि धनसमृद्धानि भवन्ति, परं राजा केवलामपकीर्तिं लभते।

दण्डनीतिशास्त्रानुसारं दिवसस्य तृतीये प्रहरे नृपतिः स्नानभोजनादिकार्याणां समयं लभते। परमत्र सततं तस्य भयं विद्यते। कदाऽपि कोऽपि गूढचरो वाऽन्तःशत्रुर्वा तस्य भोजने विषं सम्मिश्रयेत्। ततो यावद् भोजनादिकमुदरे जीर्यति, तावद् वराकोऽसौ नरपतिः विषप्रयोगेभ्यो विभेति।

दिवसस्य चतुर्थे प्रहरे राजा विभागाध्यक्षेभ्यः करानुपहारद्रव्याणि चाऽङ्गीकरोति। तत्राऽपि वराकोऽसौ दैन्यभावेन हस्तमेव प्रसारयति।

दिवसस्य पञ्चमे प्रहरे पार्थिवो मन्त्रिभिः सह विचारमन्त्रणां विदधाति। तत्राऽपि सततं दुःखं वा कष्टमेव वा निश्चितम्। परस्परं सम्मन्त्र्य मन्त्रिणो राजानमतिसंदधति। राजभक्तिं प्रदर्शयन्तो मध्यस्था इवाऽऽत्मनः कथयन्तः कस्मिन्नपि पक्षे नाऽस्माकं पक्षपातः, पक्षपातस्तु केवलं न्यायसङ्गते कर्मणि, इति प्रकटयन्तस्ते कस्मादपि पक्षादुत्कोचग्रहणं कृत्वा दूषितपक्षे निर्णयमापादयन्ति। गुप्तरूपेण बाह्यानाभ्यन्तरिकांश्चोपद्रवानुत्पाद्य प्रकटरूपेण प्रशान्ततनां नयन्तो दृश्यन्ते। एवञ्च ते सततं राजानं विपत्तिषु निपातयन्ति।

दिवसस्य षष्ठः प्रहरो राज्ञां स्वैरविहाराय शास्त्रकारैर्निर्दिष्टः। स्वल्पेऽप्यस्मिन् समये राज्याधिकारिणोऽनेकानि कार्याणि तस्य समक्षमुपस्थाप्य तं पीडयन्ति।

सप्तमोऽष्टमो वा प्रहरो दिवसस्य नरपालानां महाविपत्तये भवति। सप्तमे प्रहरेऽसौ सैनिकानामभ्यासं सेनाङ्गानाञ्च व्यवस्थां निरीक्षते। परं तत्राऽपि तस्य सततं महद् भयं भवति, कदाचित् कोऽपि षड्यन्त्रं विधाय तस्य वधं कुर्यात्। बृहद्रथो मौर्यवंशीयो नरपतिः सेनापतिना पुष्यमित्रेण सैनिकानामभ्याससमये हतः। अष्टमे प्रहरे सेनापतिभिः सार्द्धं मन्त्रणागृहे समुपविष्टो युद्धाभियानान् पार्थिवो विमृशति।

एवं दिवसस्याष्टस्वपि प्रहरेषु महान्ति दुःखान्यनुभवतो राज्ञो न च सुखं नाऽपि च शान्तिः समुपलभ्यते।

अथ रात्रावपि तस्य कुतः सुखम् ? निशायाः प्रथमे प्रहरे सन्ध्यामुपास्य नरपतिर्गुप्तचरानवलोकयति। तेषां माध्यमेनाऽसौ विदितसकलजगद्व्यापारो नृशंसकार्याणां सम्पादनायाऽनिच्छन्नपि प्रवर्तते। यथा - गुप्तरूपेण शस्त्रैरभिघातोऽग्निना दाहो विषादिना वा मारणम्।

रजन्याः द्वितीये प्रहरे राजा भोजनादिभ्यो निर्वृतः स्वाध्याये प्रवर्तते। तृतीयस्य प्रहरस्य प्रारम्भे तूर्यादिवाद्यानां घोषाः भवन्ति। अभिप्रायोऽयं महीपालस्य शयनसमयः सम्प्राप्तः। तृतीय-चतुर्थ-पञ्चमप्रहराः राज्ञां शयनाय भवन्ति। वराको दयनीयस्थितिर्हि नरपती राजकीयव्यवहाराणां दण्डनीतिप्रयोगानाञ्च चिन्तया सम्यक् निद्रामपि न लभते। विह्वलमनसस्तस्य चिन्तयतो जागरणैरेव रजन्यो व्यतियन्ति। शयनसमयोऽपि स्वल्प एव।

षष्ठे प्रहरे राज्ञा शास्त्राणां चिन्तनमध्यनञ्च कर्तव्यम्।

निशायाः सप्तमे प्रहरे कठोरतमानि कर्कशाणि चित्तोद्वेगकारीणि कार्याणि राज्ञे निर्धारितानि। यथा - मन्त्रिभिः सह मन्त्रणं, गुप्तचराणां सम्प्रेषणमित्यादीनि। एतेषां मन्त्रिणां गुप्तचराणां वा राजा निश्चयेन वशवर्ती भवति। सर्वेभ्योऽप्युत्कोचग्राहिणस्ते राजानं वञ्चयित्वा धनसङ्ग्रहरताः वर्तन्ते।

रजन्या अष्टमः प्रहरो नरपालाय महान् कष्टप्रदः। अस्मिन् समये शान्त्युपायो-पदेशकाः पुरोहिताः राजानमुपसर्पन्ति। दुःस्वप्नदुष्टग्रहाशुभशकुनादिशान्त्युपायानुप-दिशन्तस्ते राजानमतिसंदधति। ते कथयन्ति -

यज्ञं याजय। स्वस्तिवाचनं वाचय। ब्राह्मणेभ्यश्च प्रचुरं स्वर्णादिकं देहि। ब्राह्मणेभ्यः स्वर्णस्य दानेन विपत्तयो नोपसर्पन्ति। सुदूरादेव परावर्तन्ते। दुष्टग्रहाः प्रशाम्यन्ति। इहलोके परलोके च सुखानि लभ्यन्ते। दीर्घमायुः प्राप्यते। अरिष्टाश्च नोपसर्पन्ति। धनदानाय निर्दिष्टेभ्यो ब्राह्मणेभ्यस्ते पुरोहिताः सांवत्सरिकाश्चोत्कोचं गृह्णन्ति। एवञ्च ते सर्वे राजानं वञ्चयित्वा सततं स्वगृहाणि धनैर्धान्यैश्च संवर्धयन्ति।

पुरातनैः शास्त्रकारैर्भूपतिभ्यः समुपदिष्टा दण्डनीतिरतिकष्टदायिनी। एतां परिपालयन्तस्ते न तु दिवा शान्तिं लभन्ते न च रजन्यां विश्रान्तिं प्राप्नुवन्ति। सुखस्य लेशमात्रमपि न तेभ्यो विनिर्दिष्टम्। मन्त्रिभिर्विभागाध्यक्षैर्दूतैः पुरोहितैश्च सततं प्रतार्यमाणो नरपतिश्चक्रवर्तिपदं तु किं लभेत, स्वकीयमैश्वर्यमपि विनाशयति। चक्रपर्तिपदमुपलभ्याऽपि किं सुखं वा शान्तिं वाऽसावधिगमिष्यति ?

यदि राज्ञा जितेन्द्रियेण भवितव्यं, दिवानिशं तपश्चरणीयं, सामदानभेददण्डमायानां पञ्चोपायानां चिन्ता करणीया, सन्धिविग्रहयानासनसंश्रयद्वैधीभावानां षडङ्गानां चिन्तने समयो विनाशनीयः, कामक्रोधमदलोभमोहमात्सर्याः षड्रिपवो विजेतव्याः, स्वपरजनेषु निरन्तरं कूटनीतिप्रयोगैर्दुःखानि वोढव्यानि, राज्याधिकारस्य को लाभः? सर्वदा दुःखैरेव परिवृतः क्षणमात्रमप्यसौ सुखानि न लभते न वा शान्तिमधिगच्छति।

राजन् ! मन्त्रिणश्चैते धूर्तबका इव सदा राजकीयधनेष्वेव दृष्टिं व्यापारयन्तो

लोलुपाः सततमवसराणि परिमार्गयन्ति, कथं तेन धनेन निजकञ्चुककोशान् बिभ्रियुः? तदर्धञ्च ते व्यसनेषु विशेषतः वेश्यासु व्ययन्ति। येषां शास्त्रकाराणामुपदेशांस्ते प्रस्तुवन्ति, कौटिल्यशुक्राङ्गिरोविशालाक्षबाहुदन्तिपुत्रजयदत्तपाराशरकामन्दकादि-वचनान्युद्धरन्ति तैरपि कदाचिदिन्द्रियाणि विजितानि, तपांसि चरितानि, शास्त्राणां वा वचनानि परिपालितानि ? एतत्सर्वं धूर्तजनानां परवञ्चनकौशलम्, परातिसन्धानविद्या च निश्चयेन वर्तते। अतो भवता नाऽत्राऽवधेयम्।

पुनश्च, भृशं स्वाध्यायेन को लाभः ? सततमध्ययनेन लोकव्यवहारबुद्धिर्विनश्यति। तथाविधाः जनाः सदा धूर्तैः प्रतार्यन्ते।

देव ! पुनश्चेयं वार्ता। कां न्यूनतां वा हीनतां वा भवाननुभवति ? लोकसुखकारिणां कीर्तिप्रदानां सर्वेषां तत्त्वानां हेतूनां भवानधिपतिः। प्रशंसनीयं कुलं वर्तते। नवयौवनेन शोभनरूपेण भवान् शोभते। मनोहरं स्वस्थञ्च वपुरस्ति। अपरिमितस्य धनस्य स्वामी भवान्। सर्वमितत् सुखोपभोगाय, न तु दुःखमनुभवितुम्। अतो भवता मन्त्रिणामेत उपदेशाः सदोपेक्षणीयाः। व्यर्थमेव तपश्चिन्तानलेषु न भवता कान्तमिदं वपुर्होतव्यम्।

राजन् ! प्रचण्डं लोकविजयसमर्थं सैन्यं भवतो वर्तते। तत्र सहस्राणां दश दन्तिनः, विंशतिसहस्रं स्यन्दनाः, लक्षत्रयं सादिनः, लक्षाणां षट् च पदातिसैनिकाः वर्तन्ते। राजकीयकोशे सहस्रशः स्वर्णनिष्कपरिपूरिताः कलशाः विद्यन्ते। सहस्रवर्षं यावन्मुक्तहस्तं व्ययीकृतमपि राजकोशस्थं धनं न न्यूनतां प्रपत्स्यते। प्राप्तव्यशेषं वस्तु किं विद्यते, यस्योपलब्धये मानवजीवनमिदं पुण्यैरर्जितं तपस्त्यागजितेन्द्रियत्वादि-विविधचिन्तापरम्परासु व्यर्थीक्रियेत। प्राणिनां जीवनानि स्वल्पावधिकानि चतुर्दिनानि भवन्ति। पुनर्भोगक्षममायुस्तु ततोऽपि स्वल्पम्। अर्जितं धनं यदि नोपभुज्यते, जीवनस्य का सार्थकता, किञ्च सुखम् ?

देव ! मूर्खास्ते ह्यविचारणीयचरिताः, ये धनमर्जयन्तो देवलोकं गच्छन्ति, न चोपार्जितं धनमुपभुञ्जते। अतो राज्यप्रशासनसंचालनधुरमुत्तरदायिनां विश्वस्तानां राज्याधिकारिणां सेवकानां स्कन्धेषु समारोप्याऽऽनन्देन यौवनसुलभान् भोगान् भुङ्क्ताम्। भवतोऽन्तःपुरेऽप्सरसामपि तिरस्कारिण्यो मनोरमा रामाः वर्तन्ते। ताभिः सार्द्धं प्रणयरतिविलासानां सुखानि भोक्तव्यानि। षड्ऋत्वनुकूलाः नृत्यगीतसुरापानगोष्ठ्यः संयोजनीयाः। काव्यसभासु दत्तावधानेन भवितव्यम्। विविधकलाप्रयोगप्रदर्शनेषु स्वरचनाकौशलैः कलामर्मज्ञाः विस्मयविमुग्धाश्चमत्कृताः करणीयाः। मन्त्रिणामुपदेशास्तु कर्णेनैकेन श्रुत्वा द्वितीयकर्णमार्गाद् बहिष्करणीयाः।"

एवमुपदिश्याऽसौ धूर्तो विलासी विहारभद्रः सर्वैः शरीरवयवैर्भूमौ शयानो राजानं

साष्टाङ्गं प्रणनाम। तस्य मनोहारिणः सदुपदेशानाकर्ण्य राजानं परिवारयन् प्रमदाजनो नयनानि नर्तयन् साट्टहासं जहास। काचन युवतयस्तालीवादनेन हर्षं प्रकटयामासुः। एतत्सर्वमवलोक्याऽसौ नरपतिरनन्तवर्मा चाऽपि हसितुं प्रावर्तत। द्वाभ्यां कराभ्यां विहारभद्रमुत्थाप्याऽसौ जगाद –

"गुरुदेव ! उत्तिष्ठतु भवानुत्तिष्ठतु। भवता महाकल्याणकारी प्रस्तुत उपदेशः। तदनुसारेणैव मयाऽऽचरणीयम्।"

इति कथयित्वा राजाऽनन्तवर्मा पूर्ववद् विलासमयीषु प्रणयक्रीडासु निमग्नः समयमत्यवाहयत्। राजभक्तो वृद्धमन्त्री वसुरक्षितः पुनः पुनः राजानमुपदिशति स्म, राजकार्याणि च निरीक्षितुं प्रेरयति स्म। परन्त्वसौ विलासी पार्थिवोऽनन्तवर्मा राजकार्याण्युपेक्षमाणो भोगेषु सततमासक्तचित्तो विहारभद्रस्यैवोपदेशान् जग्राह। मन्त्रिणो वसुरक्षितस्य सदुपदेशेषु स्वीकृतिं प्रदर्शयन्नपि स्वैरं विहरति स्म।

एवञ्च दीर्घावधिर्व्यतीतः। दुर्भाग्यशालिना नरपतिना वसुरक्षितस्य बुद्धिमतो वृद्धमन्त्रिणः सततमुपदेशा उपेक्षिताः। विधिमुल्लङ्घयितुं कः क्षमते ? वसुरक्षितेन मनसि चिन्तितम् –

"अरे, मूर्खोऽहमविमृश्यकारी वर्ते। राजा मामाद्रियते, उपदेशान् हितकारिणः शृणोति, इति मे मतिरवर्तत। मया सततमयं नीतियुक्तव्यवहारेषु प्रेर्यति। परन्तु सदैवाऽयं मामुपेक्षते। सम्प्रत्यहमस्य नयनयोर्धूलिकण इव पीडादायकः पात्रञ्चोपहासस्य सञ्जातः। अस्य चेष्टाः व्यवहाराश्च विपरीता एव मयि दरीदृश्यन्ते।

सम्प्रति नरपतिरयं मामादरस्नेहिलदृष्टिभिर्नावलोकयति, स्मित्वा नाऽभिभाषते, रहस्यकार्येषु मामुपेक्षते, न मां सस्पर्शमालपति, न मह्यमुपहारान् प्रेषयति, उपस्थिते-षूत्सवेषु न मां सम्मानयति, शुभकार्याण्यपि न समुचितानि मनुते, न गृहस्थस्य परिवारस्य वा कुशलमङ्गलादिकं मां पृच्छति, न मे पक्षपातिनो जनान् कृपापात्राणि च स्नेहदृष्ट्याऽवलोकयति, प्रत्युपस्थितेषु विशिष्टकार्येषु सततमुपेक्षमाणो मां न निमन्त्रयति, अन्तःपुरे चाऽपि न स्वात्मना सह नयति। सर्वाणि तस्याऽऽचरणानि मयि विपरीतान्येव संलक्ष्यन्ते।

मामयं सर्वदा पदाननुरूपकार्येष्वयोग्येषु नियुनक्ति। राजसंसदि मदासनेऽन्यजना-नामुपवेशनमनुमनुते। मम प्रतिपक्षिणो जनानधिकं सम्मानयति। मम कथितं नोत्तरति। मयि दोषारोपणं कुर्वत्सु जनेषु स्निह्यति। व्यङ्ग्योक्तिभिर्मां पीडयति। उपहासवार्तासु मामुपहसति। सर्वेषाञ्च समक्षं मामुपहासपात्रं विदधाति। अथ मम समक्षमेव नीतिशास्त्रविदो निन्दन् मूर्खांस्तान् मन्यमानोऽपवदति। मया प्रेषितान् महार्घानुपहारान्

नाऽङ्गीकरोति। सत्यमेव निर्दिष्टं कौटिल्येन -

परेषां मनांस्यनभिज्ञाय प्रियकथनमप्यनर्थहेतुरेव केवलम्। प्रियजना अप्यनेन व्यवहारेण शत्रवो जायन्ते।

तत् किमहं करोमि ? किं कर्तुं शक्यते ? अयं नरपतिर्निरन्तरं विपत्पथेऽग्रेसरीभवति। न मयाऽयं परित्रातुं शक्यः। पितृपरम्परयाऽहं राज्यस्याऽस्य मन्त्री वर्ते। हितमेवाऽस्य मयाऽभिलषणीयम्। अस्माकं जनपदप्रतिद्वन्द्वी प्रतिवेशी महीपतिर्वसन्तभानु-रश्मकजनपदस्य। बाह्यतो मित्रतां प्रदर्शयन्नपि प्रच्छन्नशत्रुराभ्यन्तरिकोऽसौ। निरन्तरमस्माकं छिद्राणि प्रतीक्षमाणस्य तस्य लक्ष्यम् - विदर्भाणामधिग्रहणम्।

परन्त्वयमनन्तवर्मा न किञ्चिदवबुध्यते। सम्भवतः समुपस्थितासु विपत्सु नियन्त्रिमात्मानं कुर्यात्। सम्प्रति सुपरामर्शा अप्यस्य विरागहेतवो भविष्यन्ति। अनर्थश्चाऽवश्यम्भावी। बलवती भवितव्यता। न चाऽयं नियन्तुं शक्यः। अतः स्वात्मानमेव नियम्य स्वपदस्थितिं रक्षामि। समये समुचिते सम्प्राप्ते विलासिनोऽस्य नरपालस्य नियमनाय प्रयतिष्ये।"

इति विचार्याऽसौ बुद्धिमान् प्राज्ञो मन्त्री वसुरक्षितो निभृतं स्थितः। इतश्च मन्त्री तथाभूतामवस्थां प्रपेदे, अमुतश्च नरपालस्याऽनन्तवर्मणः स्वैरविहारो निरन्तरं प्रवर्धमानो बभूव।

विदर्भजनपदस्योत्तरस्यां दिशि सीमासंलग्नोऽश्मकजनपदो वर्तते। तत्संलग्नश्च पूर्वदिशि वनवासिकजनपदः। अश्मकजनपदपार्थिवस्य वसन्तभानोः मन्त्रिण इन्द्रपालितस्य चन्द्रपालाभिधानः सुतोऽवर्तत। चन्द्रपालस्य दुराचरणैरुद्दण्डव्यवहारैः स्वैरविहारैश्च प्रकुपितो जनकः सुतं राज्यनिर्वासनदण्डेनाऽदण्डयत्। स तु बहुभिश्चारणै-र्वाराङ्गनाभिश्चारैः सेवकैश्च सार्द्धं विदर्भान् प्रविवेश।

विदर्भान् प्रविश्य चन्द्रपालः प्रजाजनेषु प्रचचार, वसन्तभानुनाऽसौ शत्रुत्वभावान्नि-जजनपदान्निष्कासितः। विदर्भे निवसन्नसौ राज्ञोऽनन्तवर्मणः सहायो भविता। विहारभद्रो विदर्भाधिपस्य परमविश्वासपात्रमवर्तत। चन्द्रपालो बहुभिर्मधुरालापैर्महार्घोपहारप्रदानैश्च विहारभद्रं निजमनोऽनुकूलं कृतवान्। तन्माध्यमेनाऽसौ विदर्भाधिपस्याऽनन्तवर्मणो-ऽप्यानुकूल्यं लेभे। याथार्थ्येन चन्द्रपालितोऽश्मकेन्द्रस्य वसन्तभानोर्गूढपुरुष एवाऽऽसीत्। छलेनैव निर्वासनदण्डव्याजेनाऽसौ विदर्भानिन्द्रपालेन प्रवेशितः, येन छलप्रपञ्चादिभि-रनन्तवर्मशक्तिर्विनाशमाप्नुयात्।

अथाऽनन्तवर्मणो विश्वासमापन्नश्चन्द्रपालो राजानं विविधविलासान् शिक्षयितुमारब्धवान्। विविधेषु विषयोपभोगेषु व्यसनेषु च राजानं समासक्तं विधायाऽसौ

तेषां गुणान् कीर्तयति स्म। चन्द्रपालः प्रोवाच -

"देव ! मृगयासदृशी परोपकारिणी क्रीडाऽपरा न वर्तते। व्यायामदायिनीयं क्रीडा नराणां पादेषु वेगाधिक्यं जनयति। अनया वाहनारोहणचातुर्यं वर्धते। दीर्घाध्वनस्त्वरितगत्योल्लङ्घनस्य सामर्थ्यमुत्पद्यते। वपुषः कफहानिर्भवति। अतः जाठराग्निरुद्दीप्यते। बुभुक्षा वर्धते। गृहीतस्याऽऽहारस्य पाचनमपि स्वल्पसमयेन सम्भवति। मेदोवृद्धिर्विरमति। शरीरावयवानि सुघटितानि सुकठोराणि लघुभाराणि स्फूर्तिशालीनि च भवन्ति। शीततापप्रभञ्जनवर्षणतृड्बुभुक्षादिव्यापारेषु सहनशक्तिर्विवर्धते। वन्यपशूनां विविधचेष्टानामाकृतीनाञ्चाऽवबोधनेन परचित्तान्तर्गतभावाभिज्ञानशक्तिः प्रादुर्भवति। हरिणगवयवन्यमहिषादीनां वधेन कृषीवलानां कृषिः संरक्ष्यते। सिंहव्याघ्रतिन्दुकचित्रकवृकादीनां हिंस्रजन्तूनां व्यापादनेन वनमार्गाः सुरक्षिताः शोधिताश्च भवन्ति। गिरिषु वनेषु च भ्रमणेन भौगोलिकज्ञानं विवर्धते। स्थानीयप्रजाजनैः सार्द्धं पार्थिवस्य जनसम्पर्केण तेषु राजभक्तिभावस्य सम्पुष्टिर्भवति। राजनि विजयोत्साहो वर्धते। निरन्तरं शस्त्राणामभ्यासेन शत्रवो बिभ्यति, राज्ये च प्रजाजनहृदयेषु सुरक्षाभावना समुत्पद्यते।

द्यूतश्चाऽपि परमगुणशालितां भजते। कितवो जनः प्रभूतामपि सम्पत्तिं तृणवन्मन्यमानः पणेषु नियोजयति। अनेन तस्मिन्नुदारभावाः समुद्भवन्ति। द्यूतकारी जयं वा पराजयं वा समभावेनाऽवलोकयन् हर्षविषादयोर्न वशवर्ती भवति। द्यूतक्रीडया क्रोधोऽभिवर्धते। क्रोधाच्च पुरुषार्थवृद्धिर्जायते। अक्षविद्यायां कूटबुद्धिप्रयोगोऽपि भवत्यनिवार्यरूपेण। अनेन कितवो जनः सूक्ष्मदर्शी सम्पद्यते। कपटप्रयोगैरेवाऽसौ शत्रूणाञ्जये समर्थो भवति। कितवस्य बुद्धिः सुसूक्ष्मतीक्ष्णविचारिणी जायते। तस्य चित्तं सततं विजयं चिन्तयति। अनेन चित्तैकाग्रता विकसति। अत्यद्भुतविस्मयोत्पादकसाहसिककार्येष्वभिरुचिर्निश्चयकारित्वञ्च समुत्पद्यते। कितवानां प्रतिस्पर्धिनः कर्कशकठोरप्रकृतयो भवन्ति। तैः सह प्रतिद्वन्द्विताभावेन द्यूतकरेष्वपि कठोरप्रकृतिर्विकसति। असौ कस्मादपि जनान्न बिभेति न च केनाऽपि पराभूयते। स्वाभिमानत्वगुणसम्पन्नो महासङ्कटेष्वपि न कदाऽपि व्यामुह्यते। जीवनव्यवहारेषु दैन्यभावः कथमपि तं नाऽभिभवति।

मनोरमासु रामासु रमणं तासामुपभोगोऽपि वा परमगुणशालितामावहति। अनेन जनानां धर्माणां धनानां सुफलता जायते। प्रियाभ्यः प्रचुरोपहारदानैर्लोभाद् विवर्जितो विलासी प्रणयरसरतिः सहृदयोऽत्युदारस्वभावो भवति। प्रमदास्वासक्तजनस्य पुरुषोचिताभिमानो विवर्धते। परहृदयान्तर्गतभावाभिज्ञानसामर्थ्यमभिजायते। विलासी जनोऽप्राप्य-

नायिकायाः प्राप्त्यै प्रयतते, प्राप्तनायिकां वशीकुरुते, वशीकृतनायिकामुपभुङ्क्ते, समुपभुक्तां नायिकां प्रसादयति, कुपिताञ्च नायिकामनुनयति। ईदृशेष्वभिनयेषु विलासिनो जनस्य बुद्धौ वाचि च परं कौशलं समुत्पद्यते।

प्रणयिनीनां प्रसादनाय समाकर्षणाय च विलासिजनो वपुः सुप्रसाधनसज्जितं विदधाति। मनोरमाणि वसनान्याभरणानि दधाति। अनेन पुरुषस्य सौभाग्यं वर्धते। लोकास्तं सादरं पश्यन्ति। स्वरमाधुर्यं स्मितपूर्वाभिभाषित्वमौदार्यं सौजन्यमित्यादिगुणाः विकसन्ति। रमणीषु विलास एव सन्तानोत्पत्तिहेतुः। पुत्रास्तस्येहलोकपरलोक-योर्यशस्वितामापादयन्ति।

मधुपानञ्च गुणकारितत्त्वेषु महत्तमम्। आसवानां पानेन नानाविधाः रोगाः सूर्योदयेनाऽन्धन्तमांसीव विनाशमुपयान्ति। मदिरामदिरं यौवनं दीर्घसमयं प्राणान् रक्षति। अहङ्कारो विवर्धते। अतः दुःखानि नोपसर्पन्ति। अङ्गेषु कामोद्दीपनेन रमणीनामुपभोगसामर्थ्यं विवर्धते। अपराधेषु ग्लानिर्नाऽनुभूयते। अतो मनःसन्तापाः नाऽतिपीडयन्ति। सुरापानसंसक्तानां जनानां मनांसि निर्मलीभूय कपटच्छलभावरहितानि भवन्ति। अतस्ते विश्वसनीयतां भजन्ते।

मनसो मात्सर्यापगमेन तादृशो जनः सततं हर्षनिर्भरो जायते। इन्द्रियविषयाणां रूपरसशब्दगन्धस्पर्शानां सातत्यानुभवेन प्रचुरानन्दानुभूतिर्भवति। मदिरापानं सुहृद्भिः सम्मिलित्य क्रियते। अतो मित्राणां संख्या वृद्धिमाप्नोति। अङ्गेष्वनुपमसौन्दर्या-कर्षणविवृद्ध्या अनुपमेयाः विलासाः लभ्यन्ते। सुरासेवनेन भयपीडानुभूतिहानिः सम्पद्यते। अतः समराङ्गणेषु पराक्रमाधिक्यं जायते।

एवञ्च वाचि काठिन्यं, भयावहानामार्तिकराणां दण्डानां प्रयोगः, स्तेयमायावञ्चनादिभिः प्रभूतधनोपार्जनादीनि व्यसनानि यथासमयं यथावसरं भृशमुपयोगीनि भवन्ति। एतेभ्यो विरहितो जनो न लोकव्यवहारेषु साफल्यमधिगच्छति।

शास्त्रेषु मृगयाद्यूतप्रमदासक्तिमधुपानवाक्पारुष्यदण्डपारुष्यस्तेयसाहसानि महाव्यसनान्युच्यन्ते। परन्तु यथार्थतः सर्वाण्येतानि महोपकारकाणि विद्यन्ते। भवानस्य जनपदस्याऽधिपतिः। अतो भवता व्यसनरूपेण प्रसिद्धासु सर्वासु विद्यासु महाकुशलेन भाव्यम्। अथ भवान् नरपतिर्न वा मुनिः नाऽपि च तपस्वी वर्तते, य इन्द्रियाणि संयम्य भोगानां वा विलासानां वा नोपभोगमाचरेत्।

व्यसनविरहितो नरपतिर्न तु रिपूणां विजये समर्थो भवति, न च राज्यप्रशासन-सञ्चालने क्षमो जायते। व्यसनविरहितं पार्थिवं न च मित्राणि न च शत्रवः सम्मानयन्ति।"

पार्थिवायाऽनन्तवर्मणे चन्द्रपालस्य वचनान्यतिशयेनाऽरोचन्त। तदुपदिष्टव्यसनेषु भृशमासक्तमानसोऽसौ सततं तेषामेव चिन्तनं करोति स्म। राजानमनुसरन्तो राजकर्मचारिणः प्रजाजनाश्च तथैव व्यवहरन्तो व्यसनेष्वासक्ता अभवन्। समानशीलव्यसनास्ते परस्परं कस्यचिदपि दोषं न पश्यन्ति स्म। न च दर्शयन्ति स्म। विविधविभागानामध्यक्षाः स्वेच्छाचारिणो बभूवुः। राजकीयायसाधनानि विलुप्तानि। करैः सङ्गृहीतानि धनानि राजकर्मचारिभिर्विलुप्यन्ते स्म। उत्कोचपरम्परा भृशं संवर्धिता। उत्कोचग्राहिणो राजकर्मचारिण उत्कोचेनैव स्वकीयानि प्रयोजनानि साधयन्ति स्म। राजकीयायसाधनेषु विलुप्तेषु सत्स्वपि विषयेष्वासक्तचित्तस्य महीपालस्य व्ययेषु न काऽपि न्यूनता समायाता, अपितु वृद्धिरेव सञ्जाता। विदर्भेषु भ्रष्टाचरण-दुराचरणपरम्परा सततं वर्धमाना बभूव।

अथ महीपालोऽनन्तवर्मा राजकार्येष्वसावधानः पानगोष्ठीषु भृशमासक्तो दिवानिशं तथैवाऽऽत्मानं संयोजयामास। तत्र सामन्ताः मन्त्रिणो विभागाध्यक्षाः पौरजानदाश्च सपरिवारं निमन्त्र्यन्ते स्म। मनोरमरूपलावण्यवत्यः प्रमदाः विवाहिता अविवाहिताश्च समागच्छन्ति स्म। मदिरापानेन सञ्जातमदासु तास्वनाचारवृद्धिः समजायत। निमन्त्रितासु महिलासु नराधिपोऽसौ रमते स्म। निमन्त्रिताश्चाऽतिथयो राजपरिवार-रमणीषु व्यभिचरन्ति स्म। दुष्टाः दुराचारिणो व्यभिचारिणः षड्यन्त्रकारिणश्च जनाः निर्भयाः सन्तो राज्ञोऽन्तःपुरं प्रविशन्ति स्म। कुलीनाः स्त्रियः सदाचरणभ्रष्टाः समभूवन्। ताः न तु भर्तृवशवर्तिन्य आसन् न च गुरुजनानामादेशोपदेशानशृण्वन्। तास्तु गुरुजनानां तिरस्कारमकुर्वन्। तथाविधैराचरणैः परस्परं कलहक्रोधेर्ष्यादि-भावानामभिवृद्धिः समजायत।

महीपतेरनन्तवर्मणो विषयासक्तीनां परिणामोऽल्पसमयेनैवाऽऽविर्बभूव। राज्यप्रशासनं शिथिलं सञ्जातम्। बलवन्तो दुर्बलानपीडयन्। चौराणां साहसिकानाञ्च वृद्धिरभूत्। धनिनां धनान्यलुण्ठ्यन्त। प्रजाजनाः स्वच्छन्दाः सन्तः स्वैरविहारिणः पापपथगामिनो बभूवुः। सर्वस्मिन् जनपदे हाहाकारैः प्रजाजनानां दिशां प्रान्तराणि निनादितानि। चौरैः साहसिकैश्च लुण्ठितानां हिंसकप्रकृतिभिर्बन्धुबान्धवैर्निपीडितानां राज्याधिकारि-भिर्निष्कारणं बन्दीकृतानां प्रजाजनानामश्रूणां दर्शनमपि पार्थिवेन परित्यक्तम्। तत्प्रमार्जनस्य प्रजारक्षणस्य तु कथैव का ?

विदर्भजनपदे तथाविधाऽव्यवस्था प्रावर्तत, यथाऽऽर्तजनानां चीत्कृतयोऽपि न राज्ञः श्रवणगोचरतां जग्मुः। न्यायकरणाय न्यायाधिकरणेषु पीठासीनन्यायाधिकारिण एव प्रजाजनानन्यायैरपीडयन्। ते सदोषान् बन्धनमुक्तान् निर्दोषांश्च दण्डितांश्चक्रुः।

एभिः दुष्कर्मभिः प्रजाजनानां हृदयेषु प्रथमं भयस्य तदनन्तरं क्रोधस्याऽपि भावाः समुत्पादिताः। सर्वत्राऽराजकता समुत्पन्ना। धनरहितेषु जनेषु लोभः प्रादुर्बभूव। तेजस्विनः स्वाभिमानिनश्च जना राजकर्मचारिभिः समुत्पीडिताः। तदनन्तरं रिपुभिस्तेषु विदर्भेषु विविधानां षड्यन्त्राणां समायोजनानि प्रारब्धानि।

विदर्भेषु तादृशीमव्यवस्थामराजकतां प्रसृतां विदित्वाऽश्मकेन्द्रो वसन्तभानुरवसरं हस्तक्षेपस्य लेभे। यथार्थतो विदर्भाधिपतेरनन्तवर्मणः सामन्त एवाऽसाववर्तत। गुप्तचराः विविधषड्यन्त्रचतुरा रसदास्तीक्ष्णा विविधवेशधारिणस्तेन विदर्भनगरं प्रेषिताः। मायाप्रयोगैस्ते विविधैरुपायैः राज्याधिकारिणां प्रजाजनानाञ्च वधं कृत्वा राजशक्तिक्षकर्मणि प्रवृत्ताः।

केचन गुप्तचराः व्याधवेशाः समाययुः। मृगयाव्यसनिनो जनान् ते कथयन्ति स्म-

"अस्मिन् विपिने मृगव्यानां जन्तूनां प्राचुर्यं वर्तते।"

एवं प्रलोभ्य ते शुष्कशष्पकीचकबहुलेषु वनेषु नेनीयन्ते स्म। ततश्च तत्र तांस्ते वह्निं सन्दीप्य भस्मावशेषतां नयन्ति स्म। अथवा सिंह-व्याघ्र-तिन्दुक-चित्रकादीनां मृगयायै प्रोत्साह्य तान् निघ्नन्ति स्म। तृड्बुभुक्षापीडितांस्तान् जलभोजनलोभेन प्रलोभ्य कूपसमीपं नीत्वा तत्र पातयन्ति स्म। कण्टकक्षुपाञ्चितेष्ववसर्पिषु समविषमेषु मार्गेषु घोटकान् प्रद्राव्योपत्यकासु गर्तेषु निपातयन्ति स्म। कण्टकविद्धेभ्यः पादेभ्यः कण्टकानि समुद्धर्तुं विषदिग्घसूचिकाप्रयोगं कुर्वन्ति स्म। वनेषु संयोगवशादेकाकिनं जनं समुपलभ्य शस्त्रैरेव निघ्नन्ति स्म। मृगव्येषु पशुषु बाणसन्धानव्याजेन विदर्भसैनिकानां प्रजाजनानाञ्च वधव्यापारं कुर्वन्ति स्म। पर्वतशिखरारोहणाय प्रोत्साह्य तत्र नीत्वा करप्रहारैरधो भ्रंशयन्ति स्म।

केचन गुप्तचराः नागरिकवेशाः विदर्भनगरमागत्य सम्मर्दस्थानेषु प्रविश्योपद्रवाञ्जनयामासुः। द्यूतस्थानेषु पशुपक्षिद्वन्द्वस्थलेषु यात्रोत्सवेष्वेवंविधेष्वन्येषु च स्थानेषु विविधानुपद्रवानुत्पाद्य परस्परं क्रोधभावं समुद्दीप्य जनान् प्रतिद्वन्द्विजनवधाय प्रेरयन्ति स्म। गुप्तरूपेण कस्यचिद् वधं कृत्वा प्रकटरूपेण तदपराधमन्यस्मिन् जने कस्मिंश्चिदारोप्य परस्परं कलहबीजमावपन्ति स्म। व्यसनशीलेषु जनेषु कृत्रिममित्रभावं प्रदर्शयन्तस्तान् परस्त्रीष्वासक्तान् विधाय ते तथाविधमुपद्रवं जनयन्ति स्म यथा जनाः परस्परं कलहायन्तोऽन्योन्यं व्यापादयेयुः।

गूढपुरुषैः सह लावण्यवतीनां मनोरमरूपाणां प्रमदानां गूढमहिलानामपि प्रवेशो विदर्भनगरे बभूव। ताश्च प्रमुखान् पौरान् जानपदांश्च राज्याधिकारिणो वीरभटांश्च

विविधाभिः प्रणयचेष्टाभिर्विमोह्य सङ्केतस्थानमागन्तुं प्रेरयन्ति स्म। तासां पुरुषसहचराः सङ्केतस्थलेषु तेषु तेषु पूर्वमेव गोपनीयरूपेण स्थिताः यौवनसौन्दर्यलोभिनो व्यसनिनस्तत्रैव घातयन्ति स्म।

अश्मकेन्द्रेण वसन्तभानुना प्रेषिताभिर्वाराङ्गनाभिरनेके वीरपुरुषाः विदर्भसैन्यभटाः रूपसौन्दर्ययौवनमदविमोहिताः भोगविलासक्रीडासक्ताः मधुपानोन्मत्ताः क्षयरोगग्रस्ताः विहिताः। बहवश्च विषप्रयोगैरेव व्यापादिताः। तत्र चाऽप्यनेके चिकित्साव्यतिक्रमेण यमलोकं प्रापिताः।

अश्मकानामनेकैर्गूढपुरुषैरन्यप्रकारेणाऽप्यव्यवस्था विदर्भनगरे प्रसारिता। मातङ्गान् व्यालत्वमापन्नान् जनसम्मर्देषु प्रचोद्य तेषां दन्तकरचरणप्रहारैरगणितान् नागरिकांस्ते पेषयामासुः। बहूनि च लघ्वाकाराणि गृहाणि बभञ्जुः। भ्रातॄणां सम्पत्तिविभाजनावसरेषूत्तराधिकारविवादेषु भ्रातुर्वधमपि कारयित्वाऽपरं भ्रातरमपराधिनं प्रत्यापादयन्। छलं वा कपटं वाऽऽचरन्तो मायाविनः साधुपुरुषानपि समाजविरोधिनः षड्यन्त्रकारिणश्चेति प्रतिपादितवन्तः।

एवंविधैः षड्यन्त्रैरन्यैश्च विविधैरुपायैः प्रयोगैश्च वसन्तभानुना विदर्भेष्वनन्तवर्मणः शासनमस्थिरीकृत्य प्रजाजनेषु पौरजानपदेषु च क्रोधो वाऽविश्वसनीयताभावो वा समुत्पादितः। राज्याधिकारिणो विलासिनः प्रमत्ताः उत्कोचग्राहिणः प्रजोत्पीडकाः समभूवन्। कुलीनमहिलानां चरित्राणि विभ्रष्टानि पतनोन्मुखानि च सञ्जातानि। सैन्यशक्तिः शक्तिहीना विशृङ्खला चाऽभवत्।

एवं विदर्भजनपदं प्रदूष्याऽसावश्मकेश्वरो विदर्भजनपदपूर्वसीमासंलग्नवनवासिकजनपदस्याऽधिपतिमुदयप्रभुमुद्दीप्य विदर्भान् आक्रमीत्। उदयप्रभोः सैन्ये विदर्भजनपदसीमानं प्रविष्टेऽनन्तवर्मा चिन्तितो बभूव। षड्यन्त्रविनाशावशिष्टया सेनया योद्धुं समुत्सुको महीपतिः समरक्षेत्रमवततार। वनवासिकसैन्यसमक्षं तेन स्वशिविरं स्थापितम्।

वनवासिकाधिपेन सह समरे समुपस्थितेऽनन्तवर्मा सर्वान् सामन्तराजान् निमन्त्रयामास। तत्र वसन्तभानुः प्रथमं सेनया सह समागत्याऽनन्तवर्माणमुपेत्य तस्य प्रियपात्रं समजायत। अन्ये सामन्तराजा अपि तत्र समीयुः। तेषु कुन्तलपतिरनन्तदेवो मुरलाधिपो वीरदेवः ऋचीकाधिपतिरेकदेवः कोंकणराजः कुमारगुप्तो नासिकस्वामी नागपालश्च सम्मिलिताः पञ्च राजानो बभूवुः। सम्मिलितं सैन्यशिविरं नर्मदातीरे संस्थापितमभवत्।

कुन्तलपतेरवन्तिदेवस्य वाराङ्गनाऽनुपमरूपलावण्यवती उर्वशीनाम्नी त्रिभुवन-

रमणीसंहतिललामभूता चित्तविमोहनकरी नृत्यगीतादिषु कलासु परममप्रावीण्यमुपागता समवर्तत। भूलोकस्याप्सराः सा नृत्याङ्गनाऽवन्तिदेवस्य परमप्रिया सम्मानास्पदं बभूव। वसन्तभानोः परामर्शेन चन्द्रपालितस्तामामन्त्र्य विदर्भराजस्याऽनन्तवर्मणः समक्ष-मुपस्थापयामास। गणिकाया उर्वश्याः नृत्यादिकलाकौशलेन शारीरिकसौन्दर्येण चाऽतितरां हृतहृदयोऽनन्तवर्मा तां निजे पटशिविरे निमन्त्रयामास। मधुपानोन्मत्तश्च तामुपाभुङ्क्त।

अनन्तवर्मणो विलासिताया अस्याः समाचारो झटित्येव दावानल इव सर्वेषु सामन्तराजेषु प्रससार। तत्र वसन्तभानुरेकान्तेऽवन्तिदेवमुवाच -

"भ्रातः ! अनन्तवर्माऽसौ मदोन्मत्तोऽस्मदाश्रितमहिलास्तावदपि न परित्यजति। नृत्यव्याजेनाऽऽमन्त्रिता भवतः प्रिया वाराङ्गनोर्वशी स्वर्गाप्सरस उर्वश्या अप्यतिशायिनी सौन्दर्येण तेन व्यभिचरिता। अनन्तवर्मणोऽनेन कृत्येन सर्वे वयं ह्यपमानितानात्मनोऽनुभवामः। कथं तावद् वयमेतान् तिरस्कारान् सोढुं क्षमामहे। अतः प्रतिकरणायाऽऽवाभ्यां परस्परं सन्धिः करणीयः। अन्ये सामन्तराजा अपि विदर्भाधिपतेरिदं दुराचरणमवलोक्याऽस्मत्पक्षावलम्बिनो भविष्यन्ति।

मम तावत् समरशिक्षितानां हस्तिनां शतं वर्तते। भवतश्च शतपञ्चकम्। अन्येषामपि सामन्तमहीपतीनां सम्मिलितानां दन्तिनां सहस्रमेकं वर्तते। एवं षट्शताधिकैकसहस्रं दन्तिनोऽस्माकं सामन्तनरपतीनां वर्तन्ते। वनवासिको राजा उदयप्रभुर्मे परिचितो मित्रं मयि स्निह्यति। अस्मिन् विषये तेनाऽपि सह वयं मन्त्रयिष्यामहे। यदाऽसौ सम्मुखस्थितमनन्तवर्माणमाक्रमिष्यति, वयं सर्वे पृष्ठतः समागत्य तं विदर्भराजमाक्रमिष्यामः। हते च समराङ्गणेऽनन्तवर्मणि तस्य वाहनानि कोषो राज्यञ्चाऽस्माकं भविष्यति। सर्वं वस्तुजातं वयं परस्परं विभज्याऽधिकरिष्यामः।

वसन्तभानोः प्रस्तावः कुन्तलपतयेऽतितरामरोचत। प्रसन्नचित्तोऽसावन्तिदेवः प्रस्तावमेनमङ्गीचकार। अथ महार्घाणां कौशेयवसनानां प्रावरणानां रत्नजटित-कनकाभरणानामुपहाराणां सम्प्रेषणं विधायाऽन्ये सामन्तमहीपालाः वीरदेवैकवीर-कुमारगुप्तनागपालाः शिविरेऽनन्तदेवास्याऽऽमन्त्रिताः बभूवुः। तै सामन्तैरपि वसन्तभानोः प्रस्तावः स्वीकृतः। वनवासिको नरपतिरुदयप्रभुरपि षड्यन्त्रेऽस्मिन् सम्मिलितोऽवर्तत।

अपरेद्युः प्रभाते उदयति बालभास्करे पूर्वदिक्क्षितिजे वनवासिकाधिपति-रुदयप्रभुरनन्तवर्माणं विदर्भाधिपतिमाचक्राम। सेनासहायेन वीरेणाऽनन्तवर्मणा सह तस्य सम्प्रवृत्ते महति घोरे भीषणे सम्पराये, वसन्तभानुना सम्प्रेरिताः सामन्तमहीपालाः पृष्ठतो गत्वा तमाचक्रमुः। सर्वतश्च शत्रुभिः परिवृतो वराकोऽसावनन्तवर्मा तत्र समराङ्गणे वीरगतिं प्राप्य स्वर्गगामी बभूव।

स्वर्गङ्गतेऽनन्तवर्मणि युधि वसन्तभानुः प्रथममेव विदर्भाधिपस्य वाहनानि कोषञ्चाऽधिचक्रे। तदनन्तरं सामान्तराजानामन्त्र्याऽसौ प्रोवाच -

"सर्वे भवन्तोऽनन्तवर्मणो राज्यस्य धनैश्वर्यस्य विभागं निश्चयन्तु। अहं तावद् यत् किञ्चिदपि भवतामनुमतं भविष्यति, तदेव स्वीकरिष्यामि।"

विभागतत्परेषु तेषु सामन्तमहीपतिषु वसन्तभानुना मायाप्रयोगेन कलहः परस्परं समुत्पादितः। परस्परं विवदन्तस्ते यमलोकं सम्प्राप्ताः। धूर्तेन वसन्तभानुनाऽनन्तवर्मणो राज्येन सह तेषां सामन्तराजानां राज्यान्यप्यधिकृत्य सर्वाः सम्पत्तयो निजाधिकारे समानीताः। वनवासिकाधिपायोदयप्रभवे दन्तिनां पञ्चशतमश्वानां सहस्रं स्वर्णमुद्राणाञ्चैकलक्षकनकनिष्कमुपहारीकृत्य सन्धिः कृता। उदयप्रभुरपि उपहारानादाय स्वदेशं गतः। अथ विदर्भजनपदमधिकृत्याऽन्येषामपि सामन्तनरपालानां राज्यानि वसन्तभानुर्निजसैन्यबलेनाऽधिचक्रे।"

बालकसम्बन्धि वृत्तमिदं श्रावयन् वृद्धोऽसौ क्षणं विरम्य पुनरुवाच -

"स्वर्गङ्गतेऽनन्तवर्मणि समराङ्गणेऽधिकृते च वसन्तभानुना विदर्भराज्ये वृद्धो मन्त्री वसुरक्षितश्चिन्तार्णवे निमग्नः। कुलक्रमागतैः स्वामिभक्तैरन्यैर्मन्त्रिभिः सह परामृश्याऽसौ राजपरिवारं राजप्रासादाद् बहिरानिनाय।

तत्र राजपरिवारसदस्याः सन्ति -

बालकोऽयमनन्तवर्मसुतो भास्करवर्मा, राजनन्दिनी मञ्जुवादिन्यस्य भगिनी, राजमहिषी वसुन्धरा देवी, राजपरिवारस्य विश्वस्तसेवकोऽहं भद्रसेनः।

सर्वे वयं वसुरक्षितेन वृद्धेन स्वामिभक्तेन मन्त्रिणा सह विदर्भनगरं परित्यज्य माहिष्मत्यै प्रस्थिताः। माहिष्मत्याः स्वामी मित्रवर्मा विदर्भाधिराजस्याऽनन्तवर्मणो वैमात्रो भ्राता वर्तते। परमस्मद्दौर्भाग्येण वसुरक्षितो वार्धक्येन दुर्बलो मार्गविषमत्वमसहमानोऽरण्यवर्तिनि ग्राम एकस्मिन् ज्वराक्रान्तो भूत्वा पञ्चत्वञ्जगाम। तदा राजपरिवारेण सहाऽहं माहिष्मतीं सम्प्राप्तः।

माहिष्मतीं सम्प्राप्य राजसदनं गत्वा मया राजपरिवारो मित्रवर्मणः संरक्षायां समर्पितः। परं तत्र देव्याः वसुन्धरायाः रूपलावण्येन मदसम्भृतेन यौवनेन च समावर्जितहृदयस्य मित्रवर्मणश्चित्तं भ्रातृजायां प्रति विचलितम्बभूव। भ्रातृसम्बन्धस्य पवित्रतां तिरस्कुर्वन्नसौ दुराचरणस्तामङ्कशायिनीं विधातुमाग्रहं कर्तुमारेभे। परं सा पवित्रा पवित्राचरणा पतिव्रता देवी न कथमपि कुत्सितकर्मव्यभिचरणमङ्गीचकार। सा तं देवरं सततमबभर्त्सत।

अथ देव्या वसुन्धरया निर्भर्त्सितो दुरात्मा मित्रवर्मा कुत्सितं चरितुमारेभे। देव्याः

विषये तेन प्रचारितम् -

"कुलटेयं भ्रातृजाया पातिव्रत्यपाखण्डं प्रदर्शयन्ती स्वसुतं माहिष्मत्या राजानं कर्तुमभिलषति। अतोऽयं कृष्णसर्पः सत्वरं पशुमारं मारणीयः।"

अथ गुप्तरूपेण तेन मित्रवर्मणा भास्करवर्मणो वधाय गूढघातकाः नियुक्ताः। एतत् षड्यन्त्रं विज्ञाय देवी वसुन्धरा विजने मामाहूय प्रोवाच -

"भद्र भद्रसेन ! मित्रवर्माऽयं गुप्तरूपेण मे सुतं भास्करवर्माणं हन्तुमिच्छति। अस्य प्राणरक्षणे तवैवाऽधिकारः। प्रच्छन्नरूपेण त्वयाऽयं बालकः कस्मिन्नपि सुरक्षिते स्थाने नेतव्यः। तत्र त्वया निवासस्य प्रबन्धोऽपि विधेयः। यद्यहं जीविष्यामि, मञ्जुवादिन्या सह तत्रैवाऽऽगमिष्यामि। समुचितायां व्यवस्थायां सत्यां त्वयाऽहं सूचनीया।"

देव्याः वचनानि निशम्य तत्प्रदत्तानि कनकनिष्काण्यादाय बहुजनसङ्कुले राजकुले कथमपि मार्गं परिष्कृत्य बालकमेनमहं राजप्रासाद् बहिरानीयाऽस्मिन् सर्वप्राणिभयङ्करे विन्ध्यारण्ये समागच्छम्। पादाभ्यां चलन्तमेनं बालकं मार्गश्रमक्लान्तवपुषमवलोक्य समीपस्थितां कोलपल्लीमाययौ। कतिपयदिनान्यावाभ्यां तत्र न्युषितम्। परं माहिष्मती नगरी स्थानादस्मान्नाऽतिदूरवर्तिनी। राज्याधिकारिणः प्रायशस्तत्र समागत्य विश्रामं कुर्वन्ति। अभिज्ञानभयाद् बालकेनाऽनेन सह तस्मादपि स्थानादहं निर्गतः।

वन्यमार्गे परिभ्रमन्नयं बालको पिपासया बुभुक्षया च मार्गजनितश्रमेण च क्लान्तशरीरो म्लानवदनश्च बभूव। अत्र कूपमवलोक्य मया विचारितम् -

स्वल्पमत्र विश्रम्य कूपाज्जलमुद्धृत्य तृषं प्रशाम्य समीपस्थेभ्यो वृक्षेभ्यः फलान्याहृत्य भक्षयित्वा पुनर्यात्रामावां प्रारप्स्यावहे। परं कूपाज्जलमुदञ्चन्तं मां जराजनितदौर्बल्यं कूपेऽपातयत्। देवतारूपेण भवानत्राऽऽगत्य मां कूपादुदहरत्। मया च नवजीवनं प्राप्तम्।"

इति कथयित्वाऽसौ वृद्धः पुनः बद्धाञ्जलिश्चरणयोर्मे पपात।

विश्रुतो निजचरितं राजवाहनाय कुमाराय निवेदयन्नासीत्। क्षणं विरम्याऽसौ पुनः बभाषे -

भद्रसेनकथितं वृत्तं निशम्य मे हृदयं करुणया विगलितम्। मानवदेहधारिणामपि जनानां विचारास्तथा कुत्सिताः नृशंसाः स्वार्थपरायणाः भवन्तीत्यनुभूय विधेर्विधानमतिक्रूरं भवतीत्यवलोक्य विविधपरिकल्पनासु निमग्नोऽहमभवम्। तदाऽहं भद्रसेनमपृच्छम् -

"भद्र ! अस्य राजसुतस्य जननी कस्य वंशस्य कन्या ?"

भद्रसेन उवाच -

"आर्य ! कुसुमपुरे वैश्रवणो नाम सार्थवाहो वणिक् बभूव। तस्य तनया सागरदत्ता

कोसलजनपदस्य राजकुमारस्य कुसुमधन्वनो माताऽवर्तत। कोसलराजकन्येयं वर्तते देवी वसुन्धरा।"

भद्रसेनस्येमानि वचनानि निशम्य मे हृदयं स्नेहकरुणाविगलितं सञ्जातम्। नयने अश्रुपूर्णे जाते। स्नेहहर्षभरसमाक्रान्तहृदयोऽहं बालकमङ्के निधाय वक्षस्याऽऽलिङ्ग्य प्रोवाच -

"भद्र ! यदि भवान् सत्यं वदति, अस्य बालकस्य जनन्याः वसुन्धरायाः मातामहो मम जनन्याश्च मातामहः स एव वैश्रवणः कुसुमपुरवासी। जनको मे वैश्रवणसुतायाः सुतः। वैश्रवणस्य द्वितीया सुता सिन्धुदत्ता मे जनकस्य जननी।"

भद्रसेनेन पुनः पृष्टोऽहं प्रावोचम् -

"भद्र ! मम जनकः सुश्रुतो वर्तते, अहञ्च तस्य सुतो विश्रुतोऽस्मि।"

इदमाकर्ण्य परमहर्षमुपागतो भद्रसेनः पुनः मम चरणौ संस्पृश्याऽवदत् -

"आर्य ! कीदृशः संयोगो विधिना उपस्थापितः ?"

भद्रसेनेन प्रोक्तं भास्करवर्मणः सकलं वृत्तं निशम्य मया हृदि निश्चयो विहितो यदयं बालकः पुनः पितुः पदे प्रतिष्ठितो भविष्यति। अश्मकेन्द्रेण वसन्तभानुना कूटनीतिप्रयोगं कृत्वा यथाऽनन्तवर्मा व्यापादितस्तथैवाऽहं कूटनीतिप्रयोगैरश्मकपतिं व्यापाद्य भास्करवर्माणं विदर्भराजसिंहासने प्रतिष्ठितं करिष्यामि।

एवं मिथः संलपत्स्वस्मासु पश्चिमदिशो व्याध एकस्तत्र समायातः। व्याधाय निष्कमेकं दत्त्वा मया कथितम् -

"भद्र ! समीपस्थाद् ग्रामाद् भोजनसामग्री भवताऽऽनेया।"

सोऽपि व्याधः स्वल्पेन समयेन भोजनसामग्रीमानयत्। भोजनाय मया सोऽपि निमन्त्रितः। भोजनानन्तरं तं व्याधमहमपृच्छम् -

"भद्र ! भवता माहिष्मतीसमाचाराः किं ज्ञायन्ते ?"

व्याध उदतरत् -

"आर्य ! माहिष्मत्या एवाऽहमागच्छामि। वन्यवस्तूनि मृगव्याघ्रत्वग्गजमुक्तालाक्षादीनि मया विपणिषु विक्रीतानि। परमद्य माहिष्मत्यां महान् सम्भ्रमो विद्यते। मया श्रुतम् -

माहिष्मतीनरेशो मित्रवर्मा स्वकीयां भ्रातृसुतां महिषकजनपदमहीपतये प्रचण्डवर्मणे प्रदातुमिच्छति। प्रचण्डवर्मा स्वल्पेनैव समयेन माहिष्मतीं समागमिष्यति। अतो नगरी विशेषरूपेण सुभूषिता वर्तते।"

एतं समाचारमाकर्ण्य चिन्तासागरनिमग्नोऽहं तद्विपन्निराकरणोपायं विचारितवान्। गते व्याधे भद्रसेनमहमवोचम् -

"आर्य ! मित्रवर्माऽयं महाधूर्तानामपि शिरोमणिः। मञ्जुवादिनीं भ्रातृजां प्रति स्नेहं वात्सल्यञ्च प्रदर्शयन्नयं देव्यां वसुन्धरायां विश्वासमुत्पादयितुमभिलषति। तदनन्तरमसौ देवीमाध्यमेन भास्करवर्माणं माहिष्मतीमानीय तस्य वधं विधास्यति। परमसौ धूर्तः स्वधूर्ततायाः फलं ध्रुवं भोक्ष्यते।

त्वमेनं बालकमिह मम संरक्षणे परित्यज्य माहिष्मतीमुपगच्छ। देवीं वसुन्धरां रहसि बालकस्य भास्करवर्मणः कुशलं निवेद्य मम परिचयो देयः। तदनन्तरं प्रकटरूपेण क्रन्दन्नुभाभ्यां हस्ताभ्यां वक्षःस्थलं ताडयन् सहाहाकारं त्वं कथयिष्यसि –

"हा हा वने वराको भास्करवर्मा व्याघ्रेन भक्षितः।"

एतच्छ्रुत्वा मनसि भृशं प्रहृष्टोऽपि दुर्वृत्तोऽसौ मित्रवर्मा दुःखातिशयं प्रकटयन् देवीं वसुन्धरां भ्रातृजायां सान्त्वयिष्यति। तदा देवी तं दुरात्मानं कथयतु –

"देवर ! सुतस्याऽपेक्षया मया भवांस्तिरस्कृतः। मम दौर्भाग्येनाऽसौ परलोकमगच्छत्। जगत्यस्मिन् विशाले किं करिष्याम्यहमेकाकिनी ? यदि भवान् मयि स्निह्यति, अनुरागं बिभर्ति, मद्वचनानुसारं कार्यं करोतु।

स तु धूर्तः परं महामूर्खो मित्रवर्मा झटिति देवीं सम्मानयन् स्वीकरिष्यति।"

तदनन्तरं मया निजपोट्टलिकातः कार्पासवसनपुष्परचितां स्रजमेकामौषधिग्रन्थिञ्च निष्कास्य तदुभयं तस्मै भद्रसेनाय समर्प्य प्रोक्तम् –

"आर्य ! स्रगियं विषदिग्धा वर्तते। औषधं चेदं विषनाशकमगदम्। देव्या वसुन्धरायाः प्रणयनिवेदनं स्वीकृत्य परमहर्षनिर्भरो मित्रवर्माऽन्तिकमागम्य हस्तग्रहणाय प्रयतिष्यते। तदा देवी वसुन्धरा मित्रवर्मणो नरपालस्य मुखे वक्षसि च स्रजा प्रहरन्ती वदतु –

"यद्यहं पतिव्रता, स्रगेवेयं दुराचारिणस्तव पापिनः कालो भवतु।"

विषदिग्धस्रक्प्रहारेण पापीयानसौ मित्रवर्मा वत्सनाभविषप्रभावेण निश्चयेन परलोकयात्रां करिष्यति। तदनन्तरं विषनाशकेनाऽगदेन स्रजं विषप्रभावरहितां विधाय तां सा मञ्जुवादिन्याः ग्रीवायां दधातु। परं मञ्जुवादिनी स्वस्था स्थास्यति। कर्मणाऽनेन समीपस्थाः जनाः विश्वसिष्यन्ति, जयजयकारैश्च वसुन्धरायाः गगनं निनादयिष्यन्ति। ते कथयिष्यन्ति –

"पातिव्रतधर्मस्याऽयं प्रभावो विस्मयकरः। अहो सतीयं देवी वसुन्धरा। कार्पासवसनरचितस्रक्प्रहारेणैव स दुरात्मा पापीयान् मित्रवर्मा हतः। परं मञ्जुवादिनी स्वस्था तिष्ठति। यद्यत्र काचन वञ्चना भवेत् तत्कथं मञ्जुवादिनी स्वस्था तिष्ठेत्।"

इत्येवं कथयित्वा मया स्वयोजना विस्तरेण भद्रसेनस्य कर्णे जल्पिता।

मम योजनया सहमतो भद्रसेनो भास्करवर्माणं तत्रैव मम संरक्षणे परित्यज्य

माहिष्मतीमुपजगाम। तां योजनामनुसरन्ती वसुन्धरा तं दुर्वृत्तं मित्रवर्माणं परलोकाय प्रास्थापयत्। तस्याः पातिव्रत्यप्रभावमवलोक्य जयजयनादैर्गगनं निनादयन्तो मन्त्रिणः पौराः जानपदाश्च देवीं वसुन्धरां राज्यशासनसञ्चालिकां मत्वा तस्यै सर्वानधिकारान् समर्पितवन्तः।

मित्रवर्मवधवृत्तान्तं निशम्याऽहं भास्करवर्मा च कापालिकवेशधारिणौ माहिष्मत्याः पितृवनं समागच्छाव। तत्र विन्ध्यवासिन्याः मन्दिरे देव्याः सिंहसमारूढायाः भव्या प्रतिमा प्रतिष्ठिताऽवर्तत। पूजार्चनाप्रयोजनसमागतानां भक्तानां निवासाय मन्दिरप्राङ्गणे केचन प्रकोष्ठाः निर्मिता आसन्। कापालिकवेशावावां तत्रैकस्मिन् प्रकोष्ठेऽतिष्ठाव।

भद्रसेनेनाऽस्मद्विषये माहिष्मत्यां तथा प्रचारितं यथा सर्वे तत्रत्याः निवासिनो मयि परमां श्रद्धां भक्तिञ्च प्रादर्शयन्। भक्तैरुपाहृतान्युपायनानि मया तत्रैवोपस्थितेषु भक्तेषु वितीर्णानि। सर्वजनसमक्षं भोजनादिकं परिहरन्तावावां गुप्तरूपेण लौकिक-व्यवहारानपालयाव। भद्रसेनोऽपि सुगुप्तरूपेण मामुपगम्य माहिष्मत्याः समाचारान् निवेद्य परामृशति स्म।

दिवसद्वयानन्तरं मम परामर्शेन महाराज्ञी वसुन्धरा महिषकजनपदाधिपस्य प्रचण्डवर्मणः सेवायां सन्देशहरेण सन्देशं प्रैषयत् -

"आर्य ! नास्तीदानीं माहिष्मत्याः कोऽपि स्वामी। दिवङ्गते मित्रवर्मणि, भक्षिते च विपिने व्याघ्रेण भास्करवर्मणि मञ्जुवादिन्याः वाग्दत्तो वरो भवानेव राज्यमेतदर्हति। अतो मम सुतां परिणीय माहिष्मतीराज्यप्रशासनधुरमपि भवानेव सुदृढस्थूलसबलयोः स्कन्धयोर्वहतु।"

सन्देशमेतं समुपलभ्य परमप्रसन्नो हर्षभरसम्भृतचेताः मूर्खोऽसौ प्रचण्डवर्मा माहिष्मतीमागम्य राज्याधिकारिभिः सत्क्रियमाणो राजकीयातिथिशालायां तस्थौ। विविध-क्रीडाविलासव्यसनेषु मनो विनोदयन्नसौ विवाहशुभवेलां प्रत्यैक्षत। सांवत्सरिकाश्च तमसूचयन् -

"पञ्चमे दिवसे पूर्णिमातिथौ विवाहस्य शुभलग्नं विद्यते।"

अपरेद्युः मम परामर्शमनुमन्य वसुन्धरा निर्जने मन्त्रणागृहे वंशपरम्परागतान् स्वामिभक्तान् वृद्धमन्त्रिणः समाहूय प्रावोचत् -

"आर्याः ! रजन्यामद्य देवी विन्ध्यवायिनी स्वप्ने समागत्य मां निर्दिदेश, यत् तृतीये दिवसे प्रचण्डवर्मा स्वर्गस्य पथिको भविष्यति। तदनन्तरमन्येद्युस्तव सुतेन भास्करवर्मणा साकं कश्चिद् विप्रो मे मन्दिरप्राङ्गणे समेष्यति। तव सुतो न व्याघ्रेन भक्षितः। व्याघ्रेण निगृहीतमपि तमहं तव सुतं भास्करवर्माणं सुरक्षितमरक्षम्। सम्प्रति

विप्रोऽसौ तव सुतं राजसिंहासने प्रतिष्ठाप्य शासनधुरं वक्ष्यति। स एव द्विजन्मा मया तव सुतायै मञ्जुवादिन्यै वररूपेण निश्चितः।

आर्याः ! रहस्यानामेतेषां मया भवतां समक्षमुद्घाटनं विहितम्। यावदेतानि न सिध्यन्ति, तावद् भवद्भिर्गोपनीयं रहस्यमिदं रक्षणीयम्।"

सकलां योजनां निर्विशेषरूपेणाऽवबुध्य मया प्रेर्यमाणा देवी वसुन्धरा वृद्धैर्मन्त्रिभिः सार्द्धं देव्याः विन्ध्यवासिन्याः दर्शनेनाऽऽत्मानं कृतार्थयितुं मन्दिरं समायाता। देवीमभ्यर्च्याऽऽशीर्वादग्रहणव्याजेन मञ्जुवादिन्या सह वसुन्धरा ममाऽन्तिकं समायाता। तत्र माञ्च भास्करवर्माणञ्चाऽवलोक्य तस्याः मातुः पयोधरौ वात्सल्यभावेन पयःपूरितौ सञ्जातौ। मनश्च परमहर्षेण विह्वलत्वमवाप। परन्तु कथमपि मनसि समुद्गतान् भावान्नियम्य सा लोकव्यवहारान् परिपालयन्ती मे चरणयोः प्रणम्याऽगादीत् -

"भगवन् ! अनुग्रहणीयोऽयं दीनो जनः। भगवन्तमहं वारम्वारं प्रणमामि। मयि करुणां कृत्वा निशावलोकितस्वप्नरहस्यव्याख्यया मामनुगृह्णातु।"

अहमुदतरम् -

"देवि ! स्वप्न एष तव सत्यो भविष्यति। तृतीये दिवसेऽहं तव द्वारि भिक्षार्थमागमिष्यामि।"

हर्षपारावारनिमग्ना सा वसुन्धरा विनयभावेन मम चरणौ संस्पृश्य प्रावोचत् -

"यदीदृशमेवाऽस्ति, भवतश्चरणदासी वर्तेऽहम्। देव्याः प्रसादेन स्वपुत्रमहं प्राप्स्यामीत्यतोऽधिकं मे किं प्रापणीयम्।"

इत्येवं कथयित्वा प्रभूतं वस्त्राभरणसन्दोहमाहारजातञ्च मह्यमुपहृत्य सा वसुन्धरा गन्तुमुदतिष्ठत्। मञ्जुवादिन्याः नवविकसितेन यौवनमयेन सौन्दर्येण समावर्जितहृदयोऽहं तामेवैकाग्रदृशा विस्मृतनयनपक्ष्मनिमेषव्यापारः समीक्षाञ्चक्रे। सम्भवतः साऽपि मयि प्रणयभावैः प्रभाविताऽवर्तत। सतृष्णनयनाभ्यां मयि दृष्टिं व्यापार्य चरणयोश्च प्रणम्य सा जनन्या सह प्रतस्थे। मयाऽपि वसुन्धरादत्ता उपहारास्तत्रत्येषु समुपस्थितेषु जनेषु वितीर्णाः।

तृतीये दिवसेऽहञ्च भास्करवर्मा च कापालिकवेशधारिणौ भिक्षार्थमटमानौ राजकुलमुपजग्मतुः। मया तु विदितमेवाऽऽसीद् यदयं प्रचण्डवर्मा माहिष्मतीराज्यमात्मीयं वसुन्धरासुताञ्च मञ्जुवादिनीं निजपरिणीतामवगच्छन् नटनटीनां नृत्याभिनयेषु सङ्गीतेषु च मनो विनोदयति।

राजकुले देव्या वसुन्धरया प्रदत्तां भिक्षां सम्प्राप्याऽहं मञ्जुवादिन्याः स्नेहानुराग-दृष्टिभिरभिषिच्यमानः सञ्जातरोमोद्गमो भास्करवर्मणा सह राजप्रासादान्निर्गतः।

देव्या वसुमत्या विश्वस्तनृत्यकलाकौशलप्रमाणपत्रं राजकीयमुद्राङ्कितं भिक्षाव्याजेन मम भिक्षापात्रे प्रक्षिप्तम्। प्रत्यावर्तनसमये भद्रसेनो मामन्वगच्छत्।

राजप्रासादस्य पृष्ठतः प्रमदवने राजकीयमतिथिगृहमवर्तत। समीपस्था च मठिकाऽप्येका तत्राऽऽसीत्। दीर्घकालात्सा जनैरुपेक्षिता शून्याऽवर्तत। जनानां दृष्टीः परिहरन्तो वयं त्रयो मठिकां प्राविशाम। तत्र पोट्टलिकामुदघाट्य मया वेशपरिवर्तनसामग्री हस्ते कृत्वा नटनर्तकवेशः स्वीकृतः। नटवेशोऽहं भद्रसेनं सहायवेशेन सुसज्जीकृत्य भास्करवर्माणञ्च तथैव मठिकायां स्थातुमादिदेश। तदनन्तरमहं भद्रसेनश्चोभौ राजकीयमतिथिगृहं प्रति प्रस्थितौ। भास्करवर्मा मया निर्दिष्टो, यदसौ मठिकायामेव निभृतं निलीय तिष्ठन् ममाऽऽगमनं प्रतीक्षताम्।

भद्रसेनेन सहाऽहं राजकीयमतिथिगृहं परितोऽष्टहस्तोच्छ्रायेणोपरि च लोहमयदृढ-स्थूलतीक्ष्णाग्रकीलकचितेन प्राकारेण परिवेष्टितमुपागच्छम्। प्रवेशायैकमेव द्वारमवर्तत। तत्र द्वादश सुवीराः सुपुष्टाः सुशिक्षिताः भटाः प्रहरिणो नग्नचन्द्रहासानुत्तोलयन्तो गतागतं कुर्वन्ति स्म। तत्र प्रवेशस्ततो निर्गमनं वाऽपरिचितजनाय परिचयपत्र-रहितायाऽसम्भवमेवाऽऽसीत्।

नर्तकवेशेन विद्यमानं मां प्रहरिणां नायकोऽपृच्छत् –

"कुत्र गम्यते ?"

अहमपि भयरहितेन भावेनोदतरम् –

"मल्लिकार्जुनाभिधानोऽहं कलाकुशलो नर्तको देशदेशान्तरेषु परिभ्रमन्नृत्यकलां प्रदर्शयन् माहिष्मतीं समागतः। नृत्यकौशलेन महिषकाधिपतिं नरराजं प्रचण्डवर्माणं प्रीणयितुं देवी महाराज्ञी मामादिदेश।"

"राजकीयमुद्राङ्कितं परिचयपत्रमवलोक्य प्रहरिभिरहमन्तःप्रवेशायाऽनुमतः।"

भद्रसेनमहं सङ्केतितवान् –

"पश्चिमदिशि प्राकारपृष्ठदेशे स्थितो भवान् मां प्रतीक्षताम्।"

गते भद्रसेनेऽहमतिथिगृहप्राङ्गणं प्राविशम्।

प्राकारस्याऽभ्यन्तरे विशालोपवनस्य मध्ये दशहस्तविततो मार्गः प्रमुखभवनं गतोऽवर्तत। मार्गमभितस्तमालतरुपङ्क्तिः सुशोभिताऽऽसीत्। शुभ्रचतुष्कोणपाषाणजटितमार्गे प्रचलन्नहमतिथिगृहस्य विशालं सभाकक्षं प्राविशम्। अन्तःप्रविश्य मयाऽवलोकितम् –

महोत्सेधवत्यां वेदिकायां स्थितः प्रचण्डवर्मा मृदुतूलशयनं स्थूलपरिणाहोपबर्हाश्रयेणा-ऽर्धशयानो वर्तते। पञ्च शस्त्रधारिणो भटाः नग्नखड्गानुत्तोलयन्तः सभाकक्षे विभिन्नस्थितिषु सतर्काः सावधानाश्च तिष्ठन्ति। अनेके रसनिर्भरमानसाः सहृदयाः

सदस्याः प्रचण्डवर्मसमक्षं पीठिकासु समुपविष्टाः। नवयौवनसमुद्दीप्तकाये द्वे नर्तक्यौ मनोरमनृत्याभिनयेन दर्शकानां हृदयानि विनोदयतः। परिचयपत्रेण समाश्वस्ताः प्रहरिणो नृत्याभिनयप्रदर्शनेन प्रचण्डवर्माणं प्रीणयितुं मामन्वमन्यन्त।

विरामं गते नटीनृत्ये नृत्याय कृतसज्जेन मया विविधनृत्यमुद्राणां मयूरवृश्चिकसर्पहंसमत्स्यादिनृत्यानामभिनयः प्रदर्शितः। तमवलोक्य तत्रोपस्थिताः सर्वे जनाः दर्शकाः विस्मयानन्दमहासागरे निमग्नाः सञ्जाताः। तदनन्तरं विविधपशुपक्षिणां कुक्कुरशृगालसिंहकुररचातकहंसादीनां कण्ठरवानुकरणं मयाऽभिनीतम्। पुनश्च मेघरागगीतिकौशलेन प्रचण्डवर्षणभ्रान्तिमुत्पादयता मया प्रचण्डवर्मा तत्रोपस्थिता अन्ये च जनाः विस्मयविमूढाः विहिताः।

तस्मिन्नेवाऽवसरे नृत्यमुद्रायामग्रेसरन्नहमेकस्य सभासदः कटिसंलग्नच्छुरिकाच्छादनतो दीर्घां तीक्ष्णाग्रां छुरिकां गृहीत्वाऽनेकानि नृत्यकौशलानि प्रदर्शयन् छुरिकाग्रभागे वपुषो भारं धारयन् वक्रभावमभिनीतवान्। ततश्च विंशतिहस्तमितान्तरेण दूरवर्तिशयनमधिशयानस्य प्रचण्डवर्मणो हृदयस्थलमभिलक्ष्य सा छुरिका मया प्रबलशक्त्या वेगेन प्रक्षिप्ता। सा च तीक्ष्णाग्रा छुरिका त्सरुपर्यन्तं तस्य हृदयस्याऽन्तः प्रविष्टा।

तदनन्तरं त्वरितगत्या क्षणमपि न विलम्ब्य "वसन्तभानुः जीवतात् वर्षसहस्रमिति" तारस्वरेण सिंहगर्जनमुच्चार्य द्वाराभिमुखमधावम्। तत्र पञ्च शरसञ्चालनचतुराः शस्त्रधारिणो भटाः परिवारयितुं मां प्रायतन्त। परमतित्वरितगतिरहमेकस्य भटस्य चन्द्रहासमाच्छिद्य तेनैव तान् व्रणितान् विधाय सत्वरं सभाकक्षाद् बहिर्निर्गत्याऽतिथिगृहपृष्ठप्रदेशं समुत्प्लुत्य प्रापम्। पश्चिमदिशि प्राकारसमीपमेव महोत्सेधस्तमालतरुः शाखाभिः प्राकारभित्तिमतिक्रम्याऽतिष्ठत्। तत्राऽतिलम्बो वेणुरपि मया प्राप्तः।

वेणुमुत्थाप्य तमालतरुमारुह्य वंशाश्रयेण प्राकारमुल्लङ्घ्याऽहमपरपार्श्वे भूम्यामकूर्दे। तत्र भद्रसेनो मां प्रतीक्षमाणोऽवर्तत। तेन सह त्वरितगत्या मठिकां प्रविश्य पुनः कापालिकरूपं धृत्वा भास्करवर्मणा साकं श्मशानमागच्छम्। भद्रसेनोऽपि पूर्ववत् वेशपरिवर्तनं कृत्वा राजकुलं प्रयातः।

सकलेयं घटनाऽतित्वरितगत्या घटिता। यावत् प्रचण्डवर्मणो वधसमाचारो माहिष्मत्यां प्रासरत्, तावदेवाऽहं भास्करवर्मणा सह श्मशानभूमौ विन्ध्यवासिन्याः मन्दिरस्य प्राङ्गणं प्राविशम्। माहिष्मत्याः सैनिकैः सह प्रचण्डवर्मणो भटाः घातकस्याऽन्वेषणाय सर्वत्र भ्रमन्तो बहून् प्रयासानकुर्वन्, परं न कामपि सफलतामध्यगच्छन्।

महाराज्ञी वसुन्धरा महता राजकीयसमारोहेण सम्मानेन च प्रचण्डवर्मणोऽन्त्येष्टिसंस्कारं समादिश्य तस्याऽनुजस्य चण्डवर्मणोऽन्तिकं शोकसन्देशं प्राहिणोत्।

तत्रैषोऽपि समाचाराः प्रेषिताः, वसन्तभानुना षड्यन्त्रं विरच्य प्रचण्डवर्मा घातित इति।

यस्मिन् प्रकोष्ठे मम निवासोऽवर्तत, तस्य दक्षिणकोणात् सुरङ्गामेकां विन्ध्यवासिनी-मन्दिरं यावदहमखनम्। गर्भगृहे देव्याः भव्या प्रमिमाऽवर्तत। तस्या अधस्तादेवेयं सुरङ्गा निर्गता। प्रतिमामेकतोऽपसार्य सुरङ्गामार्गेण गर्भगृहप्रवेशप्रबन्धो विहितः। अस्माभिः संयोजितां योजनामनुसृत्य देव्या वसुन्धरया मन्त्रिभिरन्यैश्च राजकर्मचारिभिः सहाऽन्येद्युः मन्दिरे पूजार्थमागन्तव्यमासीत्।

प्रभाते समुदिते बालभास्करे महता समारोहेण वसुन्धरा देवी मन्दिरस्य गर्भगृहं प्रविष्टा देवीपूजनं समापादयत्। तदनन्तरं मधुरेणोच्चस्वरेण देवीं प्रार्थयामास –

"सकलजगज्जननी देवी त्वमसि। हे देवि ! त्वया मम सुतो भास्करवर्मा मह्यं प्रदेयः।"

तदनन्तरं सा गर्भगृहाद् बहिरागत्य मन्दिरकपाटान् सम्मुद्र्य सुतस्याऽऽगमनं प्रतीक्षाञ्चक्रे। सवैर्जनैः पूर्वमेव निरीक्षितमासीद् यन्न कोऽपि जनो गर्भगृहेऽवर्तत। वसुन्धराया आदेशेन तूर्यभेरीमृदङ्गादीनि वाद्यानि तुमुलस्वरेणाऽभ्यहन्यन्त।

निशीथिन्यां गोपनीयभावेन महार्घाणि रत्नजटितानि वस्त्राभूषणानि प्रसाधनानि च राजपुरुषोचितानि विप्रजनोचितानि च सा भास्करवर्मजननी प्राहिणोत्। भास्करवर्माणं राजसुतोचितवस्त्राभूषणैः प्रसाधनैश्च प्रसाध्य मया निजवपुः कर्मकाण्डसम्पादक-विप्रजनोचितवस्त्रैः प्रसाधितम्। तदनन्तरं देवीनामाङ्कितमुत्तरीयमहं प्रावृणवम्।

वाद्यध्वनिश्रवणेन मया सुरङ्गामार्गेण प्रविष्टेनाऽनुमितम् –"बहिरागत्य स्वात्मनः प्रकटीभवनस्य समयः समायात इति।"

सुरङ्गायां संस्थितेन मया प्रतिमाधो विद्यमानेन शिरसा हस्ताभ्याञ्च देवीमूर्ति-रुपरिकृत्याऽपसारिता। बहुभारवती पञ्चभिः पुरुषैरपि समुत्थापयितुमशक्या साऽवर्तत। अतः प्रतिमामार्गेण कश्चिदागमिष्यतीति सम्भावना न सम्भवाऽऽसीत्।

गर्भगृहं प्रविश्य देवीप्रतिमाञ्च पुनस्तथैव पूर्ववत् संस्थाप्य मया शनैः गर्भगृहस्य कपाटान्युद्घाटितानि। ततश्च बहिरागत्य भास्करवर्मसहितमात्मानं प्रकटीकृत्य सोपानपङ्क्तिषु गभीरभावेनाऽहमतिष्ठम्।

विस्मयकारिणीमघटनीयां घटनामिमामवलोक्याऽविश्वसनीयामपि प्रत्यक्षं समुपस्थितां तत्र समवेताः सर्वे जनाः महोत्सवमेव तं मन्यमानाः प्रसादहर्षभरसम्भृतहृदया रोमाञ्चिता अभवन्। नृत्यगीतैस्ते चित्तगतोल्लासान् प्रकटितवन्तः। अभिहन्यमानानां वाद्यानां ध्वनीनपि भेदयद्भिर्जनानां जयघोषणैर्व्योमाऽपि निनादितम्। विन्ध्यवासिनीदेव्याः,

देव्याः वसुन्धरायाः, भास्करवर्मणो मम व विप्ररूपधारिणो जयजयकारशब्दाः प्रावर्तन्त।

गाम्भीर्यं वदने दधानः परमाशीर्वादमुद्रया दक्षिणं करमुत्थाप्याऽहं सर्वान् प्रशान्त-शब्दानकरवम्। प्रशान्ततां गते च कोलाहले स्निग्धमन्द्रस्वरेणाऽहमबोधयम् -

"माहिष्मतीनगरनिवासिनो जनाः ! मद्द्वारेण देवी विन्ध्यवासिनी सर्वान् युष्मानादिशति -

भास्करवर्माऽयं सुतवन्मे प्रियः। वनेषु व्याघ्रेणाऽऽक्रान्तस्याऽस्य मया महता प्रयासेन रक्षा विहिता। अद्य लोकहितायाऽहं पुत्रमिमं भवद्भ्यः समर्पयामि। मातृपक्षमति-सम्मानार्हमादरणीयं मत्वा भवद्भिरयं समादरणीयः।"

"अथ च विश्रुतनाम्ना प्रसिद्धोऽहं ब्राह्मणोऽस्य राजपुत्रस्य संरक्षको नियुक्तः। पराक्रमशाली बुद्धिमान्नयज्ञश्चाऽहं निश्चयेन तं दुर्वृत्तं वसन्तभानुं निहत्य बालकमेनं विदर्भराजसिंहासने प्रतिष्ठापयिष्यामि। अधमप्रकृतिः कुचक्ररचयिता षड्यन्त्रकारी नृशंसोऽसावश्मकेन्द्रो वसन्तभानुर्वधदण्डयोग्यः। राजपुत्रसंरक्षकभृतिरूपेणाऽहं द्विजो राजसुतायाः मञ्जुवादिन्याः पाणिग्रहणं करिष्यामि। न केनाऽप्यत्र काऽपि शङ्का करणीया। संशयात्मा नूनं विनङ्क्ष्यति।"

ममैतानि वचनानि निशम्य माहिष्मतीनागरिकजनास्तालीर्वादयन्तो हर्षध्वनिभिर्मे वचनानां समर्थनमनुमोदनञ्चाऽकुर्वन्। तेऽवोचन् -

"धन्यमिदं विदर्भराजकुलं येन देव्यास्तथाविधा कृपाऽधिगता। भास्करवर्मणो राजसुतस्य रक्षां विधाय देव्या भवत्सदृशः संरक्षकोऽपि नियुक्तः।"

तस्तिन्नेव सायंकाले मञ्जुवादिनीमहमुदवहम्। विवाहसंस्कारसमये रूपेण त्रिभुवनमहिलासंहतिसौन्दर्यतिरस्कारिण्याः राजसुतायाः करपल्लवसंस्पर्शेण रोमाञ्चितवपुषो मम हृदयगतिरतितरां वृद्धिमुपागता।

तस्यामेव रजन्यां मया मन्दिरप्राङ्गणप्रकोष्ठदक्षिणकोणादारभ्य गर्भगृहं यावन्निर्मिता सुरङ्गा सम्मुद्रिता। सकला च भूमिः पूर्ववत्समतला संस्कारिता प्रसाधिता च। माहिष्मत्याः नागरिका राज्याधिकारिणश्च भास्करवर्माणं देव्याः सुतं जानन्तो देवीप्रसादाच्च मां प्रभावशालिनं विदुः। तेषां सम्मानास्पदं स्नेहपात्रञ्चाऽहं राज्यकार्याणि सम्यक् समचालयम्। ममाऽऽदेशाः हर्षभरैः सर्वैः पाल्यन्ते स्म। सर्वतोऽस्माकं यशः प्रसृतम्।

शुभनक्षत्रतिथिलग्नादिकं विचार्य गणनां कृत्वा राजकुमारस्याऽध्ययनप्रबन्धो मया विहितः। उपनयनसंस्कारेण सह विविधविद्यापारङ्गताः शिक्षकाः नियुक्ताः। दण्डनीतिशिक्षणस्य विशेषः प्रबन्धो विहितः। तच्छिक्षणेऽहं विशेषेणाऽऽग्रही बभूव।

मम दण्डनीतिविषयकाः केचन उपदेशा एवमभवन् -

"राज्यशासनसञ्चालनाय तिस्रः शक्तयो भवन्ति - प्रभुशक्तिः मन्त्रशक्तिरुत्साह-शक्तिश्च। तिस्रः शक्तयः परस्परं समन्विताः सुसम्बद्धाः राज्यं रक्षन्ति समुन्नयन्ति च। मन्त्रशक्त्या राजकार्येषु सत्यं तथ्यञ्च निर्णीयते। प्रभुशक्त्या कार्याणि प्रारभ्यन्ते। उत्साहशक्तिश्च कार्याणि सम्पादयति।

राजकार्याणां सम्पादनाय पार्थिवेन राजनयस्याऽध्ययनं ध्रुवं करणीयम्। राजनय-सिद्धान्तानामध्ययनेन सह व्यावहारिकोपयोगज्ञानमप्यनिवार्यम्। शासनतन्त्रसञ्चालनाय राज्यस्य रक्षणाय प्रजानाञ्च पालनाय निम्नाङ्कितततत्त्वानामध्ययनं प्रयोगज्ञानञ्च करणीयम् -

**विद्याः** - अध्ययनाय चतस्रो विद्याः भवन्ति - त्रयी, वार्ता, आन्वीक्षिकी दण्डनीतिश्च।

**राज्ञे चिन्तनीयकर्माणि** - अष्टविधानि कर्माणि, पञ्चवर्गः, अनुरागापरागौ, राजमण्डलस्य च प्रचारः।

**राज्यस्य सप्ताङ्गानि** - स्वाम्यमात्यकोषदण्डमित्रजनपदपुराणि।

**मन्त्रपञ्चाङ्गानि** - सहायः साधनमुपायो देशकालविभागो विपत्प्रतीकारश्च।,

**प्रभावौ** - अर्थानां पुरुषाणाञ्च समृद्धिः।

**उपायाः** - सामदानभेददण्डाः। केचन दण्डनीतिविशारदाः मायोपेक्षेन्द्रजालानपि त्रीनुपायान् वर्णयन्ति।

**षाड्गुण्यम्** - सन्धिः विग्रहो, यानमासनं, संश्रयो, द्वैधीभावश्च।

**प्रकृतयः** - द्वासप्ततिसंख्याः प्रकृतयो भवन्ति -

(क) **मूलप्रकृतयः** - १. मध्यमः, २. विजिगीषुः, ३. उदासीनः, ४. शत्रुश्च।

(ख) **शाखाप्रकृतयः** - ५. मित्रम्, ६. अरिमित्रम्, ६. मित्रमित्रम्, ८. अरिमित्रमित्रम्, ९. पार्ष्णिग्राहः, १०. आक्रन्दः, ११. पार्ष्णिग्राहासारः, १२. आक्रन्दासारः।

(ग) **द्रव्यप्रकृतयः** - १. अमात्यः, २. राष्ट्रम्, ३. मित्रम्, ४. कोषः, ५. दण्डश्च।

द्रव्यप्रकृतीनामेकैकस्य पृथक् पृथक् द्वादश मूलशाखाप्रकृतयः सम्मिलित्य षष्टि (१२×५=६०) प्रकृतयो भवन्ति। द्वादश मूलप्रकृतयः शाखाप्रकृतयश्च शुद्धरूपेणाऽपि भवन्ति। एवञ्च प्रकृतीनां संख्या द्वासप्ततिः (६०+१२=७२) वर्तते। परं षट् सन्धयः षडङ्गान्यपि राजशास्त्रे प्रकृतयः कथ्यन्ते।

**तिस्रः शक्तयः** - प्रभावमन्त्रोत्साहाः।

**त्रिवर्गः** - धर्मार्थकामाः।

**त्रिविधं नीतिशास्त्रम्** - ऐहिकमामुष्मिकमैहिकामुष्मिकमिति।

**त्रिविधं प्रशासनम्** - राजायत्तं, सचिवायत्तमुभयायत्तञ्च।

**तिस्रः सिद्धयः** - प्रभुसिद्धिरमात्यसिद्धिरुभयसिद्धिश्च।

राजनयस्य सिद्धान्तानिमानन्यानि च तत्त्वान्यधीत्य प्रयोगे च व्यवहृत्य नरपतिरनुपमामनभिभवनीयां शक्तिं लभते। सुखसमृद्धिरूपिणीञ्च सिद्धिमाप्नोति।

शासनतन्त्रसञ्चालनार्थं बहवो विभागाः संयोज्यन्ते। तत्र च विश्वस्तानां स्वामिभक्तानां पदयोग्यानाञ्चाऽधिकारिणां नियुक्तिर्विधीयते।"

एवं संरक्षकभावे स्थितोऽहं भास्करवर्माणं राजनयशास्त्रोपदेशैः शासनसञ्चालन-योग्यतासम्पन्नं व्यदधाम्। मया विचारितम् -

"राज्येऽस्मिन् विश्वासपात्राणां सहायकानामन्वेषणं कृत्वा तेषां सञ्चयः करणीयः। मित्रवर्मणः सचिव आर्यकेतुः कोशलजनपदवास्तव्यः स्वामिभक्तो बुद्धिमान् नीतिज्ञो महोत्साहवांश्च वर्तते। वसुन्धरायाः पितृगृहनिवासिनस्तस्य हृदये महिषीं प्रति हितभावना स्वाभाविकरूपेण वर्तिष्यते। आर्यकेतोः मन्त्रणामुपेक्षमाण एव मित्रवर्मा विनष्टः। तथाऽपि तस्याऽऽर्यकेतोः परीक्षा गुप्तरूपेण कर्तव्या। यद्यसौ विश्वसनीय उपधा-विशुद्धश्च सिध्यति, मन्त्रिपदे नियोजनीयः।"

तदाऽहं भद्रसेनमेकान्ते समाहूय प्रावोचम् -

"आर्य ! भवताऽऽर्यकेतोर्मनोभावाः सुगुप्तरूपेणाऽभिज्ञेयाः। विजने भवांस्तमेवं कथयतु-

मन्त्रिश्रेष्ठ ! देव्याः वसुन्धरायाः पार्थिवस्य भास्करवर्मणश्च कपटपक्षपाती विश्वासमापन्नोऽयं दुर्वृत्तो जनो न जाने कुतः समायातः ? सर्वे राज्याधिकारा अनेन स्वहस्तगताः कृताः। मृदुलसरलस्वभावा राजमाताऽस्मिन् परमविश्वासमापन्ना वर्तते। पार्थिवो भास्करवर्माऽस्य परामर्शेणैव सकलानि कार्याणि करोति। न जानेऽस्माकं राज्यस्य कीदृश्यवस्था भविष्यति ? कदाचित् सकलं शासनतन्त्रमधिकृत्याऽयं जनः स्वयमेव पार्थिवो भवेत् ? अहं तु सम्भावयामि, अजगरसरीसृपोऽयं सर्वानिवाऽस्मान् निगरिष्यति।"

कथिते भवति तादृशे व्यवहारे, आर्यकेतुनोदीरितमुत्तरं मे कथनीयम्।"

भद्रसेनेन मम वचनान्यनुसृत्याऽऽर्यकेतोः मनोभावानां परीक्षा कृता। आगत्याऽसौ मामवादीत् -

"आर्य ! विविधैरुपायैर्मधुरवार्ताभिर्बहुविधप्रकारैरुपहारैरार्यकेतोर्मनसि विश्वासमुत्पाद्य भवदुपदिष्टमार्गेण मयाऽसावार्यकेतुः परीक्षितः । मनसि स्थिताश्च तस्य भावाः विज्ञाताः । भवति विश्वासं प्रकटयन्नसावेवंविधानुद्गारान् प्रकटयामास -

"भद्र ! भवता नैवं कथनीयम्। देव्याः वसुन्धरायाः पार्थिवस्य भास्करवर्मणश्च सहायकोऽयं विश्रुतो नाम विप्रो महागुणशाली वर्तते। उच्चवंशजातोऽयं प्रतिभाति। अप्रतिमो बुद्धिशाली, अलौकिकशक्तिसम्पन्नः पराक्रमी नीतिज्ञ उदारस्वभावश्चाऽयं शस्त्राणां सञ्चालने चमूनाञ्च नेतृत्वेऽनुपमां योग्यतां बिभर्ति। बहुविधशिल्पेष्वयं कुशलः । सदयोऽप्ययं तेजस्वितां धत्ते। अस्य वीरत्वदृढत्वोत्साहगुणानां सम्मुखे शत्रवो न स्थातुं शक्नुवन्ति। शत्रूणामेष साक्षात्कालः कृपापात्राणाञ्च परित्राता मनःकामनानाञ्च पूरकः । ध्रुवमेवाऽसौ वसन्तभानुमश्मकजनपदाधिपतिं पराजित्य भास्करवर्माणं विदर्भाधिपतिं कृत्वा भोजवंशगौरवं पुनः प्रतिष्ठापयिष्यति। नास्त्यत्र कश्चित् सन्देहः ।"

भद्रसेनकथितानि तानि तथ्यानि विज्ञायाऽन्योपायैश्च विविधैस्तं परीक्ष्योपधाविशुद्धमार्यकेतुमहं प्रमुखसहायकपदे न्ययुजम्। विशेषाधिकारसम्पन्नोऽसौ सचिवपदे नियुक्तः ।

अथाऽऽर्यकेतोः परामर्शेण साहाय्येन च मया विरोधिन उत्खाताः, विश्वसनीयाश्च राजकर्मचारिणः पदेषु योग्येषु नियुक्ताः । राज्यप्रशासनतन्त्रं सम्यङ् नियम्य प्रचुरकोषञ्च सञ्चित्य मया प्रबला सेना सङ्घटिता। एवञ्च स्वामिभक्तानां बुद्धिमतां मन्त्रिणां नीतिशक्तिमतां राज्याधिकारिणां, प्रभूतस्य कोषसङ्ग्रहस्य, प्रबलस्य च सैन्यस्य सामर्थ्येन तन्माहिष्मतीराज्यं सबलं समृद्धञ्च सञ्जातम्।

माहिष्मतीशासनतन्त्रं सुव्यवस्थितं सुसङ्घटितं सबलं शत्रुभिरभेद्यञ्च विधायाऽहं विदर्भान् प्रति दत्तावधानोऽभवम्। सम्प्रति माहिष्मत्यां मम प्रभावोऽप्रतिहतो बभूव। राजा, राजकर्मचारिणश्च प्रजाजनाश्च मय्यनुरक्ताः सन्तो मम सङ्केतेनैव जन्मभूमिहिताय प्राणोत्सर्गेभ्योऽपि सन्नद्धा अवर्तन्त। कोषागारेषु प्रचुरः समुचितो धनराशिरवर्तत। अतः प्रभूतव्ययेऽपि न काऽपि हानिः सम्भवाऽऽसीत्। सुसङ्घटितमनुशासितं शिक्षितञ्च सैन्यं दशगुणामपि शत्रुचमूं पराजेतुं समर्थं बभूव। साम्प्रतं वसन्तभानोरश्मकाधिपस्य सैन्यस्याऽपेक्षया नाऽस्माकं चमूः कथमपि न्यूना हीनगुणा वाऽवर्तत।

लोके प्रसिद्धिरीदृशी सञ्चचार -

"पार्थिवो भास्करवर्मा भवान्याः वरदपुत्रो विश्रुतश्च तस्य सहायकः । दिव्यसाहाय्यमुपलभ्य सामर्थ्यशालिनी माहिष्मतीसेना न सामान्यसेनेव पराजेतुं शक्यते।

समुपलब्धदैवबलोऽयं भास्करवर्मा वसन्तभानुमश्मकेन्द्रं पराजित्य वैरनिर्यातनं कृत्वा पितुरनन्तवर्मणो राज्यं पुनरधिकरिष्यति। दैवबलं मानवबलाद् बलवत्तरम्।"

एवञ्चान्तःशक्तिसम्पन्नोऽहं वसन्तभानुमाक्रान्तुं दत्तावधानोऽभवम्।

पूर्वं तावन्मया गूढचाराः विदर्भेभ्यः प्रहिताः। विदर्भवासिनः प्रथममेव वसन्तभानुं प्रति दुर्मनायमाना आसन्। परन्त्वनन्तवर्मणि दिवं प्रयाते कस्यचिद् योग्यस्य नायकस्याऽभावे प्रतिकर्तुमसमर्था एव ते समभूवन्। तत्र मया किम्वदन्ती प्रसारिता –

"अनन्तवर्मसुतो भास्करवर्मा जीवति। असौ शक्तिसम्पन्नो नीतिज्ञश्च वर्तते। सम्प्राप्तदैवबलसहायश्चाऽस्ति। स्वल्पेनैव कालेनाऽसौ वसन्तभानुं पराजित्य पितापितामहसम्प्राप्तान् विदर्भानधिकरिष्यति।"

तदनन्तरं विदर्भाणां मन्त्रिणो राजकर्मचारिणः पौराः जानपदाश्चाऽपि मया देशभक्तिप्रचारैरुपहारादिभिश्च भास्करवर्मपक्षपातिनो विहिताः। अश्मकेन्द्रस्य विश्वसनीया अपि सेवकाः कर्मचारिणश्च भाययित्वा धनाद्युपहारैश्च स्वपक्षतामानीताः। सर्वे ते विश्वासमापन्नाः यद् वसन्तभानोः पराजयोऽवश्यम्भावी। भास्करवर्मा विदर्भानधिकरिष्यति। समराङ्गणे तत्प्रतिपक्षगतो वीरो यमलोकपथिको भविष्यति। अतो वसन्तभानोः पक्षग्रहणं मूर्खता जीवननाशहेतुरेव।

वसन्तभानुरपि गूढपुरुषसाहाय्येनाऽजानात् –

"विदर्भजनपदराज्याधिकारिणः प्रजाजनाश्च तं विरुन्धन्ति। अनन्तवर्मसुतञ्च भास्करवर्माणं विदर्भराजसिंहासनस्थमिच्छन्ति। तस्याऽन्तरङ्गताङ्गताः विश्वस्ता अपि कर्मचारिणो विपरीतभावैराक्रान्ताः। तस्य सैन्यस्याऽनुशासनमपि शिथिलतामुपयाति।"

अथाऽमात्यैर्मन्त्रिभिश्च परामृश्याऽसौ निश्चिकाय –

"भास्करवर्मणा सह युद्धमनिवार्यम्। अतः प्रथममेवाऽपूर्णबलो भास्करवर्माऽऽक्रम्य विनाशनीयः। एवं तस्मिन्निभृतं निष्क्रिये स्थिते शत्रवस्तस्य गृहे छिद्राणि समुत्पाद्य विश्वस्तानपि सहायकान् लोभेन वा भयेन वा स्वपक्षपातिनो विधास्यन्ति। तथाविधासु स्थितिषु राज्यरक्षा न कथमपि सम्भवा। अतो विपरीतपरिस्थितिषु विपदामागमनात् पूर्वमेव प्रतिकरणीयम्। माहिष्मतीं प्रत्यभियानमेव समुचितम्।"

इति विचार्याऽसौ जडमती राजनयानभिज्ञो वसन्तभानुरसङ्ख्यबलेन चतुरङ्गसैन्येन सह माहिष्मतीं प्रति प्रतस्थे। नर्मदायाः दक्षिणतीरे तेन सैन्यशिविरं स्थापितम्। मिथ्यादोषारोपणैरसौ माहिष्मतीमपहर्तुमियेष। अपरेद्युस्तेनाऽऽक्रमणं निश्चितम्।

इतोऽस्माकं गूढपुरुषाः सर्वान् वसन्तभानुकृतप्रयासान् विज्ञाय तस्य हृदयान्तर्गताभिप्रायानन्विष्य समाचारान् प्रतिक्षणं प्रेषयामासुः। अहमपि युद्धाय कृतनिश्चयो वर्ते।

अस्माकं सैन्यबलं कस्यैचिदपि विपत्त्यै सुसन्नद्धमासीत्।

भास्करवर्मणा सह सैन्यबलसहायोऽहं नर्मदामुल्लङ्घ्य दक्षिणतीरभुवमागच्छम्। तत्र विशाले समरक्षेत्रे परस्परं सम्मुखं स्थिता: युद्धायोत्सुका: वीरा: स्वामिनो हिताय प्राणानपि तृणाय मन्यमाना: नायकानां सङ्केतानि प्रतीक्षाञ्चक्रिरे।

तस्मिन् क्षणे वसन्तभानोरनीकिनीं युद्धोन्मादग्रस्तां व्यूहबद्धामवलोक्य भास्करवर्माऽश्वारूढो वसन्तभानुसैन्यं प्रति कोषात् खड्गमाकृष्ययैकाकी अभिजगाम। अहमप्यवसरज्ञस्तमन्वगच्छम्। वसन्तभानो: सैनिकैर्ज्ञातम् -

"सम्प्राप्तदैवबलोऽयं भास्करवर्मा विन्ध्यवासिनीदेव्या आशीर्वादैर्निर्भय: सन् विनैव सैन्यबलमस्मान् निहन्तुं समागच्छति।"

इति चित्रलिखिता इव ते स्थिरं तस्थु:।

अथाऽग्रेसरीभूय वसन्तभानुसमक्षमागत्य खड्गमाकृष्य युद्धाह्वानं कुर्वन्नहं तं दुराचारिणमकथयम् -

"निकृष्टचरित हे वसन्तभानो ! किमर्थमेतान् वराकान् सैनिकान् मृत्युमुखपतितान् विधातुमिच्छसि ? यदि त्वमात्मानं वीरं युद्धनिपुणं साहससम्पन्नं वा जानासि, अग्रेसरीभूय मां युद्धस्व।"

वसन्तभानुरपि युद्धाह्वानमेतदसहमानो रोषाक्रान्तचित्तोऽग्रेसरीभूय खड्गमुत्तोल्य मामभ्यक्रामत्। परन्त्वसियुद्धे निपुणतमोऽहं स्वभावेन दक्ष आसम्। वसन्तभानो: प्रबलमाक्रमणं मया घोटकमेकतोऽपसार्य विफलीकृतम्। विफलीभूते च वसन्तभानो: खड्गप्रहारे संवर्धनावसरं तस्मै न दत्त्वा मया दक्षिणकरे सुदीर्घं तीक्ष्णधारं खड्गमुत्तोल्य तथा प्रहृतं यथाऽसौ खड्गो वसन्तभानोर्दक्षिणसकन्धं प्राविशत्। स चाऽनन्तवर्म-निहन्ताऽश्मकेश्वर: स्कन्धादुदरपर्यन्तं द्विधा विभक्तकाय: शोणितधारां प्रवाहयन् भूमौ न्यपतत्। क्षणं द्विधाभूतं शरीरं स्पन्दित्वा चेतनाविरहितं भूत्वा प्रशान्ततामुपगम्य निश्चलं निष्पन्दञ्च स्थितम्।

तदनन्तरं वसन्तभानोर्वधेन किंकर्तव्यविमूढं प्रतिपक्षसैन्यं समवबोधयन्नहं तारस्वरेण प्रावोचम् -

"वीरा: भटा: ! यदि युष्मासु कश्चिदात्मामानं वीरम्मन्यमानो युद्धमेवाऽभिलषति मम समक्षमागत्य युद्धं करोतु। अन्यथा यूयं सर्वे महाराजस्य भास्करवर्मण: सेवां स्वीकृत्य तस्य चरणयोर्विनीतभावेन प्रणम्याऽऽधीनतामङ्गीकुरुत। युष्मभ्यं क्षमां वितीर्याऽस्मत्स्वामी पूर्ववदधिकारपदैराजीविकाधनैश्चाऽनुग्रहीष्यति। सर्वे यूयं सुखेन जीविष्यथ। विपरीताचरणे वधदण्डभागिनो भूत्वा स्वर्गयात्रां करिष्यथ। प्रतिपदं वा

प्रतिहन्यमाना इतस्ततो भ्रमिष्यथ।"

मम वचनानि श्रुत्वा समाश्वस्तहृदयाः वसन्तभानोः सेनानायकाः मन्त्रिणः प्रमुखाश्च राजकर्मचारिणो निजवाहनेभ्योऽवतीर्य महाराजभास्करवर्मणः सेवामङ्गीचक्रुः। चरणयोः प्रणम्य ते पराजयं स्वीकृत्य भास्करवर्मणः पारवश्यतामुपगताः।

तदनन्तरं विदर्भनगरं गत्वा भास्करवर्माणं ससमारोहं पौरैः जानपदैश्चाऽभिनन्द्यमानं पितृपरम्परागते राजसिंहासने प्रत्यष्ठापयम्। तत्र कुलपरम्परागतान् स्वामिभक्तान् पदयोग्यान् कर्मचारिणो नियुज्य प्रशासनतन्त्रं सुस्थिरञ्चकार। माहिष्मत्यामश्मकेषु च सुयोग्यान् प्रान्तपतीन् सम्प्रेष्य तत्रस्थं शासनतन्त्रमपि सुदृढमकरवम्।

एवं सर्वस्य साम्राज्यस्य शासनव्यवस्थां सुव्यवस्थितां विधाय प्रजाजनांश्च समाश्वास्य विविधविलासानन्दनिर्भराः वयं दिनानि गमयामः स्म। मञ्जुवादिनी वसुन्धरासुता परमानन्दमनुभवति स्म।

कार्तिकमासस्य कृष्णपक्षस्य चतुर्दशी समीपमायाता। सर्वेषां कुमाराणां महाकालमन्दिरे सम्मिलनमुज्जयिन्यां सुनिश्चितमासीत्। तत्र द्वादश मासानां कार्यविवरणं विवेच्य भविष्यत्कार्यक्रमोऽपि निर्धारणीयः। एकादश मासाः व्यतीताः। मासस्यैकस्याऽवधिर-वशिष्टः।

एकस्मिन् दिवसे परिवारस्य सर्वे सदस्याः राजमाता वसुन्धरा, महाराजो भास्करवर्मा, मञ्जुवादिनी चाऽहमपि च परस्परं सम्मिलिताः परिहासवार्तासु हर्षमनुभवन्तः समुपाविशाम। देवीं वसुन्धरामहमवोचम् -

"मातः ! कार्यमेकं मया प्रारब्धमासीत्। यावत्तत्कार्यं न सिध्यति, तावन्ममैकस्मिन् स्थाने स्थितिर्न स्थिरा। अतः कार्यसिद्ध्यै मया गन्तव्यमेव। यावदहं न निवर्ते, तावद् भवत्याः दुहिता मे सहधर्मिणी अत्रैव विदर्भनगरराजप्रासादे निवत्स्यति। कतिपयदिवसान् दिक्षु सर्वासु भ्रान्त्वा कार्यं साधयित्वा पुनरागत्य भवदन्तिकं समागमिष्यामि।"

मदीयं कथनं निशम्य सर्वेऽपि परिवारसदस्याः स्तब्धचित्ताः विह्वलहृदयाः सञ्जाताः। महाराजो भास्करवर्मा प्रावोचत् -

"भ्रातः ! अस्माकं राज्याधिगमस्य समुदयस्य च भवानेवैको हेतुः। भवतोऽनुपस्थित्यां न वयं क्षणमपि राज्यप्रशासनभारवहने समर्थाः। अतो भवता न कुत्रचिदपि गन्तव्यमत्रैव च स्थेयम्।"

परमहं तं बालकं राजानं भास्करवर्माणं समाश्वास्याऽवोचम् -

"भ्रातः ! न भवता काऽपि चिन्ता करणीया। तादृशी विचिकित्सा न वर्तते। मया तथा व्यवस्था सम्पादिता प्रबन्धश्च विहितो, यथा ममाऽनुपस्थित्यामपि सर्वाणि राजकार्याणि

सुव्यवस्थितरूपेण सञ्चालितानि भविष्यन्ति। अयमार्यकेतुः भवतां मन्त्री साक्षाद् बृहस्पतिरेवाऽवतीर्णो राजनयनिष्णातो वर्तते। शासनधुरो वहने राज्यसंरक्षणे चाऽयं सर्वथा समर्थः। अहमपि स्वकार्यं साधयित्वा शीघ्रं समागमिष्यामि।

परं मम कथनेन वसुन्धरा देवी न समाश्वासनमवाप। महाराजेन भास्करवर्मणाऽपि च न धैर्यं धृतम्। अश्मकानां माहिष्मत्याश्च शासनप्रबन्धेन सह सा मह्यं राजपदं समुद्घोष्य मम प्रस्थाननिवारणस्य प्रयासमकरोत्। कतिपयदिनं तथैवाऽस्माकमवस्थितिर्व्यवस्थिता। भाविविरहाशङ्कया सम्पीडितहृदया मञ्जुवादिनी विप्रलब्धेव नयनाभ्यामश्रूणि प्रवाहयन्ती करुणां दृष्टिं मयि व्यापारितवती। पञ्चदशानां दिवसानामवधिर्मया स्वीकृतः।

इति निजचरितं श्रावयन् विश्रुतः क्षणं विरम्य पुना राजवाहनमुवाच -

"कुमार ! अथ माहिष्मत्या अश्मकानाञ्च शासनप्रबन्धं स्थिरीकृत्य प्रजासु सुव्यवस्थामापाद्य मया भवदन्वेषणाय मालवजनपदेषूज्जयिनीगमनकार्यक्रमः सुनिश्चितः। परं तेष्वेव दिवसेषु सिंहवर्मणोऽङ्गराजस्य चराः स्वस्वामिने साहाय्यं याचमाना विदर्भनगरे समुपस्थिताः। सकलं वृत्तान्तं समाकर्ण्य मालवजनपदशासकस्य चण्डवर्मणो हननं कार्यमेवाऽस्माकं मन्यमानोऽहमत्र समायातः। पूर्वजन्मकृतकर्मणां प्रभावैरेव मया भवद्दर्शनसौभाग्यमधिगतम्।"

विश्रुतस्य चरितं निशम्य राजवाहनः कुमारस्तस्य साहसं शौर्यं दण्डनीतिनिपुणत्वं शासनसञ्चालनदाक्ष्यञ्चाऽऽन्तरिकहृदयेन भृशं प्रशशंस। तदनन्तरं बहुसमयं ते सर्वे तत्र विद्यमाना वयस्याः भाविकार्यक्रमरेखां व्यचारयन्। अन्ततस्ते गहनविचारविमर्शं मन्त्रणाञ्च विधाय कार्यक्रममेवं निर्धारयामासुः -

"प्रथमं तावदवन्तीषूज्जयिनी विजेतव्या। तदनन्तरं ते सर्वे विन्ध्यवने महाराजराजहंसस्य सेवायां समुपस्थास्यन्ति। अथ मगधेषु कुसुमपुरमधिकृत्य महाराजस्य राजहंसस्य चरणौ सेविष्यन्ते। पुनस्तं मगधराजसिंहासनस्थं विधास्यन्ति।" चम्पेश्वरः सिंहवर्मा चाऽपि सम्पूर्णहृदयेन सह सहयोगाय वचनबद्धो बभूव।

# चतुर्दशी-पीठिका

## अवन्तिविजयः

# चतुर्दशी-पीठिका

## अवन्तिविजयः

राजवाहनस्य कुमारस्याऽऽदेशेन चम्पाधीश्वरः सिंहवर्मा कुमाराणां कुशलमङ्गल-समाचाराणां प्रेषणाय सन्देशहरान् विन्ध्याण्ये महाराजराजहंसं निकषा प्राहिणोत्। मगधाधिपशिविरात् प्रस्थितानां कुमाराणां हायनस्यैकस्याऽवधिर्व्यतीयाय। मागधी चमूर्मार्गमध्यादेव शिविरं प्रत्यावर्तत। अतः कुमाराणां समाचारान् ज्ञातुं महाराजस्य चिन्ता वा व्यग्रता वा विकलता वा स्वाभाविकी। अङ्गराजस्य दूतेभ्यः कुमाराणां शुभमङ्गलसमाचारानवगम्य परमप्रसन्नेन समाश्वस्तेन च महाराजेन मगधाधिपेन समादिष्टम् -

"अवन्तीं विजित्योज्जयिनीमधिकृत्य कुमारा अविलम्बमागत्य मातुर्वसुमत्याश्चरणयोः प्रणमन्तु। दीर्घसमयेन कुमाराणामदर्शनेन साऽन्तःकरणे दूयते।"

इतश्चम्पायां वाहिनीनामवन्तिजनपदं प्रति प्रयाणाय सज्जीभवितुमादेशाः सम्प्रसारिताः। कार्तिकमासस्य पूर्णिमातिथिरवर्तत। कार्यक्रमोऽयमेवंविधो निर्धारितः -

"मासमेकं व्यतियाप्य सकलं सैन्याभियानप्रबन्धं कृत्वा मार्गशीर्षपूर्णिमातिथौ प्रयाणमुज्जयिन्यै विधास्यते। पक्षस्यावधिर्गमनागमनयात्रायै, पक्षस्यावधिश्चो-ज्जयिनीविजयाय निर्धारिता।"

पौषमासस्य पूर्णिमातिथौ सर्वे विन्ध्यारण्यप्रदेशेषु महाराजराजहंसस्य सेवायां समुपस्थिताः भविष्यन्ति। तदनन्तरमस्मात् स्थानात् कुसुमपुराय प्रस्थास्यते। एवञ्च युद्धयात्रायै मासस्यैकस्य समयोऽवर्तत।

अवन्तिविजयाय विशिष्टोद्योगा आयोजिताः। नवसैनिकानां निर्वाचनं प्रशिक्षणं नियुक्तिञ्च विधाय ते यथायोग्यं सैन्यगुल्मेषु प्रवेशिताः। तदनन्तरं सैन्याभियानस्य विविधानामङ्गानां प्रशिक्षणं प्रारब्धम्। अथ शस्त्राणामस्त्राणामायुधानामन्यासाञ्च युद्धोपयोगिनीनां सामग्रीणां सञ्चयो विहितः। राजवाहनेन सोमदत्तसकाशं विशिष्टः सन्देशहरो विदिशां प्रति प्रेषितो, यदसौ निर्धारिते समये सेनया सह विशालामागच्छतु। पुष्पोद्भवस्तु तत्रैवोज्जयिन्यां कारागृहेऽवर्तत।

अस्मिन् समये चम्पायामङ्गजनपदराजधान्यां मन्त्रगुप्तो मित्रगुप्तोऽर्थपालो विश्रुतः प्रमतिरुपहारवर्माऽपहारवर्मा चेति सप्त कुमाराः मन्त्रिपुत्राः निजसेनाभिः सह राजवाहन-साहाय्यार्थं समुपस्थिता अवर्तन्त। ते सर्वे चम्पेश्वरस्य सिंहवर्मणः साहाय्यार्थं समवेता

अभूवन्। सिंहवर्मणोऽप्यनीकिनी चतुरङ्गिणी प्रयाणाय सन्नद्धाऽवर्तत। सोमदत्तो यथासमयमुज्जयिनीमभियास्यति।

सर्वेषां राज्यानां कुमाराणां सैनिकानां लक्षत्रयं विविधायुधसुसज्जितं युद्धोपयोगि-विविधसामग्रीचययुतं तत्र चम्पायां समवेतमभूत्। रथाश्वगजपदातिसैन्यानि चतुरङ्ग-भूतानि तत्र सम्मिलितानि। रथानां पञ्चविंशतिसहस्रं, घोटकारोहिणां पञ्चाशत्सहस्रं, गजानां पञ्चत्रिंशत्सहस्रं पदातिसैनिकानाञ्च दशोनलक्षद्वयपरिमितं सैन्यं युद्धोन्मादोन्मत्तं "हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्" इति भगवतो वासुदेवस्यो-पदेशेनोत्साहितं तत्र समवेतम्।

मार्गशीर्षमासस्य पूर्णिमातिथौ सैन्याभियानं नायकैरादिष्टम्। राजवाहनस्याऽध्यक्षतायां कुमारैः सञ्चालितेयं सम्मिलिताऽनीकिनी त्वरितगत्याऽग्रे वर्धमाना विविधान् जनपदान् नगराणि वनानि सरितः पर्वतान् द्रोणीरुपत्यका अधित्यकाः समविषमभूमिभागान् सङ्घट्टयन्ती सीमा अवन्तीनां प्रविवेश। जनपदसीमासु निर्मितानां सीमान्तदुर्गाणां विध्वंसोऽनया सेनया स्वल्पैरेव प्रयासैर्विहितः।

तस्मिन् समयेऽवन्तीषु दर्पसारस्य प्रचण्डं शासनमवर्तत। तस्य प्रमुखयोः सहायकयोः दारुवर्मचण्डवर्मणोर्यमलोकातिथ्यङ्गतयोरपि भगवतो नीललोहितस्याऽर्चनया तपसा च प्रभावोऽमितोऽविद्यत। शक्तिसञ्चयप्रभावेनाऽसौ दर्पसार आत्मानं प्रचण्डतमं शक्तिमत्तमञ्चाऽमन्यत। प्रबलबलगर्वमदान्वितोऽसौ कमपि सङ्गरे न गणयामास। परं राजवाहनमवरोद्धुं तेन प्रेषितानि सैन्यानि नाऽऽक्रमणकारिणोऽवरोद्धुं समर्थानि बभूवुः। ते वीराः योद्धारः सैनिकाः युद्धेषु पञ्चत्वङ्गताः वा प्राणरक्षणाय वा कान्दिशीका अवर्तन्त। स्वल्पैरेव दिवसैः राजवाहनेन सञ्चालितं सैन्यमग्रे प्रसृत्योज्जयिनीमवरुरोध।

वृद्धो राजा मानसारः सुतं दर्पसारं भृशमुपदिदेश, साग्रहं च प्रार्थयामास, यदसौ राजवाहनेन सार्द्धं सन्धिं कुर्यात्। राजवाहनोऽवन्तीनां जामाता पूजनीयः। दर्पसारस्य सहोदरायाः भगिन्याः भर्ता। समरे हते राजवाहने कुमारेऽवन्तिसुन्दरी विधवाऽनाथा शोचनीयां दशां प्रपत्स्यते। हते वोज्जयिनीनाथे सर्वं विनङ्क्ष्यति। ततो दुःखतरं नु किं भविष्यति। परन्तु दर्पसारेण पितुरुपदेशोऽनुरोधोऽनुनयो वा सरोषं प्रत्याख्यातः। प्रार्थना च भर्त्सिता। पितुरुपदेशं तिरस्कृत्य दर्पसारेण नगरस्य सुरक्षाव्यवस्थायाः प्रबन्धः सुदृढीकृतः। नगरप्राकारं प्रतिसंस्कार्य परिखाऽगाधजलेन प्रपूरिता। धान्यागारेषु पुष्कलान्नानां सञ्चयं विधाय जलपूर्त्याः सुप्रबन्धोऽपि विहितः।

तदनन्तरं नगरपरिखामुत्तीर्य प्रवेशाय चतसृषु दिक्षु स्थापितानां सेतूनामाधारा-

नूर्ध्वमुत्थाप्य गोपुरकपाटान् सम्मुद्र्य तान् लोहमयकीलकार्गलाभिः पिधातुमादिदेश। प्राकारशिखरेषु विशिष्टेष्वन्येषु स्थानेषु नियुक्ताः धनुर्धारिणो योद्धारो विशिष्टच्छिद्रमार्गाभ्यन्तरालेभ्य आक्रमणकारिणो वीरान् शरलक्ष्यानकुर्वन्। सर्वे नागरिकाः शस्त्रसन्नद्धाः भवन्त्वित्यादेशोऽपि दर्पसारेण समुद्घोषितः। राजमार्गेषु वीथिषु प्राकारसंलग्नाभ्यन्तरपथेषु चाऽश्वारोहिणां गजारोहिणां पदातिसैनिकानाञ्च सम्मर्दाः सर्वत्राऽलक्ष्यन्त।

रिपूणामुज्जयिनीनिवासिनां समरसम्बद्धतामवलोक्य राजवाहनेनाऽपि स्वकीयाभियानस्य सम्यग् व्यवस्थितयोजना निर्धारिता। प्रथमं तावन्नगरप्राकारपरिखातः हस्तशतान्तरालेन प्रांशुसुदृढवितर्दिकानां निर्मितिः कारिता। तासु शतघ्नीनामिषुप्रक्षेपणयन्त्राणाञ्च सुस्थिरं निवेशनं विहितम्। अथ शतघ्नीभ्यः प्रक्षिप्तैर्लोहगोलकैः प्राकारशिखराणि विच्छिद्य तद्व्यवधानस्थितानामवन्तिसैनिकानां सम्पेषणं प्रारब्धम्। केचन वीराः विकलाङ्गीभूय परिखायां पतिताः, केचन भित्तिपृष्ठभागेऽधःस्खलिताः। केचन विततभित्तिपृष्ठप्रदेशे विच्युताः पञ्चत्वङ्गताः। शेषाश्च प्राणान् रक्षन्तः सोपानमार्गेणाऽधोऽवतीर्य पलायनञ्चक्रिरे। तस्मिन्नेव समये शतघ्नीभ्यो निर्मुक्ताः केचनाऽयोगोलकाः प्राकारमुल्लङ्घ्य नगरभवनानि भिन्दन्तो विनाशलीलां प्रारभन्त।

इषुप्रक्षेपणचन्त्रेभ्योऽपि प्रक्षिप्तैरग्निबाणैर्नगर्यामुज्जयिन्यां स्थाने स्थाने दहनलीला समुपस्थिता कृता। तत्र हनूमत्कृतं लङ्कादहनदृश्यं समदृश्यत।

प्राकारभित्त्यन्तरालवर्तिभिर्दर्पसारभटैरपि धनुर्धारिभिराकर्णान्ताकृष्टकार्मुकेभ्यस्तीक्ष्णाग्रशरवर्षणं प्रारब्धम्। परन्तु मागधसैन्यसञ्चालिताभ्यः शतघ्नीभ्यः प्रक्षिप्तैरयोगोलकैरिषुक्षेपणयन्त्रेभ्यश्च प्रहितैरग्निबाणैराहतानां तेषां गतिः शीघ्रमेवाऽवरुद्धा। प्राकारान्तरालेभ्यः प्रक्षिप्तानां शराणामुपद्रवे किञ्चित् प्रशान्ततां गते राजवाहनसैन्यस्य सुप्रशिक्षितश्रमिकाः लोहगोलकानां छायासूज्जयिन्याः प्राकारस्य पूर्वदिग्द्वारसमक्षं परिखां मृदुपलपाषाणखण्डैः सम्पूरयितुं समायाताः।

कुशलाः शिल्पिनः शिप्रासरितः परिखायां प्रवहन्तं सलिलप्रवाहं प्रतिबबन्धुः। पूर्वदिग्द्वारे सम्पूरितायां परिखायामावागमनमार्गः परिष्कृतो बभूव। गजसेनाध्यक्षेण द्वारभञ्जने प्रशिक्षिताः गजाः भालपट्टेषु लोहमयस्थूलावरणबद्धशिरस्त्राणाः गोपुरकवाटानां भेदनाय प्रहिताः।

उज्जयिन्याः मध्यभागे समवस्थितस्य सप्तभूमिकराजप्रासादस्य छदिषि मालवाधिपेन दर्पसारेण नियुक्ताः कर्मणि कुशलाः यान्त्रिका अवर्तन्त। दूरवीक्षणयन्त्राणां साहाय्येन ते राजवाहनस्य सकलं युद्धकौशलं पश्यन्ति स्म। तेन घटनाचक्रेण ते महाराजं

दर्पसारं सूचयामासुः।

दर्पसारेणाऽपि विदितम् -

"स्वल्पेन समयेन राजवाहनोऽयं मगधेशकुमारो गोपुरद्वारं भङ्क्त्वा ससैन्यं राजधानीं प्रवेक्ष्यति। असौ वीरोचितं व्यवहर्तुमियेष। कार्यं वा साधयेयं देहं वा पातयेयमिति युद्धाय कृतनिश्चयः पराजयावमानात् स्वर्गगमनमेव श्रेयो मन्यमानोऽवशिष्टान् वीरयोद्धॄन् सोत्साहान् विधाय सैनिकान् चतुर्षु भागेषु विभज्य व्यूहं पर्यकल्पयत्। एकस्य विभागस्य स्वयं नेतृत्वं कुर्वन् त्रयाणामन्येषां विभागानां नायकत्वं परमविश्वासपात्रेषु वीरसेनापतिषु निदधौ।

राज्ञो दर्पसारस्याऽऽदेशेन गोपुरद्वाराणां कपाटाः समुद्घाटिताः। परिखाया उपरि सेतूनामाधाराः पुनः पातिताः। चतसृषु दिक्षु दर्पसारस्य वाहिन्यः प्राकाराद् बहिर्निर्गत्य परिखामुल्लङ्घ्य राजवाहनसैनिकेषु परापतन्। दर्पसारराजवाहनसैन्ययोर्विजया-काङ्क्षिण्योर्मध्ये सर्वप्राणिभयङ्करः घोरः सङ्गरः परस्परं प्रावर्तत। स्वल्पेन समयेन रणक्षेत्रे निहतानां भटानां शवैः सा भूमिर्निचिता बभूव। प्रवहन्तीषु रुधिरवसामांसजनित-कर्दमेषु गजानामश्वानां पदातीनाञ्च पादानामंशाः पदे पदे प्रचस्खलुः।

दर्पसारस्य सेनास्वश्वारोहिणां पदातिसैनिकानाञ्च प्राचुर्यमवर्तत। हयानां खुरन्यासैः पदातिभटानाञ्च पादतलविक्षेपैर्विलिखिताभिरुपरिष्टाच्च समुत्पतन्तीभिर्धूलिभिर्नभो धूसरितं बभूव। परन्तु सपद्येव गजानामश्वानां पदातिभटानाञ्च क्षतविक्षतशरीरेभ्यः प्रवहन्तीभिः शोणशोणितधाराभिस्ताः धूलिराशयः प्रशान्ताः।

निहतानां वीराणां गजानामश्वानाञ्च कलेवराणि रणक्षेत्रे सर्वतः समदृश्यन्त। शस्त्रैर्विच्छिन्नान्यङ्गानि यत्र तत्र विप्रकीर्णान्यासन्। रुधिरकर्दमेषु प्रस्खलन्तो युद्धरताः सैनिकाः यत्र तत्र समपतन्। मृतानां क्षतविक्षतानाञ्च सैनिकानां करेभ्यो विच्युतानामा-युधानाञ्चयास्तत्र राशीभूताः। असिगदातोमरपट्टिशकुन्तप्रासबाणादयः सर्वत्र व्यकीर्यन्त। युद्धोन्मत्तानां भटानां जयघोषणानां व्रणितानामार्तनादानां हयानां ह्रेषाध्वनीनां करिणाञ्च बृंहितानां कोलाहलाः गगनमपि भेदयन्तः सर्वत्र दिशां प्रान्तराणि व्याप्नुवन्।

कुमारस्य राजवाहनस्य मन्त्रिपुत्राणाञ्च विश्रुतादीनां नायकत्वे मागधसैन्यभटाः लोमहर्षणशौर्यं प्रदर्शयन्तो यमकिङ्करा इव रिपुभटान् यमलोकं प्रापयन्ति स्म। उज्जयिन्याः पूर्वदिग्द्वारे राजवाहनः सोमदत्तेन सह समुपस्थितो बभूव। पश्चिमदिग्द्वारे चाऽर्थपालप्रमतिविश्रुताः भीषणाक्रमणैः शत्रुभटानां वधव्यापारं सम्पादयन्ति स्म।

स्वल्पेन समयेन शत्रुसैन्यानां प्रतिरोधोऽवसितः। बहवो मालवीयाः भटाः यमलोकस्य

प्राघुणिकाः बभूवुः। केचन विकलाङ्गाः क्षताः वा समराङ्गणे पतिताः। अन्ये प्राणान् परिरक्षन्तः कान्दिशीकाः बभूवुः। अवशिष्टाश्च मागधवीरैर्बन्दीकृताः। पराजयमङ्गीकुर्वन्तस्ते तदाऽऽत्मसमर्पणञ्चक्रुः।

मालवनाथो दर्पसारः पूर्वदिग्द्वाराद् युद्धाय बहिरागत्य राजवाहनमाचक्राम। मगधेशकुमारो राजवाहनोऽपि साक्षात् काल इव तमवरोद्धुं समुपस्थितो बभूव। युद्धाय परमोत्सुकयोः पुरुषप्राप्यपृष्ठौ चक्राकारभ्रूलतालाञ्छितभालपट्टौ शुभ्रवर्णौ सिन्धुदेशोद्भवौ तुरङ्गमावारूढयोः राजवाहनदर्पसारयोर्भीषणं लोमहर्षणञ्चाऽन्योन्यं द्वन्द्वयुद्धं प्रारेभे। दन्तयोरेव खलीनावलम्बमानयोर्दक्षिणकरयोस्तीक्ष्णधारदीर्घचन्द्रहासधारिणोर्दक्षिणेतरकरयोश्च चर्मफलकधारिणोस्तयोर्महाभीषणं समरसाम्मुख्यं समजायत। चन्द्रहासप्रहारैः रिपुक्षयमिच्छद्भ्यां चर्मफलकाभ्याञ्च खड्गप्रहारानवरुन्धद्भ्यां ताभ्यां कृतोऽसौ सङ्गरः द्युस्थानीयैर्देवैर्देवाङ्गनाभिश्च सकौतुकं सस्पृहं सप्रशंसनं सपुष्पवर्षणञ्चाऽवलोकितः।

राजवाहनस्य युद्धदाक्ष्यं वा शस्त्रसञ्चालनकौशलं वा भाग्यं वा विधेरानुकूल्यं वा प्रबलतरमासीत्। मुहूर्तेन तस्य चन्द्रहासस्य प्रचण्डाघातैर्दर्पसारस्य चर्मफलकं द्विधा विभज्य समरभुवि पतितम्। अन्येन प्रहारेण तस्य चन्द्रहासोऽपि द्विधा छिन्नः। आघातमेनमसहमानो मालवाधिपतिर्दर्पसारो भूतलेऽच्योतिष्ट। तस्य वाहनभूतोऽश्वोऽपि चमत्कृत्य भीतः स्वामिनमुत्सृज्य पलायितः।

सम्प्रति निःशस्त्रस्याऽसहायस्य वाहनरहितस्य दर्पसारस्य प्राणाः कार्त्स्न्येन राजवाहनस्याधीनाः समवर्तन्त। अयं मम प्रियायाः सहोदरो भ्रातेति विचार्याऽसौ मागधः कुमारः श्यालस्य प्राणान्न जहार। रज्जुभिर्हस्तपादेन बद्धोऽसौ बन्दीकृतः। बन्दीभूते च दर्पसारे मालवानीकिनी सम्पूर्णरूपेण पराजयमङ्गीकृत्याऽऽत्मसमर्पणञ्चक्रे। भटानां प्रचण्डजयघोषणैर्युद्धवाद्यानाञ्च तुमुलनिनादैरुज्जयिनीवास्तव्यानां प्रजाजनानां श्रोत्राणि बधिरयन्ती मागधी पृतना कुमाराणां नेतृत्वे मालवराजधानीं विशालां प्रविवेश।

नयज्ञो राजवाहनोऽग्रे गत्वा नगरमध्यस्थितं राजप्रासादमधिकृत्य महाराजस्य मानसारस्य प्रकोष्ठमुपगम्य तस्य चरणयोः प्रणनाम। प्रथमशत्रोः राजहंसस्य मगधाधिपसुतस्य मालवविजयिनोऽनेन विनयसम्पन्नेन भावेन विगलितविह्वलहृदयो मानसारः प्रणमन्तं जामातरं राजवाहनं द्वाभ्यां भुजाभ्यामुत्थाप्य वक्षस्याऽऽलिलिङ्ग। प्राणेभ्योऽपि गरीयस्याः सुताया अवन्तिसुन्दर्याः भर्ताऽसावर्तत। राजवाहनस्य भावानिमान् प्रेक्ष्य तमनुगच्छन्तः कुमारा अन्येऽपि मानसारस्य चरणयोः प्रणेमुः। आशीर्वादैरसावपि वृद्धो राजवाहनस्य श्वसुरस्तानभिषिषेच।

तदनन्तरं महाराजस्य मानसारस्याऽऽदेशेन कारागाराद् विमुक्तः पुष्पोद्भवः समागत्य

तत्रैव समुपस्थितो बभूव। सुदीर्घसमयं कारागृहनिवासेन कृशगात्रोऽप्यसौ वदनकान्त्या दैदीप्यमानो न तथा बभासे। सर्वै: कुमारैरहं पूर्वमहं पूर्वमिति त्वरायमाणै: स्नेहालिङ्गनैरसौ सम्मानित:। पुष्पोद्भवस्य पितरौ सुवृत्तारत्नोद्भवौ चाऽपि कारागृहविमुक्तौ सम्मानितौ तत्र समुपतस्थतु:। ताभ्यामधिगताशीर्वादा: कुमारा: परमकृतकृत्यतामुपागता: प्रहर्षभरविह्वला: बभूवु:।

राजवाहनस्य पुष्पोद्भवस्य च वदनयोरङ्कितान् भावानभिलक्ष्य महाराजो मानसार: कुमारान् सुसज्जिते प्रकोष्ठे यथायोग्येष्वासनेषु समुपवेशयामास। तदनन्तरं राजवाहनपुष्पोद्भवाभ्यां सहाऽसौ कन्यान्त:पुरं प्रविवेश। तत्र वराकी केवलं बालचन्द्रिकासहायाऽवन्तिसुन्दरी मालवनाथस्य परमस्नेहादरास्पदतां प्राप्ता दुहिता एकस्मिन् प्रकोष्ठे बन्दीकृताऽवर्तत। उभे अपि प्रियतमस्मरणैरेव रोदनैरेवाऽश्रुप्रवाहैरेव कथमपि विरहावधिमेतं व्यतियापयामासतु:। आभरणप्रसाधनविहीनयोर्म्लानवदनयोस्त-योरङ्गानि विरहानल: कान्तिविहीनानि सम्प्लुष्टानीव चकार।

मालवनाथेन सह राजवाहनपुष्पोद्भवौ तमेव प्रकोष्ठं प्रविविशतुर्यत्र बालचन्द्रिका-सहायाऽवन्तिसुन्दरी बन्दिनी सती महता कष्टेन प्राणान् धारयन्ती समयं यापयति स्म। अप्रत्याशितरूपेण प्राणनाथावुपस्थिताववलोक्य, मगधाभियानविषये किमप्यजानत्यौ ते हर्षविह्वलभावसम्भृतहृदये बभूवतु:। स्वप्नोऽयं यथार्थो वेति निर्णयो न सम्भव आसीत्। परन्तु जनकमपि सम्मुखस्थमवलोक्य बालचन्द्रिकासहायाऽवन्तिसुन्दरी यथार्थसत्यमवबुबोध।

तयोर्युवत्योर्नयनान्यश्रुप्रवाहैरार्द्राणि सञ्जातानि, गात्राणि रोमहर्षेणाऽभिभूतानि वपुषी च वेपथुना समाक्रान्ते। प्रहर्षवेगेन भुवि प्रस्खलन्त्यौ ते प्रियाभ्यां संस्तम्भिते। राजवाहनोऽवन्तिसुन्दरीं पुष्पोद्भवश्च बालचन्द्रिकां भुजालिङ्गनेषु जगृहतु:। उभे च ते बाले प्रमदे हर्षवेगमसहमाने महाराजस्य मानसारस्योपस्थित्यामेव प्रिययोरालिङ्गनेषु सुदृढं निबद्धे स्कन्धयो: शिरसी निधाय नि:शब्दमश्रूणि प्रवाहयन्त्यौ रुरुदतु:।

दृश्यमिदमवलोक्य मानसारस्याऽपि हृदयं विगलितं चक्षुषी च नयनजलक्लिन्ने बभूवतु:। तस्मिन्नेव काले मालवेशमहिषी अवन्तिसुन्दरीजननी राजमाता मल्लिका तत्र समुपातिष्ठत्। सुताया: जामातुश्च मिलनमवलोक्य वात्सल्यभावाप्लुतहृदयाऽपि सा हर्षसम्भृतहृदया जाता। नयनाभ्यां हर्षनीराणि प्रवाहयन्ती सा राजमाताऽवन्तिसुन्दरीं बालचन्द्रिकाञ्चाऽपि राजवाहनपुष्पोद्भवाभ्यां सार्द्धं हार्दिकैराशीर्वादै: समभिषिषेच।

विलम्बमसहमानो राजवाहनोऽचिरेणैव प्रशासनमुज्जयिन्या: सुव्यवस्थितञ्चकार। मानसारेण निषिद्धोऽपि प्रेयसीप्रेरितोऽसौ श्यालाय दर्पसाराय पुनरप्यवन्तीनां शासन-

प्रबन्धमुपजहार। दर्पसारेण राजवाहनस्याऽऽधीनता स्वीकृता क्षमा च याचिता। तस्मिन्नेवाऽवधौ व्यतीते मार्गशीर्षमासे पौषमासस्याऽऽविर्भावो बभूव। कुमाराणां परामर्शमङ्गीकृत्य राजवाहनेन पित्रोश्चरणयोरभिवादनाय विन्ध्यारण्यमार्गेण प्रस्थानस्य कार्यक्रमो निर्धारितः। सुतीव्रगामिनोऽश्वारोहिणः सन्देशहराः विन्ध्यवनशिविरे मगधाधिपं राजहंसं निकषा सकलसमाचारावबोधनार्थं प्रेषिताः। सन्देशमप्यसौ प्राहिणोत् -

"उज्जयिनी विजिता। अविलम्बमुज्जयिनीतः प्रस्थिताः कुमाराः महाराजचरणसेवायां समुपस्थास्यन्ती"ति।

महाराजो मानसारोऽश्रुजलपूर्णनयनाभ्यां राजवाहनमन्यांश्च कुमारानुज्जयिनीतो विससर्ज। यौतुकरूपेण तेन सुतायै अगणितसंख्यासु सुवर्णरत्नवस्त्राभरणानि वाहनानि चोपहृतानि। दासानां दासीनाञ्च वर्गोऽपि प्रदत्तः। मगधाधिपाय सम्बन्धिने वसुमत्यै सम्बन्धिन्यै मन्त्रिभ्योऽपि च महार्घाणामुपहाराणां राशयोऽर्पिताः।

उज्जयिन्यां निवसद्भिः कुमारैः स्वभार्या अन्ये च सम्बन्धिनस्तत्रैवाऽऽमन्त्रिताः। पुष्पोद्भवस्य पितरौ सुवृत्तारन्नोद्भवौ भार्या बालचन्द्रिका चोज्जयिन्यामेवाऽवर्तन्त। बालचन्द्रिकायाः जनकेन धर्मपालेन सार्थवाहेन श्रेष्ठिना निजैश्वर्यवैभवानुरूपं प्रतिष्ठानुरूपञ्च सुतायै जामात्रे च यौतुकरूपेण महार्घाण्युपायनान्युपहृतानि।

विदिशायाः सोमदत्तो वामलोचनां मन्त्रगुप्तः कलिङ्गेभ्यः कनकलेखां, मित्रगुप्तः सुह्मेभ्यो दामलिप्तातः कन्दुकावतीं, विश्रुतो विदर्भनगरान्मञ्जुवादिनीं, प्रमतिः श्रावस्त्याः नवमालिकाम्, अपहारवर्मा चम्पाया अम्बालिकां रागमञ्जरीञ्च, उपहारवर्मा विदेहेभ्यः कंल्पसुन्दरीम्, अर्थपालो वाराणस्याः मणिकर्णिकामिति सर्वे कुमाराः निजकलत्राणि तत्रोज्जयिन्यामाकारयामासुः। सर्वे सम्बन्धिनो मगधाधिपचरणयोः प्रणंस्यन्तीति।

महता विभवेन सह कुमारेण राजवाहनेनाऽन्यैश्च कुमारैर्नवभिरुज्जयिनीतो विन्ध्यारण्ये नर्मदातटसमवस्थितं राजशिविरमभिलक्ष्य प्रस्थितम्। पूर्वनिर्धारित-कार्यक्रममनुसृत्य तैः पौषमासस्य पूर्णिमातिथौ तत्र महाराजराजहंससेवायां समुपस्था-तव्यमिति।

विन्ध्यवने राजशिविरे कुमारस्याऽऽगमनसमाचारः पूर्वमिव सन्देशहरैश्चरैः सूचितः। महाराजो राजहंसो महिषी वसुमती मन्त्रिणोऽन्ये च परिजनाः कुमाराणां स्वागताय प्रत्युद्गमनाय समुद्यता अभूवन्। महर्षिर्वामदेवोऽपि तस्मिन्नवसरेऽन्तेवासिभिः सह तत्र समाजगाम। तमवलोक्य सर्वेषां हृदयानि प्रसादेन सम्भृतानि।

मरीचिमालिनः सायन्तनं लोहितमण्डलं वारुणीं सन्ध्यामभिससार। अनुरागवत्याः सन्ध्याया अरुणवर्णा कान्तिः सकलं भुवनमनुरागरञ्जितं व्यदधात्। सुदूरे व्योम्न्युत्पतन्तः

पतत्रिण आप्रात:सायमाहारमन्विषन्त इतस्ततो भ्रमन्तो धान्यकणान् चञ्चुभिर्वहन्त: शावकेभ्य: स्पृहयन्तो नीडानभिप्रस्थिता:। पक्षिशावका अप्याशासते, पितरस्तेषां बुभुक्षाशान्तये धान्यकणानानयन्ति। "चीं चीं" इति ध्वनयन्तो नीडद्वारेभ्यस्ते निरूपयन्त: प्रतीक्षन्ते। सूर्योदयात् सूर्यास्तं यावदादिवसं वनेषु ग्रामेषु च विहृत्य यवसानुपभुज्य धेनवो गोष्ठेभ्य: समुत्सुका: बभूवु:। तासां खुराघातै: समुत्पतन्त्यो धूलय: पुञ्जीभूता: भास्करालोकेनाऽरुणीभवन्त्य आकाशं परितो व्याप्नुवन्।

तस्मिन् सायंसमये महाराजो राजहंसो महिषी वसुमती मन्त्रिण: परिजना: महर्षिर्वामदेव: सशिष्यतपस्विजन: शिविरमुख्यद्वारं समागत्य समवेता: कुमाराणामागमनं प्रतीक्षाञ्चक्रिरे। रश्मिमालिनि पश्चिमदिक्क्षितिजेऽदृश्यतां प्राप्तवति सान्ध्येन मन्दालोकेन प्रकाशमाने भुवने प्रतीचीदिशि समुत्थितेन कोलाहलेन सर्वेषां मनांसि समाकृष्टानि। प्रवृद्धोत्कण्ठा: सर्वे तस्यामेव दिशि नयनानि व्यापारयामासु:। तेषां हृदयानां गतिर्वृद्धिमुपागता। हायनस्यैकस्याऽनन्तरं ते कुमाराणां तेज:समुद्दीपितानि वदनानि द्रक्ष्यन्तीति।

सहसा चतुर्भिरुच्चपुरुषप्राप्यपृष्ठभागै: शुभ्रवर्णै: सप्तिभिर्वाह्यमानं विशालपरिणाहं सुसज्जितं सुप्रसाधितं स्यन्दनं समारूढो राजवाहन: सर्वेषां दृष्टिपथमाजगाम। विस्मयविमुग्धैर्हर्षभरै: सर्वैर्जनैरवलोकितम् -

"राजवाहनस्य वामभागे त्रिभुवनमहिलासंहतिसौन्दर्यतिरस्कारिणी ह्यनुपमरूपलावण्य-सम्पत्तिशालिनी सुशोभमानैका युवतिर्विराजते। राजवाहनस्यन्दनमनु क्रमशो नवरथा अन्येऽपि शोभन्ते। तान् रथान् क्रमश: सोमदत्तोऽपहारवर्मोपहारवर्मा पुष्पोद्भवो मित्रगुप्तो मन्त्रगुप्तोऽर्थपाल: प्रमतिर्विश्रुतश्चेति नव कुमारा: निजनिजकलत्रसहिता अधितिष्ठन्ति। सर्वै: सहैका युवतिरवर्तत। परमपहारवर्मणो द्वौ पार्श्वौ द्वाभ्यां युवतिभ्यां सुशोभेते स्म।"

कुमाराणां दर्शनेन मगधाधिपते: राजहंसस्य वदनं चन्द्रोदयेन कुमुदमिव विकासभावमभजत। वात्सल्यभावस्योद्रेकेण वसुमत्या: पयोधराभ्यां पयोधाराया: समुद्वेल्लनेन चोलिकाऽऽर्द्रा सञ्जाता।

समीपमागत्य स्यन्दनादवतीर्य राजवाहन: सपत्नीक: पित्रोश्चरणेषु प्रणनाम। तावपि चिराल्लब्धदर्शनं मानसारनन्दिनीसुशोभितवामाङ्गं प्रियदर्शनं सुतमुत्थाप्य सममेव समालिलिङ्गतु:। तदनन्तरं नवभि: कुमारैरपि सपत्नीकै: क्रमशो महाराजस्य राजमहिष्याश्च चरणेभ्य: प्रणामाञ्जलय: समर्पिता:, विनिमये च तयो: सस्नेहा: हार्दिका आशीर्वादा: समुपलब्धा:।

अस्मिन्नेवाऽवसरे सुमतिसुमन्त्रसुमित्रसुश्रुताश्चत्वारो मन्त्रिण: सभार्यास्तत्र समुपतस्थु:। वाराणसीत: कामपाल: कान्तिमत्या तारावल्या च सह समायात:। विदेहेभ्यो महाराज: प्रहारवर्मा दूतेभ्य: सुतयो: समाचारानवगम्य सपत्नीक: समायात:। सुवृत्तया सह रत्नोद्भव: कुमारै: सहोज्जयिनीत: समायात एव। केवलं सोमदत्तस्य पितु: सत्यवर्मणोऽनुपस्थितिस्तत्र सर्वेषां हृदयान्यपीडयत्।

मातॄणां पितॄणाञ्च चरणवन्दनां कृत्वा समुपलब्धाशिष: कुमारा: मगधाधिपशिविरं प्रविविशु:। शनै: शनैर्निशाया: प्रगाढान्धेन तमसेन व्याप्तमपि सर्वं जगदुदयता परिपूर्णमण्डलेन शशिनाऽऽलोकितम्। अपरेद्युर्मध्याह्नोत्तरसमये मगधेशो राजहस: सर्वै: परिजनै: कुमारैश्च सेनाभिश्च सार्धं कुसुमपुराय प्रस्थास्यते, निर्णयमिमं कृत्वा दिवसश्रमपरिश्रान्तशरीरा: सर्वे जना: शयनाय शयनानि समाशिश्रियु:।

तस्मिन् समये मालवाधिपसेनापतिर्जयसिंहो मगधशासनधुरं स्वामिप्रतिनिधिरूपेण वहति स्म। गूढपुरुषैस्तेन विज्ञातम् -

"राजवाहनो राजहंससुत उज्जयिनीं विजित्य मानसारदुहितरमवन्तिसुन्दरीमुपयेमे। सम्प्रति राजहंसपक्षपातिन: सर्वे जना: विन्ध्यारण्ये रेवातीरेऽवस्थिते राजशिविरे स्थिता: कुसुमपुरमविलम्बमभियातुमुत्सुका: वर्तन्ते।"

समरे राजहंसस्य विजयं सुनिश्चितमिति जयसिंहस्तेषामाक्रमणात् पूर्वमिवाऽऽत्मसमर्पणं समुचितं मेने। स्वयमेव स्वल्पै: सैनिकै: सेवकैश्च सहाऽसौ मगधाधिपसेवायां समुपस्थितो बभूव। जयसिंहस्तस्मिन् क्षणे राजहंसशिविरं सम्प्राप, यदा राजवाहन: ससैन्यं कुसुमपुरमभियातुं प्रस्थानाय समुद्यतोऽवर्तत।

मगधेशस्य चरणयो: शिरो निधाय चरणधूलिभिश्च निजभालपट्टं विभूष्य जयसिंह: कुसुमपुरस्य शासनं तस्मै समार्पयत्। घटनयाऽनया शुभकारिण्या सर्वे जनास्तत्र परमानन्दमन्वभवन्। विनैव युद्धं महाराजेन राजहंसेन निजराज्यं पुन: सम्प्राप्तम्। तत: सर्वैरनुगम्यमानोऽसौ कुसुमपुराय प्रतस्थे।

# पञ्चदशी-पीठिका

## राज्याभिषेकः

## राज्याभिषेकः

चतुर्दिवसयात्रानन्तरं महाराजो राजहंसः कुमारैः मन्त्रिभिः परिजनैश्च परिवृतो मगधराजधानीं कुसुमपुरं सम्प्राप्नोत्। हर्षनिर्भरहृदयाः नागरिकाः परमाह्लादेन नृत्यन्त इव प्रजाजनहृदयसम्राजं महाराजराजहंसं कुमारांश्चाऽभिननन्दु। सांवत्सरिकैः शुभनक्षत्रतिथीनां संशोधने विहिते राजपुरोहितो राजहंसं पुनः पितृपरम्पराप्राप्त-राजसिंहासनारूढं व्यदधात्। कुमारो राजवाहनो युवराजपदे प्रतिष्ठापितः। कुमाराश्चाऽन्ये मन्त्रिपरिषदि यथायोग्यैः पदैः सम्मानिताः।

परन्त्वेते कुमारा अन्येषामपि जनपदानां शासका अवर्तन्त। अतो मन्त्रिपरिषदि महाराजेन निर्णीतम् -

"एते कुमाराः षण्मासं निजोपार्जितशासनेषु जनपदेषु निवत्स्यन्ति। षण्मासञ्च कुसुमपुरे तेषां निवासो भविता। अत्रेमे मगधसाम्राज्यस्य सेवायां निरताः भारतराष्ट्रनिर्माणं विकासयन्तो राष्ट्रियभावनां प्रसारयन्तो भारतैक्यसंविधानाय प्रयतिष्यन्ते।

देशस्याऽस्य सर्वे नागरिकाः समानाधिकारं भजन्ते। न कोऽपि जातिदेशधर्मवंशादिक-समुद्भवं निम्नभावमुच्चभावं वा दधाति। निर्बलाः सबलाः वा निर्धनाः धनवन्तो वा सर्वे जनाः प्रशासनतन्त्रेण समभावेन व्यवहृताः भवन्ति। सर्वे धर्माः प्रशासनिकदृष्टि-कोणेन समभावं वहन्ति। अथ च न कोऽप्युच्चजातीयो निम्नजातीयो वा वर्तते। पुष्पोद्भवः षण्मासमुज्जयिन्यां निवसन् दर्पसारस्य प्रधानामात्यपदमलङ्करिष्यति। षण्मासञ्च कुसुमपुरे निवसन् मगधानां प्रधानामात्यो भविता।"

व्यवस्थैषा हायनावधिका बभूव। द्वादशमासानन्तरं राजहंसस्य मनसि भवविरक्तिभावानां समुदयो बभूव। कुमाराणां परमामुन्नतिं प्रेक्षमाणौ वसुमतीराजहंसौ मनसोरपरिमितमनुपमेयं प्रसादमनुभवतः स्म। राजहंसस्यायुः प्रतिवर्षं वर्धमानं तस्य हृदये वैराग्यभावनां समुत्पादयामास। षष्टिपूर्त्यवसरे महर्षेर्वामदेवस्याऽनुरोधेन राजहंसोऽश्वमेधयज्ञयाजने मतिञ्चकार।

अश्वमेधीयोऽश्वः कुमाराणां संरक्षणे चतसृषु दिक्षु निरवरोधमप्रतिबन्धं भारतवर्षं परिक्रम्य सकुशलं कुसुमपुरं प्रत्यायातः। तदनन्तरमसौ चक्रवर्ती समाड् राजहंसः सर्वं कर्मकाण्डमाश्वमेधिकं समापादयात्। वीरैः पराक्रमशालिभिर्नयज्ञैः कुमारैर्दिशो विजित्य

विजितराजशिरस्सु पदानि निधाय विश्वस्याऽधिपत्येन सह सकलविजितसमृद्धयो नवचक्रवर्तिपदप्रतिष्ठितस्य सम्राजो राजवाहनस्य जनकस्य पितुः चरणेषु समर्पिताः।

एकस्मिन् दिवसे महर्षिर्वामदेवो राजसंसदि समुपस्थितो बभूव। महाराजस्य हृदये वानप्रस्थव्रतग्रहणाभिलाषो दीर्घकालादेवोल्लसति स्म। अवसरमवलोक्याऽसौ महर्षये निवेदयामास -

"भगवन् ! भवतोऽनुग्रहेण मया सकलानि इहलोकसुखान्युपभुक्तानि। व्यतिक्रान्ते च षष्टिपूर्तिसमारोहे समापिते चाऽश्वमेधकर्मकाण्डे, इहलोकस्य चिन्तामुपेक्ष्य परलोकचिन्तनं मया विधेयम्। सम्प्रति परलोकचिन्ता मे मनो हृदयञ्च बलात् प्रविशति। अतो वानप्रस्थधर्ममङ्गीकृत्य भवतश्चरणयोर्वसन् साधनामाध्यात्मिकीं साधयितुमभिलषामि। लोकसम्पदोऽध्यात्मसम्पदेव गरीयसी। महिषी वसुमती यथाभिलषितं मामनुसरन्ती वनं वा गच्छेत्, पुत्रस्याऽऽश्रये वा वसन्ती राजमातापदप्रतिष्ठिता राज्याधिकारसुखान्युपभुञ्जीत।

अतः समुचितमिदं, यत् कुसुमपुरे युवराजपदप्रतिष्ठितस्य राजवाहनस्य राज्याभिषेको भवेदहञ्च वानप्रस्थव्रतमाचरन् वनानि गच्छेयम्। राज्यप्रशासनव्यवस्था पूर्ववद् भविष्यत्यपि काले नवकुमाराणां संरक्षकत्वे सञ्चालिता भवेत्। एते नव कुमाराः पराक्रमशालिनो नयज्ञाः भारतवर्षस्य राजनीतिकसांस्कृतिकैकत्वं संरक्षन्तो राजवाहनस्य शासने सततं निरताः प्रजाः पालयन्तु।

भगवन् ! उत्तरस्यां दिशि मेरुगिरिशिखरोत्तुङ्गश्रेणीभ्यो दक्षिणस्यां दिशि दक्षिणसमुद्रस्य कुमार्यन्तरीपपर्यन्तं, प्राच्यां गौड-कामरूप-पूर्वसमुदेभ्यः प्रतीच्याञ्च गान्धारकपिश-जनपदवंक्षुसरित्पश्चिमसमुद्रपर्यन्तं विन्ध्यमेखला भारतभूरियं ह्येकचक्रान्तर्गता सर्वदा सर्वकालं भवेदिति महर्षीणां विधानम्। तदैव भारतीयानां कुशलं क्षेमं सुरक्षा समुन्नतिश्च सम्भाव्यते। राजवाहनस्य नव कुमाराणाञ्च शौर्यपराक्रमनीतीनामाश्रयेण सुखं शान्तिं सद्भावनां समृद्धिञ्चाऽनुभवन्तः प्रजाजनाः सततं परमं श्रेयोऽवाप्स्यन्ति। राज्ञां कर्तव्यमिदं यत्ते निजदेशवास्तव्यान् भारतीयान् जनाननुपद्रवेभ्यो बाह्याभ्यन्तरिकेभ्यो रक्षन्तु।"

वानप्रस्थव्रतमङ्गीकृत्य पितुर्वनगमननिर्णयमधिगम्य राजवाहनस्य चित्तमतितरां विकलमुद्विग्नं सम्भ्रान्तञ्च बभूव। नव कुमारा अपि च तत्रोपस्थिताः दुःखपरीता उन्मनस्काः सञ्जाताः। सर्वेषामप्येषः प्रबलो हार्दिकोऽनुरोधोऽवर्तत, यन्महाराजस्य हस्तच्छत्रच्छाया तेषां समुन्नतयेऽनिवार्या हिमकारिणी च वर्तते। अतः महाराजो वानप्रस्थधर्मग्रहणविचारं परित्यज्य कुसुमपुरे राजप्रासाद एव निवसतु। कुमाराणामाग्रहं विलोक्य राजहंसहितचिन्तनपरो महर्षिर्वामदेवस्तानुवाच -

"कुमाराः ! मनुष्याणां धर्म एष यत् ते आयुषो द्वितीये भागे लोककार्याणि सम्पाद्योत्तरदायित्वञ्च निर्वाह्य तृतीये भागे जीवनस्य तृतीये प्रहरे भौतिकसुखासक्तिमिह-लोकसम्बद्धञ्च मोहभावं परित्यज्य परलोकचिन्तनं कुर्युः। भक्तिभावनासम्भृतमानसो मानवः स्वात्मानं प्रभवे समर्पयेत्।

पुनश्च, ममाऽऽश्रमे वसन् वानप्रस्थव्रतं परिपालयन् महाराजो राजहंसः किमपि शारीरिकं वा मानसं वा दुःखं नाऽनुभविष्यति। अतो यथैवाऽयं कथयत्यभिलषति वा तथैव भवन्तोऽङ्गीकुर्वन्तु। एष एवाऽस्य धर्मः, एषा एव भवतां कुलपरम्परा, भारतीया ऋषिजनप्रतिपादिता एषा एव संस्कृतिः। वार्धक्ये मुनिवृत्तीनां तपोवननिवासिनां जनानामेषोधर्म एतत् कर्तव्यञ्च वर्तते। भवन्तो यथाभिलषितं मदाश्रममागत्य महाराजस्य दर्शनेषु परामर्शग्रहणेषु च प्रभवः। समयापेक्षया च भवद्भिरामन्त्रितोऽयं कुसुमपुर-मागमिष्यत्येव।

महर्षेर्वामदेवस्य युक्तियुक्तान् धर्मसम्मतान् उपदेशान् कुमाराः विनम्रमस्तकैरङ्-गीचक्रिरे। सांवत्सरिकैर्निर्दिष्टे शुभे मुहूर्ते राजवाहनस्य राज्याभिषेकाय समारोहाः सम्पादिताः बभूवुः। राजसिंहासनं परित्यज्य राजहंसः स्वकीयवामेतरकराङ्गुष्ठेन राजवाहनभालपट्टं राजतिलकेन समभूषयत्। शिरश्च तस्य रत्नजटितकनकमयेन राजमुकुटेनाऽसौ समलञ्चकार।

राजवाहनं मगधानां राजसिंहासने प्रतिष्ठाप्य राजहंसः प्रियया भार्यया वसुमत्या सह विन्ध्यवने रेवातीरेऽवस्थितं वामदेवाश्रमं प्रविष्टः। पितरि वनं प्रयाते नव कुमाराणां परामर्शेण राज्यप्रशासनधुरं वहन् शासनतन्त्रञ्च सञ्चालयन् राजवाहनः प्रजाजनाननुरञ्जयन् पालयामास।

# षोडशी-पीठिका

# कमलरहस्यम्

# कमलरहस्यम्

दण्डिना महाकविना मनीषिणा प्रोक्तां मनोरमां गाथां निशम्य सर्वोऽपि मित्रगणः परमौत्सुक्यविस्मयहर्षनिर्भरोऽवर्तत। मित्राणि तथाऽवस्थां गतानि ध्यानावहितचित्तान्यवलोक्य मेधाविना दण्डिना क्षणं विरम्य पुनः कथारहस्यं कथयितुमारब्धम् -

एकस्मिन् दिवसे महाराजो राजवाहनो मध्याह्नोत्तरसमये राजसंसदि राजसिंहासने समुपविष्टो मनो विनोदयन्नवर्तत। तदानीं सर्वे कुमाराः कुसुमपुरमागत्य राजसभायामुपस्थिताः यथायोग्यासनान्यलङ्कुर्वन्ति स्म। हासपरिहासयुतानां विस्रम्भालापानां रमणीयासु वार्तासु ते परमानन्दमनुभवन्ति स्म। तस्मिन् समये विद्याधर एको राजसभां प्राविशत्। उत्सुकाभ्यां नयनाभ्यां निरूपयति महाराजे, निरीक्षमाणेषु चाऽन्येषु सभासत्सु सावहितां दृष्टिं निपात्याऽसौ विद्याधरः समुवाच -

"राजन् ! हेमकूटपर्वतस्य विद्याधरराजस्य चन्द्रभानोः पार्थिवस्याऽहं दूतो भवामि। पूर्वजन्मनि भवांश्चित्रभानोर्विद्याधरराजस्य सुतः शाम्बोऽवर्तत। भवतो भार्याऽवन्तिसुन्दरी तस्मिन् जन्मनि यज्ञवतीनाम्नी बभूव। राजहंसरूपधारिणो मुनेः शापादस्मिन् जन्मनि भवान् मगधाधिपसुतरूपेण जन्म लेभे। महाराजस्य चित्रभानोर्न काचिदन्या सन्ततिर्बभूव। अतोऽस्मिन् जन्मन्यपि भवानेव तस्य पुत्रः राजसिंहासनस्योत्तराधिकारी वर्तते। हेमकूटमानेतुं भवन्तमहं विद्याधरराजेन चित्रभानुना प्रेषितोऽस्मि।"

महाराजो राजवाहनो मन्त्रिपरिषत्सदस्यैरन्यैश्च सभासद्भिः परामर्श - "किमत्र कर्तव्यमि"ति।

सहमतेषु च सर्वेषु सभासत्सु राजवाहनो राजमहिष्याऽवन्तिसुन्दर्या वयस्यैश्च नवकुमारैः सार्द्धं विद्याधरराजेन प्रेषितानि विमानानि समारुह्य हेमकूटपर्वतं सम्प्राप्तः।

हिमशुभ्रस्य हेमकूटभूधरस्य शिखराणामुपत्यकासु समतलस्थले संस्थितस्य हेमकूटनगरस्य राजप्रासादे विमानान्यवातरन्। स्वागताय समायातस्य विद्याधरराजस्य चित्रभानोश्चरणयोः राजवाहनः समित्रवर्गः प्रणनाम। सुतमस्मिन् रूपे समवलोक्य चित्रभानुस्तस्य च महिषी महल्लिका हर्षगद्गदौ निरुद्धकण्ठौ नयनयोः प्रस्रवद्भिरश्रुभिर्भुवमार्द्रयाञ्चक्रतुः।

रुध्यमानाभ्यां कण्ठाभ्यां पुत्रमभिनन्द्य तौ सममेव तमालिलिङ्गतुः। पूर्वजन्मपितु-

र्विद्याधर-राजस्य चित्रभानोराग्रहमङ्गीकृत्य राजवाहनो विद्याधरराज्यस्याऽपि युवराजपदं स्वीचकार। अथ च तत्र समयोऽयं बभूव -

"राजवाहनः कञ्चित् समयं हेमकूटनगरे कञ्चिच्च कुसुमपुरे निवत्स्यति।" चित्रभानुर्मानसं नाम मनःसदृशवेगशालि विमानमिच्छानुसारगतिकं प्रियसुताय समुपाहरत्। विमानमेतदारुह्याऽवन्तिसुन्दरीराजवाहनौ यथाऽभिलषितं व्योमविहारानन्द-मनुबभूवतुः।

एकस्मिन् सुप्रभाते बालभास्करमण्डलास्याऽरुणकान्तिः पूर्वदिक्क्षितिजविभागे व्यद्योतत। अनुपमरूपलावण्यसुशोभमानवस्त्राभरणा पुराणी युवतिः पुरन्धिर्दिवो दुहिता हिरण्यवर्णा नर्तकीव दिव्यज्योतिर्मयी अरुणवर्णोत्तरीयं प्रावरणं वसानाऽरुणवर्णमुखनेपथ्या पूर्वदिशि गगनमण्डले समवतीर्णा। विस्तृतं तमोऽवचिन्वती सा दिव आपृथिव्याः पप्रथे।

सकलं भुवनं पिङ्गलवर्णभिन कनकद्रवेणेवाऽऽलिप्तम्। सघनतरुविटपेषु कोटरेषु च संस्थिताः पतत्रिणश्चुकूजुः। शावकान् शान्तभावं समुपदिश्याऽऽहारान्वेषणाय ते विविधासु दिक्षु समुत्पेतुः। उत्पततां तेषां कलात्मकपङ्क्तयो मनांसि हठादेवाऽऽवर्जयन्ति स्म।

वनेषु मांसभक्षिणो जन्तवो निशाजागरणपरिश्रमक्लान्तकायाः पक्ष्मभारनिमीलित-चक्षुषः शयनाय निजनिवासगह्वरान् प्राविशन्। परं मृगादयः शष्पाहाराः पशवो रजनिरमण्यङ्कशयनतन्द्राविमुक्ताः विगलितचिन्ताभाराः विहारानन्दानन्वभूवन्। कर्मकराः कृषीवलाश्च स्वस्वकर्मभिनिवेशिनो गृहेभ्यो निश्चक्रमुः। ग्रामाणां नगराणाञ्च देवगृहेषु समुत्थिताः घण्टावादनध्वनयः सर्वत्र प्रासरन्। भक्तजनानां समूहाः देवकृपाकाङ्क्षिणो मन्दिराणि प्रति प्रतस्थिरे।

तस्मिन्नेतादृशे सहृदयजनमनोहरणे रमणीये सुप्रभाते मन्दाकिनीतटसमवस्थितस्य हेमकूटनगरप्रासादस्य सप्तमभूमिकायां छदिषि स्थितो महाराजो राजवाहनः पट्टमहिष्याऽवन्तिसुन्दर्या सह प्रातरुदयतो बालभास्करस्य रमणीयामरुणाभां शोभां निरीक्षमाणोऽनिर्वचनीयेनाऽऽनन्दभरेण समुल्ललास। भगवतीमुषसमनुसरन्तं भास्करं, लोहितद्विपटीं धारयन्तीं प्रमदामनुसरन्तं कामासक्तं प्रणयिनमिवसमालोक्याऽसावनुराग-रञ्जितहृदयो बभूव।

मन्दाकिन्याः निर्मलनीलनीरविशालधारायामगणितजललहरीषु प्रतिबिम्बमानस्य सूर्यस्य मण्डलमगणितसंख्यतामिवोपगतं ददृशे। परमब्रह्माऽपि माययाऽऽवृतमेकं सद् बहुरूपमीयते।

तस्मिन् समये सवितृरश्मिसंस्पर्शेन कमलान्युन्मुद्रितानि कुमुदानि च सम्मुद्रितानि

भवितुमारेभिरे। तरुषु लतासु वल्लरीषु शष्पेषु दूर्वाङ्कुरेषु च पतिताः नीहारबिन्दवः प्रातरुदितभानुकिरणसंस्पर्शादरुणीभूय संस्फुटिताः सप्तवर्णकान्त्या लक्षश आखण्डलधनुः-खण्डानां कान्तिमुद्दीपयामासुः। शनैः शनैः पूर्वदिग्वर्तिभ्यो गिरिशिखरेभ्यः समुद्गच्छन्ती शोणिताभा सर्वतोऽनुरागं विकिरन्ती मध्याकाशं व्याप्नोत्। रमणीयेनाऽनेन प्रकृतिरमणीसौन्दर्येण विमोहिताऽवन्तिसुन्दरी प्रियतमसमक्षं व्योमविहाराभिलाषं प्रास्तौत्।

राजवाहनस्य मानसं नाम मानसगतिकं विमानं सप्तभूमिकप्रासादस्य छदिषि सुरक्षितमवर्तत। "स्वल्पेनैव समयेनाऽऽवां प्रत्यागमिष्याव" इति विचार्य सेवकांश्च तथा संसूच्य राजवाहनोऽवन्तिसुन्दर्या सह वयोमयानमारुह्य पूर्वसमुद्रदिगन्तान् गन्तुमियेष। स्वामिनो मनसोऽभिप्रायमधिगम्य स्वेच्छानुसारगतिकं विमानं त्वरितगत्या दक्षिणपूर्वाभिमुखमुत्पपात। कतिपयेष्वेव क्षणेषु भारतीयसमस्थलभूमिभागानुल्लङ्घ्य पूर्वसमुद्रतीरञ्चोत्तीर्य विमानमिदं सलिलनिधिनीलनीरस्योपर्युड्डयनमारेभे।

व्योमयाने समुपविष्टाववन्तिसुन्दरीराजवाहनौ प्रहरमेकं सलिलनिधेश्चित्ताकर्षक-दृश्यानामवलोकनानन्देन सन्तृप्तमानसौ बभूवतुः। तस्मिन् समये विस्तृतं शान्तं नीरनिधिनीलनीरं रश्मिमालिनोऽरुणरश्मिसमुदयं गृहीत्वाऽरुणाभां प्रकाशयन् प्रकृतिनट्या विशालशयने विस्तारितं रक्ताभनीलप्रावरणमिव प्रतीयाय। तस्य मध्ये क्वचिद् विशालाकारास्तिमिङ्गलमत्स्याः मुखनासिकाभ्यो जलधाराः प्रक्षिपन्तो धारागृहाणीव प्रतिभासन्ते स्म। क्वचिच्च बृहदाकाराः ग्राहाः निश्चलनिश्चेतनकाष्ठस्तम्भा इव तरन्तः समवालोक्यन्त। क्वचित् शुभ्रवर्णाः समुद्रफेनसमूहाः क्वचिच्चाऽरुणवर्णप्रवालानां विशालशृङ्खलाः सन्दीप्यन्ते स्म। क्वचिच्च वातपटयुताः विशालाकाराः पोता इतस्ततस्तरन्तो दरीदृश्यन्ते स्म।

सागरस्योपरि वायुमण्डले परिभ्राम्याऽवन्तिसुन्दरी गृहं प्रत्यावर्तनायाऽभिलाषं प्रकटयामास। स्वामिनोऽभिलाषं विदित्वा व्योमयानं पुनर्हेमकूटं प्रति प्रावर्तत। समुद्रतटोल्लङ्घनमनु निकटमागते महेन्द्रपर्वतभूमिभागे तत्रोपत्यकायामवन्तिसुन्दरी मनोरममाश्रमपदमेकं ददर्श। तया पृष्टो राजवाहनः प्रत्युदतरत् -

"प्रिये ! अत्र महानद्यास्तटे भगवतः परशुरामस्याऽऽश्रमपदं वर्तते। परम्परया विद्यापीठरूपेणाऽस्य प्रसिद्धिः सर्वत्र जगतीतले वर्तते। अत्र विविधविद्यानामध्ययनाय विशेषतो धनुर्वेदस्याऽध्ययनाय विद्यार्थिनः सुदूरप्रदेशेभ्योऽपि समायान्ति। अथ च ऋषयो मुनयश्च तपः साधयन्तः पुण्यानां सञ्चयं कुर्वन्ति।"

कुतूहलेन भक्तिभरेण च समाक्रान्तहृदयाऽवन्तिसुन्दरी मुनेर्दर्शनाय चरणयोश्च प्रणामायेयेष। राजवाहनेन निर्दिष्टं व्योमयानं महेन्द्रपर्वतस्योपत्यकायामवततार।

विमानादवरुह्य दम्पती प्रावण्येन पदातिमार्गेण महानदीतटमभिजग्मतुः। अस्मात् स्थानादाश्रमपर्यन्तं सरलो विततो मार्गः प्रससार।

परन्तु तत्रैव दम्पत्योर्महाभयानकं परिणामे च दुःखावहं स्खलितं बभूव। को जानीते, भविष्यति काऽचिन्तनीया घटना घटिष्यति। परशुरामस्याऽयमाश्रमोऽवर्तत। महातपस्वी परशुरामो जमदग्निपुत्रो विष्णोरवतारत्वेनाऽपि प्रसिद्धो बभूव बाल-ब्रह्मचारी। परिणयस्तु तेन न विहितः। ब्रह्मर्षिः परशुरामो नारीणां दर्शनमपि परिहरति, परिणयस्य तु कथैव का। तेन नियमो निर्धारितः -

"या काचिन्नारी तस्याऽऽश्रमं प्रवेक्ष्यति, तत्कालमेव पाषाणप्रतिमारूपे परिणंस्यति। तस्य सहयात्री पुरुषोऽपि प्रहरानन्तरं कमलरूपमास्थाय महानद्यां पतिष्यति।"

अवन्तिसुन्दरीराजवाहनौ भगवतः परशुरामस्य नियमादपरिचितौ तस्याऽऽश्रमं प्रति प्रस्थितौ। विगतचिन्तौ तौ परस्परं गृहीतहस्तौ स्मितविभूषितवदनौ नयनेष्वेवेक्षमाणौ सुमधुरवार्तालापेषु निमग्नचित्तौ महानदीतटमुपजग्मतुः। तत्र हस्तपादमुखानि सरिन्निर्मलनीरेण प्रक्षाल्य मुहूर्तं विश्रम्य पुनराश्रमपदमभिप्रस्थितौ।

परं किमिदं सञ्जातम् ? आश्रमसीमासु प्रविशन्त्यवन्तिसुन्दरी सहसा पाषाणप्रतिमा बभूव। निर्मलस्फटिकनिर्मितेव सा साक्षाद् विषादस्य सूक्ष्मरेखाभिरिवाङ्किता ददृशे।

घटनामेतां निरीक्ष्य राजवाहनो जडीभूत इव स्थितः। प्राणेभ्योऽपि प्रिया तस्य प्रणयिनी भार्या सहसा स्फटिकमणिनिर्मिता शुभ्रा प्रतिमा सञ्जाता। निश्चलनिष्पन्दाऽपि वदने तथाभूतया उदासकान्त्या सुशोभिता, यथा झटित्येव चेतनामधिगम्य करुणं रुदित्वा नवमालिका रसातलरुमिव प्रियतममालिङ्गिष्यति। नेत्रयोरपि तथाविधा कान्तिरवर्तत।

सहसा सचेतनो भूत्वा राजवाहनः पाषाणप्रमिारूपिणीं प्रणयिनीं भार्यां द्वयोर्भुजयोराबध्य वक्षसाऽऽसज्ज्य तारस्वरेण सकरुणं विललाप। विलापस्य ध्वनयः सर्वासु दिक्षु प्रसरन्तः छात्रानध्यापयतो महर्षेः परशुरामस्य कर्णौ प्रविविशुः।

किमिदं सञ्जातमिति महर्षिः परशुरामो निजासनादुत्थाय छात्रैरनुसृतो राजवाहन-मुपजगाम। मुनिमवलोक्य राजवाहनस्तस्य चरणयोः पतित्वा सकरुणं सगद्गदं रुदन् सकलं वृत्तान्तमकथयत्। दृश्यमिदमवलोक्याऽतिकठोरचेतसोऽपि मुनेर्हृदयं करुणया द्रवीभूतम्। तपःकठिनकर्कशकराभ्यां राजवाहनमुत्थाप्याऽसौ प्रोवाच -

"वत्स ! नारीजनमुखदर्शनं परिहरन्नहं नियममुं निरधारयम् -

"या काचिदपि नारी तपोभुव्यस्मिन् प्रवेक्ष्यति, पदमपि निधास्यति पाषाणप्रतिमारूपे परिणंस्यति। तत्सहचरश्च पुरुषः प्रहरैकानन्तरं रक्तकमलकुसुमं भविष्यति।

ममाऽयं नियमो नाऽन्यथा भवितुमर्हति। तथाऽपि त्वमेको योग्यः प्रजावत्सलः पराक्रमशाली च महीपालः सर्वगुणसम्पन्नो मामभिवादयितुमाश्रममागतः, तव भार्या चाऽपि सर्वथा कलङ्करहिता पवित्रहृदया शुद्धाचरणा महिला वर्तते। अतो दुर्घटनायाः परिहारोपायो मया कथ्यते -

केषुचिदेव क्षणेषु त्वयाऽपि रक्तकमलरूपेण परिणन्तव्यम्। तदाऽहं त्वां महानद्याश्चटुलनिर्मजललहरीषु प्रवाहयिष्यामि। नद्यां तरंस्त्वं सागरमवाप्तोऽत्युत्ताल-तरङ्गेषु वर्षमेकं तरङ्गायिष्यते। तरङ्गास्त्वां कथमपि मामल्लपुरस्य सागरतटं प्रापयिष्यन्ति। अत्र भगवतोर्विष्णोर्विशालमन्दिरं वर्तते। अस्मिन् शेषशायी भगवान् मूर्तिरूपेण वर्तते। भगवतः शेषशायिनो विष्णोर्दर्शनेनाऽऽत्मनः पावयितुं पापविमुक्तये विष्णुलोकाप्तिकामनया च सुदूरभ्योऽपि प्रदेशेभ्यो भक्तजनास्तत्र समागच्छन्ति। पूजनार्चनस्तोत्रगानादिभिस्ते भगवन्तं प्रसाद्याऽभीष्टफलान्यधिगच्छन्ति।

सम्प्राप्ते त्वयि मामल्लपुरसमुद्रतीरमुत्तालतरङ्गाः सागरस्य त्वामुन्नयन्तो भगवतः शेषशायिनश्चरणेभ्योऽर्पयित्वाकृतार्थतां नेष्यन्ति। विष्णुचरणस्पर्शमवाप्य त्वं पूर्वजन्मनो विद्याधररूपं प्राप्स्यसि। ततस्त्वं मधुरस्वरेण स्तोत्रगानैर्भगवन्तमनन्तमाराध्य व्योममार्गगमनविद्यामधिगम्योड्डीयाऽऽश्रमपदमिदमायाहि। ततः शिलारूपेण परिणतां चैनां प्रियां भार्यां द्वाभ्यां भुजाभ्यामालिङ्गने स्थापय। तवाऽऽलिङ्गनस्पर्शमवाप्यैषा तव प्रिया पुरातनं यज्ञवतीरूपं प्राप्य त्वामभिनन्दिष्यति।

महर्षौ परशुरामे कथयत्येवं राजवाहनोऽरुणकमलकुसुमरूपे परिणतो भूम्यां पपात। महर्षिरपि तत्कुसुममुत्थाप्य महानदीनीरे प्रवाहयामास। सरिता प्रवाह्यमानं तत्कमलं पूर्वसमुद्रस्याऽगाधनीलजलराशिषु तरङ्गेष्वान्दोल्यमानं सुदूरं जगाम। जलनिधिरश्मयस्तत् कदाचिदितः कदाचिच्चाऽमुतः प्रक्षिपन्ति स्म। आभ्यन्तरेणाऽन्तःकरणेन सचेतनं परं बाह्यरूपेण चेतनारहितं तदरुणकमलं तरङ्गेषु तरन् वर्षमेकं समुद्रे न्यवसत्।

महाकविना दण्डिना समाख्याता सा मनोरमा विस्मयकरी रुचिरा कथा श्रोतॄणां मनांस्यावर्जयामास। दण्डिनोऽन्तरङ्गमित्राणि तृड्बुभुक्षाविस्मरणप्रवृत्तयः कथारसनिमग्नान्तःकरणाः निद्रामपि परितत्यजुः। तथाऽपि महाकविः प्रतिदिवसं प्रातः नित्यकर्मभ्यो निवृत्तो देव्याः सरस्वत्याश्चरणयोः प्रणम्य स्तोत्रैर्मधुरशास्त्रसङ्गीतसुनिबद्धतन्त्रीस्वन-सङ्गतैस्तामभिवन्द्योपवेशनप्रकोष्ठकं प्रविशति स्म। मित्राण्यपि च कुतूहलौत्सुक्यसम्भृत-मनोभिस्तत्र समागच्छन्ति स्म। आमध्याह्नसमयं दण्डी पूर्वदिवसकथासूत्रमवलम्ब्य शारदाप्रसादादधिगतां राजवाहनचरिताभिव्यञ्जिनीं विधेः पुरुषार्थस्य च माहात्म्यं प्रकटयन्तीं विधिपौरुषीयां कथां श्रावयति स्म। एवञ्च कथां श्रावयतस्तस्य दश

दिनानि व्यतीतानि। एकादशे दिवसे कथामुपसंहरन् कविरेवमुवाच -

वैशाखमासस्य पूर्णिमातिथौ सम्प्राप्तेष्वस्मासु मामल्लपुरं तस्मिन्नेव दिवसे महामुनेः परशुरामस्य शापस्यैकवर्षावधिः सम्पूर्णतां गतः। तस्मिन् समयेऽवलोकयत्स्वेवाऽस्मासु सलिलनिधिनीलनीरोत्तुङ्गरश्मयोऽरुणवर्णकमलकुसुमरूपं राजवाहनमुन्नमयन्तो भगवतः शेषशायिनो विष्णोश्चरणयोः समर्पयामासुः।

प्रभुचरणस्पर्शमवाप्य भगवतोऽनन्तस्य प्रसादेनाऽसौ राजवाहनः पूर्वजन्मनो विद्याधररूपमवाप्य वीणां धारयन् मधुरस्वरेण स्तुतिगीतैर्भगवन्तमनन्तमभ्यर्च्य गगनमार्गेणोड्डीय महर्षेः परशुरामस्याऽऽश्रमं प्रति जगाम। तत्र तस्य प्रिया भार्याऽवन्तिसुन्दरी निर्मलस्फटिकशिलाप्रतिमारूपिणी निश्चला निष्पन्दा भर्तारं प्रतीक्षमाणाऽतिष्ठत्।

वयस्याः ! सम्प्रति महाराजो राजवाहनो विद्याधररूपमवाप्य महर्षेः परशुरामस्य जामदग्न्यस्य तपोवनमाश्रमं गत्वा प्रियप्रणयिनीमवन्तिसुन्दरीं यज्ञवतीरूपेण पुनः परिणतां सङ्गच्छते। महर्षेश्चरणयोः प्रणम्याऽऽशीर्भिरभिषिक्तो यज्ञवत्या सहाऽसौ कुसुमपुरं गत्वा पुरातनीं प्रतिष्ठामधिगम्य सर्वैर्जनैः प्रशस्यते।

साम्प्रतं तेन नियमो निर्धारितो यदसौ षण्मासं कुसुमपुरे निवसन् प्रजापालनरूपं कर्तव्यं निर्वक्ष्यति, षण्मासञ्च हिमालयक्षेत्रे हिमशुभ्रगिरिशिखरश्रेणिपरिवृतायां हेमकूटोपत्यकायां समवस्थिते हेमकूटनगरे पूर्वजन्मपितुश्चित्रभानोः सेवायां समयं यापयन् विद्याधरोचितसुखभोगविलासान् यज्ञवत्या सह भोक्ष्यते। तस्य मित्राणि नव कुमाराः स्वस्वाधिशासितराज्येषु निवसन्तो सुमृदुव्यवहारा अपि सुदृढशासनदण्ड-मवलम्बमानाः प्रजाः पालयन्ति। यथासमयञ्च ते कुसुमपुरमागत्य तत्रत्यान् पौराञ्जानपदांश्चाऽऽनन्दयन्तः परस्परमिलनसुखमधिगच्छन्ति।

# उपसंहारः

महाकविना दण्डिना प्रोक्तमद्भुतवृत्तान्तमिमं निशम्य सर्वे सुहृदोऽन्तरङ्गवयस्याः परमानन्दमनुभवन्तः कथारसस्याऽऽस्वादनञ्चक्रुः। महाकवौ दण्डिनि देव्याः सरस्वत्याः महती कृपा वर्तत इति कविप्रतिभां ते प्रशशंसुः। तेषां हार्दिकोऽनुरोधो बभूव, महाकविना कथैषा काव्यरूपेण निबन्धनीया। दण्डिनाऽपि मित्राणामनुरोधोऽङ्गीकृतः। अथ चाऽवन्तिसुन्दरीराजवाहनवृत्तान्तं काव्यरूपेण निबध्य लोकसमक्षञ्चोपस्थाप्य तेनाऽनन्तमविनश्वरं यशोऽर्जितम्।

विधेश्च पौरुषस्य च द्वयोः संयोगोऽस्मिन् लोके साफल्यहेतुरिति लोकवृत्तमनुभूय डाक्टरोपाधिधारिणा कविना मनीषिणा कृष्णकुमारेण गुरुकुलकांगड़ीविश्वविद्यालये आगराविश्वविद्यालयान्तर्गतमुरादाबादनगरस्थकेदारनाथगिरधारीलालमहाविद्यालये च गुरुजनचरणसेवाऽधीतविद्येन रामप्रियाभूषणशरणतनुजनुषा मुरादाबादनगरगृहीतजन्मना राजकीयोच्चशिक्षासेवायां संस्कृतविभागाध्यक्षपदाद् गढवालविश्वविद्यालयस्थसंस्कृतविभागाध्यक्षपदाच्च सेवानिवृत्तेन मन्दाकिनीसलिलपवित्रीकृतकनखलमृत्तिकासेविना विधिपौरुषीयेयं कथा सहृदयजनमनोविनोदनाय गद्यकाव्यान्तर्गतोपन्यासविधारूपेण निबध्य सहृदयविद्वज्जनसमक्षं प्रस्तुता।

# परिशिष्टाः

प्रथमः परिशिष्टः – सुभाषितानि

द्वितीयः परिशिष्टः – भौगोलिक स्थानानि

तृतीयः परिशिष्टः – कानिचिद् विशिष्टवर्णनानि

चतुर्थः परिशिष्टः – काव्यकर्तुः परिचयः

# प्रथम: परिशिष्ट: - सुभाषितानि

## द्वितीय: परिशिष्ट: – भौगोलिकस्थानानि

### (१) समुद्रद्वीपवनगिरय:



### (२) सरित:

| | |
|---|---|
| पम्पा | शोण |
| भागीरथी | सरस्वती |
| मन्दाकिनी | सिन्धु |
| महानदी | स्वर्णसरित् |
| यमुना | |

## (३) देशाः जनपदाश्च

| | |
|---|---|
| अङ्ग | दक्षिण भारत |
| अवन्ती | नासिक |
| अश्मक | निषध |
| आन्ध्र | बङ्ग |
| आर्यावर्त | भारतवर्ष |
| उत्तरभारत | मगध |
| ऋचीक | महिषक |
| कपिश | मालव |
| कलिङ्ग | मुरल |
| कामरूप | लङ्का |
| कुन्तल | लाट |
| केरल | वनवासिक |
| कोंकण | विदर्भ |
| गान्धार | विदेह |
| गुर्जरदेश | शूरसेन |
| गौड | सुह्म |
| तेलङ्गान | सौराष्ट्र |
| त्रिगर्त | |

## (४) नगराणि ग्रामाश्च

| | |
|---|---|
| अचलपुर | पुष्पपुर |
| अलकापुरी | बलभी |
| अवन्तिपुरी | भुवनेश्वर |
| आनन्दपुर | भोगपुर |

आन्ध्रनगर
उज्जयिनी
कल्याणनगर
काञ्ची
काशी
कुसुमपुर
चम्पा
जगन्नाथपुरी
तक्षशिला
तीरभुक्ति
त्रिगर्त
दामलिप्ता
द्वारिका
नालन्दा
नासिक
पाटलिपुत्र
पुष्करणग्राम
मणिभद्रपुर
मथुरा
मधुमती
मामल्लपुर
माहिष्मती
मिथिला
वाराणसी
विदर्भनगर
विदिशा
विष्णुकाञ्ची
विशाला
शिवकाञ्ची
श्रावस्ती
श्रीपुर
समन्तपुर
स्वर्णपुर

## तृतीयः परिशिष्टः - कानिचिद् विशिष्टवर्णनानि

### (i) षड्ऋतुवर्णनम्

एवञ्च भूमिपाले सपत्नीके सुखविलासानन्दाननुभवत्येव सर्वर्तुनायको वसन्तर्तुरप्याविर्बभूव।

सर्वतो वाटिकासु रसालतरूणामग्रभागाः नवोन्मिषितमञ्जरीभारविनम्रा अनिर्वचनीयोन्मादभरेण सौरभेण दिगन्तरालानप्याप्याययामासुः। मञ्जरीणामास्वादनेनोन्मत्तानां पिकानां मधुरकुहूरुतैर्विरहिणां हृदयेषु सन्धुक्षिताः कामज्वालाः। अथ च तेषां निनादाः रसिकजनकर्णकुहरेषु माधुर्यं प्रच्यावयन्तो विषमव्यवहारं प्रकटयाञ्चक्रिरे। किङ्किरातानोकहेषु विकसितानां कपिलानां पुष्पमञ्जरीणां चयैर्युवतयः कृष्णकुन्तलवेणीः सुशोभयामासुः। शुकतुण्डसमनवपलाशपुष्पगुच्छाः वासन्तिकं सुमनोरमं सौन्दर्यं सुदूरं प्रतिदिशं प्रसारयामासुः। राजमार्गमभितः सुदूरं यावत् प्ररूढा आरग्वधतरवः पीतमञ्जरीराशिं वर्षन्तो वसन्तर्तोः स्वागतसमारोहमिव प्रारेभिरे। मलयमरुतां संस्पर्शमवाप्य प्रणयिजनानां हृदयानि समुच्छ्वसितानि वपूंषि च रोमोद्गमैः कण्टकितानि बभूवुः।

परं विधेर्विलसितानि विचित्राणि। प्रकृतिरामणीयकमसहमानो विधिर्वसन्तं

प्रस्थातुमादिदेश। दिनानां परिणाहः सुदीर्घतां प्राप्ताः। कतिपयेष्वेव दिवसेषु कालक्रमेण रसालमञ्जरीषु जीर्णासु भूमिलुण्ठितासु लघ्वाकाराणि हरिद्वर्णान्यम्बकानि तत्र नयनगोचरीभूतानि। ग्रीष्मर्तुराविर्बभूव। दिनकरस्य प्रचण्डः सन्तापो शनैः शनैः ववृधे। प्रचण्डातपवशाद् ग्रीष्मोष्मणा विह्वलानां जनानां गृहेभ्यो बहिर्गमनमपि सुदुर्भरं बभूव। सरित्सु जलाशयेषु कासारेषु शीतलजलावगाहनानि मनोरमाणि रुचिराणि प्रियतराणि च सञ्जातानि। तटवर्तिषु च भूभागेषु जनानां सम्मर्दाः समवालोक्यन्त। शिरीषकुसुमसमलङ्कृतकर्णपालयो महिलासंहतयः सुगठितसुगौरशरीरा अपि प्रस्वेदबिन्दुनिचयश्यानसकलावयवाः व्याकुलचित्ताः शैत्याभिलाषिण्यो न कथञ्चिदपि निर्वृतिमवापुः। प्रकृतिरपि स्त्रीस्वाभावतया तासां पीडामसहमाना दुःखप्रतीकारायोद्यता बभूव। न सदृशानि भवन्ति दिनानि सर्वत्र सर्वेषां सर्वाणि।

सहसा पूर्वदिगन्तरालेषु श्यामवर्णानां कामिनीकृष्णकुन्तलचयानामिव जीमूतानां पङ्क्तयो दृष्टिगोचराः समभूवन्। समुन्नमद्भिर्मेघैः सघनैः सकलमेव वियन्मण्डलं तरसा समाच्छादितम्। कनकरेखाभ्रान्तिमिव निकषोपलेषु समुत्पादयन्तीनां तडितां श्रेणयस्तडत्तडदिति घनगर्जनेन सार्धं व्योममध्यं क्रकचैरिव चिच्छिदुः। घनानां घनघोरगर्जनैर्विद्युताञ्च चाकचक्यैर्लोकानां कर्णेषु बाधिर्यमिव समुत्पादितम्। मेघदर्शनेन सन्तृप्तनयनाः जलवर्षणेन च सञ्जातमदाः मयूराः नर्तनाय सम्मोदावसरमिव सम्प्राप्य समतलभूमिभागेषु समवेत्य शिखण्डान् प्रासारयन्। मयूरीणां मण्डलाकारासु परिवृतिषु शिखण्डान् प्रासार्य नृत्यतां शिखण्डिनामभिनन्दनं परितो वर्तमानाः कदम्बतरवः सुन्दरीश्रोत्राभूषणयोग्यानि स्वर्णिमपुष्पाणि विकीर्य सम्पादयामासुः। कदाचित् प्रतनुसलिललवान् विकिरन्तः कदाचिच्च धारासारेण सझंझावातं वर्षन्तो मेघाः नतोन्नतविषमसमभूमिभागान् समानिव चक्रिरे। परदुःखकातराः जलदाः वर्षन्तीभिः सुशीतलजलधाराभिः ग्रीष्मर्तोः सकलमेव तापमपाहरन्। ब्रीहिमकायाद्यन्नप्रसवयितॄणि क्षेत्राणि वर्षाजलैराप्यायितानि विधाय मेघाः लोकात् प्रस्थानाय जनानुमतिमिव ययाचिरे। उत्सेकवतीनां सरितां प्रचुरसलिलसम्भृतानाञ्च जलाशयानां विस्ताराः सुङ्कुचिताः। जलेषु मृत्तिकाविमिश्रितेषु शनैः शनैः नैर्मल्यमाविर्बभूव। वर्षर्तुः प्रातिष्ठत।

प्रस्थिते च घनकाले शरदृतुना धरायामवतीर्णम्। स्रोतसां स्रोतस्विनीनां सरसाञ्च सलिलानि प्रतनुत्वमवाप्य निर्मलानि सञ्जातानि। पुष्करिणीषु विकसितानां कुमुदकह्लारेन्दीवरपुण्डरीकतामरसानां विविधवर्णा शोभाऽवलोकयितॄणां नयनान्यानन्द-भरेणाऽऽपूरयामास। केदारभूमिषु धान्यक्षुपानामग्रभागेषु धान्यमञ्जरीषु पीतिमा पदं निदधौ। मन्दमारुतान्दोलिताभिर्मञ्जरीभिः कृषीवलानां हृदयान्यानन्दोल्लासेन प्रपूरितानि। सूर्यसंतापस्य प्रखरत्वं शनैः शनैरल्पत्वं गतमपि न साकल्येन प्रणष्टम्। शरदृतोः

प्राणभूतस्य पूर्णचन्द्रोदयस्य कल्पनाभिरेव सरससहृदयहृदयान्यान्दोलितानि। कौमुदीमहोत्सवस्यायोजने तेषां महोल्लासः सततं प्रवर्धमानो बभूव। पौर्णमास्यां शरदृतुः स्वसाम्राज्यसंहरणसमयमिवाऽनुबभूव। प्रस्थातव्यमेव साम्प्रतमिति। हेमन्तर्तुस्तु तस्मै विकल्पनस्यावसरमपि न प्रायच्छत्। स तु शरदृतुमर्धचन्द्रेणैव प्रकृतिप्राङ्गणाद् बहिरपसार्य स्वसाम्राज्यविस्तारकरणे कृतप्रयासो बभूव।

लोकेऽतितरां कुपित इव हेमन्तर्तुर्भानुप्रतापं सुमन्दितञ्चकार। कमलिनीहरितासु सरसीषु प्रमुदितानि कमलकुमुदानि सूर्योष्मणा विरहितानि विशीर्णानि म्लानतामुपगतानि। हिमशीतलस्तीक्ष्णतरो वायुः प्रखरशैत्येन प्रवहन् जनानां मनांसि वपूंषि च प्रकम्पयामास। ऊर्णावस्त्रधारणाय वह्निसेवनाय गृहाभ्यन्तरेष्वेव च निवासाय ते विवशीबभूवुः। मध्याह्नकालीनोऽपि विवस्वान् नाऽतिसन्तापाय बभूव। प्रातःकालीनैर्नीहारपृषतैः समाच्छादितेषु वनस्पतिषु पतिता उदयतो बालभास्करस्य रश्मयो विभ्राजमानाः विकीर्णाः सप्तस्वेव वर्णेषु विभक्ता अगणितपुरन्दरधनुषां शोभां दधुः। कुन्दक्षुपेषु बकुलपादपेषु च प्रस्फुटिताः स्वल्पाकारा अप्यसंख्यसंख्याः कोरकाः मन्दं मन्दं जहसुः। एतैरुपद्रवैरशान्ता- सन्तुष्टचेताः स हेमन्तर्तुः प्रियं सहायं शिशिरर्तुं निमन्त्रयामास स्वयञ्च विवश इव प्रस्थानाय समुद्यतो बभूव।

समायाते शिशिरर्तौ सुशीतलाः सुतीक्ष्णास्तीव्रगामिनः सुदुःस्पर्शाः समीरणाः प्रावहन्। तेषां स्पर्शमात्रेणैव प्राणिनां त्वचः प्रपुस्फुटिरे। अत्युत्कटहिमगर्भप्रचण्डशीत-स्पर्शासहिष्णवो जनाः गृहाभ्यन्तरेष्वेवाऽनलोष्मभिः स्ववपूंषि सन्तापयन्तो बहिर्गन्तुं नोत्सेहिरे। दिवसकरोऽपि नीहारसंवृत इव शीतभीत इवोदैत्। पूर्वदिक्क्षितिजप्रान्तरेऽसौ विलम्बेनैव स्वकीयारुणवर्णमण्डलमुपर्युत्थाप्य मध्ये व्योम्नि तिर्यग्भावेनैव प्रसरन् मन्दसन्तापं रश्मिचयं प्रसारयन् स्वल्पेनैव समयेन पश्चिमदिक्क्षितिजप्रान्तरेष्वात्मानं न्यमज्जयत्। तरवोऽपि प्रचण्डशैत्यमसहमानाः जीर्णतां प्राप्तानि पत्राणि सत्वरं पातयन्तो निष्पत्रा अभूवन्। परन्तु तस्मिन्नतिप्रचण्डनीहारसम्पाते शैत्यकालेऽपि लोध्रवासन्तीकुन्दादिवनस्पतिष्वनुपमा श्रीः कुसुमानां चकाशे। विकसितानां सुमनसां परागाः सुशीतलैः पवनैः सर्वासु दिक्षु प्रकीर्णाः। परं शिशिरस्य प्रचण्डं गर्वमसहनशीला जगन्माता प्रकृतिः नाऽधिकं सेहे। सुदिनानि दुर्दिनानि च चक्रवत् परिवर्तन्ते। वसन्तर्तुराहूतो निर्दिष्टः - सत्वरं गत्वा विद्राव्य शिशिरर्तुं प्रचण्डशीतपीडितानां प्राणान् रक्ष, दुःखानि चापहर। पृ० २६-२९

## (ii) विष्णुमन्दिरम्

सागरतीरे सन्निविष्टस्य मामल्लपुरस्यास्य विष्णुमन्दिरस्य निर्मितिः कदा सञ्जाता केन वा कारितेति न कोऽपि जानाति। सुविशालां सुविस्तृतां भूमिं समीकृत्य सुपरिष्कृत्य च जलनिधितीरे समुत्तुङ्गशिखरयुतस्य देवमन्दिरस्य भक्तजनविस्मयोत्पादिनी

कुतूहलकारिणी वास्तुकलाऽत्यद्भुताऽवर्तत। भव्ये गर्भगृहे प्रतिमानां शुभ्रहरितताम्रचित्र-विचित्रघटितपाषाणविरचितानां स्थापना गवाक्षाणां द्वाराणां च व्यवस्था तथाविधशिल्पकौशलेन संविहिता, यथा प्रातरुदितस्य रश्मिमालिनो रश्मयः सर्वेष्वेवर्तुषु प्रभोः शेषशायिनः पाषाणशरीरं स्पृष्ट्वा सकलं गर्भगृहमालोकभरेणालोकयन्ति स्म। अकूपारनीलनीरराशिभ्यः समुद्गच्छन्तीनां लहरीणां भङ्गयः शनैरागत्य प्रभोश्चरणस्पर्शं विधाय निवर्तन्ते स्म।

मन्दिरे प्रधानभूता प्रतिमा शेषशायिनो विष्णोरवर्तत। शेषशयने शयानस्य विष्णोश्चरणौ संवाहयन्ती लक्ष्मीश्चापि तत्र प्रतिष्ठिता। जयविजयौ द्वारपालौ मूर्तिरूपिणौ द्वारि तस्थतुः। नारायणस्य नाभ्याः समुद्गते मृणालदण्डे विकसितकमलदलपटलमध्ये सृष्टिस्रष्टा चतुर्भुजो ब्रह्मा ऋग्यजुःसामाथर्वलक्षणांश्चतुरो वेदान् करेषु चतुर्षु धारयन् विराजमानोऽवर्तत। गर्भगृहस्य पश्चिमदिग्वर्तिन्यां भित्तौ सप्तर्षिमण्डलभित्तिचित्राणि समालिखितान्यवर्तन्त। पूर्ववर्तिन्यां भित्तौ स्तुतिगानमुद्रासुशोभमानाः महेन्द्रादयो देवाः, दक्षिणोत्तरवर्तिन्योश्च भित्त्योर्यक्षगन्धर्वविद्याधरसिद्धाप्सरसोऽर्धदेवाश्चित्रिता आसन्। ते सर्वेऽपि परमप्रभुमनन्तं शेषशायिनमुपासमानाः ध्यानावस्थिता अवर्तन्त। यत्र तत्र महर्षीणां भृगुनारदादीनां चित्राण्यविद्यन्त। तस्य महतो देवस्य विष्णोर्वामः करः शिरसोऽधस्तादुपधानरूपो विरचितो दक्षिणश्चाशीर्वादमुद्रयोपर्युद्गतोऽवर्तत। पृ० १९

## (iii) समुदतटवर्णनम्

परिपूर्णमण्डलस्य रजनीकरस्य हिमगर्भितरश्मिभ्यः क्षरन्त्याः कौमुद्या आकर्षणेन गभीरसलिलः सागरोऽपि मदोन्मत्त इवोच्छलन्नासीत्। वेलावृद्धिकरा उच्छलन्तस्तरङ्गाः प्रोद्दामवेगास्तटबन्धं खण्डयितुं पुनः पुनः सवेगं प्रवृत्तनवोत्साहाः पान्थागारस्य देवमन्दिरस्य च भित्तिभिः सुतीक्ष्णं संघट्टनमवाप्य प्रयत्ननिष्फलाः सन्तः सहाहाकारमिव निवर्तमानाः पुनरपि सागरे विलीयन्ते स्म। काञ्चनद्रवार्द्रैरिव शशिरश्मिभिः समुज्ज्वलं गहननीलसलिलनिधेरिदं मनोहारि दृश्यं सुदीर्घकालमनन्यचेताः विस्मृतसकलजगद्व्यापारो दण्डी मन्त्रमुग्ध इवालुलोके।

परं तस्मिन् समये निशीथसमयसूचकः घण्टानादो मन्दिरगर्भगृहात् समुत्थितः। यात्राश्रमपरिश्रान्तोऽपि दण्डी हिमकरकराभिषिक्तरत्नाकरदर्शनसमुत्सुको विगतान्य-कर्तव्यचिन्तोऽर्धरात्रपर्यन्तं निद्राविहीनस्तत्र पादचारेण बभ्राम। परं पदचरणजन्यश्रान्ति-समुद्दीपितां निद्रामनुभवन् स दारुवर्मणा सह पुनः पान्थागारशयनागारमागत्य सुकोमलस्वच्छतूलशय्यामारुह्य गभीरं सुष्वाप।

प्रभाते सूर्योदयात् प्रागेव ब्राह्मे मुहूर्ते दण्डी निद्राभरविमुक्तो भास्करोदयजनितप्रकृति-

सौन्दर्यशोभां पूर्वसमुद्रमध्यगतां दिदृक्षुः सुमन्दमपि पादनिःक्षेपध्वनिं परिहरन्नेकल एव शयनादुत्थाय बहिरागत्य समुद्रतीरमुपाजगाम। सुदूरे पश्चिमक्षितिजप्रान्तभागे महोत्तुङ्गनारिकेलपूगतालतमालतरूणां पृष्ठभागे मातुर्धरित्र्याः क्रोडे क्रीडनलालस इव शशी सततमधोगच्छन् नयनानामगोचरतां शनैः शनैः प्रापद्यत। सूर्योदयात् पूर्ववर्तिनि ईषद्द्युतिप्रभे प्रकाशे सुदूरं विस्तृते प्रशान्तनीलसलिले बङ्गसागरे यत्र तत्र जलजन्तूनां नक्रतिमितिमिङ्गलादीनां सलिलाद् बहिरागमनस्य पुनश्च तत्क्षणमेव तत्रैव निमज्जनस्य मनोरमाणि दृश्यानि तत्र प्रावर्तन्त। वेलावृद्धिसमयावसानत्वात् समुच्छलतः समुद्रजलस्य प्रत्यपसारणभावात् सैकतप्रदेशे शुक्तिशङ्खवराटप्रवालसमुद्रफेनादीनां सामुद्रिकद्रव्याणामनन्ताः सघनराशयो यत्र तत्राऽवाकीर्यन्त।

सहसा सर्वासु दिक्षु सन्तप्तहेमनिभः प्रकाशराशिः प्रससार। पूर्वसमुद्रस्य सुदूरेऽन्तरिक्षप्रान्तभागे सुनीलसलिलमध्यादरुणवर्णया उषसा समुज्ज्वलदीप्तिपरिवृतं वदनमुन्नामितम्। सकलमेव प्रकृतिमण्डलं सुतप्तपिङ्गलकाञ्चनद्रवेणेवोपलिप्तं ददृशे।

पृ० १८

## (iv) सामुद्रिकझंझावातः

सायंसमय आसीत्। सहसा प्राचीदिक्क्षितिजे श्यामवर्णो जलबिन्दुरेको जनैः पोताधिरूढैरग्रे वर्धमानोऽवलोकितः। कतिपयेष्वेव क्षणेषु घोरकृष्णवर्णाः जीमूताः तीक्ष्णप्रभासमुज्ज्वलाभिर्विद्युद्भिर्विदीर्यमाणा इव सकलं गगनतलमाच्छादयामासुः। सुतीक्ष्णाः वातसंघाताः प्रावहन्। सौम्यभावं परित्यज्य जलनिधी रौद्ररूपधारी बभूव। सोच्छ्रायवन्तो भयावहास्तरङ्गसंघाता रोषावेशविवशसमुद्गतफणनीलोरगसमूहा इव प्रसरन्तः पुनरपि पुनः समागत्य पोतेन संघट्टमानाः प्रलयकालीनं दृश्यं जनयामासुः। आमोदमदमत्तानां नृत्यतां नाविकानां भयविकम्पितहृदयानां शरीराणि जडीभूतानि। भीत्यभिभूतचित्तास्ते किंकर्तव्यताविमूढतया चित्रलिखिता इव गतिरहिता अवर्तन्त। अकाले प्रसरद्भिः ससुकठोरगर्जनं स्थूलातिस्थूलबिन्दुयुतघनघोरवर्षणैः संवर्तकावर्तकैरिव जलदैः प्रबलवेगेन संसरद्भिः प्रभञ्जनसंघातैर्गगनभेदकैः सुतीक्ष्णैस्तडत्तडदिति हृदयविदारकैस्तडिच्चयैः प्रचण्डवात्यावेगोच्छालितोत्तालतरङ्गैः कल्पान्तकाल इव समुपस्थापितः। नभसः पतन्तीभिः स्थूलस्थूलधारासारजलधाराभिः सागरतलोच्छलत्स्वच्छन्दविसर्पिरश्मिनिचयैः पोताधिरूढजनप्राणभयोत्पादकैस्तत्र जलौघदृश्यं समुत्पादितम्।

सकलमिदं सृष्ट्यन्तकरं दृश्यमवलोक्य रत्नोद्भवस्य सुवृत्तायाश्चोभयोरपि हृदये भयविकम्पिते बभूव तुः। शरीराङ्गानि प्रभञ्जनाघातनिहताकाशवल्लर्य इव स्पन्दितानि। परन्तु किमपि प्रतिकर्तुमसमर्थौ निरुपायौ तौ तस्यां सङ्कटवेलायां प्रभोः परमात्मन एव सर्वशक्तिमत्तमस्य नामसंस्मरणं चक्रतुः। अधस्तात्तु बङ्गसागरस्य प्रबलशक्तिशालिनीनां प्रलयङ्करीणां लहरीणामाघाता उपरिष्टाच्च धारासारसम्पातजलमयत्वप्रतिपादकं

मेघवर्षणम्। वात्याचक्रप्रहारजर्जरित इव दोलेव लहरीषु संसर्पन् स सुदृढं संघटितोऽपि पोत उपद्रवानेतान् सोढुमसमर्थो बभूव। प्रलयङ्करघनघोरगर्जनकराणां गडगडेति निनादानां चमच्चमेति चमचमायमानानां गगनं क्रकचधाराभिरिव द्विधा छेदिकानां लोचनेषु सुतीक्ष्णज्योतिर्भिश्चमत्कृतिमादधानानां कडकडेति विद्युतां ध्वानानां मध्ये महोत्तालतरङ्गाघातैर्दोलायमानो भयप्रदं चडचडदित्यार्तनादमिव समुच्चारयन् स पोतः खण्डशो विभक्तः। तत्रारूढाः सर्वे च प्राणिनः प्रकुपितसागरसलिलमध्ये निपेतुः सकलञ्च सामग्रीजातं जलसमाधिमध्यमगच्छत्। पृ० ५१

## (v) नारीसौन्दर्यम् (१)

तन्वी कृशा पुष्पशरधनुरिव कमनीया स्वर्णमयीव देहयष्टिः, सघनश्यामलघनघटां तिरस्कुर्वन् कुन्तलनिकरः, अलकराशिमध्यात् परिपूर्णचन्द्रमण्डलमिव दीप्तिमन्मुखमण्डलं, भवभालसुशोभितसमुज्ज्वलशीतरश्मिकलेव कान्तिमान् मूर्धा, चकितहरिणीविलोचने इव चञ्चले नीलकमलनयने, नयनयोरुपरि मन्मथकार्मुकसमे भ्रूलते, किञ्चिद्दीर्घाणिमत्तीक्ष्णाग्रभागा श्वासप्रश्वासराशिभिः सौरभमिव प्रसारयन्ती शुकतुण्डसमा शुभ्रसमुज्ज्वलहीरकमणिजटितलवङ्गविभूषणविभूषिता नासिका, नवविकसितकोकनदपटलसमसुकोमलौ कम्पमानौ पीयूषद्रवपरिप्लुताविवौष्ठौ, तन्मध्याच्च प्रवालराशिराजिजटितमौक्तिकपंक्तिरिव दृश्यमाना दन्तावलिः, ब्राह्ममुहूर्ते नवोदितोषर्वर्णचौरौ सम्भरितौ कपोलौ, पद्मरागमणिजटितकर्णकुण्डलसुभूषिते कर्णपाली, गोलाकारमप्यणिमच्चिबुकं, शुभ्रनीलमौक्तिकैकावलिसमलङ्कृता दीर्घा गोलाकारा तन्वी कम्बुनिभा ग्रीवा, कण्ठाधश्चोभयतः वक्षःसमुद्भवौ पञ्चशराश्रयभूतौ समुन्नतौ शुभ्रकौशेयचोलिकानिबद्धौ चन्द्रहारविभूषितौ कथमपि महता प्रयासेन यौवनोद्दामवेगसंस्तम्भकौ पयोधरौ, चोलिकामपि भेदयन्ताविव तीक्ष्णाग्रौ श्यामिकामिव प्रकटयन्तौ चूचुकौ, सुघटितौ स्मरभारवहनसमर्थौ स्कन्धौ, शेफालिकालतागौरवर्णविटपाविव तनुमांसलौ तरङ्गायमाणौ भुजौ, वक्षोऽधस्तात् सततं तनुतां गच्छन्ती अवसर्पिणी कटिस्तत्रैव सम्मुखमुदरमध्ये विराजमाना गभीरा नाभिः तस्याधस्ताच्च त्रिभुवनवशीकरणसामर्थ्यशालिनी त्रिधावर्तितरज्जुपंक्तिरिव त्रिवली, तदधस्तनप्रदेशे सूक्ष्मनीलकौशेयाधोवसनावरोधकारिणौ सुपुष्टौ सुघटितौ सुविस्तृतौ नितम्बौ, नीलक्षौमाधोवस्त्रान्तर्निहिते अपि वसनसूक्ष्मभावेन नीलाभयुतहेमराशिनिर्मिते इव श्यामलसघनाडम्बरमध्ये तडिन्मालासमे विद्योतमाने पिचिण्डके, इति सौन्दर्यसारतत्त्वैः लोकसृष्टिकरेण वेधसा रूपैकसारसरसा विरचिता सा प्रमदा ब्रह्मणः सृष्टिरचनाकौशलप्रमाणमिवाऽवर्तत। पृ० ७६-७७

## (vi) नारीसौन्दर्यम् (२)

समुज्ज्वलद्दीपशिखालोके कल्पसुन्दरी दीप्तिमत्सौन्दर्येण शुशुभे। ननु विधात्रा

सुपिष्टमौक्तिकविद्रुमश्लक्ष्णचूर्णसम्मिश्रणेन तद् वपुर्विरचितम्। सुविस्तृतं कनकचम्पकद्युति भालपट्टं, सरोवरनिर्मलसलिलनीलाभे कर्णान्तविस्तृते विलोचने, सुतीक्ष्णे कज्जलनिभे नेत्रप्रान्ते, सुदीर्घा शुकतुण्डतीक्ष्णाग्रा नासिका, यौवनमदारुणौ कपोलौ, बिम्बफललोहितौ दशनच्छदौ, कार्मुकाकारौ भ्रुवौ, सुदीर्घनीलश्लक्ष्णा मेघाडम्बरसदृशी कुन्तलपङ्क्तिः, कम्बुनिभः कण्ठस्ततश्च मन्मथस्वागतस्थापितमङ्गलद्वारकनककलशाविव समुन्नतौ पयोधरौ, लोहितकुसुमगुच्छावृतकिङ्किराततरुविटपानुकारिणौ मृदुलौ दीर्घौ भुजौ, मुष्टिग्राह्या कटिस्तत्र विभूषिता त्रिवली, चित्तनिमज्जनक्षमा गभीरा नाभिः,सूक्ष्मकौशेय-वसनावृतमपि सुघटितप्रमाणाभिव्यञ्जकं श्रोणियुगलं, सुदीप्ताङ्गारनिभे पिचण्डिके, कोकदलपटलनिर्मितमिव चरणयुगलमिति मन्मथपञ्चशरक्षेपणकार्मुककाञ्चनयष्टि-कामिव तामवलोक्य मम मनोऽन्तःकरणं सबाह्यकरणं कामाग्निना सन्तप्तम्।

पृ० १९५-१९६

## (vii) सरोवर्णनम्

सहसैव ताभ्यां पथतटवर्ती स्वच्छनीलसलिलसम्पूर्णो नातिबृहन्नातिस्वल्पायामो पद्माकरोऽवलोकितः। पुण्डरीकेन्दीवरकोकनदकैरवकुमुदादिजलजपुष्पाभरणं मध्ये मध्ये हरितशैवालाच्छादितं हंससारसक्रौञ्चकादम्बवटकजलकाकादिसलिलवयोनिनादितं तं कासारमवलोक्य पथि श्रमविनोदनाभिलाषौ तटवर्तिशिलाखण्डमुपस्थाय तृट्क्षामकण्ठौ तावञ्जलिभ्यामेव जलसंघुटकानि पातुमारेभाते।

अथ प्रशमितायां पिपासायां पद्माकरसौन्दर्यावलोकनेन हृतहृदयौ परमपरमात्मनः सृष्टयुत्पत्तिपालनप्रलयकारिणो जगत्सर्जनकौशलदर्शने नाभिभूतचित्तावभवाताम्। तैरवलोकितम् -

“जलचरपतत्रिणस्तु कदाचिन्नीलनिर्मलसलिले तरन्ति, कदाचित् सुविस्तृते सुनीलनिर्मलव्योम्नि पक्षान् प्रसारयन्त उत्पतन्ति कदाचिच्च भूमावेव खाद्यभूतान् कृमीनन्विषन्तो विचरन्ति। केचन जलपक्षिणो यौवनमदोन्मत्तचेतसो मधुरकलरव-क्रेङ्कारनिनादैर्वायुमण्डलं निनादयन्तः प्रेयसीरनुधावन्ति। निर्मलगभीरपारदर्शिनीरे सर्वतस्तरन्तो विविधवर्णकर्बुरचित्रविचित्राः स्वल्पाकाराः मत्स्याः सुतनुतरङ्गान् समुत्पादयन्ति। परितस्तु वनप्रान्तरेषु मधुसमयप्रभावविकसितपुष्पाः लोहितकिसलयसमा-च्छादिताः लताः सम्प्रत्यपि निकटस्थितवनतरुस्कन्धाश्रयेणाऽऽरोहन्त्यः शाखाबाहुभि-स्तानाश्लिष्यन्त्यः सुविकसितसुममुखैश्चुचुम्बिषया परितः सरन्ति। प्रकृतिजनन्या विसृष्टेऽपि वसन्ततौं समागते चाऽपि तपर्तौ पर्यावरणं तत्र वासन्तिकसुषुमया परिवेष्टितं बभूव।　　पृ० ७४

## (viii) कन्दुकनृत्यम्

द्वयोः करयोः कन्दुकमुत्थाप्य मन्दिरद्वारमध्यगतदृष्टिमापन्नां दुर्गाप्रतिमामभिलक्ष्य सविशेषनृत्यमुद्रया भगवतीं प्रणम्य सा कन्दुकनृत्याभिनयं प्रारेभे।

प्रथमं तावत् कन्दुकावती दक्षिणेन करेण कन्दुकमुच्चिक्षेप। तदनन्तरं भुवि पतितमुपर्युच्छलन्तं कन्दुकं कदाचिद् दक्षिणेन कदाचिच्च वामेन करेण भूमाववपातयन्ती तथैव पौनःपुन्येन निपातयन्ती प्रोत्क्षिपन्ती रङ्गपीठे त्वरितगत्या वर्तुलाकारं बभ्राम। क्रमशस्तस्या उत्क्षेपणावक्षेपणभ्रमणगतिः ववृधे। तदनन्तरं सा रङ्गपीठमध्यभागमागम्य द्वयोः करयोरङ्गुष्ठौ किञ्चिदिव व्यावृत्य कोमलाङ्गुलिसमूहं प्रसार्योपर्येव कन्दुकं मालाकारेण तथा भ्रामयामास यथा एक एव कन्दुकोऽगणितसंङ्ख्यको ददृशे। अथ कदाचित्तं कन्दुकं मन्दैः कदाचिच्च मध्यमैः कदाचिच्च द्रुतैर्निर्दयप्रहारैस्ताडयन्ती निपातयन्ती प्रोत्थापयन्ती सा विविधगतिप्रचारान् प्रादर्शयत्। सभामण्डपे दर्शकदीर्घायां स्थिताः सर्वे दर्शकाः राजनन्दिन्याः नृत्यकौशलमभिलक्ष्य स्तम्भिता इव विस्मयाभिभूता इव निश्चला अवर्तन्त।

परं मह्यं तु सा राजनन्दिनी देवताप्रसादाद् भुवि समवतीर्णा दिव्याङ्गनेव मे हृदयेनैव क्रीडन्ती प्रतीयाय न तु कन्दुकेन। कन्दुके निपातितानां तस्या कृशाङ्ग्याः हस्तप्रहाराणां माध्यमेन कामदेवो मेऽङ्गेष्वेव प्रजहार।

कन्दुकनृत्यसंलग्नचित्ता सा राजकन्या स्वात्मनोऽपि विसस्मार। मनसो वपुषश्चाधिकारोऽपि तस्याः नाऽवशिष्टः। केशाः विकीर्णाः, आभरणानि स्वस्थानेभ्यो विचलितानि, भालात् कपोलाभ्याञ्च स्वेदजलधाराः प्रावहन्, श्वासः प्रमाणाधिको बभूव। वक्षस उत्पतनभावेन तत्र धारितो मुक्ताहारः सततमवपतन्निव प्रतिभाति स्म। तदनन्तरं रभसा नृत्यन्त्यास्तस्याः नृत्यगतिस्तीव्रा, तीव्रतरा तीव्रतमा च सञ्जाता। सकलो रङ्गपीठो रक्तवर्णैः कन्दुकैरसङ्ख्यताङ्गतैः राजसुतागतिभिश्च संभृतोऽवालोक्यत। घटिकाद्वयं कन्दुंकनृत्याभिनयं सम्पाद्य राजसुता व्यरमत्। पृ० २४६-२४७

## (ix) युद्धवर्णनम्

रिपूणामुज्जयिनीनिवासिनां समरसम्बद्धतामवलोक्य राजवाहनेनाऽपि स्वकीयाभियानस्य सम्यग् व्यवस्थितयोजना निर्धारिता। प्रथमं तावन्नगरप्राकारपरिखातः हस्तशतान्तरालेन प्रांशुसुदृढवितर्दिकानां निर्मितिः कारिता। तासु शतघ्नीनामिषुप्रक्षेपणयन्त्राणाञ्च सुस्थिरं निवेशनं विहितम्। अथ शतघ्नीभ्यः प्रक्षिप्तैर्लोहगोलकैः प्राकारशिखराणि विच्छिद्य तद्व्यवधानस्थितानामवन्तिसैनिकानां सम्पेषणं प्रारब्धम्। केचन वीराः विकलाङ्गीभूय परिखायां पतिताः, केचन भित्तिपृष्ठभागेऽधःस्खलिताः।

केचन विततभित्तिपृष्ठप्रदेशे विच्युताः पञ्चत्वङ्गताः। शेषाश्च प्राणान् रक्षन्तः सोपानमार्गेणाऽधोऽवतीर्य पलायनञ्चक्रिरे। तस्मिन्नेव समये शतघ्नीभ्यो निर्मुक्ताः केचनाऽयोगोलकाः प्राकारमुल्लङ्घ्य नगरभवनानि भिन्दन्तो विनाशलीलां प्रारभन्त।

इषुप्रक्षेपणचन्त्रेभ्योऽपि प्रक्षिप्तैरग्निबाणैर्नगर्यामुज्जयिन्यां स्थाने स्थाने दहनलीला समुपस्थिता कृता। तत्र हनूमत्कृतं लङ्कादहनदृश्यं समदृश्यत।

प्राकारभित्त्यन्तरालवर्तिभिर्दर्पसारभटैरपि धनुर्धारिभिराकर्णान्ताकृष्टकार्मुकेभ्यस्तीक्ष्णाग्रशरवर्षणं प्रारब्धम्। परन्तु मागधसैन्यसञ्चालिताभ्यः शतघ्नीभ्यः प्रक्षिप्तैरयोगोलकैरिषुक्षेपणयन्त्रेभ्यश्च प्रहितैरग्निबाणैराहतानां तेषां गतिः शीघ्रमेवाऽवरुद्धा। प्राकारान्तरालेभ्यः प्रक्षिप्तानां शराणामुपद्रवे किञ्चित् प्रशान्ततां गते राजवाहनसैन्यस्य सुप्रशिक्षितश्रमिकाः लोहगोलकानां छायासूज्जयिन्याः प्राकारस्य पूर्वदिग्द्वारसमक्षं परिखां मृदुपलपाषाणखण्डैः सम्पूरयितुं समायाताः।

कुशलाः शिल्पिनः शिप्रासरितः परिखायां प्रवहन्तं सलिलप्रवाहं प्रतिबबन्धुः। पूर्वदिग्द्वारे सम्पूरितायां परिखायामावागमनमार्गः परिष्कृतो बभूव। गजसेनाध्यक्षेण द्वारभञ्जने प्रशिक्षिताः गजाः भालपट्टेषु लोहमयस्थूलावरणबद्धशिरस्त्राणाः गोपुरक- वादानां भेदनाय प्रहिताः।

उज्जयिन्याः मध्यभागे समवस्थितस्य सप्तभूमिकराजप्रासादस्य छदिषि मालवाधिपेन दर्पसारेण नियुक्ताः कर्मणि कुशलाः यान्त्रिका अवर्तन्त। दूरवीक्षणयन्त्राणां साहाय्येन ते राजवाहनस्य सकलं युद्धकौशलं पश्यन्ति स्म। तेन घटनाचक्रेण ते महाराजदर्पसारं सूचयामासुः।

दर्पसारेणाऽपि विदितम् –

"स्वल्पेन समयेन राजवाहनोऽयं मगधेशकुमारो गोपुरद्वारं भङ्क्त्वा ससैन्यं राजधानीं प्रवेक्ष्यति। असौ वीरोचितं व्यवहर्तुमियेष। कार्यं वा साधयेयं देहं वा पातयेयमिति युद्धाय कृतनिश्चयः पराजयावमानात् स्वर्गगमनमेव श्रेयो मन्यमानोऽवशिष्टान् वीरयोद्धॄन् सोत्साहान् विधाय सैनिकान् चतुर्षु भागेषु विभज्य व्यूहं पर्यकल्पयत्। एकस्य विभागस्य स्वयं नेतृत्वं कुर्वन् त्रयाणामन्येषां विभागानां नायकत्वं परमविश्वासपात्रेषु वीरसेनापतिषु निदधौ।

राज्ञो दर्पसारस्याऽऽदेशेन गोपुरद्वाराणां कपाटाः समुद्घाटिताः। परिखाया उपरि सेतूनामाधाराः पुनः पातिताः। चतसृषु दिक्षु दर्पसारस्य वाहिन्यः प्राकाराद् बहिर्निर्गत्य परिखामुल्लङ्घ्य राजवाहनसैनिकेषु परापतन्। दर्पसारराजवाहनसैन्ययोर्विजयाकाङ्क्षिण्योर्मध्ये सर्वप्राणिभयङ्करः घोरः सङ्गरः परस्परं प्रावर्तत। स्वल्पेन समयेन रणक्षेत्रे निहतानां भटानां शवैः सा भूमिर्निचिता बभूव। प्रवहन्तीषु रुधिरवसामांसजनितकर्दमेषु गजानामश्वानां पदातीनाञ्च पादानामंशाः पदे पदे प्रचस्खलुः।

दर्पसारस्य सेनास्वश्वारोहिणां पदातिसैनिकानाञ्च प्राचुर्यमवर्तत। हयानां खुरन्यासैः पदातिभटानाञ्च पादतलविक्षेपैर्विलिखिताभिरुपरिष्टाच्च समुत्पतन्तीभिर्धूलिभिर्नभो धूसरितं बभूव। परन्तु सपद्येव गजानामश्वानां पदातिभटानाञ्च क्षतविक्षतशरीरेभ्यः प्रवहन्तीभिः शोणशोणितधाराभिस्ताः धूलिराशयः प्रशान्ताः।

निहतानां वीराणां गजानामश्वानाञ्च कलेवराणि रणक्षेत्रे सर्वतः समदृश्यन्त। शस्त्रैर्विच्छिन्नान्यङ्गानि यत्र तत्र विप्रकीर्णान्यासन्। रुधिरकर्दमेषु प्रस्खलन्तो युद्धरताः सैनिकाः यत्र तत्र समपतन्। मृतानां क्षतविक्षतानाञ्च सैनिकानां करेभ्यो विच्युतानामायुधानाञ्चयास्तत्र राशीभूताः। असिगदातोमरपट्टिशकुन्तप्रासबाणादयः सर्वत्र व्यकीर्यन्त। युद्धोन्मत्तानां भटानां जयघोषणानां व्रणितानामार्तनादानां हयानां ह्रेषाध्वनीनां करिणाञ्च बृंहितानां कोलाहलाः गगनमपि भेदयन्तः सर्वत्र दिशां प्रान्तराणि व्याप्नुवन्।

कुमारस्य राजवाहनस्य मन्त्रिपुत्राणाञ्च विश्रुतादीनां नायकत्वे मागधसैन्यभटाः लोमहर्षणशौर्यं प्रदर्शयन्तो यमकिङ्करा इव रिपुभटान् यमलोकं प्रापयन्ति स्म। उज्जयिन्याः पूर्वदिग्द्वारे राजवाहनः सोमदत्तेन सह समुपस्थितो बभूव। पश्चिमदिग्द्वारे चाऽर्थपालप्रमतिविश्रुताः भीषणाक्रमणैः शत्रुभटानां वधव्यापारं सम्पादयन्ति स्म।

स्वल्पेन समयेन शत्रुसैन्यानां प्रतिरोधोऽवसितः। बहवो मालवीयाः भटाः यमलोकस्य प्राघुणिकाः बभूवुः। केचन विकलाङ्गाः क्षताः वा समराङ्गणे पतिताः। अन्ये प्राणान् परिरक्षन्तः कान्दिशीकाः बभूवुः। अवशिष्टाश्च मागधवीरैर्बन्दीकृताः। पराजयमङ्गीकुर्वन्तस्ते तदाऽऽत्मसमर्पणञ्चक्रुः।

मालवनाथो दर्पसारः पूर्वदिग्द्वाराद् युद्धाय बहिरागत्य राजवाहनमाचक्राम। मगधेशकुमारो राजवाहनोऽपि साक्षात् काल इव तमवरोद्धुं समुपस्थितो बभूव। युद्धाय परमोत्सुकयोः पुरुषप्राप्यपृष्ठौ चक्राकारभ्रूलतालाञ्छितभालपट्टौ शुभ्रवर्णौ सिन्धुदेशोद्भवौ तुरङ्गमावारूढयोः राजवाहनदर्पसारयोर्भीषणं लोमहर्षणञ्चाऽन्योन्यं द्वन्द्वयुद्धं प्रारेभे। दन्तयोरेव खलीनावलम्बमानयोर्दक्षिणकरयोस्तीक्ष्णधारदीर्घचन्द्रहासधारिणोर्दक्षिणेतरकरयोश्च चर्मफलकधारिणोस्तयोर्महाभीषणं समरसाम्मुख्यं समजायत। चन्द्रहासप्रहारैः रिपुक्षयमिच्छद्भ्यां चर्मफलकाभ्याञ्च खड्गप्रहारानवरुन्धद्भ्यां ताभ्यां कृतोऽसौ सङ्गरः द्युस्थानीयैर्देवैर्देवाङ्गनाभिश्च सकौतुकं सस्पृहं सप्रशंसनं सपुष्पवर्षणञ्चाऽवलोकितः।

राजवाहनस्य युद्धदाक्ष्यं वा शस्त्रसञ्चालनकौशलं वा भाग्यं वा विधेरानुकूल्यं वा प्रबलतरमासीत्। मुहूर्तेन तस्य चन्द्रहासस्य प्रचण्डाघातैर्दर्पसारस्य चर्मफलकं द्विधा विभज्य समरभुवि पतितम्। अन्येन प्रहारेण तस्य चन्द्रहासोऽपि द्विधा छिन्नः। आघातमेनमसहमानो मालवाधिपतिर्दर्पसारो भूतलेऽच्योतिष्ट। तस्य वाहनभूतोऽश्वोऽपि चमत्कृत्य भीतः स्वामिनमुत्सृज्य पलायितः। पृ० ३३४-३३६

# चतुर्थः परिशिष्टः

## काव्यकर्तुः परिचयः

**जन्मतिथिः**- १० फरवरी १९२५

**जन्मस्थानम्**- पश्चिमोत्तरप्रदेशस्य मुरादाबादनगरम्

### पारिवारिक पृष्ठभूमिः-

काव्यकर्तुः पितृचरणानां श्रीभूषणशरणमहोदयानां मुरादाबादनगरवास्तव्यानां गणना नगरस्याऽतिसमृद्धसफलव्यापारिवर्गेऽवर्तत। भारतीयस्वातंत्र्यान्दोलनेतिहासेऽसौ प्रसिद्धो महनीयरूपेणाऽगण्यत। आङ्‌ग्लशासनजनितपराधीनतापीडामसहमानोऽसौ कृष्णमन्दिरं कारागृहमपि स्वप्रवेशेनाऽलञ्चकार। काव्यकर्तुः जननी श्रीमती रामप्यारी धार्मिक-वृत्तिधारिणी कुशलगृहिणी समवर्तत। पञ्च पुत्रान् कृष्णकुमारब्रजकुमाररामकुमार-विनोदकुमाररमेशकुमारान् द्वे च सुते कृष्णाकुमारीं राजकुमारीं च प्रसूय सा धन्यतमा जननी पतिव्रता गृहस्थधर्मपालनरता बभूव। श्री भूषणशरणमहोदयाः स्वजीवनकाल एव स्वतन्त्रतासूर्यालोकप्रकाशितां भारतभुवमवलोक्य प्रसादातिशयेन विकसितहृदयपुण्डरीकाः १९४८ तमे ख्रीष्टाब्दे भगवता समाहूताः स्वर्गलोकयात्रामङ्गीचक्रिरे।

१९४६ तमे ख्रीष्टाब्दे डा० कृष्णकुमारमहोदयो बीसलपुरनिवासिनीं प्रह्लादस्वरूप-तनूजां वैदर्भीमिव दमयन्तीं परिणीय गृहस्थधर्मपालनरतो बभूव। सा पावनी जननी हिमानीनिर्मलसलिलप्रवाहानिव त्रीन् सुतान् सर्वविधगुणसुभूषितान् प्रदीपालोकमयङ्क-कुमारानेकाञ्च गौरवान्वितां सुतां मञ्जुलां प्रसुषुवे।

### शिक्षा-

राष्ट्रीयस्वतन्त्रतान्दोलनासक्तचित्तो राष्ट्रीयविचारधारासमलङ्कृतहृदयो भूषण-शरणमहोदयः स्वपुत्रं आङ्‌ग्लशिक्षाध्ययनपरिवर्जितमानसमायुषो सप्तमे वर्ष उपगङ्गं गुरुकुलकाङ्गडीविश्वविद्यालयेऽध्ययनाय १९३१ तमे ख्रीष्टाब्दे प्रवेशयामास। चतुर्दश-वर्षावधिसमयं यावद् विद्यामधीत्याऽसौ तरुणावस्थां प्रपन्नः कृष्णकुमार आयुर्वेदालंकार-प्रमाणपत्रमधिगम्य गुरुकुलकांगड़ीविश्वविद्यालयस्य स्नातकपदमभूषयत्। तदनन्तरमसौ आगराविश्वविद्यालयाद् एम.ए. (संस्कृत) इत्युपाधिं सम्प्राप्य पी-एच.डी. इत्युपाधि-मप्यधिगतवान्। तदनन्तरं वाराणसीस्थसंस्कृतविश्वविद्यालयाद् आचार्य (साहित्य) पदवीं लब्ध्वाऽसौ प्रखरप्रतिभान्वितोऽध्ययनशीलो विद्यार्थी पुण्यभूमिकेदारखण्डस्थश्रीनगरे प्रतिष्ठापितेन गढ़वालविश्वविद्यालयेन डी.लिट. इत्युपाधिनाऽपि सप्रतिष्ठं विभूषितः।

### अध्यापनम्-

स्वकुलजननीसेवासंलग्नमानसोऽसौ कृष्णकुमारः प्रथमं तावद् गुरुकुलविश्व-

विद्यालयेऽध्यापनकार्यं स्वीचकार। तदनन्तरं मुजफ्फरनगरस्थसनातनधर्मस्नातकोत्तर-महाविद्यालयेऽध्यापनकार्यं निर्वाह्य विभिन्नेषु उत्तरप्रदेशस्थराजकीयस्नातकोत्तरमहाविद्यालयेषु प्रायशः देवतात्महिमालयनगाधिराजक्रोडसमवस्थितेषु संस्कृतविभागाध्यक्षपदमलंकुर्वाणः श्रीनगरे नवस्थापितगढवालविश्वविद्यालये संस्कृतविभागाध्यक्षपदमङ्गीचकार। बहुतिथं यावत् सम्मानं समुपलभ्य विद्यार्थिनां स्नेहादरपात्रतां गतोऽसावेकत्रिंशद्वर्षपर्यन्तमध्यापनकार्य निर्वाह्य १९८५ तमे खीष्टाब्दे सेवानिवृत्तो बभूव। तदनन्तरं गङ्गातीरमेव बहु मन्यमानः सर्वकलुषप्रक्षालनसमर्थे पुराणेषु प्रसिद्धे कनखलनगरे जीवनयात्रानिर्वहणाभिलाषी निवासमभिललाष।

## शोधकार्याणि-

डा० कृष्णकुमारमहोदयेन बहूनि शोधकार्याणि विश्वविद्यालयानुदानायोगसहायतयाऽन्यासां च संस्थानां सहयोगेन स्वयं चाऽपि महताऽध्यवसायेन प्रपूरितानि। तेषां च कानिचिदधो लक्ष्यन्ते-

केदारखण्डपुराणस्य सम्पादनमनुवादो विवेचनात्मकमध्ययनञ्च
संस्कृतरूपकेषु जन्तूनां वनस्पतीनाञ्च स्थितिः
प्राचीनभारतस्य सांस्कृतिक इतिहासः
गढवालजनपदस्य प्राचीना अभिलेखाः
प्राचीनभारतस्य राजनीतिकप्रशासनिकसंस्थाः
प्राचीनभारतस्य शिक्षा-पद्धतिः

## शोधनिर्देशनम्-

डा० कृष्णकुमारस्य निर्देशने पञ्चाशदधिकछात्रैः शोधकार्याणि सम्पाद्य विभिन्नेभ्यो विश्वविद्यालयेभ्यः शोध-उपाधयः सम्प्राप्ताः।

## ग्रन्थलेखनम्-

डा० कृष्णकुमारेण विरचिता लिखिताश्च पञ्चाशदधिकग्रन्थाः वर्तन्ते। विषयानुसारं तेषां नामान्यधो निर्दिश्यन्ते-

### प्राचीन भारतीय संस्कृतिरितिहासश्च

(१) भारतीय संस्कृति के आधार तत्त्व
(२) वैदिक साहित्य का इतिहास
(३) संस्कृत साहित्य का इतिहास
(४) गढ़वाल के प्रमुख तीर्थ
(५) गढ़वाल के संस्कृत अभिलेख
(६) गढ़वाल के प्राचीन अभिलेख और उनका ऐतिहासिक महत्त्व
(७) प्राचीन भारत का सांस्कृतिक इतिहास
(८) प्राचीन भारत की राजनीतिक एवं प्रशासनिक संस्थायें

**समालोचनात्मकग्रन्थाः**

(९) पं० अम्बिकादत्त व्यास - एक अध्ययन
(१०) संस्कृतं-नाटक-सूक्ति-तरङ्गिणी
(११) संस्कृत नाटकों का भौगोलिक परिवेश
(१२) संस्कृत नाटकों का जीव-जगत्
(१३) संस्कृत नाटकों का वानस्पतिक पर्यावरण

**अलङ्कारशास्त्रीयग्रन्थाः**

(१४) अलङ्कारशास्त्र का इतिहास
(१५) ध्वन्यालोक व्याख्या
(१६) छन्दोऽलंकारप्रकाश

**वैदिकसाहित्यम्**

(१७) वैदिकसाहित्य का इतिहास
(१८) ऋक्सूक्तसंग्रह
(१९) ऋक्सूक्तसुधाकर
(२०) चतुर्वेद-सूक्त-सुधाकर
(२१) वैदिकसूक्तसंग्रह

**काव्य-व्याख्या ग्रन्थाः**

(२२) अभिज्ञानशाकुन्तलम्
(२३) प्रियदर्शिका नाटिका
(२४) प्रतिमानाटक
(२५) रघुवंशम्
(२६) किरातार्जुनीयम्
(२७) शिवराजविजयः
(२८) कुसुमलक्ष्मी
(२९) कुन्दमाला
(३०) हर्षचरितम्

**काव्यानुवादाः**

(३१) मेघदूतानुशीलनम्
(३२) चौरपञ्चाशिका

**ग्रन्थविवरणी**

(३३) Descriptive Catalogue of Sanskrit Manuscripts Part I
(३४) Descriptive Catalogue of Sanskrit Manuscripts Part II

(३५) Descriptive Catalogue of Sanskrit Manuscripts Part III

पुराणानि

(३६) केदारखण्डपुराणम् - सम्पादनमनुवादो विवेचनात्मकमध्ययनञ्च (चार खण्डों में)

**मौलिकसंस्कृतकाव्यप्रणयनम्**

(३७) उदयनचरितम् (संस्कृतोपन्यासः)

(३८) अस्ति कश्चिद् वागर्थीयम् (संस्कृत नाटकम्)

(३९) तपोवनवासिनी (संस्कृतोपन्यासः)

(४०) विधिपौरुषम् (संस्कृतोपन्यासः)

**कथा साहित्य (हिन्दी)**

(४१) प्राचीन कथायें

(४२) तपोवनवासिनी

(४३) भाग्य और पुरुषार्थ



**चिकित्साग्रन्थाः**

(४४) विषविज्ञान

(४५) पोषण के लिये विटामिन और खनिज

(४६) अन्तःस्रावी ग्रन्थियां

**प्रकाशनार्थं पाण्डुलिपयः**

(४७) बाल्मीकिरामायणम् (सम्पादनमनुवादश्च)

(४८) केदारखण्डप्रदेशस्य तीर्थयात्रा तीर्थस्थलानि च

(४९) प्राचीन भारत की न्याय-व्यवस्था

(५०) काव्यशास्त्रविमर्शः

(५१) प्राचीन भारत की शिक्षा-पद्धति

(५३) वत्सराज उदयन

एतदतिरिक्तं काव्यकारस्य वा सम्पादकस्य वा समालोचकस्य वा काव्यव्याख्यातुर्वा डा० कृष्णकुमारस्य बहवो निबन्धाः शोधलेखाः वा विभिन्नासु पत्रिकासु प्रकाशिताः समभूवन्, आकाशवाणीकेन्द्रेभ्यश्च वार्ता अपि प्रसारं प्राप्ताः।

सेवानिवृत्त्यनन्तरमधुनाऽप्यस्यां वृद्धावस्थायां डा० कृष्णकुमारमहोदयः सततं सरस्वतीसाधनायामेव दिवानिशं संलग्नो दृश्यते।

---